राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला - २२६
पारम्परिकशास्त्रसमुत्कर्षग्रन्थमाला - ६४
स्वर्णजयन्तीग्रन्थमाला - २३

श्रीशुद्धसत्त्वं रामानुजाचार्यैः कृतं

# रहस्यत्रयमीमांसाभाष्यम्

( द्वितीयभागः)

प्रधानसम्पादकः
आचार्यः हरेकृष्णशतपथी
कुलपतिः

सम्पादकः
आचार्यः तट्टा विजयराघवाचार्यः

राष्ट्रियसंस्कृतविद्यापीठम्
(विश्वविद्यालयानुदानायोगस्य १९५६ धारायास्तृतीयानुभागेन स्थापितः विश्वविद्यालयः)
तिरुपतिः - ५१७ ०६४ (आन्ध्रप्रदेशः)
२०१०

## ABOUT THE BOOK

The inclination for Spirituality and desire for Salvation is a result of divine grace, the meritorious acts of one's previous lives which is strengthened with the preaching and guidance of Acharyas, the spiritual masters. There are three important matters, or Secrets, that a Seeker of Salvation should know. the first one is the Aṣṭākṣarīmantra, the second one is the Dvaya Mantra and the third one is the Carama Śloka. These three secrets, or Rahasya traya, as they are called, along with other secrets as mentioned in the tradition are collected by Pillai Lokacharya in a work called Aṣṭādaśarahasyaṅgala (The Eighteen Secrets). Mumukṣuppaḍi is an explanatory work on Rahasyatraya, for which Suddhasatvam Ramanujacharya has written a commentary by name Rahasyatraya-mīmāṃsābhāṣyam. In this commentary the explanation of Aṣṭākṣarī Mantra only is given. The philosophical concepts of Sri Vaishnava Tradition of Ramajuja are well explained in this Bhāṣya.

Proper understanding of the Aṣṭākṣarī Mantra is fundamental for knowing the nature of the Self. The Mantra explains the nature, the end and means of Self. For the Supreme Self, i.e., the Lord, who is omniscient, Omnipresent, the individual self is the Śeṣabhūta. I cannot protect myself, I am the servant to the Supreme Lord, who is none other than Nārāyaṇa. The word Nārāyaṇa is explained as follows: Nara means that which is imperishable. Hence Nārāyaṇa is one who is imperishable. The devotee believes that I am not able to protect myself, and am solely dependant on Nārāyaṇa for my protection. I being a servant of the Lord is saved by Him. The sentences of the Itihasa, Purāṇa and those of the Divyaprbandha are shown as an authority to substantiate this point.

Rashtriya Sanskrit Vidyapeetha Publication Series : 226
Centre of Excellence Publication Series : 64
Golden Jubilee Publication Series : 23

ŚRĪŚUDDHASATTVAṂ RĀMĀNUJĀCĀRYAIḤ KṚTAṂ

# RAHASYATRAYAMĪMĀMSĀBHĀṢYAM

( Volume - II )

**General Editor**
**Prof. Harekrishna Satapathy**
**Vice-Chancellor**

**Editor**
**Prof. Tatta Vijaya Raghavacharyulu**

**RASHTRIYA SANSKRIT VIDYAPEETHA**
**(University established under section 3 of UGC Act, 1956)**
**TIRUPATI - 517 064 (ANDHRA PRADESH)**
**2010**

ग्रन्थानां भाव : अतीव गम्भीर : ; किन्तु भाषा सुखपाठ्या । रचनाविन्यास : अतीव हृदयस्पर्शी । रचनाकाराश्च स्वस्वक्षेत्रेषु प्रसिद्धा : । अत : एते स्वर्णजयन्तीसमारोहग्रन्था : अवश्यं पाठकै : गवेषकैश्च आदृता : भविष्यन्ति इति मे दृढ : विश्वास : ।

अस्मिन्नवसरे प्रस्तुतग्रन्थस्य प्रकाशनस्य सफलतां कामये तथा ग्रन्थकर्त्तु : सर्वविधं मङ्गलं भगवत : श्रीवेङ्कटेश्वरस्य पदकमलतले सम्प्रार्थये ।

जानकीवल्लभ पट्टनायक:

(जानकीबल्लभपट्टनायक :)

कुलाधिपति :

**Prof. Harekrishna Satapathy**
**Vice-Chancellor**

**Rashtriya Sanskrit Vidyapeetha**
**Tirupati - 517 064 (A.P.)**
**(Accredited with A⁺ Grade by NAAC)**

Tel/Fax : 0877 - 2287680
(O) 2287838
(R) 2287826
E-mail : hks_vc@yahoo.com

*"Centre of Excellence in the subject of Traditional Shastras"*

---

# पुरोवाक्

श्रीशुद्धसत्त्वं रामानुजाचार्यैः रचितं **रहस्यत्रयमीमांसाभाष्यम् (द्वितीयभागः)** इति ग्रन्थः श्रीमता **आचार्य. टि.वि.राघवाचार्येण** सम्पादितः राष्ट्रियसंस्कृत-विद्यापीठेनानेन प्रकाश्यत इति महतो हर्षस्य विषयः।

श्रीवैष्णवसम्प्रदाये रहस्यशब्देन प्रसिद्धेषु श्रीमदष्टाक्षरद्वयचरमश्लोकेषु मन्त्रेषु द्वयस्य चरमश्लोकस्य च विषयेऽयं द्वितीयभागः विवरणरूपोऽस्ति । अत्र न केवलं तदर्थविवरणं कृतम्, किन्तु तत्तदनुसन्धानस्य प्रयोजनमपि विस्तरेण प्रादर्शि ।

अस्मिन् ग्रन्थे संपादकेन श्रीकाञ्ची.प्र.भ.अण्णङ्गराचार्यैः विरचितः **श्रीवचनभूषणरत्नमाला** इति ग्रन्थोऽपि योजितः, तथा तत्त्वशेखर-अर्चिरादि-मार्गग्रन्थौ अपि योजितौ जिज्ञासूनामुपकाराय ।

एतद्ग्रन्थाध्ययनेन महानुपकारः आस्तिकलोकस्य भविष्यतीत्यत्र न संशीतिर्मम। अयं सम्पादकमहोदयः आचार्य टि.वि.राघवाचार्यः आगमविभागाध्यक्षः, अत्यन्तमभिनन्दनीयः ।

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य सुवर्णजयन्तीसंवत्सरमुपलक्ष्य प्रकाश्यमानेषु ग्रन्थेषु अयमन्यतमो ग्रन्थः । अस्य ग्रन्थस्य प्रकाशनप्रक्रियायाम् **आचार्य का.इ.देवनाथन्** महोदयानां तथा अन्येषां भूमिका अतीव गुरुत्वपूर्णा, तेभ्यः सर्वेभ्यः मम सहकर्मिभ्यः कृतज्ञतां विनिवेदयन् सम्पादकाय आचार्य टि.वि.राघवाचार्यमहोदयाय भगवान् श्रीवेङ्कटेशः श्रेयः परम्परां विदधातु इति प्रार्थये।

हरेकृष्ण शतपथी

**(प्रो.हरेकृष्णशतपथी)**
कुलपतिः

# कृतज्ञतानिवेदनम्

शुद्धसत्वं रामानुजायार्यैः कृतस्य **रहस्यत्रयमीमांसाभाष्याख्यस्य** ग्रन्थस्य सम्पादने मां नियोज्य तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य प्रकाशन-मालायां प्रकाशयितुमनुमतिं दत्तवद्भ्यः कुलपतिपदमलङ्कुर्वद्भ्यः **आचार्य हरेकृष्णशतपथि**महाभागेभ्यः सकार्तज्ञ्यं धन्यवादान् समर्पयामि। तथैव ग्रन्थस्यास्य प्रकाशने सुष्ठु प्रोत्साहं दत्तवद्भ्यः **डा. समुद्राल रङ्गरामानुजाचार्ये**भ्यश्च हार्दान् धन्यवादान् प्रकटयामि।

ग्रन्थस्यास्य प्रकाशने मातृकापरिशीलने च साहाय्यं दत्तवद्भ्यः **डा.पि.आर्.रङ्गराजन्**महोदयेभ्यश्च हार्दान् धन्यवादान् प्रकटयामि।

ग्रन्थोऽयं पारम्परिकशास्त्रसमुत्कर्षपरियोजानान्तर्गते प्रकाश्यते इत्यतः पारम्परिकशास्त्रसमुत्कर्षपरियोजनायाः निदेशकवर्येभ्यः बहुशास्त्रनिष्णातेभ्यः **आचार्य का.इ.देवनाथाचार्येभ्यः** कृतज्ञतावचनानि उदीरयामि।

ग्रन्थस्यास्य सुष्ठु मुद्रणं कृतवद्भ्यः राष्ट्रियसंस्कृतविद्यापीठस्य शोधविभागकार्यकर्तृभ्यः हार्दान् धन्यवादान् समर्पयामि।

भगवतो श्रीनिवासस्यानुग्रहेण **रहस्यत्रयमीमांसाभाष्य**मिदं श्रीवैष्णव-तत्त्वजिज्ञासूनां सहृदयानां च आनन्दाय कल्पतामित्याशास्महे।

इति

श्रीवैष्णवदासः

**तट्टा विजयराघवाचार्यः**

# उपोद्घातः

**'रहस्यत्रयमीमांसाभाष्यम्'** इत्यस्मिन् ग्रन्थे प्रथमभागे अष्टाक्षरीमन्त्रार्थ विवरणे प्रथमाध्याये प्रथमपादः द्वितीयपादश्च प्रकाशितौ। द्वितीयभागेऽस्मिन् तृतीयपादे षष्ठाधिकरणानि एव उपलभ्यन्ते।

तत्र **प्रथमाधिकरणे** मन्त्रशेषविवरणत्वसमर्थनं कृतम्। विचार्यते च नमश्शब्दनारायणशब्दयोः उकाराकारविवरणत्वं, चतुर्थीनारायणपदयोः मकार-विवरणत्वं न सम्भवति, उत सम्भवतीति। तदर्थं मन्त्रशेषस्य विवरणत्वे द्वितीयतृतीयपदयोः क्रमः विरुद्ध्यते न वेति।

**द्वितीयाधिकरणे** नमश्शब्दार्थसमर्थनं कृतम् । प्रणवविवरणभूते मन्त्रशेषे प्रथमं नमश्शब्दार्थः निरूप्यते। नमशब्दोऽयम् अखण्डः सखण्डो वेति। तदर्थं नमश्शब्देन स्वसम्बन्धः निषेद्धुमशक्यः उत शक्यः इति। तदर्थं सखण्डत्वे वर्णद्वयक्रमः नोपपद्यते, उत उपपद्यत इति। तदर्थं सखण्डत्वे अस्मच्छब्दपर्यायेण मकारेण स्वसम्बन्धप्रशक्तिपूर्वकप्रतिषेधस्य प्रयोजनमस्ति न वेति विचारितम्।

**तृतीयाधिकरणे** नमश्शब्दप्रयोजनसमर्थनं कृतम् । भगवन्मुखोल्लासस्य परमपुरुषार्थस्य साधनं गुणानुभवजनितप्रीतिकारितकैङ्कर्यमिति वा कैङ्कर्यमेव तादृशं भगवत्प्रियतमतया परमपुरुषार्थः, तत्साधनमयनपदार्थभूतसिद्धोपाय इति वा प्रणवस्य पुरुषार्थतत्साधनपरत्वं पूर्वपदीयप्रथमाधिकरणन्यायेन युज्यते।

**चतुर्थाधिकरणे** नमश्शब्दव्यङ्ग्यार्थविशेषस्य समर्थनं कृतम्। भागवत-शेषत्वं नमश्शब्दस्य व्यङ्ग्यार्थः न वेति संशयः। भागवतशेषत्वं न नमश्शब्द-व्यङ्ग्यार्थः इति पूर्वपक्षः। सिद्धान्तस्तु ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि इति षाड्गुण्य-परिपूर्तिः लक्षणगुणानुभवजनितश्रीमन्नारायणविषयकपरमभक्तिशालित्वरूप-भागवततत्त्वलक्षणस्य गुणानुभवजनितभागवतशेषवृत्तेः तादृशभागवतनिष्ठायाः भगवत्प्रीत्यतिशयहेतुभूतप्रवृत्तिमत्त्वरूपभगवच्छेषत्वात्मकतया निषेधस्य विहितेतरविषयतया च '**न वारे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु**

**कामाय पतिः प्रियो भवति'** इत्यादिवाक्येषु नमश्शब्दव्यङ्ग्यत्वस्य व्याघातगन्धाभावात् इति।

**पञ्चमाधिकरणे** अचित्पारतन्त्र्यस्य समर्थनं कृतम्। नमश्शब्देन स्वशेषत्वांशस्य प्रसज्यप्रतिशेषः सम्भवत्येव। स्वशेषत्वस्य अन्यशेषत्वापेक्षया क्रौर्यातिशयमात्रसिद्ध्या अद्वेषाभिमुख्यशालिनि पुरुषे प्रामाणिकतया जीवस्वरूपे दुर्निवारत्वेन जीवे स्वशेषत्वस्य निषेधासम्भवात् अचितः पारतन्त्र्यसमर्थनं सिद्ध्यति इति।

**षष्ठाधिकरणे** भगवत्पर्यन्ताचिद्वत्पारतन्त्र्यरूपमध्यमपदार्थनिष्ठायाः प्रथमतृतीयपदार्थनिष्ठापेक्षया षोढा वैलक्षण्यं समर्थ्यते । अत्र उत्तरग्रन्थालाभात् विरतम्। ततः रहस्ये प्रमेयशेखरे हृदयगुहानिर्गमनक्रमः, दिव्यदेहप्राप्तिः, दिव्यपरिषत्प्राप्तिः, सपत्नीकसर्वेश्वरदर्शनं कैङ्कर्यसाम्राज्यानुभवप्रकारश्च विवृताः।

**प्रपन्नपरित्राणे** भ्राता, पुत्रः, माता पिता च न तु रक्षकाः इति, चन्द्रादित्येन्द्रब्रह्मरुद्रादयः न रक्षकाः इति, परमात्मा श्रीमन्नारायणः एक एव रक्षक इति अनन्यगतित्वनिरूपणम् अकिञ्चिन्यनिरूपणञ्च कृतानि इति।

**नवरत्नमालायां** शरणागति-स्वस्वरूप-संसारदेहाचरणविधान-देवतान्तर-श्रीवैष्णव-आचार्यलक्ष्मीसर्वेश्वरादीन् उद्दिश्य विवृत्तम्।

**अष्टश्लोक्यां** प्रणवशब्दे अकार-उकार-मकाराणां त्रयीसारः नारायणशब्दार्थः श्रीमन्नारायणचरणावेव शरणमिति च उक्तम् ।

अर्थपञ्चके स्वस्वरूपं नाम जीवात्मनः स्वरूपम् । परस्वरूपं नाम परमात्मनः स्वरूपं परतत्त्वमिति, व्यूहतत्त्वमिति, विभवतत्त्वमिति, अन्तर्यामितत्त्वमिति अर्चावतारतत्त्वमिति च पञ्चविधं विवृत्तम् । उपायस्वरूपं नाम भगवत्प्राप्तेः उपायाः कर्मज्ञानभक्तिप्रपत्त्याचार्याभिमानमिति विवृतानि । विरोधिस्वरूपं नाम परमात्मनः प्राप्तेः अवरोधाः स्वरूपविरोधि, परत्वविरोधि, पुरुषार्थविरोधि, उपायविरोधि, प्राप्तविरोधि इति पञ्चविधं विरोधिस्वरूपं विवृतम् । पुरुषार्थस्वरूपं नाम धर्मार्थकाममोक्षाः विवृताः । मोहक्षय मोक्ष इति मोक्षस्वरूपञ्च उक्तम् । एवं प्रकारेण अर्थपञ्चकज्ञानी एव मुमुक्षुर्भवतीति ।

**तत्त्वशेखरे** परस्वरूपं, जीवस्वरूपं, पुरुषार्थस्वरूपं, विरोधिस्वरूपं उपायस्वरूपं च निरूपितानि।

**रहस्यत्रयार्थरत्नमालायां** श्रीमन्त्रप्रकरणे **'ओं नमो नारायणाय'** इति अष्टाक्षरीमन्त्रस्य विवरणं श्लोकरूपेण उक्तम् ।

**द्वयप्रकरणे 'श्रीमन्नारायणचरणौ शरणं प्रपद्ये, श्रीमते नारायणाय नमः'** इति द्वयमन्त्रस्य विवरणं श्लोकरूपेण उक्तम् ।

**चरमश्लोकप्रकरणे** अर्जुनं प्रति श्रीकृष्णभगवता उक्तोऽयं श्लोकः-

**'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।'** इति ।

अस्य चरमश्लोकस्य व्याख्यानं श्लोकरूपेण विवृत्तम् ।

**श्रीवचनभूषणरत्नमालायां** उपायप्रकरणसारः, प्रापकान्तरपरित्यागप्रकरणसारः, मङ्गलाशासनप्रकरणसारः, त्रिपाद्विभूतिप्रकरणसारः आचार्याभिमानस्यावश्यकता च उक्ताः। अर्चिरादिमार्गे एकादशाध्यायेषु भक्तिप्रपत्तिभ्यां परमात्मनः अनुग्रहपात्रभूतस्य जीवस्य परमपुरुषप्राप्तेः विधानं वर्णितम् ।

अत्र भागे रामायणमहाभारतपुराणोपनिषद्ग्रन्थवाक्यानि दिव्यप्रबन्धवचनानि च उदाहृतानि। मणिप्रबालभाषायां विद्यमानानां अष्टादशरहस्यानां संस्कृतभाषानुवादाः ये लब्धाः तेऽपि ग्रन्थाः अत्र द्वितीयभागे संयोजिताः। **'एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः'** इत्येतेषां सर्वेषां परमार्थः इति।

इत्थं
श्रीवैष्णवदासः
**तट्टा विजयराघवाचार्यः**

# विषयानुक्रमः
## द्वितीयभागः


कुलाधिपतिसन्देशः
कुलपतिसन्देशः
कृतज्ञतानिवेदनम्
उपोद्घातः

| | पृष्ठसंख्या |
|---|---|
| प्रथमाध्यायः - तृतीयपादः | |
| **प्रथमाधिकरणम्** | |
| मन्त्रशेषविवरणत्वसमर्थनम् | 1-9 |
| **द्वितीयाधिकरणम्** | |
| नमश्शब्दार्थसमर्थनम् | 10-17 |
| **तृतीयाधिकरणम्** | |
| नमश्शब्दप्रयोजनसमर्थनम् | 18-80 |
| **चतुर्थाधिकरणम्** | |
| नमश्शब्दव्यङ्ग्यार्थविशेषसमर्थनम् | 81-87 |
| **पञ्चमाधिकरणम्** | |
| अचित्पारतन्त्र्यसमर्थनम् | 88-105 |
| **षष्ठाधिकरणम्** | |
| षोढावौलक्षण्यम् | 106-107 |
| **प्रमेयशेखरः** | 108-109 |
| **प्रपन्नपरित्राणम्** | 110-111 |
| **नवरत्नमाला** | 112 |
| **अष्टाश्लोकी** | 113-114 |
| **अर्थपञ्चकम्** | 115-120 |
| **तत्त्वशेखरः** | 121 |
| प्रथमप्रकरणम् | 121-131 |
| द्वितीयप्रकरणम् | 132-140 |
| तृतीयप्रकरणम् | 141-149 |
| चतुर्थप्रकरणम् | 150-158 |

**रहस्तत्रयार्थरत्नमाला**
श्रीमन्त्रप्रकरणम् 159-166
द्वयप्रकरणम् 167-171
चरमश्लोकप्रकरणम् 172-179
**तत्त्वत्रयार्थरत्नमाला**
पूर्वपीठिका 180-182
मङ्गलाचरणादिकम् 183
चित्प्रकरणम् 184-188
अचित्प्रकरणम् 189-193
ईश्वरप्रकरणम् 194-200
**श्रीवचनभूषणरत्नमाला**
प्रथमप्रकरणम् 201-209
द्वितीयप्रकरणम् 210-218
तृतीयप्रकरणम् 219-229
चतुर्थप्रकरणम् 230-236
**अर्चिरादिमार्गः**
प्रथमोऽध्यायः 237-241
द्वितीयोऽध्यायः 242-246
तृतीयोऽध्यायः 247-251
चतुर्थोऽध्यायः 252-257
पञ्चमोऽध्यायः 258-260
षष्ठाध्यायः 261-265
सप्तमोऽध्यायः 266-269
अष्टमोऽध्यायः 270-274
नवमोऽध्यायः 275-279
दशमोऽध्यायः 280-283
एकादशोऽध्यायः 284-288
**उदाहृतप्रमाणवाक्यानुक्रमणी** 289-294
**एतद्वचनोपयुक्तग्रन्थाः** 295-297

श्रीमते रामानुजाय नमः

# रहस्यत्रयमीमांसाभाष्ये
# प्रथमाध्याये तृतीयपादे
# मन्त्रशेषविवरणत्वसमर्थनं नाम
# प्रथमाधिकरणम्

## विवरणविभागः

**मू।। (९०) इनिमेल् प्रणवत्तै विवरिक्किरतु**

**अथ मन्त्रे नमश्शब्दं व्याख्यातुं क्रम आदितः।**
**मन्त्रशेषप्रणवयोरुपोद्घातेन वर्ण्यते।।**

**व्याख्यानस्यार्थजिज्ञासा मूलार्थे ज्ञात एव हि।**
**मूलव्याख्यानभावोऽतस्तयोरादौ समर्थ्यते।।**

अत्रैवं संशयक्रमः। प्रणवमन्त्रशेषयोः विवरणविवरणिभावो न सम्भवति इति। तदर्थमिदं विचार्यते नमश्शब्दनारायणशब्दयोः उकाराकारविवरणत्वं, चतुर्थीनारपदयोः मकारविवरणत्वं न सम्भवति, उत सम्भवतीति। तदर्थं मन्त्रशेषस्य विवरणत्वे द्वितीयतृतीयपदयोः क्रमो विरुध्यते न वेति।

## तत्र पूर्वपक्षः

प्रणवमन्त्रशेषयोः मूलमूलिभावः न सम्भवत्येव। मूलमूलिलक्षणाभावात्। मूलं हि नामपदार्थज्ञानाऽजनकं संशयविपर्ययाविरोधिज्ञानजनकञ्च वाक्यम्। व्याख्यानञ्चमूलार्थाज्ञानसंशयविपर्ययनिवर्तकज्ञानजनकं वाक्यम्। इत्थञ्च उकारस्य पूर्वपादीयनवमाधिकरणन्यायेन अन्ययोगव्यवच्छेदरूपावधारणार्थकस्य निर्णीतत्वात्, न तत्र अज्ञानादि सम्भवः।

न च उकारेणान्यत्स्वरूपेण सामान्यतोऽन्यशेषत्वविवृत्तिद्योतान्, नमश्शब्देन आत्मत्वेन विशेषरूपेणोपस्थितान्यशेषत्वनिवृत्तेः शब्देन बोधनाच्च उक्तार्थविशदी-

काररूपविवरणत्वं सम्भवतीति वाच्यम्। उकारद्योत्यस्य अन्यसामान्यस्य मकारेण विशेषाकारलाभेऽपि, नमश्शब्देन स्वशेषत्वनिषेधेद्योत्यार्थसङ्कोचासत्त्या विवरणत्वस्यैव भङ्गप्रसङ्गात्।

विशेषनिषेधस्य प्रदर्शनार्थत्वाश्रयणेन, उकारस्य सामान्यालम्बकतया वैपरीत्यप्रसङ्गाच्च। **भगवत एव अहमस्मि** इत्यादिप्रसिद्धसामान्यनिषेधस्य उकारेणापि द्योतनसम्भवे, विशेषनिषेधस्य शाब्दबोधाश्रयणे प्रयोजनविशेषालाभाच्च। नञो निपातत्वेन अत्रापि निषेधस्य द्योतनावश्यम्भावाच्च।

तस्मात् न नमश्शब्दस्य उकारविवरणत्वसम्भवः। नापि नारायणशब्दस्य अकारविवरणत्वसम्भवः। **सामर्थ्यम् - कारणत्वमिति यावत्, प्रमाकरणम्-प्रमाणपदवाच्यम्, पचति - पाकं करोति, गौः - सास्नादिमती** इत्यादाविव वाच्यवाचकभावबोधकारणत्वस्य वा उक्तार्थस्य विशेषाकारेण बोधकत्वस्य वा व्यञ्जकमुखेन वाच्यवाचकभावः तात्पर्यकत्वस्य वा, नारायणशब्दे **अहं नारायणाय स्याम्** इत्येव प्रार्थनीयत्वेनव्यञ्जनया बोध्यकैङ्कर्यरूपविधेयार्थस्य प्रतिसम्बन्धिनिर्देशकतया वाक्यान्तरेणोपत्ते वक्तुमशक्यत्वात्।

एतेन रक्षकस्वरूपस्य रक्ष्यभूतचेतनाचेतनवर्गस्य रक्षकगुणसमूहस्य रक्षणप्रकारस्य च कथनात्, नारायणशब्दः - अकारविवरणमित्यपास्तम्। विधेयान्तरपरस्य विवरणतात्पर्ये मानाभावात्। किञ्च अकारस्यापि रक्षकस्वरूपपरतया वैपरीत्यापत्तिः। रक्षकव्यक्तिविशेषविवक्षायाम् **अकारो विष्णुवाचकः** इत्याद्युनुसारेण अकारस्यापि तत्सम्भवात्। रक्ष्यवर्गस्य मकारेणापि निर्देशेन तस्यैव विवरणत्वापत्तिः रक्ष्यत्वेन रक्ष्यवर्गबोधकत्वाभावात्, शेषत्ववाक्य प्रतियोगिसमर्पकत्वाच्च। **मकारो नाकारविवरणम्** इत्युक्तौ नारशब्दोऽपि तथा स्यात्। सकलगुणसमष्टिरूपकारणत्वपराकारेण रक्षकगुणजातसिद्ध्या, नारशब्दस्य रक्षकगुणपरत्वेन विवरणत्वमयुक्तम्। विशिष्य गुणजातस्यानिर्देशः नित्यसमूहवाचिनारशब्देऽपि तुल्यः।

नारायणशब्दो रक्षणप्रकारपरतया अकारविवरणमित्यपि अयुक्तम्। रक्षणहेतुभूतव्यापारस्य बहुव्रीहिसिद्धव्याप्तिरूपधर्मस्य रक्षणप्रकारपदेन विवक्षायां,

व्याप्तिफलीभूतरक्षणपरतया अकारविवरणत्वं किं न स्यादिति वैपरीत्यपत्तेः। अत एव तत्पुरुषसिद्धधारकत्वरूपरक्षणप्रकारपरतया विवरणत्वानुपपत्तेश्च। रक्षकशब्दस्य इष्टप्राप्त्यनिष्टनिवृत्तिहेतुः इत्यनेन उक्तार्थविशदीकाररूपेण विवरणत्वासम्भवाच्च। न च अर्थान्तरबोधनमपि विवरणमिति वाच्यम्। विवरणशब्दार्थाननुगमापत्तेः, उक्तार्थ विशदीकारस्थले उक्तार्थव्यतिरिक्तार्थबोधनाभावात्।

अर्थान्तरबोधनस्यापि विवरणरूपत्वे **पटोऽस्ति** इति वाक्यस्य **घटोऽस्तीति वाक्य**विवरणत्वापत्तेः। विशिष्टस्य विवरणशब्दार्थत्वे एकैकस्थले अव्याप्तेश्च। एतेन व्यक्तचतुर्थ्याः मकारविवरणत्वमपिदूरोत्सारितम्। आत्मवाचिनो मकारस्य परातिशयेच्छा वाचिन्याः चतुर्थ्याश्च अन्योऽन्यावार्तानभिज्ञत्वात्। नारपदं मकारविवरणमित्यपि अयुक्तम्। उक्तार्थविशदीकाराभावात्। अन्यविशेषणस्य विवरणतात्पर्ये मानाभावाच्च।

अपि च, मन्त्रशेषस्य प्रणवविवरणरूपत्वे **अहं नारायणाय अस्मि, मे नास्मि, नारायणाय स्याम्** इति वाक्यत्रयरूपेण मन्त्राविन्यासापत्तिः। **आयाऽस्मि** इति प्रकृत्यर्थविशेषितविभक्त्यर्थविवरणस्य त्यागायोगात्, उकारविवरणानन्तरम् अकारविवरणायोगाच्च। अकारविवरणानन्तरं मकारविवरणायोगाच्च। अकारविवरणात्पूर्वं नारपदेन मकारविवरणायोगाच्च।

एतेन अनुभवस्य विरोधिनिवृत्तिपूर्वकतया नमश्शब्दनारायणशब्दयोः क्रमइत्यपास्तम्। **अहं नारायणायास्मि** इति अकारं विवृत्य, **मे नास्मि** इति उकारं विवृत्य, **अस्मै स्याम्** इत्युक्तावप्यनुभवजनितप्रीतिकारितकैङ्कर्यफलोपधानप्रार्थनाव्यङ्ग्यस्यानुभवस्य विरोधिनिवृत्तिपूर्वकत्वरूपार्थक्रमोपपत्तेः। तस्मात् प्रणवमन्त्रशेषयोः विवरणविवरणिभावो नोपपद्यत इति।

## सिद्धान्तस्तु

प्रणवमन्त्रशेषयोः विवरणविवरणिभावः सम्भवत्येव। पूर्वोक्तरीत्या मूलव्याख्यानयोः लक्षणाभ्युपगमे प्रकृते मूलत्वेनाभिमते अज्ञानसंशयविपर्ययसम्भवेन व्याख्यानत्वेनाभिमते तन्निवृत्तिसम्भवेन च, मूलमूलिभावे बाधकाभावात्।

तथा हि-नमश्शब्दस्तावत् उकारविवरणम्। सामान्यतो भगवदन्यस्मिन् शेषत्वस्य निरूपकतासम्बन्ध लक्षणयोगव्यवच्छेदपरे उकारे, अचेतनेऽपि शेषत्व-योगव्यवच्छेद प्रतीत्यापत्तौ, अचेतने चेतनप्रवृत्तिजन्यप्रीतिमत्त्वलक्षणशेषित्वासिद्ध्या च, अप्रसक्तस्य शेषित्वस्य निषेधाप्रतिपत्तिसम्भवात्। उकारबलादेव चेतनप्रवृत्तिजन्येच्छाविषयः यत्किञ्चिदतिशयवत्त्वरूपशेषित्वस्य प्रसक्तौ, तन्निषेधसंशयस्य तद्विपर्ययस्य च सम्भवाच्च। तथापि अचितः सर्वलोकप्रतीत्या, चेतनस्येव स्वातन्त्र्येण शेषित्वस्य अप्रसक्त्या नञिवयुक्तन्यायेन, शेषित्वनिषेधाधिकरणस्य भगवदन्यस्य चेतनरूपत्वसिद्ध्या च, नमश्शब्देन चेतनशेषित्वनिषेधपरतया, उकारविवरणसम्भवाच्च।

न च नमश्शब्देन स्वशेषत्वनिषेधे सति उकारद्योत्यनिषेधसङ्कोचप्रसङ्गः। अस्मच्छब्दपर्यायमकारप्रयोगोपाधिभूतकर्तृत्वस्योपलक्षणतया निष्कृष्टचेतनस्वरूप-सामान्ये स्वतश्शेषित्वनिषेधस्यैव नमश्शब्दार्थत्वात्, एवं नमश्शब्देन विशेषनिषेधा-भावात्, उकारस्य सामान्यनिषेधपरत्वेन वैपरीत्याऽप्रसङ्गाच्च।

न चैवं पूर्वपादीयनवमाधिकरणान्तिमसूत्रविरोधः। तत्र सामान्यपरतया उकारप्रयोजनस्योक्तत्वादिति वाच्यम्। मकारप्रयोगोपाधेः उपलक्षणत्वतात्पर्य-ग्राहकतया तत्साफल्यस्य तत्र विवक्षितत्वोपपत्तेः। एतेन विशेषनिषेधस्य शाब्द-बोधाश्रयणं विफलम्। नमश्शब्देन नञो द्योतकत्वञ्च आवश्यकमित्यपि निरस्तम्।

**तस्मान्नमशब्दस्य तावत् उकारविवरणत्वं युक्तम्।**

एवं नारायणपदस्य अकारविवरणत्वमपि युक्तमेव। **यद्विषये शेषवृत्ति-योग्योऽहं तद्विषये शेषवृत्तिर्भूयात्** इत्येवं फलोपधानप्रार्थनार्थं पूर्वोपात्तशेषवृत्तिप्रति-सम्बन्धिनिर्देशपरे नारायणपदेऽपि शेषवृत्तौ गुणकृतत्वसूचके कल्याणगुणगणस्याकारे रक्षकत्वोक्त्या क्षिप्तस्य कण्ठोक्तिमुखेन तद्विवरणत्वस्य अवश्याभ्युपगन्तव्यतया, भिन्नवाक्योपात्तेऽपि नारायणपदे अकारेणैकविषयकत्वमात्रेण विवरणविवरणिभाव-तात्पर्यस्य दुरपादत्वात्। **नारायणाय स्याम्** इति वाक्यस्य अर्थान्तरविधानपरत्वेऽपि **गौः सास्नादिमती** इत्यादाविव प्रकृत्यंशेव्यञ्जकमुखेन उक्तार्थविशदीकारसम्भवात्।

इत्थं नारायणपदस्य स्वरूपादिपरत्वेन विवरणत्वमपि युक्तम्। **अकारो ब्रह्मविष्णवीशकमठेष्वङ्कणेरणे** इत्यादि निखण्डुबलेन अकारस्य अन्यत्रापि

प्रयोगार्हतया, नारायणशब्दस्य न तु नारायणादीनाम् इत्यादिवचनानुसारेण, स्वातन्त्र्येण नारायणशब्दस्य अन्यत्रप्रयोगादर्शनेन च, अकारे देवताविशेषरूप रक्षकस्वरूप-परत्वस्य महावाक्यविधया, तदेकवाक्यतापन्नेन कैङ्कर्यप्रतिसम्बन्धि निर्देशकतया समानविषयेण च नारायणशब्देनणत्वानुपपत्त्यादिसुप्रसिद्धन्यायानुगृहीतेन निश्शङ्कमेव देवताविशेषसमर्पणमुखेनैव वक्तव्यत्वात्।

मकारस्य समभिव्याहारबलाऽद्योत्यतया रक्ष्यपरत्वेऽपि रक्षणप्रकार - भूतव्यापकत्वधारकत्वप्राप्यत्वप्रापकत्वप्रतियोगितया, जीवसमष्टिनिर्देशमुखेन, अकारविवरणत्वस्य वक्तव्यत्वाभावेन कैङ्कर्यप्रवर्तकगुणानां कल्पितत्वशङ्का-परिहारालाभेन नारपदेनैव रक्षणोपयोगिगुणजातप्रतिपादनमुखेन नारायणपदे अकार-विवरणत्वस्य वक्तव्यत्वाच्च।

नारायणपदस्य अनन्तरोपात्तत्वेन अकारार्थोपस्थितिमूलकाकाङ्क्षानिवर्त-कज्ञानजनकत्वेन कल्याणगुणवत्त्व व्यापकत्वधारकत्वप्रापकत्वप्राप्यत्वानां रक्षणप्रकाराणां प्रतिपादनेन च नारायणशब्दस्यैव विवरणत्वाच्च। हेतुवाक्यस्य प्रज्ञावाक्योपपादकत्वस्य सुप्रसिद्धतया रक्षकगुणजातादिप्रतिपादकस्य विवरणत्व-सम्भवाच्च। व्याप्तिविशिष्टपक्षधर्मताप्रतिपादकयोः उदाहरणोपनययोः हेत्ववयवोक्त-ज्ञापकत्वप्रकारपरतया, विवरणत्वस्य तान्त्रिकैः अभ्युपगतत्वेन, अर्थान्तरबोधन-स्यापि विवरणपदार्थत्वाच्च। आकाङ्क्षितार्थप्रतिपादनस्यैव अनुगतविवरणपदार्थ-त्वाच्च। **घटोऽस्ति, पटोऽस्ति** इत्यादेः परस्परवार्तानभिज्ञतया तदप्रसङ्गाच्च। उक्तार्थे नियतानियताकारबोधनभेदेन उक्तार्थविशदीकारार्थान्तरबोधनयोः भेदसम्भ-वाच्च। **मतं विवरणं तत्र** इत्युक्ततया प्रकृताभिप्रायेणैव विशिष्टस्य विवरणपदार्थत्वेन अव्याप्त्यनवकाशाच्च।

व्यक्तचतुर्थ्याः मकारविवरणत्वमपि युक्तम्। ज्ञातृत्वादेः परातिशयेच्छायाश्च मकारचतुर्थीवाच्यत्वेऽपि, मकारस्य शेषत्वाश्रयबोधकतया चतुर्थ्याः शेषत्वोप-पादककिञ्चित्कारसूचकतया च तयोः अन्योन्यवार्ताभिज्ञत्वेन मूलमूलिभाव-सम्भवात्। किञ्चित्कारस्य शेषत्वोपपादकत्वञ्च **नाऽकिञ्चित्कुर्वतश्शेषत्वम्** इत्याद्यभियुक्त व्यवहारसिद्धम्।

न च तथापि लुप्तचतुर्थीविवरणत्वमेव व्यक्तचतुर्थ्याः सिद्ध्यति। न तु मकारविवरणत्वम्। व्यक्तचतुर्थ्याः ज्ञातृत्वादिविशेषसमर्पणस्य तदुपयुक्तार्थान्तर-समर्पणस्य चाभावात्, व्यक्तचतुर्थ्याः लुप्तचतुर्थी विवरणत्वमपि अयुक्तम्। एकप्रकारकैकविशेष्यकबोधजनकयोः चतुर्थ्योः लुप्तत्वव्यक्तत्ववैषम्यमात्रेण मूलमूलिभावा सम्भवात्। किञ्चित्कारस्यैव शेषत्वशब्दार्थतया नाकिञ्चित्कुर्वत-शेषत्वम् इत्यादिव्यतिरेकव्याप्तिप्रदर्शकाभियुक्तव्यवहारानुपपत्तिश्च इत्थञ्च मकारचतुर्थ्योः अन्योन्यवार्तानभिज्ञत्वं मूलमूलिभावांशे दृढमेवेति वाच्यम्।

भावानवबोधात्, शेषवृत्तिहेतुतया मकारेण ज्ञातृत्वोक्तौ ज्ञाने प्रवृत्तिहेतुत्वस्य फलेच्छाचिकीर्षाद्वारकतया परातिशयेच्छावाचिन्याः व्यक्तचतुर्थ्याः **स्याम्** इत्यध्याहृतचिकीर्षाबोधकक्रियापदसमभिव्याहृतायाः उपयुक्तार्थान्तरबोधनेन मकार-विवरणत्वोपपत्तेः। **आयास्मि** इति नित्यवच्छ्वणरूपे प्रणवे शेषवृत्त्यर्हत्वस्योक्ततया **नारायणाय स्याम्** इत्यत्र प्रार्थनीयत्वेन शेषवृत्तिफलोपधानस्यैव व्यङ्ग्यतया च प्रणवनारायणपदयोः समानार्थकत्वाभावाच्च। फलोपधानस्य स्वरूपयोग्यता व्यापकतया शेषवृत्त्यभावे शेषवृत्त्यर्हत्वं न सम्भवतीति अभियुक्तव्यवहारोपपत्तेश्च।

नारपदं मकारविवरणमित्यपि युक्तम्। मकारार्थे ज्ञातृत्वादिपञ्चाविशिष्टे, नित्यत्वैकरूपत्वबहुत्वरूपमतान्तरव्यावृत्तज्ञातव्यार्थान्तरबोधकत्वात्। **नारस्त्विति सर्वपुंसाम्** इत्याद्युक्तरीत्या नारायणपदेन सर्वचेतनप्राप्यत्वलाभेन, प्राप्यत्वस्य शेषित्वोपपादकत्वेन च शेषत्वानुयोगिसमर्पकस्य मकारस्य प्राप्यत्वप्रतियोगि-समर्पकनारपदस्य च, एकविषयकतया विवरणविवरणीभावतात्पर्योपपत्तेश्च।

अपि च इत्याद्यपि अयुक्तम्। **अहं नारायणायास्मि** इत्यत्र नारायणपद-मात्रस्य अकारविवरणत्वेन पदत्रयवैफल्यापत्त्या, कैङ्कर्यप्रतिसम्बन्धि निर्देशकवाक्य एव प्रकृत्यंशेन अकारविवरणस्य युक्तत्वात्। अत एव उकारविवरणानन्तर्यस्य युक्तत्वाच्च।

एतेन प्रार्थनीयत्वेन तृतीयपदव्यङ्ग्यकैङ्कर्यप्रवर्तकानुभवस्य **अहमपि मम न इदमपि मम न, भोक्तऽहम्, मम भोगोऽयम्** इत्येवं रूपाहङ्कारमम-कारनिवृत्तिसाध्यतया अर्थक्रमादपि द्वितीयतृतीयपदयोः क्रम उपपद्यत इति सिद्धम्। पूर्वोक्तरीत्या प्रार्थनीयत्वेन तृतीयपदव्यङ्ग्यकैङ्कर्य प्रतिसम्बन्धिनिर्देशक-

पदावश्यम्भावेन **अहं नारायणायास्मि** इति व्यर्थपदत्रयघटितवाक्यस्य **तस्मै स्याम्** इति पदान्तरप्रक्षेपेण वाक्यान्तरस्य च वैफल्येन क्रमेण विवरणार्थं वाक्यत्रयाश्रयणेऽपि अर्थक्रमः सिद्ध्यतीति वक्तुमशक्यत्वात्। तस्मात्प्रणवमन्त्रशेषयोः विवरणविवरणिभाव उपपद्यत इति सिद्धम्।

इदञ्चाधिकरणं षट्सूत्र्यात्मकम्। तत्र व्याख्यानक्रमहेतुभूतं, मन्त्रशेषस्य प्रणवानन्तर्ये नियामकमाह प्रथमसूत्रेण (इनिमेलित्यादिना)।

**मू।। (९१) उकारत्तै विवरिक्किरतु नमस्सु**

पूर्वोक्तरीत्या उकारार्थाऽज्ञानादि निवृत्त्यर्थं निष्कृष्टात्मसामान्यस्य निष्कृष्टात्मसामान्यं प्रति निरुपाधिकशेषत्वानर्हत्वप्रतिपादनमुखेन नमश्शब्देन उक्तार्थविशेषाकारकथनरूपविवरणं क्रियत इत्यर्थः। (नमस्सु) **न** इति, **मः** इति **च** पदद्वयमित्यर्थः।

एवं मन्त्रशेषप्रथमद्वितीयपदयोः विवरणत्वमुक्त्वा क्रमप्राप्ते तृतीयपदे प्रकृत्यंशस्य विवरणत्वमाह तृतीयसूत्रेण (अकारत्तैयित्यादिना) **अकारत्तै विवरिक्किरदु नारायणपदम्** अकारेण रक्षकस्योक्तौ, तस्य नानार्थतया रक्षकव्यक्तिविशेषाकाङ्क्षायां, शेषवृत्तियोग्यताप्रतिसम्बन्धिनः शेषवृत्तिफलोपधान प्रतिसम्बन्धिनश्च एकव्यक्तित्वावश्यम्भावेन, फलोपधानप्रतिसम्बन्धिनिर्देशकेन नारायणपदेन, रूढिवृत्या लक्ष्मीवक्षस्कशङ्खचक्रादिचिह्नितविग्रहविशेषावच्छिन्नदेवताविशेषसमर्पणात्। **कुतो रक्षकः** इत्याकाङ्क्षायां स्वाभाविक कल्याणगुणगणादेवेति सूचयितुम्, नित्यवस्तुसमूहाश्रयत्वस्य कथं रक्षक इत्यपेक्षायाम् **नियमनार्थाऽन्तर्व्याप्ति पूर्वकधारणेन निरुपाधिकेन प्राप्यत्वप्रापकत्वाभ्याञ्च** इत्येवं तत्पुरुषबहुव्रीहिवृत्तिभ्यां बोधनात्। **केषां रक्षकः**इत्याकाङ्क्षायां, **त्रिविधचेतनाचेतनगतस्वेष्टानिष्टप्राप्तिपरिहारमुखेन चेतनाचेतन वर्गाणाम्** इत्येवं व्याप्त्यादि प्रकारचतुष्टयप्रतियोगिसमर्पकनारपदेन बोधनाच्च। शेषवृत्तिस्वरूपयोग्यताप्रतिसम्बन्धिनिर्देशकाकारस्य शेषवृत्तिफलोपधानप्रतिसम्बन्धिनिर्देशकं नारायणपदं विवरणमिति भावः।

(नारायणपदम्) इत्यत्र पदशब्दः - शक्तिपरः। शक्तिश्चयोगरूढिरूपा विवक्षिता। अत एव पूर्वसूत्रे नमस्तु इत्येव सकारान्तेन पदद्वयानुकरणं कृतम्।

न तु **नमः पदम्** इति। तस्य पदद्वयत्वात् इत्यनुसन्धेयम्। अथ क्रमप्राप्ताया: तृतीयपदस्थाया विभक्तेः विवरणत्वं प्रदर्शयति चतुर्थसूत्रेण (मकारत्तैयित्यादिना)।

**मू।। (९३) मकारत्तै विवरिक्किरतु चतुर्थी**

अत्र अकारोक्तकल्याणगुणगणानुभवस्य निरुपाधिरक्ष्यरक्षकभावानन्यार्हशेषशेषिभाव सम्बन्धानुसन्धानस्य, व्यङ्ग्यार्थभूतदिव्यदम्पतिरूपकैङ्कर्यप्रतिसम्बन्धिप्रतिसन्धानस्य, निरतिशयभोग्यभूतगुणादिचतुष्टयानुभवजनितहर्षप्रकर्षरूपप्रीतेश्च सामग्रीबलेन अवघातस्वेदवदनुनिष्पन्नायाम् अकारेण बोधनात्। **स्याम्** इत्यध्याहृतक्रियापदसमभिव्याहृतया व्यक्तचतुर्थ्या अनुभवजनितप्रीतिकारितकैङ्कर्यस्य वाक्यार्थविधयाव्यञ्जनात्, ज्ञानफलीभूतचिकीर्षाया: अपरपदार्थतया बोधनात्, चिकीर्षाहेतुभूत परगतातिशयेच्छाया ज्ञानद्वारभूताया: स्वशक्त्यैव बोधनात्, कैङ्कर्यप्रवृत्त्युद्देश्यपरमफलीभूतभगवन्मुखोल्लासार्थकप्रीतेः ज्ञानान्दफलेच्छाचिकीर्षाप्रवृत्तिसाध्याया: व्यक्तचतुर्थीप्रवृत्त्योर्वाक्यार्थतया बोधनाच्च अर्थान्तरबोधनेन मकारविवरणत्वं व्यक्तचतुर्थ्या युज्यत इति भावः।

अत्र लुप्तचतुर्थीप्रतिपादित शेषवृत्तिस्वरूपयोग्यताहेतुभूतज्ञातृत्वरूपमकारार्थस्य तृतीयवाक्येन इच्छाद्वयरूपफलद्वयकण्ठोक्त्या विवरणात्, फलोपधानपरव्यक्तचतुर्थ्या स्वरूपयोग्यतापरलुप्तचतुर्थीविवरणत्वमविगर्हितम्। अतः न न्यूनतादोष इत्यनुसन्धेयम्।

अथ न्यूनतादोषं परिहर्तुमेव रक्षकत्वशेषित्वधारकत्वव्यापकरत्वप्राप्यत्वप्रापकत्वप्रतियोगिसमर्पकतया, मकारसमानार्थकस्यनारपदस्यापि मकारविवरणत्वं सम्भवतीत्यभिप्रायेणाह पञ्चमसूत्रेण (नारपदमित्यादिना)।

**मू।। (९४) नारपदमेन्नुम् शोल्लुवर्कल्**

अत्र (मकारत्तै विवरिक्किरतु) इति-आदितः पदद्वयमनुसन्धेयम्। अत्र प्रथमान्ततया षष्ठ्यन्ततया वा नारशब्दस्य पदत्वमभिप्रेतम्। व्यक्तचतुर्थीवत् न वाक्यानुप्रवेशेन मकारविवरणत्वं नारपदस्य। किन्तु पदविधयैवेति पदशब्दस्य भावः। (एन्नुम् शोल्लुवर् कल्) इति नारपदस्यविवरणत्वं साम्प्रदायिकमिति सूच्यते। अपि शब्देन पूर्वोक्तपदत्रयविवरणत्वमपि साम्प्रदायिकमिति व्यज्यते।

अथ क्रमानुपपत्त्या पूर्वोक्तं चतुर्विधं विवरणत्वमनुपपन्नमिति शङ्का परिह्रियते षष्ठसूत्रेण (अडैवे) इत्यादिना।

**मू।। (९५) अडै वे विवरियातोलिकिरतु विरोधिपोयनु भविक्कवेण्डुकैयाले**

(अडैवे विवरिया तोलिकिरतु) क्रमेण विवरणं विना विवरणान्निवृत्तिः इत्यर्थः। क्रमेण विवरणे सत्येव विवरणं पूर्णमिति कृत्वा, विवरणात् निवृत्तिः युज्यते। क्रमिविरोधेन विवरणे तु, विवरणमपूर्णमेवेति विवरणात् निवृत्तिः न युक्तेत्यर्थः। अनेन **नमो नारायणाय** इति पदद्वयस्य पूर्वोक्तरीत्या विवरणत्व-सम्भवेऽपि, विवरणिक्रमविरोधेन लुप्तविभक्तिविवरणाभावे न्यूनतया च **अहं नारायणायास्मि, मे नास्मि तस्मै स्याम्** इत्युक्तावेव विवरणस्य विवरणिक्रमा-विरोधः, लुप्तविभक्तेः अध्याहृतक्रियायाश्च कण्ठोक्त्या विवरणस्य पूर्तिरिति सूचितम्।

(विरोधिपोय्) **भोक्ताहं मम भोगोऽयम्** इति अनन्यार्थप्रवृत्त्युद्देश्य भोगाश्रयताबुद्धिरूपाहङ्कारस्य, अनन्यार्थप्रवृत्त्युद्देश्य भोगे निरुपाधिकम दीयेच्छा-विषयत्वरूपममकारस्य च, अनन्यार्थपरेच्छाविषयत्वज्ञानाधीनस्वकीयेच्छाविषय-स्वकीयगुणानुभवरूपकेवलपरार्थनुभवरूपप्रतिबन्धतया, तन्निवृत्तौ सत्यामेवकेवल-परार्थानुभवस्य कर्तव्यत्वात् इति भावः। (अनुभविक्कवेण्डुकैयाले) इत्यनेन, व्यक्तचतुर्थी व्यङ्ग्याकारनारायणपदोक्तगुणानुभवजनितप्रीतिकारितकैङ्कर्यस्य, तन्मूलभूतानुभवस्य च विरोधिनिवृत्तिपूर्वकत्वमभिप्रेतम्।

तथा च चतुर्थीकण्ठोक्तिमात्रेण अर्थान्तरालाभेन वैफल्यात्, पुनः **तस्मै स्याम्** इति प्रतिसम्बन्धि निर्देशगौरवात्, अस्मीति क्रियाध्याहारस्य स्फुटत्वात्, पौनरुक्त्यपरिहाराय **स्याम्** इत्यध्याहारस्य योग्यतया ऊहितुं शक्यत्वाच्च, आवश्यक-प्रार्थनीयफलोपधानप्रतिसम्बन्धिनिर्देशावसर एव अकारविवरणमपि युज्यत इति अर्थक्रमानुसारेण विवरणक्रम उपपद्यत इति भावः।

**इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयपादे मन्त्रशेषविवरणत्वसमर्थनं नाम प्रथमाधिकरणम् समाप्तम्।**

श्रीमते रामानुजाय नमः

## प्रथमाध्याये तृतीयपादे

# नमश्शब्दार्थसमर्थनं नाम

# द्वितीयाधिकरणम्

### नमश्शब्दार्थः

इत्थं प्रणवविवरणभूते मन्त्रशेषे प्रथमं नमश्शब्दार्थो निरूप्यते। तत्र संशयः। नमश्शब्दोऽयमखण्डः सखण्डो वेति। तदर्थं नमश्शब्देन स्वसम्बन्धोनिषेद्धुमशक्यः, उत शक्य इति। तदर्थं सखण्डत्वे वर्णद्वयक्रमः नोपपद्यते, उत उपपद्यत इति। तदर्थं सखण्डत्वे अस्मच्छब्दपर्यायेण मकारेण स्वसम्बन्धप्रसक्तिपूर्वकप्रतिषेधस्य प्रयोजनमस्ति न वेति।

### तत्र पूर्वपक्षः

नमः शब्दाखण्डत्वे सर्वात्मनां स्वभोगोद्देशेन प्रवृत्तेः सर्वजनीनतया, तन्निषेधे अयोग्यार्थत्वापातात्। न च स्वसम्बन्धयोग्यत्वं निषेद्धुं शक्यमिति वाच्यम्। स्वसम्बन्धाभावस्य कदाप्यननुभवेन तद्योग्यतायाः अपि अनुमेयत्वात्। अन्यथा अतीन्द्रियशक्तिरूपयोग्यताया अप्रसक्तत्वेन निषेधायोगतादवस्थ्यात्।

किञ्च सखण्डत्वे प्रतियोगिबोधनान्तरमेव निषेधस्य बोधनीयतया **मः नः** इति मन्त्रविन्यासापत्तिः।

अपि च सखण्डत्वे मकारेण स्वसम्बन्धप्रसक्तिपूर्वकं निषेधो विफलः। उकारविवरणार्थंप्रवृत्तेन नमश्शब्देन जीवसामान्यशेषत्वस्यैव निषेध्यतया मकारेण स्वसम्बन्धस्य प्रसक्तिपूर्वकं निषेधेमकारप्रयोगोपाधिभूतस्य वक्तृत्वस्योपलक्षणत्वाश्रयणे गौरवात्। निष्कृष्टात्मसामान्यशेषत्वाभावस्य स्वाभाविकतया, अनित्यार्थसंयोगपरिहाराय तस्यैव बोधनीयतया च, प्रयोगोपाधिभूतदेहविशिष्टवेषोपलक्षणत्वस्य अवश्याश्रयणीयत्वाच्च।

न च - सर्वत्मनामन्यशेषत्वापेक्षयास्वस्वशेषत्वस्य अतिशयितानर्थावहतया तत्क्रौर्यद्योतनाय उपलक्षणमुखेन तत्तदात्मशेषत्वनिषेधः कृत इति वाच्यम्।

तत्तदात्मनां निष्कृष्टास्वस्वरूपशेषत्वरूपस्वातन्त्र्य भ्रमस्य अन्यथा ज्ञानरूपस्य रजोगुणकार्यतया, तदपेक्षया देहात्मभ्रमस्य विपरीतज्ञानरूपस्य तमोगुण-कार्यतया च अतिक्रूरत्वात्, अन्यशेषत्वस्वातन्त्र्यभ्रमयोः अनर्थहेतुत्वे विशेषाभावाच्च।

न च तयोर्भगवच्छेषत्वज्ञानयोग्यतासम्पादकत्वतदभावाभ्यां वैषम्यमस्तीति-वाच्यम्। तथापि देवतान्तरशेषत्वनिवृत्तेः भगवद्वैलक्षण्यज्ञानेनैव साध्यतया, तद्वैलक्षण्यज्ञानेनैव देवतान्तरापेक्षयापि अज्ञानाशक्त्यादिपरिपूर्णस्वशेषत्वाभावस्य व्याप्यव्यापकन्यायेन सुलभत्वेन, निरुक्तवैषम्यस्य स्वशेषत्वनिषेधावश्य वक्तव्यत्वा-प्रयोजकत्वात्। तस्मात् नमः शब्दः अखण्ड एवेति।

## सिद्धान्तस्तु

नमश्शब्दः सखण्ड एव। स्वशेषत्वस्य अनाद्यनुभवसिद्धत्वेऽपि भ्रान्ति-मूलत्वेन तत्वज्ञानेन, तन्निवृत्तिसम्भवेन च निषेद्धुं शक्यत्वात्। न च भ्रान्तिमूलकस्यापि तस्य सत्त्वेन निषेधायोगः। तद्योग्यताया एवनिषेद्ध्यत्वात्, प्रमाणतममूलमन्त्रस्थनम-श्शब्दबलादेव योग्यतायाः निषेध्यत्वकल्पनेन, अनाद्यनुभवबलेन योग्यतायाः अनुमेयत्वासम्भवेन, अनुभवस्यैव भ्रान्तिमूलकत्वात्, तद्धर्मफलोपहिततद्धर्म-स्वरूपयोग्यतायाः औत्सर्गिकत्वेन योग्यतायाः प्रसक्तिसम्भवाच्च। **अहम् आयास्मि** इति नित्यवच्छ्रवणरूपे प्रणवे शेषवृत्तियोग्यतायाः विहितत्वेन **मो नास्मि** इत्यत्रापि तस्या एव निषेधस्य स्वरसतः प्राप्तत्वाच्च। **स्मि** इति पूर्वत्र योग्यताया एव निषिद्धत्वेन तद्विवरण दशायामपि तस्या एव निषेध्यत्वाच्च।

किञ्चेत्यप्ययुक्तम्। प्रदीप्तशरणस्थले **इथ्युक्त्वा प्रदीप्तं शरणम्** इति निद्राणं प्रत्युक्तिवत्, सर्वं हस्ते गृहीत्वा, क्रीडमानं प्रति त्यज त्यज इत्युक्त्वा सर्पोऽयं मारकः इति बालकं प्रत्युक्तिवच्च, अत्यन्तपरदुःखाऽसहिष्णुना झटिति निषेधः कार्य इत्यभिप्रायेण अनन्तरं बोधनीयस्यापि निषेधस्य प्रथमं बोधनोपपत्तेः। अत एव सर्वज्ञेन परोपदेशप्रवृत्तेन श्रीमता शठकोपसूरिणापि [1]**वीडुमिन् मुट्रवुम्**

१. तिरुवायिमोलि १-२-१

इत्यनुगृहीतम्। अत एव श्रीरामायणे [1]**त्यक्त्वा पुत्रांश्च दारांश्च** [2]**परित्यक्ता मया लङ्का** इत्येवं कर्मोक्तेः पूर्वमेव त्याग उक्तः।

अपि चेत्याद्यप्ययुक्तम्। उकारविवरणार्थम्, अनित्यर्थसंयोगपरिहारार्थञ्च निष्कृष्टजीवसामान्ये निष्कृष्टजीवसामान्यशेषत्वनिषेधस्य वक्तव्यत्वेऽपि तत्तदात्मनां स्वशेषत्वाभावमात्रानुसन्धानमूलकप्रयोगवत्, नमःशब्दप्रयोगः। प्रयोगोपाधेः उपलक्षणत्व बोधे अपरपरार्थान्वये च अस्तीत्यजानतां वक्त्रुत्वपरिचायितस्य अपरपदार्थान्वय इति बोधनमुखेन सर्वात्मनां स्वस्वशेषत्वमन्यशेषत्वापेक्षया अतिक्रूरम्। अतः तन्निषेध एव अवश्यं वाच्य इति सूचनाय अस्मच्छब्दपर्याय-मकारप्रयोगोपपत्तेः।

न च स्वातन्त्र्यबुद्ध्यपेक्षया देहात्माभिमान एवातिक्रूरः। स्वातन्त्र्यभ्रमस्य **मदतिरिक्त आत्मा नास्ति** इत्येवं धर्म्यनभ्युपगमेन प्रवृत्तत्वाभावेनधर्मविपर्यासरू-पान्यथाज्ञानरूपत्वात्, देहात्माभिमानस्य **देहातिरिक्त आत्मा नास्ति** इत्येव धर्म्यनभ्युपगमेनप्रवृत्तत्वेन धर्मिविपर्यासात्मकविपरीतज्ञानरूपत्वाच्चेति वाच्यम्।

तथापि अन्यशेषत्वापेक्षया स्वशेषत्वस्य क्रौर्यातिशयसम्भवेन, तावतैव प्रकृतार्थसिद्धेः निष्प्रत्यूहत्वात्। [3]**वपुरादिषु योऽपि कोऽपि वा** इति देहात्माभि-मानादरेण **अहमद्यैव मया समर्पितः, नियतस्वमिति प्रबुद्धधीरथवा किं नु समर्पयामि ते** इति स्वशेषत्वभ्रान्तेरेवावश्यपरिहरणीयतायाः अनुगृहीतत्वेन, तद्बलेन देहात्मभ्रमापेक्षया स्वशेषत्वभ्रमस्यैव क्रौर्यातिशयसिद्धेश्च।

न चैवमपि अन्यशेषत्वस्वस्वातन्त्र्यभ्रमयोः अनर्थहेतुत्वेन कोऽपि विशेष इति वाच्यम्। अन्यशेषत्वभ्रमस्य तन्निवर्तकप्रमाणान्तराप्रामाण्यग्राहकदोषमूलत्व-विरहात्। स्वशेषत्वभ्रमस्य तन्निवर्तकस्वापकर्षप्रत्यक्षोपदेशाद्यप्रामाण्यग्राहक-स्वविषयकपक्षपाताभिनिवेशादिलक्षणदोषमूलत्वसद्भावाच्च, अनयोः भगवद्वैलक्षण्य ज्ञापनेन सुनिरसत्वदुर्निरसत्वलक्षणक्रौर्यतारतम्यस्य लोकसिद्धत्वात्।

अत एव अन्यशेषत्वभ्रमस्य अन्यशब्दार्थरूपनिरूपकांशे भ्रान्तिरूपत्वेऽपि शेषत्वज्ञानांशे प्रमारूपत्वेन तदंशसम्प्रतिपत्तेः भगवच्छेषत्वयोग्यतासम्पत्तिरूपत्वात्,

---

१. रामा.यु.का.१८-१६ २. रामा.यु.का.१९-५ ३. स्तो.र.५२

स्वशेषत्वभ्रमस्य स्वातन्त्र्यभ्रमरूपत्वेन परशेषत्वज्ञानसामान्यविरोधितया भगवच्छेषत्वप्रतिबन्धकसमवधानरूपत्वाच्च अनयोः क्रौर्य तारतम्यस्य अपह्नोतुमशक्यत्वाच्च।

एतेन तथापि इत्यादिकं निरस्तम्। अन्यशेषत्वस्वस्वातन्त्र्यत्वभ्रमयोः द्वेधा वैषम्यस्य प्रतिपादितत्वेन, तन्निवृत्त्योः द्वयोरपि भगवद्वैलक्षण्यज्ञानमात्रेण साधयितुमशक्यत्वात्। प्रसिद्धं हि अन्यशेषभूते घण्टाकर्णे मोक्षदानार्हत्वादि भगवद्वैलक्षण्यज्ञानस्य अन्यशेषत्वनिवर्तकत्वम्। [1]**न नमेयं तु कस्यचित्** इति स्वशेषभूते शरणे [2]**विदितस्सहि धर्मज्ञः** इत्युक्त भगवद्वैलक्षण्यज्ञानस्य स्वस्वातन्त्र्यानिवर्तकत्वञ्च।

तस्मात् स्वशेषत्वस्यैव अत्यन्तक्रूरत्वेन अवश्यपरिहरणीयत्वात्, तत्प्रसङ्गप्रतिषेधपरोऽयं नमः शब्दः सखण्ड एवेति सिद्धम्। इदञ्चाधिकरणं षट्सूत्र्यात्मकम्। अत्र मध्यमपदस्यास्यनमसः पदार्थप्रतिपादनपूर्वकं वाक्यार्थं वक्ष्यन्, तत्र अवान्तरपदभेदमाह प्रथमसूत्रेण (नमस्सु) इत्यादिना।

**मू।। (९६) नमस्सु - न एन्रुम् मः एन्रुम् इरण्डु पदम्।**

अत्र (नमः एन्गिर) इत्यनुक्त्वा नमस्सु इत्युक्तिः। अहिर्बुध्न्योक्तस्थूलयोजना प्रत्यभिज्ञानमुखेन अखण्डैकपदस्थापूर्वपक्षयुक्तिस्फोरणार्था। तथा च अहिर्बुध्न्येन स्थूलयोजनायां नमसः अखण्डत्वेन व्याख्याततत्वेऽपि, तदुक्तार्थस्य –

**[3]शाश्वती मम संसिद्धिरियं प्रह्वीभवामि यत्।**
**पुरुषं परमुद्दिश्य न मे सिद्धिरतोऽन्यथा।।**

इत्युक्त स्वयम्प्रयोजनप्रह्वीभावस्य [4]**नम इत्येव वादिनः** इति यावदात्मभाविनोः विरोधिनिवृत्तिमन्तरेणासम्भवात्। सूक्ष्मयोजनाप्रदर्शितदिशा सखण्डनमसा स्वस्वातन्त्र्यादिविरोधिनिवृत्तौ सत्यां तादृशप्रह्वीभावस्य स्वतः प्राप्तिसम्भवाच्च। **अपेक्षितविधेः अनपेक्षितविधानं दुर्बलम्। अनन्यलभ्यः शब्दार्थः** इत्यांदिन्यायैः सखण्डत्वाश्रयणमेवन्याय्यमिति भावः।

१. रामा.यु.का.३६-१५ २. रामा.सु.का.२१-२०
३. अहि.सं. ४. म.भा.शा.प.३३७-४०

अथ प्रतिषेधवाचिनो नञः प्रतियोगिवाच केव विना प्रतिपादनापूर्त्या **पद्यते अनेन इति पदम्** इति विशिष्टार्थप्रतिपादकत्वलक्षणं पदत्वमनुपपन्नमित्याशङ्कानिराकरणायाह (न एन्नुम्) इति।

अन्योन्याभावस्थले नञः प्रतियोगिवाचकपदवाच्यापेक्षया विशिष्टान्तरबोधकतायाः व्युत्पन्नत्वेन, नञः प्रत्येकपदत्वमुपपद्यत इति भावः। **घटो नास्ति** इति अत्यन्ताभावस्थले, घट एव नास्तित्वरूपावस्थान्तर विशिष्टः प्रतीयते। **घटो न** इति अन्योन्याभावस्थले तु, **घटः** इत्यनेन घटत्वविशिष्टम्, तत्समभिव्याहृतेन नञा पटत्वादि विशिष्टार्थान्तरञ्चेति अर्थद्वयं प्रतीयते। तद्वत् अत्रापीति भावः। अत एवोच्यते –

**[1]द्व्यक्षरस्तु भवेन्मृत्युः त्र्यक्षरं ब्रह्मणः पदम्।**
**ममेति द्व्यक्षरो मृत्युः न ममेति च शाश्वतम्।।**

अथ अहिर्बुध्न्येन परयोजनाप्रदर्शितरीत्या **मः** इत्यस्य द्विपदत्वव्यावर्तनार्थमाह (मः एन्नुम्) इति। स्थूलपरयोजनोक्तन्यूननाधिकसङ्ख्या व्युदासायाह (इरण्डुपदम्) इति।

अथ निषेध्यनिषेधपरयोः मकारनकारयोः आकाङ्क्षाविशेषमूलकान्वय**मुखेन** वाक्यार्थं वक्ष्यन्, तदुपोद्घाततया पदद्वयार्थस्वभावात् व्युत्क्रमान्वयः आवश्यक इति सूचयितुं प्रथमं षष्ठ्यन्तपदार्थमाह द्वितीयसूत्रेण (मः एन्गिर इत्यादिना)।

## मू।। (९७) मः एन्गिरवित्ताल् तनक्कुरियनेन्गिरतु

(मः एन्गिरवित्ताल्) सम्बन्धसामान्यवाचि षष्ठ्यन्तपदेनेत्यर्थः। (इत्ताल्) इति-इदं शब्देन सम्बन्धसामान्यवाचित्वोक्तेः फलं दर्शयति। (तनक्कुरियनेन्गिरतु, अरियन) इत्यत्र **मकारार्थ आत्मा** इति विशेष्यमभिप्रेतम्। तथा च तनक्कु इति स्वपदम् अध्याहारेण समभिव्याहृतविशेष्यपरम्।

(तनक्कुरियनेन्गिरतु) मन्त्रानुकरणरूपवाक्येन – **विवरणं विना मकारेण आत्मा स्वशेष इत्युच्यते।** इति व्याख्यात्रुवाक्यरूपेण विवरणं प्रयोगोपाधिभूतं, वक्तृत्वमुपलक्षणम् **आत्मा आत्मसामान्यशेषभूतो न भवति** इत्येव विवक्षितमिति

१. म.भा.शा.प.१३-४

सूचयितुम्। अत एव (इत्ताल्) तनक्कुम् पिर्रक्कुमुरित्तन्ने न्निरतु इति पूर्वमपि स्वशब्दप्रयोगः कृतः।

अत एव च (तनक्कुरियनन्नेन्निरतु, तनक्केन्नवन्नु) इति सूत्रद्वये स्वशब्द एव प्रयोक्ष्यते!(उरियनेन्निरतु) इत्यनेन षष्ठ्याः सम्बन्धसामान्यवाचित्वात् सम्बन्ध-सामान्यरूपेण योग्यत्वमेवात्रनिषेध्यम् अतः न बाध इति सूच्यते।

यद्यपि न (एन्नुम्, मः एन्नुम्) इति पूर्वसूत्रोक्तरीत्या मूलक्रमानुसारेण द्वितीयतृतीयसूत्रयोः व्युत्क्रम एव युक्तः। तथापि (न एन्नु-अत्तैत्तविर्क्किरतु) प्रतियोगिविशिष्टनिषेधस्यनञर्थत्वोक्तिः प्रतियोग्युक्तिं विना न सम्भवतीति सूत्रद्वयव्युत्क्रमेण प्रवृत्तौ मूलक्रमेण व्याख्यानेन (एन्नुतविर्क्किरतु) इत्येव स्यात्। तथा च नञो निषेधवाचित्वस्य लोकसिद्धतया तृतीयसूत्रं व्यर्थं स्यादित्यवधेयम्।

इत्थं निषेध्यस्वरूपं निर्णीय तत्फलीभूतमबाधितं निषेधं दर्शयति तृतीयसूत्रेण (न एन्नुवित्यादिना)।

## मू।। (९८) न एन्नु अत्तैत्तविर्क्किरतु

(न) इत्यव्ययरूपं पदम् - अस्मीत्यध्याहृतक्रिया पदसहितं सत्, स्वशेषत्व-योग्यतां निषेधतीत्यर्थः। (अत्तै) तनक्कुरियनेन्नुमत्तै। (तविर्क्किरतु) नास्तीति बोधयतीत्यर्थः।

इत्थं षष्ठ्यन्तस्य प्रतियोगिबोधकतया नञो निषेधबोधकतया, प्रतियोगि-विशिष्टवेषेण अभावस्य बोधनीयतया च व्युत्क्रमान्वयः आवश्यक इति सूचितम्। अथ व्युत्क्रमान्वयप्रदर्शनपूर्वकं वाक्यार्थमाह चतुर्थसूत्रेण (आगवित्यादिना)।

## मू।। (९९) आगनमः एन्निरवित्ताल् तनक्कुरिय नन्नेन्निरतु

(आग) मः एन्निरवित्ताल्-तनक्कुरियनन्गैयालुम्, न एन्नु-अत्तैत्तविर्क्कै-यालुमित्यर्थः। (नमः एन्निरवित्ताल्) एतादृशक्रमविशिष्टपदद्वयेनेत्यर्थः (तनक्कुरियन्) आत्मेति आदावध्याहारः। (तनक्कु) इति-स्वपदम्-अध्याहृतात्म-परम्। षष्ठ्यर्थोनिरूपकत्वम्। (उरियन्) शेषवृत्तियोग्य इत्यर्थः। (अन्नेन्निरतु) न भवतीत्युच्यत इत्यर्थः।

यद्यपि (तनक्कुरियनल्लातवन्नेन्गिरतु) इत्येव वक्तव्यम्, षष्ठ्याः सम्बन्धवाचित्वाभावात्। अत एव पूर्वसूत्रेऽपि तनक्कुरिमैयौच्चोल्लु किरतूत्येव वक्तव्यम्।

तथापि लाघवार्थमन्योन्याभावमुखेन फलितार्थकथनं कृतमिति न दोषः। घटो न भवतीति एतदपेक्षया योग्यो न भवतीत्यस्य लघुत्वात्, धर्मात्यन्ताव्यावस्य धर्म्यन्योन्याभावनियतत्वाच्च। अतः श्रोत्रुप्रतिपत्तिसौकर्याय, (उरियनेन्गिरतु, उरियनन्रे - न्गिरतु) इति च सम्बन्धिनिर्देशमुखेन अन्योन्याभावमुखेन विवरणं कृतमिति ध्येयम्।

ननु तर्हि स्वायत्तन्यायेन आत्मनो नेत्येव मन्त्रविन्यासः स्यादित्याशङ्क्य, अनादिदुर्वासनावशेन स्वशेषवृत्तिमसहमानं प्रति आत्मा देवतान्तरशेषो न भवति। **न हि कारागृहनिगलित एव, तन्मोचनमभ्यर्थनीयः** इति न्यायेन अनन्यार्हत्ववच न मनवसरपराहतं स्यात्। अतः स्वशेषत्वनिषेधे कृते भगवत्कटा-क्षविशेषेण **उपदेशो निरर्थकः** इति न्यायं विना स्वस्व अत्यन्ताऽज्ञानाशक्त्याद्यनु सन्धानेन स्वातन्त्र्यनिवृत्त्याकार्यार्थन्यायेन अन्यशेषत्वप्राप्तौ कारागृहनिगलितन्यायः प्राप्तावसर इति, स्वशेषत्वनिषेध एव अवश्यवक्तव्य इति, परिहारमभिप्रेत्य, तन्न्यायोपन्यासस्य अवसरं दर्शयति पञ्चमसूत्रेण (पिररक्कित्यादिना)।

**मू।। (१००) पिरर्क्कुरियनान वन्रु तन् वैलक्षण्यत्तक्काट्टिमीट्कलाम्।**

(पिरर्क्कु) स्वापेक्षया अन्यसामान्यस्येत्यर्थः। (उरियन्) इत्यनेन शेषवृत्ति-सम्मतिरेव योग्यतारूपत्वेन विवक्षिता। अन्यशेषत्ववृत्त्यर्हत्वस्य बाधितत्वेन कदाप्यभावात्। (आनवन्नु) कार्यार्थन्यायेन अन्यशेषवृत्तिसम्मतिदशायामित्यर्थः। (तन् वैलक्षण्यत्तैक्काट्टि) अत्र (मीट्कलाम्) इति वक्ष्यमाणनिवर्तनक्रियायां कर्तृसमर्पकतया ईश्वरेण इति अध्याहार्यम्। तथा च तान् इति पदम् अध्याहृ-तेश्वरपदम्। तथा च **जायमानं हि पुरुषम्** इत्याद्युक्तस्वकटाक्षविशेषसहकृतेन [१]**अनपहतपाप्मा वा अहमस्मि अपहतपाप्मा दिव्यो देव एको नारायणः** इत्याद्युपदेशेन देवतान्तरापेक्षया भगवतः सर्वथा अत्यन्तोत्कर्षं प्रदर्श्येत्यर्थः। (मीट्कलाम्) जीवो देवतान्तरशेषत्वात् निवर्तयितुं योग्य इत्यर्थः।

---

१. वेदार्थसारसङ्ग्रहः

अथ स्वशेषत्वदुर्वासनादृढिमदशायाम् अन्यशेषत्वनिवृत्त्युपदेशोऽनवसर-दुस्थ इत्यभिप्रायेणाह षष्ठसूत्रेण (तनक्केन्नवन्नित्यादिना)।

**मू।। (१०१) तनक्केन्नुमन्रु योग्यतैयुम् कूडवळियुम्**

(तनक्केन्नवन्नु, आत्मातनक्कुरियन्) इत्येवं रूपायाम् **उपदेशो निरर्थकः** इति दशायामित्यर्थः। (योग्यतैयुम् कूड) अन्यशेषत्वफलोपदानेन सह अन्यशेषत्व-सम्मतिरूपयोग्यतापीत्यर्थः। (अलियुम्) न सम्भवतीत्यर्थः। अतः तादृशयोग्यता विरोधिस्वशेषत्वनिवृत्तिरवश्यंवक्तव्येति भावः। तस्मात् (ओरुजीवनुक्कु ओरुजीवन् तञ्जमल्लन्) इत्येवमादिरूपेण मन्त्रविन्यासः न कृतः इति स्थितम्।

**।। इति श्रीशुद्धसत्त्वरामानुजार्यविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयपादे नमश्शब्दार्थसमर्थनं नाम द्वितीयाधिकरणम् समाप्तम्।।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

# प्रथमाध्याये तृतीयपादे
# नमश्शब्दप्रयोजनसमर्थनं नाम
# तृतीयाधिकरणम्

ननु भगवन्मुखोल्लासः परमपुरुषार्थः। तत्साधनं गुणानुभवजनितप्रीतिकारितकैङ्कर्यमिति वा, कैङ्कर्यमेव तादृशं भगवत्प्रियतमतया परमपुरुषार्थः, तत्साधनम् अयनपदार्थभूतसिद्धोपाय इति वा प्रणवस्य पुरुषार्थतत्साधनपरत्वं पूर्वपादीय प्रथमाधिकरणन्यायेन युज्यते। केवलभगवन्मुखोल्लासार्थकैङ्कर्यफलोपधानस्य प्रार्थनीयत्वोक्त्या तृतीयपादस्यापि तन्न्यायेन तत्सम्भवति। तथापि उकारनमश्शब्दयोस्तु तदसम्भवः। उकारनमश्शब्दार्थफलीभूतान्यशेषत्वनिवृत्तेः स्वयं प्रयोजनरूपत्वाभावात्। क्षुद्रफलार्थे देवतान्तरप्रीत्यर्थप्रवृत्तेः तत्तद्देवताकर्मणां तत्तत्फलसाधनत्वविध्यनुसारेण त्रिवर्गार्थिषु सम्भवाच्च। तस्मात् अनन्यार्हत्वोक्तिः व्यर्था इत्याशङ्क्य निराक्रियते।

तत्र संशयः - उकारनमश्शब्दयोः प्रयोजनपर्यवसानं सम्भवति, न वेति। तदर्थमनन्यार्हत्वविरोध्यन्यशेषत्वं भगवच्छेषत्वविरोधि, न वेति। तदर्थं तस्य विरोधित्वेन सम्बन्धसामान्योक्तिः विरुध्यते, न वेति। तदर्थं स्वरक्षणान्वयः स्वभोगन्वयश्च चेतनस्य भगवद्रक्षणे विरोधीनवेति। तदर्थम् अन्यशेषत्वस्वरक्षणस्वभोगान्वयनिवृत्तीनां हेतुत्वे सुषुप्ति प्रलययोः अतिप्रसङ्गोऽस्ति, न वेति। तथा अन्यशेषत्वादीनां विरोधित्वेहेतुत्वे च उपबृम्हणमस्ति न वेति च।

## तत्र पूर्वपक्षः

उकारनमश्शब्दयोः प्रयोजनपर्यवसानं न सम्भवति। उकारनमश्शब्दफलीभूतान्यशेषत्वनिवृत्तेः स्वयम्प्रयोजनरूपत्वाभावात्। प्रत्युत अन्यशेषत्वस्य त्रिवर्गादिषु प्रधानपुरुषार्थहेतुतायाः अपवर्गार्थिषुविद्यानिष्पादनाद्यर्थाऽऽरोग्यकरणपाटवदीर्घायुष्यादिप्रयोजनहेतुतायाः, निष्पन्नविद्येष्वपियावन्मोक्षभाव्याज्ञानुज्ञान-

कैङ्कर्याद्यर्थतादृशपुरुषार्थहेतुतायाश्च [१]**आरोग्यं भास्करादिच्छेत् श्रेयमिच्छेत् हुताशनात्**।

**शङ्करात् ज्ञानमन्विच्छेत्** [२]**पश्येम शरदश्शतम्, जीवेम शरदश्शतम्** [३]**आयुराशास्ते सुप्रजास्त्वमाशास्ते** [४]**अन्नवानन्नादो भवति** इत्यादि बहुप्रमाणसिद्धत्वेन तन्निवृत्तेः इष्टसाधननिवृत्तिरूपतया द्विष्टत्वादनर्थपर्यवसानस्य दुरपह्नवत्वात्।

न च प्रयोजनान्तररहितानां परमैकान्तिनां प्रयोजनान्तरार्थान्यशेषत्वस्य प्रतिकूलत्वात् तन्निवृत्तिः इष्टतया तादृशाधिकारिविषये प्रयोजनपर्यवसानं शंक्यम्। [५]**मत्पादभक्तितज्ज्ञानाभ्यां फलमन्यत्कदाचन** [६]**सर्वान् देवान् नमस्यन्ति रामस्यार्थे यशस्विनः** इत्यादि प्रमाणानुसारेण पारमैकान्त्यान्तर्गतप्रयोजनान्तरनिवृत्तेः मोक्षानुकूलज्ञानभक्तिभगवद्भागवतसमृद्ध्यादिप्रयोजनविशेषव्यतिरिक्तप्रयोजनान्तरविषयत्वसिद्ध्या भगवद्ज्ञानाद्यर्थ देवतान्तरशेषतायाः, इष्टसाधनरूपत्वानपायात्।

न च अन्यशेषत्वस्य भगवच्छेषत्वविरोधित्वात् तन्निवृत्तेः पुरुषार्थरूपत्वं शङ्क्यम्। [७]**पिरर्क्कुरियनानवन्नु तन् वैलक्षण्यत्तैक्काट्टि मीट्कलाम्** इति स्ववचनविरोधात्। चैत्रमैत्रादेः स्वस्वमातृपितृगुरुप्रभृतिनानाव्यक्तिशेषत्वानां युगपद्दर्शनेन तन्न्यायेनैव देवतान्तरशेषत्वभगवच्छेषत्वयोः यौगपद्यसम्भवेन विरोधाभावाच्च। अपि च कर्तृत्वेन यागशेषभूतस्यैव पुरुषस्य अधिकारित्वेनाकारेण यागशेषितायाः तद्द्वारा कर्तृभूतस्वशेषितायाश्च तान्त्रिकसम्प्रतिपन्नत्वेन तन्न्यायेन भगवदाराधनन्यासोपासनकर्तृतया भगवच्छेषभूतस्यैव चेतनस्य तदाराधनजन्यफलभोक्तृत्वेनाकारेण स्वशेषितायाः अपि दुरपह्नवत्वेन भगवच्छेषत्वतदन्यशेषत्वयोः विरोधाभावाच्च, एतेन स्वशेषत्वरूपान्यशेषत्वस्य भगवच्छेषत्वविरोधित्वमित्यपि परास्तम्।

किञ्च उकारनमश्शब्दयः स्वशेषत्वपर्यन्तान्यशेषत्वनिवर्तकत्वे रहस्यशास्त्राप्रामाण्यप्रसङ्गो दुरुद्धरः।

[८]**निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट्।**
**भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते।।**

---

१. मात्स्य.पु.६७-४१ २,३.यजुर्वेदे ४. तै.उ.भृ.व.६ ५. यजुर्वेदे
६. रामा.अयो.का.२-५२ ७. श्री.व.भू. ८. श्रीभाष्ये.जिज्ञा.

इत्यनुगृहीतरीत्या मोक्षकामस्यैव रहस्यशास्त्रश्रवणाद्याधिकारितया तस्य स्वशेषत्व-सामान्यनिषेधे स्वशेषित्वकार्यमोक्षरूपफलस्वाम्यानुसन्धानलक्षणाधिकारस्यैवा-सम्भवेन अधिकारिरहितस्य तस्य प्रामाण्ययोगात्। अपि च अमात्यादीनां राजदत्त-स्वातन्त्र्यवत् जीवस्य तत्तत्साधनानुष्ठानतत्तत्फलभोगविषयेषु भगवदधीनस्वातन्त्र्य-सद्भावस्य [1]**स्वतन्त्रः कर्ता** [2]**कर्ता शास्त्रार्थवत्त्वात्, शास्त्रफलं प्रयोक्तरि** [3]**स्वस्वराड् भवति** [4]**न तत्र पर्येति जक्षन्, क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा** इत्यादि बहुप्रमाणसिद्धत्वेन नमश्शब्देन जीवस्वातन्त्र्यनिषेधे तद्बाधस्य वज्रलेपत्वाच्च।

अथ षष्ठ्यन्तमकारस्य स्वस्वत्वपरताया एव प्रथयमः प्रतीयमानतया तत्परित्यागे नियामकाभावाच्च –

[5]**समित्साधनकादीनां यज्ञानां न्यासमात्मनः।**
**नमसा यो करोद्देवेनस्वध्वर इतीरितः।।**

इति नमश्शब्दस्य आत्मयागे विनियुक्तत्वेन तदनुसारेण परदेवतामुद्दिश्य आत्मह-विस्त्यागात्मकात्मयागान्तर्गतस्वस्वत्वनिवृत्तिपरतायाः नमश्शब्दस्य अवश्य-वक्तव्यत्वेन अर्थान्तराश्रयणस्य तद्विरुद्धत्वात् अहिर्बुध्न्यसंहितायां नमश्शब्दस्थूल-योजनायां न्यासपरत्वमुक्त्वा सूक्ष्मयोजनायां मोक्षोपायाधिकारिणः अवश्यापेक्षितं निरपेक्षस्वातन्त्र्यादिनिवृत्तिपूर्वकस्वरूपशोधनं विधाय, अनन्तरं परयोजनायां साध्योपायविशेषवशीकार्यस्य परयोजनायां साध्योपायविशेषवशीकार्यस्य प्राप्यभूत-सिद्धोपायस्य वा उपायान्तरापेक्षया समर्पणस्यैव वा प्राधान्याभिधाने नमश्शब्दस्य साध्यैकपरतया तादृशस्य तस्य स्वस्वातन्त्र्यसामान्यनिवृत्तिपरतायाः असम्भवदुक्ति-कत्वात्, **स्वतन्त्रः कर्ता** इत्युक्तकर्तृनिरपेक्षस्य साध्योपायस्य स्वातन्त्र्यमन्तरा अनुपपन्नत्वात्। एवम् –

[6]**यस्सदेवो मयादृष्टः पुरा पद्मायतेक्षणः।**
**स एव पुरुषव्याघ्रस्सम्बन्धी ते जनार्दनः।।**

---

१. पा.सू. २. ब्र.सू.२-३-३३ ३. छा.उ.७-२५-२
४. छा.उ.८-१२-३ ५. अहि.सं.३६-४१ ६. म.भा.अ.प.९२

**सर्वेषामेव लोकानां पिता माता च माधवः।**
**गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभाः।।**

इत्युपदेशं श्रुत्वा -

[1]**एवमुक्तस्त्रयः पार्थ ! यमौ च भरतर्षभाः।**
**द्रौपद्या सहितस्सर्वे नमश्चक्रुर्जनार्दनम्।।**

इति तदनुष्ठानदशायां नमस्कारप्रयोगोक्तेः, दमयन्तीवृत्तान्ते -

**शरणं प्रति देवानां प्राप्तकालममन्यत।**

इत्युपक्रम्य, **वाचा च न मनसा चैव नमस्कारं प्रयुज्य सा** इत्युक्तेश्च शरणागतिस्थानपाठरूपाल्लिङ्गात् **नमस्कारात्मकं यस्तु विधायात्मनिवेदनम्** इति वचनान्तराच्च नमश्शब्दस्य शरणागतिरूपसाध्योपाय वाचकताया दुरपह्नवत्वेन तस्य स्वस्वतन्त्र्यसामान्यनिवृत्तिपरताया अनुपपन्नत्वाच्च।

अपि च प्रणवप्रतिपन्नस्य रक्ष्यरक्षकभावसम्बन्ध विषये किञ्चिदुपायसापेक्षत्वात्, चरमपदप्रतिपन्न कैङ्कर्यप्रार्थनायाश्च साधनफलप्रार्थनारूपत्वेन तस्याश्च साधनानुष्ठानमन्तरा अनुपपन्नत्वाच्च। पूर्वोत्तरपदसमभिव्याहारबलेनापि नमश्शब्दस्य उपायानुष्ठानपरताया दृढीकृतत्वेन तत्र स्वस्वातन्त्र्यसामान्य निषेधोऽनुपपन्नः। परं च प्रणवघटकमकारे नमः पदघटकमकारे च ज्ञातृत्वोक्त्या ज्ञातृत्वेनैव [2]**कर्ता शास्त्रार्थवत्त्वात्** इत्यधिकरणोक्तन्यायेन कर्तृत्वलक्षणस्वातन्त्र्यसिद्धेः, चरमपदे फलप्रार्थनोक्त्या **शास्त्रफलं प्रयोक्तरि** इति न्यायेन प्रयोक्तृत्वसिद्ध्या च पूर्वोक्तोत्तरपदानां सर्वेषां स्वस्वातन्त्र्याक्षेपतया तन्मध्यघटकेन नमश्शब्देन स्वस्वातन्त्र्यनिषेधो बाधित एव। अपरञ्च नमश्शब्दस्य स्वशेषत्वनिवृत्तिपरत्वे वैयर्थ्यं दुर्वारम् । अन्यशेषत्वनिवृत्तिपरेण प्रणवघटकोकारेणैव अन्यान्यतमस्वशेषत्वस्यापि स्वस्मिन्निर्वर्तितया पुनः नमश्शब्दे तन्निवर्तनायोगात्।

न च गोबलीवर्दन्यायादुकारस्य नमश्शब्दनिवारिता न्यशेषत्वव्यतिरिक्तविषयत्वात् न दोष इति वाच्यम्। नमश्शब्दस्य स्वशेषत्वात्मकान्यशेषत्वविशेष-

१. म.भा.आर.प.५४-१६ २. ब्र.सू.२-३-३३

निषेधपरत्वसिद्धौ गोबलीवर्दन्यायादुकारस्य तद्व्यतिरिक्तविषयत्वसिद्धिः, उकारस्य स्वशेषत्वव्यतिरिक्तन्यशेषत्वमात्रनिवर्तकत्वसिद्धौ नमः पदस्य स्वशेषत्वनिवृत्तिपरत्वसिद्धिः इति अन्योन्याश्रयात्।

न च उकारस्य अन्यशेषत्वसामान्यनिवर्तकत्वेऽपि तत्र स्वदेहादिनिरुपितस्वामित्वस्य अव्यावर्तितत्वेन तद्व्यावर्तकतयानमश्शब्दसार्थक्यमिति वाच्यम्। स्वस्य स्वम्प्रति शेषत्वाभावग्राहकेन उकारेणैव [1]**यस्यैते तस्य तद्धनम्** इति न्यायेन स्वापेक्षया देहादेः स्वत्वाभावस्यापि सिद्धत्वेन तदयोगात्।

नापि स्वशेषित्वस्वदेहादि स्वामित्वापेक्षया अतिरिक्तस्य स्वनिर्वाहकत्वात्मकस्वस्वातन्त्र्यस्य नमश्शब्देन निषेधात् तत्सार्थक्यम्। स्वस्य भगवत्सापेक्षस्वनिर्वाहकतायाः [2]**कर्ता शास्त्रार्थवत्त्वात्** [3]**शास्त्रफलं प्रयोक्तरि** इत्यादिसिद्धत्वेन तन्निषेधे बाधात्। ईश्वरनिरपेक्षनिर्वाहकतायाः [4]**अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा,** [5]**आत्मानमन्तरो यमयति** इत्यादिभिः भगवतः रणत्वादिप्रतिपादकाकारेण च निषेधसिद्धेश्च तदयोगात्। न हि भगवत्परत्वं श्रुतवतः स्वस्य भगवन्निरपेक्षनिर्वाहकत्वशङ्का स्यात्। येन तन्निवारकतया नमश्शब्दसार्थक्यम्। तस्मात् नमश्शब्दस्य उकारविवरणत्वपक्षे शब्दस्वारस्य भङ्गप्रकरणविरोधार्थबाधवैयर्थ्यादि दोषा दुष्परिहरा एव।

ननु श्रीमदष्टश्लोक्याम् —

**अकारार्थायैव स्वमहमथमह्यं न निवहा**
**नराणां नित्यानामयनमिति नारायणपदम्।**
**यमाहास्मै कालं सकलमपि सर्वत्र सकला**
**न्वयस्थास्वाविस्युर्मम सहजकैङ्कर्यविधयः ।।**

इति श्लोकक्रमेण मूलमन्त्रपदत्रायर्थविवरणरूपे नमश्शब्दस्य स्वशेषत्वनिवृत्तिपरत्वप्रदर्शनात्, सम्बन्धसामान्यविषयिण्यामकारोत्तरष्ठ्याः शेषत्वरूपविशेषपरत्वाश्रयणे अवश्यं नमश्शब्दस्य स्वशेषत्वनिषेधपरत्वं वक्तव्यम् । तथा च सम्प्रदायबलात् पूर्वोक्तदोषाणां दोषाभासत्वमेवेति चेन्न।

---

१. महा.भा.उ.प. २. ब्र.सू.२-३-३३ ३. पू.मी.३-७-१८
४. यजु.आर.३-११ ५. बृह.उ.५-७-२२

**मन्त्रब्रह्मणि मध्यमेन नमसा पुंसस्स्वरूपं गति-**
**र्गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपिस्थानतः।।**

इति श्लोके नमश्शब्दस्य भरन्यासाद्युपाय परतायाः अनुगृहीतत्वेन अस्मदुक्त-स्वारसिकयोजनायामेव श्रीपराशरभट्टपादानां मुख्यतात्पर्यसिद्धेः। उपायस्यैव स्वस्थानस्थितनमश्शब्दार्थत्वात्। **अकारार्थायैव स्वमहमथमह्यं न** इत्युक्तिस्तु प्रणवार्थानुसन्धानमात्रपरैव। स्वरूपानुकैङ्कर्यप्रार्थनायाः स्वरूपानुसन्धानपूर्वकत्वावश्यम्भावेन कैङ्कर्यप्रार्थनावसरे चरमपदे स्वरूपपरप्रणवार्थमात्रस्यैवानुसन्धेयत्वात्। तस्मात् **अथ मह्यं न** इत्युक्तेरुकारस्य नमश्शब्दसामभिव्याहारबलल्भ्यार्थासङ्कोचतात्पर्यकत्वप्रदर्शनमात्रार्थत्वेन नमश्शब्दार्थशिक्षणपरत्वाभावान्नोक्तरीत्यासम्प्रदायबलात् पूर्वोक्तदोषाणां दोषाभासत्वसिद्धिः।

अथ स्यात्, नमश्शब्दस्य विरोधिनिवृत्तिपरत्व एव शब्दस्वारस्यम्। विरोधिभूतसम्बन्धसामान्यपरतया तदानीमेव षष्ठीस्वारस्य सिद्धेः। न तावत् स्वात्मात्मीयापेक्षया शेषशेषिभाववत् रक्ष्यरक्षकभाव भोक्तृभोग्यभावावपि विरोधिभूतावेव। तयोः क्रमेण उपायोपेयविरोधित्वात्। तदेवं विरोधिसामान्यनिवृत्तिपरत्वे सत्येव नमश्शब्दस्वारस्यम्। आत्मयागपरत्वेतु सम्बन्धसामान्यपरायाः षष्ठ्याः स्वत्वरूपविशेषमात्रपरत्वेन अस्वारस्यम् परिग्रहरूपार्थासङ्कोचाभावात्। एवं शरणागतिस्थानेनमश्शब्दप्रयोगोऽपि नमश्शब्दस्य विरोधिसामान्यनिवृत्तिपरत्वएव उपपद्यते। **भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिः प्रपत्तिः** इति श्रीराममिश्रदिव्यसूक्त्या शरणागतेः विरोधिनिवृत्तिरूपतायाः सिद्धत्वेनक्लुप्तयैव वृत्त्यानमश्शब्दस्य तत्परत्वोपपत्तेः। साध्योपायरूपविद्याविशेषपरत्वे तु शक्त्यरन्तरं कल्पनीयमिति अस्वारस्यमितिचेत् न।

मूलमन्त्रे प्रथमचरमपदयोः स्वरूपप्राप्ययोः प्रस्तुतत्वेन तन्मध्यगते **नमः** पदे तादृशपूर्वोत्तरपदसमभिव्याहारबलेन स्वरूपप्राप्यविरोधिनोः निषेधसम्भवेऽपि नमश्शब्दस्य उपायपरत्वाभावे उपायस्यैवाप्रस्तुतत्वेन तत्र तद्विरोधिनिषेधायोगात्। शरणागतेः भगवत्प्रवृत्तिविरोधिस्वप्रवृत्तिनिवृत्तिमात्ररूपत्वे सुषुप्तिप्रलययोः सर्वेषां शरणागतत्वापत्त्या सर्वमुक्तिप्रसङ्गाच्च।

किञ्च स्वरक्षणस्वभोगान्वययोः भगवत्प्रवृत्तिविरोधित्वमपि दुरुपपादम्। भगवत्कर्तृकरक्षणोपायानुष्ठानरूपस्य चेतनकर्तृकस्वरक्षणान्वयस्य भगवत्कर्तृक-रक्षणापेक्षितप्रसादहेतुत्वात्, तद्वैषम्यनैर्घृण्यपरिहारकत्वाच्च भगवत्प्रवृत्त्यनुकूलतायाः दुरपह्नवत्वात्। एवं चेतनकर्तृकस्वभोगान्वयस्यापि [1]**उदारास्सर्व एवैते** इत्युक्तरीत्या रक्षकगतौदार्यगुणप्रकाशकत्वात्, सार्वभौमलीलाशुकक्षीरास्वादनन्यायेन भगवदा-नन्दहेतुत्वाच्च। तदनुकूलतायाः दुरपह्नवत्वाच्च।

अपि च यदि स्वरक्षणस्वभोगान्वययोः नमश्शब्देन निषेधः स्यात्। तदा चेतनानाम् अचेतनवैलक्षण्यं, तद्रक्षणे नमश्शब्देन निषेधः स्यात्। तदा चेतनानाम् अचेतनवैलक्षण्यं, तद्रक्षणे तद्रक्षणवैलक्षण्यञ्च लोकवेदसिद्धं भज्येत। चेतनानां चैतन्यकार्योपायोपेयान्वयाभावे चैतन्यस्यैवासिद्धिप्रसङ्गात्। इष्टप्रापकत्वानिष्ट-निवर्तकत्वरूपं चेतनरक्षावैलक्षण्यञ्च चेतनस्य फलान्वयमन्तरादुरुपपादम्।

अथ **भगवान्तरमभावः** इति रीत्या अन्यशेषत्वस्वरक्षणस्वभोगान्वय-निवृत्तीनां ज्ञानविशेषरूपत्वाश्रयणेन चेतनानाम् अचेतनवैलक्षण्यादिकमुपापदयितुं शक्यत इति चेन्न। तथा सति तादृशज्ञानविशेषाणामेव चेतनरक्षणहेतुत्वसिद्ध्या, स्वरक्षणे स्वान्वयप्रसङ्गात्।

न च सिद्धान्ते सत्यां सामग्र्यां प्रतिबन्धकबलात् कार्यानुत्पाद इति प्रामाणिकव्यवहारानुसारेण प्रतिबन्धकाभावस्य कार्यसामग्रीकोट्युत्तीर्णत्वाङ्गी-कारात्, सामग्रीकालीनकार्यानुत्पादप्रयोजकत्वं प्रतिबन्धकत्वमिति प्रतिबन्धकलक्षणा-ङ्गीकाराच्च, प्रतिबन्धकाभावमात्राकानां निरुक्तज्ञानविशेषाणां हेतुत्वासम्भवात् न तदन्वयस्य स्वरक्षणान्वयरूपत्वमिति वाच्यम्। प्रतिबन्धकाभावस्य हेतुत्वा-ङ्गीकारपक्षे स्वरक्षणे स्वान्वयप्रसङ्गस्य अपरिहरणीयत्वात्।

न स्वस्वरूपप्राप्यस्वरूपैतदुभयानन्तर्गताऽदृष्टद्वारकफलसाधनगोच-व्यापारान्वयस्यैव स्वरक्षणान्वयशब्दार्थत्वात्, विरोधित्रयनिवृत्तिरूपाणां ज्ञानाविशे-षाणां यथावस्थितस्वस्वरूपाविर्भावान्तर्गततया यावदात्मभाविप्राप्यरूपत्वाच्च न दोष इति वाच्यम्। मुक्तिदशायां [2]**स यदि पितृलोककामोभवति सङ्कल्पादेवा-**

---

१. भ.गी.७-१२ २. छा.उ.८-२-१

**स्यपितरः समुत्तिष्ठन्ति** इत्यादिषु चेतनस्य पितृलोकसृष्ट्यादि रूपस्वभोगोद्देश्यक-प्रवृत्तेः [1]**सोऽश्नुते सर्वान् कामान्**, [2]**जक्षन् क्रीडन् रममाणः** इत्यादिषु स्वप्रवृत्त्युद्देश्य भोगाश्रयतायाः [3]**यथाक्रतुरस्मिन् लोके पुरुषोभवति तथेतः प्रेत्य भवति** इत्यदृष्टद्वारकफलसाधनगोचर कृत्यनुवृत्तेश्च प्रतिपन्नतया स्वशेषत्वादि सामान्यनिवृत्तेः यावदात्मभावि प्राप्यान्तर्गतत्वोक्तेः अप्रामाणिकत्वात्।

न च [4]**द्व्यक्षरस्तु भवेन्मृत्युः** इत्यादिवचनस्य अत्र प्रमाणत्वं शङ्क्यम्।

**सर्वं मृत्युपदं जिह्ममार्जवं ब्रह्मणः पदम्।**
**एतावान् ज्ञानविषयः किं फलापः करिष्यति।।**

इति वचनान्तरानुगुण्येन नमश्शब्दस्य ज्ञातव्यसर्वसाध्योपायसारभूतन्यासविद्याप्रतिपादकतया सारतमत्वमात्रतात्पर्यकत्वसिद्ध्यातदयोगात् तत्र हि आत्मापहार-प्रायश्चित्तात्मकभरसमर्पणाननुष्ठानरूपजिह्मशब्दार्थस्य संसारानुवृत्तिप्रयोजकत्वोक्ति-पूर्वकं तदनुष्ठानरूपार्जवस्य ब्रह्मप्राप्तिहेतुमुक्त्वा **एतावान् ज्ञानविषयः** इति भरन्यासस्यैव ज्ञातव्यसर्वार्थसारत्वमुक्त्वा (किं प्रलापः करिष्यति) इति तद्व्य-तिरिक्तपरवचनानाम् असारत्वमुच्यते। तस्मात्, तदैकार्थाय –

**द्व्यक्षरस्तु भवेन्मृत्युः अक्षरं ब्रह्मणः पदम्।**
**ममेति द्व्यक्षरो मृत्युः न ममेति च शाश्वतम् ।।**

इति वचमस्यापि ज्ञातव्यसारार्थप्रतिपादकतया नमश्शब्दप्रशंसामात्रपरत्वावश्यं भावेन तस्य मोक्षदशायां ममकारसामान्यनिवृत्तिपरत्वसिद्ध्या प्रकृतार्थप्रामाण्यम-सम्भावितमेव।

तदेवं ममकारसामान्यनिवृत्तेः स्वरूपान्तर्गततया पुरुषार्थत्वे मानाभावात्, **द्व्यक्षरस्तु भवेन्मृत्युः** इत्यादीनां भरन्यासरूपसाध्योपायप्रशंसापर्यवसानात्, साध्योपायविशेषाननुष्ठानरूपजिह्मशब्दितकौटिल्यात्मकमस्य निवृत्तेः साध्यो-पायानुष्ठानरूपत्वावश्यं भावेन तस्यैव नमश्शब्दार्थत्वौचित्यात्, साध्योपायानुष्ठानं विनाकेवलस्वशेषत्वादिनिवृत्तिमात्रस्य प्रपत्तिशब्दार्थतया दृष्टविधया फलहेतुत्वोक्तौ सुषुप्तिप्रलययोः प्रयोजनतायाः सम्प्रतिपन्नत्वाच्च।

---

१. तै.उ.आ.व.२-२ २. छा.उ.८-१२-३ ३. छा.उ.३-१४-१ ४. महा.भा.शा.प.१३-४

न च आरोग्यं भास्करादिच्छेत् इत्याद्युक्त भास्करादिशेषतायाः सर्वाधिकार्यपेक्षितफलसाधनतया तन्निवृत्तिः अनर्थरूपतावचनं युज्यते। भास्कराद्याराधकानामपि [१]**तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम्** [२]**लभते च ततः कामान् मयैव विहितान् हि तान्** इत्यादिभिः फललाभस्य वस्तुतः भगवदाराधनाधीनत्वोक्त्या, देवतान्तरशेषत्वस्य अन्यथा सिद्धत्वेन फलहेतुत्वायोगात्। प्रत्युत -

[३]**ब्रह्माणं शितिकण्ठिञ्च याश्चान्या देवताः स्मृताः।**
**प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम्।।**

[४]**न तु मामभिजानन्ति तत्वेनातः च्यवन्ति ते**
[५]**पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः।**
**रजसा तमसा चास्य मानसं समभिप्लुतम्।।**

इत्यादिभिः देवतान्तरशेषतायाः तदन्तर्यामिदीयमानफलगताल्पत्वास्थिरत्वहेयत्वादिदोषमात्रप्रयोजकतयात्रिवर्गार्थ्यपेक्षयापि अनर्थापहत्वानपायेन तन्निवृत्तेः पुरुषार्थरूपतायाः दुरपह्नवत्वाच्च। एतेन देवतान्तरशेषतायाः मोक्षानुकूलज्ञानादिहेतुतया मुमुक्षुजनाभिमतत्वमपि प्रत्युक्तम्।

[६]**जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।**
**सात्विकस्स तु विज्ञेयः स वै मोक्षार्थचिन्तकः।।**

[७]**महान् प्रभुर्वै पुरुषस्सत्वस्यैष प्रवर्तकः।**
[८]**ददामि बुद्धियोगं तं येन मामुपयान्ति ते।**

इत्यादिना तस्य भगवदसाधारणत्वोक्तेः। किञ्च, भावनात्रयान्वयादिना रजोगुणादिप्रयुक्ताहङ्कारादिनाच अशुद्धानां देवतान्तराणां प्रसक्तानुप्रसक्तनामग्रहणस्यापि अशुद्धिरुपतायाः श्रीहरिवंशे भगवता बादरायणेन -

[९]**असत्कीर्तनकान्तारपरिवर्तनपांसुलाम्।**
**वाचं हरिकथालापगङ्गयैवपुनीमहे।।**

इति दर्शितत्वेन तादृशदेवतान्तरशेषतायाः मुमुक्षुजनाभिमतत्वायोगाच्च।

---

१. भ.गी.६-२३ २. भ.गी.७-२२ ३. म.भा.शा.प.३५८ ४. भ.गी.९-२४
५,६. म.भा.शा.प.३५-८ ७. श्वेता.उ.३-१२ ८. भ.गी.१०-१० ९. हरिवंशे

न चैवम् [1]**सर्वान् देवान् नमस्यन्ति रामस्यार्थे यशस्विनः** इत्यादिविरोधः। तादृशान्यदेवताभजनस्य नः। **अत्यन्तभक्तियुक्तानां नैव शास्त्रं न च क्रमः** इत्युक्ता पुरुषतन्त्रभक्तिभूमामत्ताऽज्ञानकार्यतया केवलभगवत्सौन्दर्यादिरूपविषयदोष-प्रयुक्तत्वेन अदोषत्वेऽपि स्वयं प्रयोजनार्थं देवतान्तरशेषतायाः आश्रयदोषजन्यायादोष-रूपतया तन्निवृत्तेः पुरुषार्थत्वोक्तौ विरोधाभावात्।

न च अन्यशेषत्वस्य भगवच्छेषत्वानुकूलतायाः (पिरर्क्कुरियनानवन्रु) इत्यादि नोक्ततया तद्विरोधः। अन्यशेषत्वस्य स्वास्वातन्त्र्यनिवृत्तिरूपत्वेनाकारेण भगच्छेषत्वानुकूलत्वे सत्यपि भगवदन्यशेषत्वेन रूपेण तस्य भगवच्छेषत्वविरोधि-त्वोपपत्तेः।

न च लोकवेदयोः एकं प्रतिशेषभूतस्यैव तदितरशेषत्वस्यापि दर्शनात्, तन्न्यायेन भगवच्छेषत्वान्यशेषत्वयोः विरोधसम्भवः। प्रणवे लुप्तचतुर्थ्युक्तभगव-च्छेषत्वस्य सङ्कोचकाभावेन सर्वात्मनाचेतनानां भगवच्छेषत्वसिद्ध्या केनचिदा-कारेण तदन्यशेषतायाः तद्विरुद्धत्वात्। न चैवं प्रत्यक्षादि विरोधः। शास्त्रबलेन प्रत्यक्षादिसिद्धान्यशेषत्वादीनां कर्मोपाधिकत्वसिद्धेः सर्वात्मना भगवच्छेषत्वार्हत्व-स्यैवलुप्तचतुर्थ्यर्थत्वेन तस्य शास्त्रैकगम्यतया तस्य प्रत्यक्षादिभिः बाधायोगाच्च।

एतेन यागादिकर्तृयजमानदृष्टान्तेन ब्रह्मविद्यानिष्ठानां स्वशेषत्वानुमानं परास्तम्। चेतनानां सर्वात्मना भगवच्छेषत्वग्राहकलुप्तचतुर्थीस्वारस्येन तस्य बाधितत्वात्। भगवच्छेषत्वान्ययोगव्यवच्छेदकप्रणवघटकोकारतद्विवरणनमश्शब्दाभ्यां लुप्तचतुर्थ्यर्थाऽसङ्कोचस्य दृढीकृतत्वेन तादृशप्रबलप्रमाणविरुद्धानां स्वशेषत्वसाध-कतर्काणां तर्काभासमात्रत्वात्।

न च चेतनानां स्वशेषत्वनिषेधे रहस्यशास्त्रस्य अधिकारिदौर्बल्याद-प्रामाण्य प्रसङ्गः लोके विषयान्तरे गुणकृतदास्यवतां प्राणप्रहाणेनापि अतिशयाधानस्य सुप्रसिद्धतया तन्न्याये न केवलपरातिशयाधानरूपकैङ्कर्येच्छयैव स्वस्वरूपयाथात्म्य-ज्ञानिनां प्रवृत्त्युपपत्तेः।

---

१. रामा.अयो.का.२-५२

न च **स्वतन्त्रः कर्ता, कर्ता शास्त्रार्थवत्त्वात्** [1]**शास्त्रफलं प्रयोक्तरि** [2]**स स्वराड् भवति** [3]**न तत्र पर्येति जक्षन् क्रीडन् रममाणः** इत्यादिभिः चेतनस्य साधनानुष्ठानाद्यर्थस्वातन्त्र्यावगमात्, अत्र तन्निषेधविरोधः। **स्वतन्त्रः कर्ता** इत्यनुशासनस्य कर्मसंज्ञारहितकर्तृमात्रविषयत्वेन तस्य भगवदेकनियाम्यस्वरूपविषत्वायोगात्। न हि प्रयोज्यकर्तुः स्वातन्त्र्यापेक्षा। तस्य प्रयोज्यता विरुद्धत्वात्। **कर्ता शास्त्रार्थवत्त्वात्** इत्यस्य प्रयोज्यप्रधानसाधारण्येन कर्तृतामात्रसाधनपरत्वेन तस्य स्वातन्त्र्यसाधनकत्वायोगात्। **शास्त्रफलं प्रयोक्तरि** इत्यस्य स्वामिविषयत्वेन कर्मकर्तृविषयकत्वाभावात्। तस्य प्रयोज्यसामान्यविषयकत्वे यजमानपरिक्रीतानाम् ऋत्विजामपि फलप्रसङ्गादुपचरितसत्रस्वामिप्रतिनिहितस्यापि फलप्रसङ्गाच्च।

तस्मात् शास्त्रफलं प्रयोक्तरि इत्यत्र प्रयोक्तृशब्दस्यत्यज्यमानद्रव्यस्वामिभूतपरिक्रयणप्रयोगकर्तृवाचकत्वावश्यम्भावेन तस्य दास्यरूपपरार्थकर्म कर्तृविषयकत्वायोगात्। तस्य भक्तिप्रपत्तिरूपकेवलभगवदाराधनानुष्ठातॄणां स्वफलभोगान्वयलक्षणस्वातन्त्र्यसाधकत्वमसिद्धमेव। **स स्वराड्भवति** इत्यस्य कर्मवश्यतामात्रपरतया भाषितत्वात्।

**जक्षन् क्रीडन् रममाणः** इत्यादीनां [4]**रममाणा वने त्रयः** इत्यादिष्विव योग्यतानुसारेण परातिशयाधानात्मकनित्यकैङ्कर्यरतिमात्रविषयकत्वात्। तत्र पितृलोकादिसृष्टेरपि भगवत्प्रयोज्यव्यापाररूपत्वेन भगवल्लीलाद्यन्तर्गतत्वस्य **भावे जाग्रद्वत्** इति सूत्रभाष्यान्ते **कदाचिच्च मुक्तास्सत्यसङ्कल्पत्वात् परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृजन्ति** इत्यनुगृहीतत्वात् [5]**तस्य भावे सन्ध्य वदुपपत्तेः** इति सूत्रभाष्ये सत्यसङ्कल्पोऽपि स्वयं न सृजतीति अनुगृहीतत्वात्, **उच्छिन्नकर्मबन्धस्य असङ्कुचितज्ञानस्य परब्रह्मानुभवैकस्वभावस्य तदेकप्रियस्य अनवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षा तदर्थारम्भाद्यसम्भवात्** इति जगद्व्यापारवर्जाधिकरणे भाषितत्वात्, ब्रह्मानुभवस्यापि भगवत्कर्तृकचेतनानुभवे चेतनकर्तृकप्रीतिवीक्षणदानानुनिष्पाद्यानुषङ्गिक भोगमात्ररूपत्वाच्च चेतनस्य स्वप्रवृत्त्युद्देश्य भोगाश्रयत्व लक्षणस्वातन्त्र्यासिद्धेः नमश्शब्देन जीवस्वातन्त्र्यनिषेधे बाधकाभावात्।

१. पू.मी.३-७-१८ २. छा.उ.७-२५-२ ३. छा.उ.८-१२-३
४. रामा.बा.का.१ ५. ब्र.सू.४-४-१४

न च नमश्शब्दस्य स्वशेषत्वनिवर्तकत्वे मकारोत्तरषष्ठ्यस्वारस्यम्। स्वसम्बन्धत्वेन रूपेणैव स्वशेषत्वस्यापि निषेध्यत्वसम्भवेन तदस्वारस्याप्रसक्तेः। न चैवं बाधः। अबाधितप्रमाणान्तरसिद्धसम्बन्धविशेषव्यतिरिक्तविषयतया षष्ठ्याः सङ्कोचसम्भवात्। न चैवं स्वशेषत्वादीनामपि अनिषेध्य सम्बन्धान्तर्भावशङ्का। चेतनस्य तादात्म्यादिरूपस्वसम्बन्धवत् स्वशेषत्वादीनाम् अबाधितप्रबलप्रमाणसिद्धत्वाभावात्, स्वशेषत्वादीनां सकललोकसाक्षिकत्वेऽपि देहात्मैक्यवत् शास्त्रबाध्यत्वोपपत्तेः।

न चैवमपि विशेषरूपेण निषेध्यालाभप्रसङ्गः। नमश्शब्दस्य स्थानत्रयसम्बन्धबलेनैव तल्लाभोपपत्तेः।

तथा हि मूलमन्त्रमन्त्ररत्नव्यापकान्तरादिगतनमश्शब्देषु मकारस्य षष्ठ्यन्तत्वात् **अहमपि न मम भगवत एवाहमस्मि, याः काश्चन कृतयो मम, भगवति मम ममता नास्ति। तासु भगवत एव ताः, ममेति द्व्यक्षरो मृत्युः न ममेति च शाश्वतम्** [1]**चेतनस्य यदा मह्यम्** इत्यादिनमश्शब्दविवरणश्रुतिनिरुक्तस्मृतिवचनेषु च नियमेन मकारस्य षष्ठ्यन्तशब्दैरेव विवृततया च तस्य स्वशेषत्वमात्रपरत्वं स्वस्वत्वमात्रपरत्वं वा न वक्तुं युक्तम्। तथा सति सर्वषष्ठ्या सम्बन्धसामान्योपस्थापनवैफल्यात्। अतः स्वभोगार्थप्रवृत्तिमत्त्व स्वभोगार्थप्रवृत्तियोग्यत्वस्वरक्षणयोग्यत्वरूपसम्बन्धत्रयबोधनाय सम्बन्धसामान्यषष्ठी परिगृहीता। तत्रापि स्वरक्षणयोग्यत्वरूप सम्बन्ध एव षष्ठी मुख्यतात्पर्यविषयः। अन्ययोः पूर्वोत्तरवाक्यसमभिव्याहारबलेनापि अवगन्तुं शक्यत्वात्।

यद्यपि **नारायणाय स्याम्** इत्यनेन भगवच्छेषत्वरूपवृत्ति तादर्थ्यवत् , आयास्मि इत्यनेन भगवच्छेषत्वयोग्यतारूपस्वरूपतादर्थ्यवच्च, जीवस्य भगवत्प्रवृत्तिहेतुकरक्षआकर्मत्वं तद्योग्यत्वं वा न समभिव्याहार सिद्धम्, येन स्वरक्षणसाधनप्रवृत्त्यर्हत्वलक्षणसम्बन्धस्य प्रसक्तस्य निषेधः स्यात्। तथापि निरुपाधिकरक्षकत्वस्य अकारेणोक्तौ जीवस्य मकारेण शेषत्वान्वय प्रतियोगितया बुद्धिस्थत्वात्, अयनशब्दे भगवत एव रक्षणकरणत्वोक्तेश्च जीवे प्राप्तशेषिभूतभगवत्कर्तृकसिद्धोपाय-

---

१. अहि.सं.५२-२५

भूततत्तत्प्रवृत्तिमात्रहेतुकरक्षणकर्मत्वं व्यञ्जनया प्रत्येतुं शक्यमिति, नमश्शब्दे-षष्ठ्यातत्प्रतिकोटिभूतस्वरक्षकत्वसम्बन्धस्य प्रसक्तिः स्यादिति तत्र प्रत्यक्षबाध-परिहाराय स्वरक्षणयोग्यत्वमेव निषेध्यमिति गम्यते। एतत्सर्वमभिसन्धायानुगृहीतं श्रीपराशरभट्टार्यैः –

**[१]मन्त्रब्रह्मणिमध्यमेन नमसा पुंसस्स्वरूपं गति-**
**र्गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः।।**

इत्यादि। अत्र न ममेत्यस्य सर्वचेतनानुसन्धानरूपत्वात्, पुंस इति सामान्यविर्देशः। स्वरूपशब्देन **स्वम्-आत्मीयम्, रूपम् आकारः** इति व्युत्पत्त्या प्रणवोक्तो भगवद्भोगार्थप्रवृत्तियोग्यत्वरूपो यावदात्मभाव्याकारो विवक्षितः। गतिशब्देन नारायणशब्दे करणव्युत्पत्तिसिद्ध उपायो विवक्षितः।

गम्यशब्देन व्यक्तचतुर्थी व्यङ्ग्यं भगवत्प्रीतिरूपं फलं विवक्षितम्। शिक्षितमिति नपुंसकैकशेषो विवक्षितः। एतत् त्रयं स्वभोग्यार्थप्रवृत्तियोग्यत्वतत्फलोपधानस्वरक्षण-साधनप्रवृत्तियोग्यत्वलक्षणविरोधित्रयराहित्येन सह समभिव्याहारबलेन बोधित-मित्यर्थः। (ईक्षितेनेत्यदि) पूर्वोत्तरवाक्ययोः स्ववाक्ये च पर्यालोचितेनेत्यर्थः। पूर्वोत्तरवाक्ययोः न मनः पर्यालोचनम्। ताभ्यां वाक्यैकवाक्यतया पर्यालोचनम्। स्ववाक्ये पर्यालोचनं स्ववाक्यस्थपदविशेषसमभिव्याहारविशिष्टतया पर्यालोचन-मित्यनुसन्धेयम्।

विरोधित्रयराहित्येन शिक्षितत्वं विशदयति (स्वातन्त्र्यमित्यादिना) स्वातन्त्र्य-शब्देन **स्वतः - स्वयमेव, स्वस्य तन्त्रम् - नियामकं यस्य सः** इति व्युत्पत्त्या स्वाधीनत्वं लभ्यते। तच्च प्रकृते पूर्वोक्तस्वरूपशिक्षाफलितार्थस्य विवक्षणीयतया फलेस्वाधीनत्वविवक्षणे स्वभोगार्थप्रवृत्त्यर्हत्वं विवक्षितम्। (समुचितेति) स्वार्थवृत्ति-रनुचिता, परार्थावृत्तिरुचिता, केवलपरार्थावृत्तिः समुचिता।

तथा च चेतनस्य स्वभोगार्थ प्रवृत्त्यपेक्षया देवतान्तरभोगप्रवृत्तिः भगवद्-भोगार्थ प्रवृत्तियोग्यतासम्पादकत्वात् उचिता। देवतान्तरभोगार्थप्रवृत्तिपरित्यागेन भगवद्भोगार्थप्रवृत्तिः समुचितेत्यभिप्रायः। (नान्योचिता) **अत्र नान्योचितम्** इति यथा योग्यं विपरिणामः।

---

१. अष्टश्लोकी -२

(तस्येति) [१]**पतिं विश्वस्य** इत्यादि प्रसिद्धस्येत्यर्थः । [२]**वसुरण्यो विभुरसि** इत्यादिश्रुतौ [३]**अच्युताहं तवास्मीति** इत्याद्युपबृंहणे च प्रणवस्य भगवन्तं प्रति उक्तिरूपतया विवरणमभिप्रेत्य, हरेः कथितमित्युक्तम्। हरिं प्रति कथितमित्यर्थः। सर्वं स्वार्थतया आहरति आदत्त इति-हरिः। [४]**हरिर्हरति पापानि** इति च विवक्षितम्। (नान्योचितेति) सामान्यविवक्षायाः न ममेत्युक्तिविरोधमाशङ्क्याह (विविच्येति) देवतान्तरशेषत्वापेक्षया स्वशेषत्वं क्रूरमिति विवेक्तुं विशेषनिषेधः । उकारविवरण-रूपत्वा दुपलक्षणमिति भावः।

ननु भृत्यस्य स्वभोगार्थप्रवृत्तिमत्त्वेऽपि राजभोगार्थप्रवृत्तिमत्त्वदर्शनात् नान्योचितेति निषेधः किमर्थ इत्यत्राह (स्वस्यापिनाहं ततः) इति।

अपि शब्देन हरिः समुच्चीयते। (ततः) अन्यशेषत्वनिषेधस्य वाचनिकत्वात्, स्वस्य परस्यापि शेषत्वं भगवत्प्रीत्यतिशय भञ्जकमेवेत्यवगम्यते। अत एव लोकेऽपि **स्वार्थान् परित्यज्य यः** इत्युक्तरीत्या अत्यन्तसुहृद्विषये मातृपुत्रविषये गुरुशिष्यविषये भर्तृभार्याविषये कामिनीकामुकविषये च प्रेमातिशयेन स्वप्रयोजनपरित्यागेन स्वानिष्टस्वीकारेण च केवलपरोद्देश्यकप्रवृत्तिमत्त्वं परप्रीत्यतिशयकरतया दरीदृश्यते। जननीस्तनन्धयादिस्थले तादृशप्रीत्यतिशयमनपेक्ष्यापि तादृशप्रवृत्तिमत्त्वं दरीदृश्यत इति भावः।

तदेवं नमश्शब्दस्य स्थानत्रयसम्बन्धबलेन विशिष्यसम्बन्धत्रयनिषेधकतायाः सम्प्रदायसिद्धत्वेन विशेषरूपेण निषेध्यसम्बन्धालाभशङ्कादूरा पास्ता। एतेन **इन्द्रायेदं न मम** इत्यादिष्विव प्रकृतमकारोत्तरषष्ठ्याः स्वस्वामिभावरूपसम्बन्ध-विशेषपरत्वौचित्यवर्णनं प्रत्युक्तम्। षष्ठ्याः स्वस्वत्वरूपसम्बन्धविशेषमात्रपरत्वे सम्बन्धसामान्योपस्थापन वैफल्यस्य वज्रलेपत्वात्, नमश्शब्दस्थानत्रयसम्बन्ध लब्धशेषत्वाद्याकारत्रयविरोधिसम्बन्धसामान्यपरत्वसिद्धान्ते प्रणवान्वितनमश्शब्द-घटकतमकारोत्तरषष्ठ्यर्थेषु [५]**याने येन्तनते येन्नि रुन्देन्** इत्युक्त स्वस्वामिभाव-सम्बन्धस्यापि अन्तर्गतत्वेन अत्रैव षष्ठ्यर्थपौष्कल्यसिद्धेः।

---

१,२. तै.उ.ना.व.१० ३. विष्णु.पु. ४. हर्यष्टकम्
५. तिरुवायिमोलि २-९-९

भूततत्तत्प्रवृत्तिमात्रहेतुकरक्षणकर्मत्वं व्यञ्जनया प्रत्येतुं शक्यमिति, नमश्शब्दे-षष्ठ्यातत्प्रतिकोटिभूतस्वरक्षकत्वसम्बन्धस्य प्रसक्तिः स्यादिति तत्र प्रत्यक्षबाध-परिहाराय स्वरक्षणयोग्यत्वमेव निषेध्यमिति गम्यते। एतत्सर्वमभिसन्धायानुगृहीतं श्रीपराशरभट्टार्यैः –

**[१]मन्त्रब्रह्मणिमध्यमेन नमसा पुंसस्स्वरूपं गति-**
**र्गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः।।**

इत्यादि। अत्र न ममेत्यस्य सर्वचेतनानुसन्धानरूपत्वात्, पुंस इति सामान्यविर्देशः। स्वरूपशब्देन **स्वम्-आत्मीयम्, रूपम् आकारः** इति व्युत्पत्त्या प्रणवोक्तो भगवद्भोगार्थप्रवृत्तियोग्यत्वरूपो यावदात्मभाव्याकारो विवक्षितः। गतिशब्देन नारायणशब्दे करणव्युत्पत्तिसिद्ध उपायो विवक्षितः।

गम्यशब्देन व्यक्तचतुर्थी व्यङ्ग्यं भगवत्प्रीतिरूपं फलं विवक्षितम्। शिक्षितमिति नपुंसकैकशेषो विवक्षितः। एतत् त्रयं स्वभोग्यार्थप्रवृत्तियोग्यत्वतत्फलोपधानस्वरक्षण-साधनप्रवृत्तियोग्यत्वलक्षणविरोधित्रयराहित्येन सह समभिव्याहारबलेन बोधित-मित्यर्थः। (ईक्षितेनेत्यदि) पूर्वोत्तरवाक्ययोः स्ववाक्ये च पर्यालोचितेनेत्यर्थः। पूर्वोत्तरवाक्ययोः न मनः पर्यालोचनम्। ताभ्यां वाक्यैकवाक्यतया पर्यालोचनम्। स्ववाक्ये पर्यालोचनं स्ववाक्यस्थपदविशेषसमभिव्याहारविशिष्टतया पर्यालोचन-मित्यनुसन्धेयम्।

विरोधित्रयराहित्येन शिक्षितत्वं विशदयति (स्वातन्त्र्यमित्यादिना) स्वातन्त्र्य-शब्देन **स्वतः - स्वयमेव, स्वस्य तन्त्रम् - नियामकं यस्य सः** इति व्युत्पत्त्या स्वाधीनत्वं लभ्यते। तच्च प्रकृते पूर्वोक्तस्वरूपशिक्षाफलितार्थस्य विवक्षणीयतया फलेस्वाधीनत्वविवक्षणे स्वभोगार्थप्रवृत्त्यर्हत्वं विवक्षितम्। (समुचितेति) स्वार्थवृत्ति-रनुचिता, परार्थावृत्तिरुचिता, केवलपरार्थावृत्तिः समुचिता।

तथा च चेतनस्य स्वभोगार्थ प्रवृत्त्यपेक्षया देवतान्तरभोगप्रवृत्तिः भगवद्-भोगार्थ प्रवृत्तियोग्यतासम्पादकत्वात् उचिता। देवतान्तरभोगार्थप्रवृत्तिपरित्यागेन भगवद्भोगार्थप्रवृत्तिः समुचितेत्यभिप्रायः। (नान्योचिता) **अत्र नान्योचितम्** इति यथा योग्यं विपरिणामः।

---

१. अष्टश्लोकी -२

(तस्येति) [1]**पतिं विश्वस्य** इत्यादि प्रसिद्धस्येत्यर्थः । [2]**वसुरण्यो विभुरसि** इत्यादिश्रुतौ [3]**अच्युताहं तवास्मीति** इत्याद्युपबृंहणे च प्रणवस्य भगवन्तं प्रति उक्तिरूपतया विवरणमभिप्रेत्य, हरेः कथितमित्युक्तम्। हरिं प्रति कथितमित्यर्थः। सर्वं स्वार्थतया आहरति आदत्त इति-हरिः। [4]**हरिर्हरति पापानि** इति च विवक्षितम्। (नान्योचितेति) सामान्यविवक्षायाः न ममेत्युक्तिविरोधमाशङ्क्याह (विविच्येति) देवतान्तरशेषत्वापेक्षया स्वशेषत्वं क्रूरमिति विवेक्तुं विशेषनिषेधः । उकारविवरण-रूपत्वा दुपलक्षणमिति भावः।

ननु भृत्यस्य स्वभोगार्थप्रवृत्तिमत्त्वेऽपि राजभोगार्थप्रवृत्तिमत्त्वदर्शनात् नान्योचितेति निषेधः किमर्थ इत्यत्राह (स्वस्यापिनाहं ततः) इति।

अपि शब्देन हरिः समुच्चीयते। (ततः) अन्यशेषत्वनिषेधस्य वाचनिकत्वात्, स्वस्य परस्यापि शेषत्वं भगवत्प्रीत्यतिशय भञ्जकमेवेत्यवगम्यते। अत एव लोकेऽपि **स्वार्थान् परित्यज्य यः** इत्युक्तरीत्या अत्यन्तसुहृद्विषये मातृपुत्रविषये गुरुशिष्यविषये भर्तृभार्याविषये कामिनीकामुकविषये च प्रेमातिशयेन स्वप्रयोजनपरित्यागेन स्वानिष्टस्वीकारेण च केवलपरोद्देश्यकप्रवृत्तिमत्त्वं परप्रीत्यतिशयकरतया दरीदृश्यते। जननीस्तनन्धयादिस्थले तादृशप्रीत्यतिशयमनपेक्ष्यापि तादृशप्रवृत्तिमत्त्वं दरीदृश्यत इति भावः।

तदेवं नमश्शब्दस्य स्थानत्रयसम्बन्धबलेन विशिष्यसम्बन्धत्रयनिषेधकतायाः सम्प्रदायसिद्धत्वेन विशेषरूपेण निषेध्यसम्बन्धालाभशङ्कादूरा पास्ता। एतेन **इन्द्रायेदं न मम** इत्यादिष्विव प्रकृतमकारोत्तरषष्ठ्याः स्वस्वामिभावरूपसम्बन्ध-विशेषपरत्वौचित्यवर्णनं प्रत्युक्तम्। षष्ठ्याः स्वस्वत्वरूपसम्बन्धविशेषमात्रपरत्वे सम्बन्धसामान्योपस्थापन वैफल्यस्य वज्रलेपत्वात्, नमश्शब्दस्थानत्रयसम्बन्ध लब्धशेषत्वाद्याकारत्रयविरोधिसम्बन्धसामान्यपरत्वसिद्धान्ते प्रणवान्वितनमश्शब्द-घटकतमकारोत्तरषष्ठ्यर्थेषु [5]**याने येन्तनते येन्नि रुन्देन्** इत्युक्त स्वस्वामिभाव-सम्बन्धस्यापि अन्तर्गतत्वेन अत्रैव षष्ठ्यर्थपौष्कल्यसिद्धेः।

---

१,२. तै.उ.ना.व.१० ३. विष्णु.पु. ४. हर्यष्टकम्
५. तिरुवायिमोलि २-९-९

नमश्शब्दस्य आत्मत्यागपरत्वमपि अनुपन्नम्। आत्मनः परस्वत्वेन स्वस्वत्वशून्यतयाचेतनकर्तृकतत्त्यागलक्षणयागासम्भवात्, निस्वस्य त्यागासामर्थ्यात्। तथा चोक्तं जैमिनिना [१]**द्रव्यत्वात्तुपुंसांस्यात् द्रव्यसंयुक्तम्** इति, यस्मात्, **व्रीहिभिर्यजेत, यवैर्यजेत** इत्यादिकं कर्म द्रव्यसंयुक्तं, तस्मात् पुंसां तु स्यादधिकारतः। तेषामेव द्रव्यवत्त्वादित्यर्थः। एवं **त्रयाणां द्रव्यसम्पन्नः कर्मणो द्रव्यसिद्धित्वात्** इति च सूत्रान्तरम्। ब्राह्मणादीनां त्रयाणां मध्येद्रव्यसम्पन्न एव अग्निहोत्रादिषु अधिक्रियेत। नाद्रव्यः। कर्मणां द्रव्याधीनसिद्धिकत्वात् इति तदर्थः। चेतनस्य स्वात्मकहविस्त्यागलक्षणयागकर्तृत्वे तस्य कर्मकर्तृ विरोधोऽपि दुष्परिहरः **कर्मकर्तृव्यपदेशाच्च** इति सूत्रेण तयोः विरोधस्य सिद्धत्वात्।

न च ब्रह्मणः एकस्यैव **आत्मकृतेः** इत्युक्तकर्मकर्तृत्वाश्रयत्ववत् अत्रापि उपपद्यत इति वाच्यम्। सर्वशक्तस्य तदुपपत्तावपि चेतनस्य तदयोगात्।

तस्मात् आत्मयागतद्दानहोमादि प्रतिपादकचवनानां यथावस्थितस्वरूपज्ञान-मात्रतात्पर्यं वक्तव्यम्। तथा च अनुगृहीतं स्तोत्ररत्ने [२]**अथ वा किन्नु समर्पयमि ते** इत्यत्र पूर्वश्लोककृतं समर्पणं त्वच्छेषत्वप्रतिपत्तिमात्रस्वरूपम्। न तु मदीयस्य त्वच्छेषतापादनरूपमिति भावः इति। सङ्गप्रपदनाधिकारे च (आकविरण्डुश्लोक-त्तालुम् यथावस्थितस्वरूपविवेकमिल्लै येया कित्तुम्) **नमः** (एन्नु स्वसम्बन्धमरु-क्कैये) [३]**अहमपि तवैवास्मि भरः** (एन्नुम्बडि भरसमर्पण प्रधानमानशास्त्रत्तिन् सारमेन्नताय् त्तु) इति। एवं स्वसम्बन्धसामान्यनिवृत्तिपूर्वकपरसम्बन्धप्रतिपत्तेरेव आत्मयागादिशब्दार्थत्वात्, नमश्शब्दघटकमकारोत्तरषष्ठ्या भगवत्सम्बन्धिप्रतिकोटि-स्वसम्बन्धसामान्यपरत्वमेवोचितम्। एतेन **समित्साधनकादीनाम्** इत्यादिवचनो-दाहरणपूर्वकमुक्तं प्रत्युक्तं तत्र नमश्शब्दकरणकतयोक्तस्य आत्मन्यासस्यापि नमश्शब्दश्रवणजन्यनिरुक्तस्वसम्बन्धसामान्यनिवृत्तिमात्रात्मकत्वात्।

अथ यच्चेक्तम् नमश्शब्दस्य योजनात्रयेऽपि अहिर्बुध्न्येन सध्योपाय-रूपसाधनानुष्ठानपरतया व्याख्यातत्वात्, तत्र स्वस्वातन्त्र्यसामान्यनिषेधो अनुपपन्न इति तन्न। तत्र प्रथमयोजनायां [४]**तोलैविल्लिमङ्गलम् तोलुम्** इत्युक्त स्वरूपान्तर्गत-

---

१. पू.मी.　　२,३. स्तो.र.५३　　४. तिरुवायिमोलि ६-५-१

स्वयम्प्रयोजनप्रह्वीभावादिपरतायाः, मध्यमयोजनायां भगवत्सम्बन्धविरोधिस्व-सम्बन्धसामान्यनिषेधे परतायाः चरमयोजनायां मोक्षैककारणभूतचेतनप्रवृत्तिसामान्य-निरपेक्षसिद्धोपायपरतायाश्च पृथक् पृथक् दर्शितत्वेन तदयोगात्।

**[१]प्रेक्षावतः प्रवृत्तिर्या प्रह्वीभावात्मिका स्वतः।**
**उत्कृष्टं परमुद्दिश्य तन्नमः परिगीयते।।**

**लोके चेतनवर्गस्तु द्विधैव परिगीयते।**
**ज्यायांश्चैव तथाऽज्यायान् नैवाभ्यां विद्यते परः।।**

**कालतो गुणतश्चैव प्रकर्षो यत्र तिष्ठति।**
**शब्दस्तं मुख्यया वृत्त्या ज्यायानित्यवलम्बते।।**

**अतश्चेतनवर्गोऽन्यः स्मृतः प्रत्यवरो बुधैः।**
**अज्यायांश्चानयोर्योगश्शेषशेषितयेष्यते।।**

**अज्यायांसो परे सर्वे ज्यायानेकोमतः परः।**
**नन्तृनन्तव्यभावेन तेषां तेन समन्वयः।।**

**नन्तव्यः परमश्शेषी शेषोनन्तारईरितः।**
**नन्तृनन्तव्यभावोऽयं न प्रयोजनपूर्वकः।।**
**नीचोच्चयोः स्वभावोऽयं नन्तृनन्तव्यतात्मकः।**

इति। **णमुल्-प्रह्वीभावे** इति धातोः निष्पन्नस्य नमश्शब्दस्य स्वरूपान्तर्गतस्वयं प्रयोजनशेषवृत्त्यात्मकानुपायभूत प्रणामपरत्वमभिधाय,

अथ –

**[२]उपाधिरहितेनायं येन भावेन चेतनः।**
**नमति ज्यायसे तस्मै तद्वानमनमुच्यते।।**

**भगवान् परो नित्यं अहं प्रत्यवरस्सदा।**
**इति भावो नमः प्रोक्तो नमसः करणं हि सः।।**

---

१,२. अहि.सं.

इति **नमतिप्रह्वीभवतिचेतनो अनेनेति नमः** इति करणे व्युत्पत्त्यानमश्शब्दस्य पूर्वयोजनोक्तस्वयंप्रयोजन शेषवृत्तिमात्रात्मकप्रह्वीभावहेतुभूतनिरुपाधिक भगवत्पार-तन्त्र्यज्ञानपरत्वमुक्त्वा,

**[1]न इत्यपि वा देवं प्रह्वीभावयति धृवम्।**
**प्रह्वीभवति नीचे हि परोनैच्यं विलोकयन्।**
**अतो वा नम उद्दिष्टं यत्तन्नामयति स्वयम्।।**

इति। **नामयतीति नमः** इति व्युत्पत्त्या **सम्बाहुभ्यां नमति सम्पतत्त्रैर्द्यावा पृथिवी जनयन् देव एकः** इत्याद्युक्त भगवद्गतप्रह्वीभावहेतुभूत तद्ज्ञानविषय नीचोच्चयोः स्वभावोऽयम् इत्युक्तस्वरूपान्तर्गतात्यन्तपारतन्त्र्यलक्षणनैच्यमात्र-परत्वञ्च प्रतिपाद्य,

**[2]वाचा नम इति प्रोच्य मनसा वपुषा च यत्।**
**तन्नमः पूर्णमुद्दिष्टमतोन्यम्यानमुच्यते।।**

इति स्वरूपान्तर्गतप्रह्वीभावस्य करणत्रयायत्तत्वाभावे **विचित्रा देहसम्पत्ति-रीश्वराय निवेदितुम्** इत्युक्तताद्दशकरणत्रयप्रदभगवद्विवक्षितप्रयोजनपूर्त्यभावेन वैकल्यात् करणत्रयेणापि प्रह्वीभावस्यैव **[3]इवन् पाशुरम् केट्टवारे तिरुवुल्लमुव-क्कुम्** इत्याद्यनुगृहीतरीत्या, परिपूर्णशेषवृत्तिरूपत्वाच्च तस्यैव पूर्तिमभिधाय **[4]इयं करणपूर्तिः स्यात् यदङ्गपूर्तिमिमां श्रुणु** इति ताद्दशप्रह्वीभावशालिनः सम्भावितस्वभावविशेषान् मानसप्रह्वीभावावस्था विशेषरूपतया तदङ्गशब्द-निर्दिष्टान् वक्तुम् उपक्रम्य -

**शाश्वती मम संसिद्धिरियं प्रह्वीभवामि यत्।**
**पुरुषं परमुद्दिश्य नमे सिद्धिवतोऽन्यथा।।**
**इत्यङ्गमुदितं श्रेष्ठं फलेप्सातद्विरोधिनी ।**

इति यावदात्मभाविप्रह्वीभावस्यैव **[5]नम इत्येव वादिनः**, **[6]नमो नारायणाय वेन्रु पल्लाण्डुम् परमात्तुमनैच्चूलन्दिरुन्देत्तुवर्** **[7]मेलत्तोण्डुकलित्तन्द्रि तोलम्**

---

१. अहि.सं. २. अहि.सं.५२ ३. मुमुक्षुप्पडि ४. अहि.सं.
५. महा.भा.शा.प.३३७-४० ६. तिरुप्पल्लाण्डु-१२ ७. तिरुवायिमोलि १०-२-७

**शोल्लुप्पेल्लेन्** इत्याद्युक्तरीत्या परमप्रयोजनत्वात् तद्व्यतिरिक्तप्रयोजनान्तरसामान्य-निवृत्तेरेव शेषत्वज्ञानात्मकमानसप्रह्वीभावस्य मुख्यफलत्वाच्च प्रयोजनान्तर-निवृत्तिपूर्वकप्रह्वीभावैक प्रयोजनकत्वाध्यवसायस्य प्रधानाङ्गत्वमुक्त्वा -

**फलेप्सा तद्विरोधिनी** इति तादृशप्रह्वीभावे साधनत्वभ्रान्त्या तस्य फलान्तरेच्छायाः स्वयम्प्रयोजनत्वाध्यवसायात्मकप्रधानाङ्गविरोधितया तस्मिन् मोक्षपर्यन्तस्वफलसाधनत्वबुद्धेः अवश्यपरिहरणीयतां प्रदर्श्य –

[१]**अनादिवासनायोगादनैश्वर्यात् स्वभावजात्।**
**मलावकुण्डितत्वाच्चदृक्क्रिया विहतिर्हि या।।**
**तत्कार्पण्यं तदुद्बोधो द्वितीयं ह्यङ्गमीदृशम्।।**

इति पूर्वोक्तस्वयम्प्रयोजन प्रह्वीभाववतां [२]**पोयन्निन्ञानमुम् पोल्लावोलुक्कुम्** इत्युक्ता नादिविपरीतवासनायोगात् [३]**मायुम् वकैयरियेन् वल्विनैयेन् पेण् पिरन्दे** इत्युक्तात् स्वाभाविकपारतन्त्र्यरूपधनैश्वर्यात् **अलुक्कुडम्बुम्** इत्युक्तात् मलावकुण्डितत्वाच्च। [४]**एन्नान् शेय् केन्** इत्याद्यनुगृहीतरीत्या जायमाना दृक्क्रिया विहतिः श्लोकत्रयोदित सम्यक्ज्ञानसमीचीनक्रिययोः हानिः सैव कार्पण्यं नाम, तादृशकार्पण्यस्य [५]**नोटर्नोन्बिलेन् नुण्णरिविलेन्** इत्याद्युक्तप्रकारेण यदनुसन्धानं सम्भावितस्वरूपं जायेत तदेव द्वितीयमङ्गमित्युक्त्वा, स्वाभाविकानैश्वर्यरूपात्यन्तपार-तन्त्र्यानुसन्धानगर्भस्य अस्यद्वितीयाङ्गस्य -

[६]**असन्देशात्तुरामस्य तपसश्चानुपालनात् ।**
[७]**ममैव दुष्कृतं किञ्चित् महदस्ति न संशयः ।।**

[८]**एषा विपद्याम्यहमल्पभाग्या** इत्याद्युक्तराघवान्तः पुरं पुरंध्र्याचारशिक्षि-तात्यन्तपारतन्त्र्यनिष्ठारूपत्वेन स्वरक्षण प्रवृत्त्यर्हत्वादिरूप-स्वस्वातन्त्र्यभ्रमस्य तद्विरोधित्वेन अवश्यपरिहरणीयताम् [९]**स्वस्वातन्त्र्यावबोधस्तु तद्व्याघात उदीर्यते** इति प्रदर्श्य,

१. अहि.सं. २. तिरुविरुत्तिम् -१ ३. तिरुवायिमोलि ५-४-३
४,५. तिरुवायिमोलि ५-७-१ ६,७. रामा.सु.का.३८-४३ ८. रामा.सु.का.
९. अहि.सं.

[1]**परत्वे सति देवोऽयं भूतानामनुकम्पनः।**
**अनुग्रहैकधीर्नित्यम् इत्येतत्तु तृतीयकम्।।**

इति पूर्वोक्तकार्पण्यानुसन्धानेन भीतानां तादृशभयनिवर्तकतया यत् भगवद्गुणानुसन्धानं स्यात् तदेव विश्वासशब्दितं तृतीयमङ्गमित्युक्त्वा –

[2]**उपेक्षको यथाकर्मफलदायीति या मतिः।**
**विश्वासात्मकमेतत्तु तृतीयं हन्ति वै सदा।।**

इति न्यासोपासनादिरूपचेतनानुष्ठिततत्तत्साधनानुगुणफलप्रदतया भगवानुदासीन एव। न तु निर्हेतुकोपायभूत इति बुद्धेः [3]**तकवुडै यवने येन्नुम्** इत्याद्युक्तलक्षणयैर्वोक्तविश्वासविरोधितया अवश्यपरिहरणीयतां प्रदर्श्य –

[4]**एवं भूतोप्यशक्तस्सन्नत्राणं भवितुं क्षणः।**
**इति बुद्ध्यास्यदेवस्य गोप्तृशक्तिनिरूपणम्।।**

**चतुर्थमङ्गमुद्दिष्टममुष्य व्याहृतिः पुनः।**
**उदासीनो गुणाभावादित्युत्प्रेक्षा निमित्तजा।।**

इति पूर्वोक्तभगवद्दयानुसन्धानेन अभयङ्गतानां यत्स्वकार्यापादकभगवच्छक्त्यनुसन्धानम्।

[5]**शरैस्तु सङ्कुलां कृत्वा लङ्कां परबलार्दनः। मां नयेत्** इत्याद्युक्तम् [6]**कलैवाय् तुन्बम् कलैयातोलिवाय् कलैकण् मट्रिलेन्** इत्युक्तस्वाभिप्रायनिवेदनात्मकगोप्तृत्ववरणकारणं तदेव तुरीयाङ्गम्, तादशमङ्गम्प्रति [7]**शङ्के मद्भाग्यसंक्षयात्** इति स्वभाग्यहान्या भगवति ब्रह्मास्त्रवत् सहायान्तरा सहे सर्वशक्ते निरपेक्षकार्यकारिणि निरपेक्षकारित्वात्मकगुणाभावप्रयुक्तोदासीनतारोपस्य विरोधित्वादवश्यपरिहरणीयतां प्रदर्श्य [8]**स्वस्यस्वामिनिवृत्तिर्या प्रातिकूल्यविवर्जनम्** इति पूर्वोक्तभगवच्छक्त्यनुसन्धानपर्यन्तप्रदृद्वीभाववतां जायमानं यत् सम्भावितस्वभावात्मकम् [9]**किर्पन् किल्लेवेन्निलन्** [10]**यातानुम्बपट्रिनीङ्गम्**

---

१,२. अहि.सं. ३. तिरावियुमोलि २-४-६ ४. अहि.सं.
५. रामा.सु.का.३९-३० ६. तिरुवायिमोलि ५-८-८ ७. रामा.सु.का.२७-१३
८. अहि.सं. ९. तिरुवायिमोलि ३-२-६ १०. तिरुविरुत्तम्

**विरतम्** इत्याद्युक्तरूपाणां प्रातिकूल्यानां [१]**नोक्क वेणुमेन्नुलियातोलिकै** इत्यात्यन्तिकं वर्जनं तदेव पञ्चममङ्गम्, तादृशाङ्गम्प्रति नमः पदादिरूपशास्त्रविरुद्धसाधनान्तरप्रयोजनान्तरप्रवृत्तिरूपव्यापाराणां विरोधित्वात् अवश्यपरिहरणीयतां प्रदर्श्य -

[२]**चराचराणि भूतानि सर्वाणि भगवद्वपुः।**
**अतस्तदानुकूल्यं मे कार्यमित्येव निश्चयः।।**
**षष्ठमङ्गं समुद्दिष्टं तद्वाघातो निराकृतिः।**

इति पूर्वोक्तप्रातिकूल्यवर्जनपर्यन्तप्रह्वीभाववतां सम्भावितस्वभावतयैव जायमानं यत्सर्वभूतानुकूल्यव्यवसायात्मकमानुशंस्यम्। तदेव षष्ठम्-तादृशाङ्गम्प्रति लौकिकमर्यादादिनिशकरणस्य तद्विरुद्धत्वेन परिहरणीयताञ्च प्रदर्श्य –

**पूर्णमङ्गैरुपाङ्गैश्च नमनं ते प्रकीर्तितम्।**

इति प्रह्वीभावविषयकस्वयम्प्रयोजनताबुद्धिप्रभृतिसर्वभूतानुकूल्यव्यवसायलक्षणानृशंस्यपर्यान्तानां षण्णां सम्भावितस्वभावविशेषाणामङ्गत्वम्, तत्तद्विरोधिवर्जनानां षण्णामपि उपाङ्गत्वञ्च प्रदर्श्य, तादृशसर्वाङ्गोपाङ्गसम्पन्नस्यकरणत्रयवतः प्रह्वीभावस्यैव परिपूर्णत्वमुक्त्वा **स्थूलोऽयं नमसश्चार्थः** इति स्थूलयोजना निगमिता।

न ह्यत्र साधनानुष्ठानगन्धगन्धोऽपि दृश्यते। प्रत्युतप्रह्वीभावस्य स्वरूपप्रयुक्ततया अनन्यप्रयोजनत्वोक्तेः, तत्र साधनत्वबुद्धेः त्याज्यत्वोक्तेः भगवतो यथाकर्मफलदायितया साधनान्तरसापेक्षताबुद्धेः निरपेक्षरक्षणसामर्थ्यादिगुणाभावबुद्धेश्च अवश्यं परिहरणीयत्वोक्तेः **सर्वधर्मान् परित्यज्य** इति शास्त्रविरुद्धसाधनान्तरानुष्ठानस्य अशास्त्रीयतया, **अशास्त्रीयोपसेवा तु तद्व्याघात उदीर्यते** इति तत्परित्यागोक्तेश्च, साधनान्तरप्रसङ्गसहाङ्गोपाङ्गविशिष्टं स्वयम्प्रयोजनप्रह्वीभावरूपं सिद्धोपायकर्तृकसृष्ट्यवतारादिरूपानादिकृषिपरम्पराफलीभूतशेषत्वज्ञानमेव अत्रोच्यत इति, साधनप्रपत्तेः नमश्शब्दस्थूलयोजना सिद्धत्वोक्तिः अनुपपन्नैव।

---

१. मुमुक्षुप्पडि-१    २. अहि.सं.

अथ **सूक्ष्ममन्यन्निशामय** इति सूक्ष्मयोजनां प्रक्रम्य –

**चेतनस्य यदा मह्यं स्वस्मिन् स्वीये च वस्तुनि ।**
**मम इत्यक्षरद्वन्द्वं तदा गम्यस्य वाचकम्।।**

इति अज्ञावस्थचेतनप्रयुज्यमानषष्ठ्येकवचनान्तास्मच्छब्दपर्यायस्य नमः पदघटकषष्ठ्यन्तमकारस्यतादृशास्मच्छब्दव्याख्यानमुखेन स्वात्मात्मीयविषयकममतासामान्यवाचकत्वं प्रदर्श्य -

**अनादिवासनारूढमिथ्याज्ञाननिबन्धना।**
**आत्मात्मीयपदार्थस्थायास्वातन्त्र्यस्वतामतिः ।।**
**मेनेत्येव समीचीनबुद्ध्यासात्रनिवार्यते।**

इति तादृशमम्यनिवर्तकस्य नमश्शब्दस्य अहङ्कारममकारसामान्यनिवर्तकत्वमुक्तम्। अस्यार्थः। अनादिवासनाभि रूढं-प्ररूढं यत्-मिथ्याभूतदेहादिविषयकं **देवोऽहं, मनुष्योऽहम्** इत्याकारकं स्वतन्त्रतया प्रतीयमानदेहात्माभिमानरूपं ज्ञानम्, तन्निबन्धनातद्धेतुका, या स्वातन्त्र्य स्वतामतिः, सा अत्र-नमश्शब्दे, मेनेत्यन्वयपरामर्श जन्यया समीचीनबुध्यायथावस्थितवाक्यार्थज्ञानरूपया निवार्यत इति। अत्र देहेन्द्रियादीनां मिथ्याशब्देन ग्रहणम् -अनृतशब्दिताचित्सङ्घातरूपताप्रयुक्तम्। अत एव हि भगवता पराङ्कुशमुनिना **पोय्निन्नञानम्** इत्यनुगृहीतम्।

स्वस्वातन्त्र्यस्वतामत्योः मिथ्याज्ञानशब्दितदेहात्माभिमाननिबन्धनत्वंकथमिति चेत्, इत्थम् अचित्परिणामरूपस्य देहस्य ग्राहकेन चक्षुरादिना परमात्मनोदुर्ग्रहत्वात्, प्रत्यक्षतोदेहादिकं स्वतन्त्रमेव प्रतीयते। एवं स्वतन्त्रतया प्रतीयमानात् देहादात्मनो भेदाग्रहात्, देहाविविक्तात्मज्ञानरूपो देहात्मभ्रमो भवति। भेदाग्रहणविशिष्टदेहात्मज्ञानद्वयस्यैव देहात्मभ्रमशब्दार्थत्वात्। तथा च स्वतन्त्रतया प्रतीयमानात् देहादविविक्ततया गृह्यमाणस्यात्मनः स्वातन्त्र्यभावसमवर्जनीयं भवति। एवमात्मनः स्वातन्त्र्याभिमाने सति स्वसम्बन्धिवस्तुजातम्प्रतिशेषित्वाभिमानस्यापि अवर्जनीयत्वात्। स्वीयेषु स्वस्वत्वाभिमानोऽपि भवतीति सस्वातन्त्र्यस्वतामत्योः मिथ्याज्ञाननिबन्धनत्वमुपपद्यत एव। अत एवोक्तं –

**अधिकारबोधयुक्तेषु विद्यते भावभावना।**
**अक्षीणेषुसमस्तेषु विशेषज्ञानकर्मसु।।**

इति। अत्र हि कर्मसु फलस्वाम्यबोधलक्षणाधिकारबोधान्तर्गतस्वस्वातन्त्र्यस्वतामत्योः कर्माधीनदेवमनुष्याद्यात्माभिमानलक्षणविशेषज्ञानप्रयोज्यतायाः प्रतीयमानतया स्वस्वातन्त्र्यादेः देहात्माभिमाननिबन्धत्वं सिद्धम्।

तदेवं नमश्शब्दस्य मकारव्याख्यानपूर्वकमन्वयप्रकारं विरोधिभूताज्ञान-सामान्यनिवृत्तिरूपं प्रयोजनञ्चाभिधाय तद्वाक्यार्थांशभेदौ विविच्य दर्शयति। नाहं मम स्वतन्त्रोऽहं नास्मीत्यस्यार्थ उच्यते।

**न मे देहादिकं वस्तु सशेषः परमात्मनः।**
**इति बुद्ध्या निवर्तन्ते वाः स्वीयामनीषिकाः।।**

इति। अत्र नमश्शब्दे विशेष्यवाचकपदापेक्षायाम् अध्याहारापेक्ष्यापि अनुषङ्गस्यैव न्याय्यतायाः अनुषङ्गाधिकरणसिद्धतया, प्रणवघटकमकारस्यैव अत्र अनुषङ्गे सति, तस्य **मकारार्थो जीवः तदुपकरणं वैष्णवमिदम्** इति करणकलेबरादि दास्योपकरणविशिष्टजीवस्वरूपपरतया जीवस्वरूपे तदुपकरणेषु च मम्यानिषेधः फलतीत्यभिप्रेत्य, मकारार्थैकदेशजीवस्वरूपांशे मम्यनिषेधं दर्शयति (नाहं ममेति)। अस्यार्थमाह स्वतन्त्रोऽहं नास्मीत्यस्यार्थ उच्यते इति।

**नाहं मम** इत्यत्र मम इत्यत्र निषेध्यसम्बन्धसामान्यपरां षष्ठीमभिप्रेत्यतदर्थे स्वतन्त्रशब्दः प्रयुक्तः। स्वतन्त्रशब्दोहि स्वरूपोपायफलेषु त्रिष्वपि स्वातन्त्र्यं वक्तुमीष्टे। **स्वयमेव तन्त्रः प्रधानो यस्य सः** इति व्युत्पन्नस्य स्वतन्त्रशब्दस्य स्वप्रधानतासामान्यप्रतिपादकत्वात्।

तत्र स्वरूपांशे प्राधान्यं नाम-परशेषवृत्त्यापि स्वातिशयाधानार्हमेवा-स्वभोगोद्देश्यकपरशेषवृत्त्यादिव्यापारर्हत्वमिति यावत्। यथा विषयप्रवणस्य कामुकस्य विषयान्तरविषयकशेषवृत्तेः तत्प्रतिसम्बन्धिविषयान्तरार्थत्वेसत्यपि कामुकोद्देश्य भोगार्थत्वं न मुञ्चति। तद्वच्चेतनकर्तृकभगवद्विषयकशेषवृत्तेः भगवदर्थत्वे सत्यपि कर्तुः चेतनस्य भोगरूपतया तदनुभवानन्दस्य उद्देश्यत्वे सति भगवच्छेषवृत्तिरपि

स्वभोगार्थत्वं न मुञ्चत्येवेति तादृशस्वभोगार्थव्यापारार्थत्वरूपस्वार्हत्वमेव स्वरूपांशे स्वातन्त्र्यम्।

एवमुपायांशे स्वातन्त्र्यं नाम - भगवदनुमतिमात्रेण स्वेच्छया फलसाधन-प्रवृत्त्यर्हत्वम्। अत्र अनुमन्तुः भगवतः अप्रधानत्वात्, चेतनस्य स्वप्रधानत्वरूपं स्वातन्त्र्यं सुव्यक्तमेव।

ननु साधनविधायकानां शास्त्राणां [१]**श्रुतिस्स्मृतिर्ममैवाज्ञा** इत्युक्तरीत्या भगवत्प्रेरणारूपत्वात्, कथं भगवतः अनुमन्त्रृमात्रत्वेन अप्राधानमिति चेत्, भ्रान्तोऽसि। तत्तत्फलसाधनविषयेभगवतः प्रेरकत्वे, तत्तत्साधनप्रयोक्तृणाम् ऋत्विगा-दिवत् कर्मकरमात्रत्वेन तेषां तत्तत्फलभोगाभावप्रसङ्गात्।

ऋत्विक्प्रेरकस्य यजमानस्येव भगवत एव तत्तत्फलान्वयप्रसङ्गाच्च। तस्मात् **श्रुतिस्स्मृतिर्ममैवाज्ञा** इति वचनं नित्यनैमित्तिकनिषेधादिविषयम्, न तु सर्वविषयम्। **मुमुक्षुर्ब्रह्मोपासीत, बुभुक्षुर्यजेत** इत्यादि काम्यशास्त्राणां, यदि मोक्षेच्छया कश्चित् प्रवर्तेत तर्हि स ब्रह्मोपासीत, यदि च भोगेच्छया प्रवर्तेत, स यजेतेति तत्तच्चेतनरुचिविशेषानुगुणमार्गविशेषप्रदर्शनमात्ररूपत्वेन न तेषां भगवदाज्ञारूपत्वम्। अत एव हि न्यासोपासनादि धर्माननुष्ठानेफलालाभव्यतिरिक्तः प्रत्यवायो न श्रूयते। शास्त्रोक्तसाधनान्तरानुष्ठानविषये [२]**विमृश्यैतदशेषेण यथेच्छसि तथाकुरु** इति चेतनस्य स्वेच्छयाप्रवृत्त्यर्हतया भगवतः तत्रानुमन्तृमात्रत्वेन तत्रचेतनस्य स्वातन्त्र्यमुपपद्यत एव। तथा च स्वफलोद्देश्यकादृष्ट द्वारकसाधनप्रवृत्त्यर्हत्वमेव साधनांशे स्वातन्त्र्यमित्युक्तं भवति।

अथ फलांशे स्वातन्त्र्यं नाम - **शास्त्रफलं प्रयोक्तरि** इत्युक्तं स्वप्रवृत्त्युद्देश्य-भोगाश्रयत्वमेव। साधनभक्तिप्रपत्त्यादिफलविषये भगवतः सर्वशेषिताप्रयुक्तफलित्व-सत्त्वेऽपि तादृशफलित्वस्य सृष्टिस्थितिसंहारादिसर्वकार्यसाधारणत्वेन अप्रधानत्वात्, भक्तिप्रपत्त्यादिरूपफलसाधनानां चेतनानुष्ठितत्वेन चेतनस्यैव तत्र प्रधानफलित्वाच्च चेतनानां साधनानुष्ठानोद्देश्यफलभोगार्हतायाः स्वातन्त्र्यरूपत्वमुपपन्नमेव।

तथा च एतादृशत्रिविधस्वातन्त्र्यस्यापि **स्वतन्त्रोऽहं नास्मीत्यस्यार्थ उच्यते** इत्यत्र स्वतन्त्रशब्देन उच्यमानत्वात्, नमश्शब्दघटकमकारोत्तरषष्ठ्याः

---

१. भगवच्छास्त्रे   २. भ.गी.१८-६३

सम्बन्धसामान्यविषयिण्याः स्वशेषत्व स्वरक्षकत्व स्वभोक्तृत्वरूपस्वातन्त्र्यत्रयात्मक-सम्बन्धत्रयपरत्वं व्याख्यातं भवति।

एवं नमः पदविशेष्यत्वेन अनुषक्तमकारार्थे **मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम्** इत्युक्ते सोपकरणजीवस्वरूपे स्वरूपांशे मम्यनिषेधो व्याख्यातः। अथ उपकरणांशे मम्यनिषेधं दर्शयति –

**न मे देहादिकं वस्तु सशेषः परमात्मनः।**

इति। अत्र **न मे देहादिकं वस्तु** इति जीवोपकरणेषु करणकलेबरादिषु मम्य सामान्यनिषेधः।

**स शेषः परमात्मनः** इति-सोपकरणजीवविषयकमम्यनिषेधफलितार्थ-कथनम्। तथा च शेषैः सहवर्तत इति सशेषः, सोपकरण इत्यर्थः। अहमित्यनुषज्यते। सशेषोऽहं परमात्मनः - परमात्मनिरूपितसम्बन्धसामान्यवानित्यर्थः। अत एव -

**न मे देहादिकं वस्तु तच्छेषं परमात्मनः।**

इति नोक्तम्। तथा च सोपकरणस्वस्वरूपे प्रणवघटकमकारार्थे स्वसम्बन्धरूप मम्यसामान्यनिवृत्तेः **भावान्तरमभावः** इति न्यायेन भगवत्सम्बन्धसामान्यरूपत्वात् नमश्शब्दस्य भगवदेकस्वत्वभगवदेकरक्ष्यत्वभगवदेकभोग्यत्वरूपभगवत्सम्बन्धत्रय-पर्यवसायित्वमुक्तं भवति। एतेन मम्यरूपविरोधिसामान्यनिवृत्तेः भगवत्सम्बन्ध-सामान्यज्ञानात्मकत्वसिद्ध्या, सुषुप्तिप्रलययोः सर्वमुक्तिप्रसङ्गपरिहारः सूचितः।

तदेवं नमश्शब्दजनितेन भगवदेकस्वत्वादिज्ञानपर्यवसितेन स्वस्वातन्त्र्यादि निषेधज्ञानेन विरोधिभूताज्ञानसामान्यनिवृत्तिं दर्शयति –

**इति बुद्ध्या निवर्तन्ते स्वीयास्तास्तामनीषिकाः।**
**अनादिवासनाजातैः बोधैस्तैस्तैर्विकल्पितैः।।**

**रूषितं यद्दृढं चित्तं स्वस्वातन्त्र्य स्वतामयम्।**
**तत्तद्वैष्णवसार्वात्म्याप्रतिबोधसमुत्थया।।**
**नम इत्यनया वाचा नन्त्रा स्वस्मादपोह्यते।**

इति । इतिबुद्ध्या भगवत्सम्बन्धसामान्यज्ञानपर्यवसितया स्वोपकरणस्वविशेष्य-

कमम्यसामान्याभावप्रकारकनमश्शब्दजन्यबुद्ध्येत्यर्थः। (स्वीयाः) स्वयत्नजनिता इत्यर्थः। [1]**यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः** इत्यत्र **कश्चिन्मां वेत्ति**, को वा मां वेत्ति ? न कोऽपि वेत्तीत्यर्थस्यभाषिततया, स्वयत्नजन्यज्ञान-सामान्यस्य [2]**तन्नाल् वरुम् नन्मै विलैप्पाल् पौले** इत्यनुगृहीतरीत्या दोषदुष्टतया त्याज्यत्वनियमात्।

**इति बुद्ध्या निवर्तन्ते स्वीयास्तास्तामनीषिकाः** इत्युक्तं विशदयति (अनादिवासनयेत्यादि - अपोद्यते) इत्यन्तेन। तत्र स्वीयमनीषिकासामान्यस्य दोषदुष्टत्वे नियामकमाह (अनादिवासनाजातैरिति) अत्र वासनाशब्देन स्वशेषत्ववासना-त्वयत्नवासनास्वभोगवासनादयो विवक्षिताः।

तासामनादित्वोक्त्या स्वयत्नाऽनिवर्त्यत्वं दर्शितम्। अनादिकालाभ्यस्ता नामा नन्तकालयत्नैः विना दुस्तरत्वात्, स्वयत्नानामपि अनादिवासनाकार्यत्वेन तैः तन्निस्तारायोगाच्च। (विकल्पितैः) विरुद्धतयाकल्पितैः, स्वरूपोपायप्राप्य-स्वरूपतिरोधानकरत्वेन आगन्तुकैः इत्यर्थः। (तैस्तैर्बोधैः) **ज्ञाता, कर्ता, भोक्ता, अहं ब्राह्मणः ममायं भोगः, मद्भोगसाधनत्वान्मदर्था मे कृतयः** इत्यादिरूपैः अज्ञानभेदैः दृढं यथा तथा रूषितम्, अत एव स्वस्वातन्त्र्यस्वताममहङ्कारममकार-प्रचुरंचित्तंमानसज्ञानम्, तत्तत्सर्वम्।

(वैष्णवसार्वात्म्यप्रतिबोधसमुत्यया) विष्णुसम्बन्धियत्सार्वात्म्यं-सर्वशरीरत्वम्, तद्ज्ञानमूलयेत्यर्थः। शरीरशरीरिभावस्य आधेयत्वविधेयत्वशेषत्वादि-रूपतया स्वात्मात्मीयगतभगवच्छेषत्वपारतन्त्र्यज्ञानहेतुकया इत्युक्तं भवति।

तथा च यथा प्रतीतियुक्ताचार्यकर्तृकभगवत्सार्वात्म्य प्रतिबोधमूलकत्वमुक्तं भवति। इदञ्च नमश्शब्दस्य भगवत्सार्वात्म्य एव तात्पर्यमिति ज्ञापनार्थम्। आचार्यकर्तृकभगवत्सार्वात्म्यबोधपूर्वकोपदेशरूपस्य नमश्शब्दस्य भगवत्सार्वात्म्य-बुबोधयिषा प्रयुक्तत्वासिद्धेः, आचार्यकर्तृकयथा प्रतीतिपूर्वकमन्त्रोपदेशस्य शिष्यसमवेततादृशप्रतीत्यर्थत्वात्।

---

१. भ.गी.७-३ २. श्री.व.भू.

तथा च **वैष्णव-सार्वात्म्यप्रतिबोधसमुत्थया** इत्यनेन वैष्णवसार्वात्म्यप्रतिबोधनार्थयेत्युक्तं भवति। इदञ्च वाग्विशेषणम्। तथा भूतयानमइत्यनया वाचा-नमश्शब्दात्मकेन वाक्येनेत्यर्थः

अत्र, वाक्छब्दप्रयोग आचार्योपदेशरूपत्वाभिप्रायः तथा च, यथा प्रतीतियुक्तसदाचार्यमुखात् श्रुतेन **म्-मः न** इत्यकारकवाक्येन शिष्यः स्वात्मात्मीय-सर्ववस्त्वपेक्षया भगवतः आधारत्वनियन्तृत्वादिरूपमात्मत्वमसङ्कुचितं ज्ञात्वा, तादृशप्रबोधविशेषेण [१]**एन ताविचार् यानार्** [२]**नियतस्वमिति प्रबुद्धधीः** इत्यनुगृहीतरीत्या स्वस्वातन्त्र्यादिगर्भं यथावस्थितन्यासोपासनादिरूपं मानसज्ञानं सर्वं सवासनं परित्यजतीति नमश्शब्दस्य सर्वविरोधिनिवर्तकत्वमुपपद्यत इति भावः।

अत्र सार्वात्म्यशब्दः [३]**सर्वात्मनायश्शरणम् शरण्यम्** [४]**वासुदेवस्सर्वमिति स महात्मा** [५]**उण्णुम् शोरु परुकुनीर् तिन्नुम् वेत्तिलैयुमेल्लाम् कण्णन्** इत्यद्युक्तमुपायोपेयाद्यात्मकत्वं वक्तीति केचिदाचार्याः। तदापि पूर्वोक्तयैव दिशा योजना द्रष्टव्या।

ननु पूर्वयोजनायां नमश्शब्दस्य भगवतः सर्वाधारत्वाद्यसङ्कोचशिक्षकत्वं कथमिति चेत् इत्थम् यावतास्वात्मात्मीयानां पृथक्स्थितिपृथगुपलम्बार्हत्वरूपं स्वातन्त्र्यं न निवार्येत, न तावत्पर्यन्तं भगवतः सर्वाधारतायाः सर्ववस्तुसामानाधि-करण्यार्हतापादकत्वरूपासङ्कोचसिद्धिः। यावता च स्वस्य भगवदनुमतिमात्रेण प्रवृत्त्यर्हत्वलक्षणं स्वातन्त्र्यं न निवार्येत, न तावत्पर्यन्तं भगवतः सर्वप्रेरक-तालक्षणनियन्तृत्वस्य असङ्कोचसिद्धिः। एवं स्वात्मात्मीयगताश्रयास्पति स्वस्य भोक्तृत्वलक्षणं स्वातन्त्र्यं यावता न निवार्येत, न तावत्पर्यन्तं शेषशेषिभावस्य अनन्यार्हत्वरूपासङ्कोचसिद्धिरिति, तादृशसर्वस्वातन्त्र्यनिवर्तकस्य नमश्शब्दस्य वैष्णवसार्वात्म्यान्तर्गत-सर्वाधारत्वाद्यसङ्कोचशिक्षकत्वोपपत्तिरिति। **यानेनी येन्नुडै मैयुम् नीये** इत्यादिषु स्वात्मात्मीयानां यथावस्थिताधाराधेय भावः, [६]**त्वमेव रुचिरेदेशे क्रियतामिति मां वद** इत्यादिषु यथावास्थितनियन्तृनियाम्यभावः।

---

१. तिरुवायिमोलि २-३-४ २. स्तो.र. ३. भाग.
४. भ.गी.७-१९ ५. तिरुवायिमोलि ६-७-४ ६. रामा.अयो.का.१५-७

[1]**एम्मावीट्टुत्तिरमुम् शेप्पम्** [2]**तनक्केयाकवेनैक्कोल्लुमीते** [3]**स एकाकी न रमेत** [4]**बहुस्यां प्रजायेय** [5]**करणं कारणं कर्ता विकर्ता** (एन्नुडम्बिललुक्कै नाने पोक्किक्कोल्लेनो) इत्यादिषु यथावस्थितशेषशेषिभावासङ्कोचश्च स्थानत्रय-सम्बन्धि नमश्शब्दविरचितस्वातन्त्र्यनिवारणफलीभूता एव इत्यनुसन्धेयमिति दिक्।

अथात्र **नम इत्यनया वाचानन्त्रा स्वस्मादपोह्यते** इत्यत्र नन्त्रा प्रयुज्यमानेन नमश्शब्देन विरोधिजातमपोह्यत इत्यर्थाश्रयणं न सम्भवति।

स्वमिथ्याज्ञाननिवृत्तेः स्वकर्तृकशब्दप्रयोगजन्यत्वायोगात् मिथ्या ज्ञानं हि आचार्यमुखात् नमश्शब्दश्रवणदशायामेव निवृत्तमिति। न पुनः तच्छब्दप्रयोगोऽपि अपेक्षितः। साधनानुष्ठानदशायां मन्त्रात्मकेन नमश्शब्देन कर्तृस्वरूपस्मरणम् अत्राभिधीयत इति तु न साधीयः। **सन्त्रा स्वस्मादपोह्यते** इति भ्रान्तिनिवृत्त्यर्थताया एव कण्ठोक्तत्वात्। श्रवणदशायां यथावत् शिक्षितस्यात्मस्वरूपस्य पुनर्मन्त्रेण स्मरणदशायां निवर्तनीयस्वस्वातन्त्र्याद्यभिमानाभावेन तादृशाभिमानविवृत्तिफलकत्वं तस्य नमश्शब्दस्य न सम्भवत्येव। तस्मात् पूर्वोक्त एवार्थः।

अथ नमश्शब्दस्य सूक्ष्मयोजनां निगमय्य, परयोजनां प्रक्रमते - **इति ते सूक्ष्म उद्दिष्टः परमन्यन्निशामय** इति परयोजनायां नमश्शब्दस्य नकारमकार-विसर्गात्मकपदत्रयरूपत्वात् तस्य वाक्यार्थं वक्ष्यन् प्रथमं पदार्थानाह –

**पन्थानकार उद्दिष्टो मः प्रधान उदीरितः।**
**विसर्गः परमेशस्तु तत्रार्थोऽयं निरुच्यते।।**

इति । अत्र परमेश इत्यन्तं पदार्थकथनम्। अनन्तरं वाक्यार्थप्रतिज्ञा नरो नारायणः पन्थानकारस्समुदाहृतः।

**मकारो मर्दनः कालः प्रधानः परिपठ्यते ।**
**विसर्गस्सृष्टिकृत्ख्यातो ह्यः कारः परमेश्वरः।**
**अकारश्चानिरुद्धाह्वः कलान्तस्सर्गिसंज्ञितः।।**

इति भगवच्छास्त्राक्षराभिधानकोशवचनैः नकारस्य सिद्धोपायपरतायाः, मकारस्य

---

१,२. तिरुवायिमोलि २-९-१ ३. महा.उ.१ ४. तै.उ.आ.व.६ ५.वि.स.स्तो.

सर्वपापविमोचनात्मकात्यन्तिकसंहारकर्तृत्वरूपप्राधान्यपरतायाः, विसर्गस्यानिरूद्धावस्थपरमेश्वरपरतायाश्च सिद्धतया, तदभिप्रायेण **पन्थानकार उद्दिष्टः** इत्यादिकमुक्तम्। अत्र **नकारमकारौ विधेयवाचकौ, विसर्गः उद्देश्यवाची** इत्यभिप्रेत्य विसर्गार्थप्रधानं वाक्यार्थमाह -

**अनादिः परमेशो यश्शक्तिमान् पुरुषोत्तमः।**
**तत्प्राप्तये प्रधानोऽयं पन्थानमननामवान्।।**

इति। अत्र विसर्गवाच्यस्य **अनिरुद्धस्य शक्तितेजस्समुत्कर्षादनिरुद्धतनुः** इति शक्तितेजः प्रधानत्वात्, तत्र -

**शक्त्या जगदिदं सर्वमनन्ताण्डं निरन्तरम्।**
**बिभर्ति पाति च हरिर्मणि सानुरिवाणुकम्।।**

इति। शक्तिकार्यसर्वजगद्भरणादिना -

**[1]यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।**

इत्युक्तपुरुषोत्तमशब्दप्रवृत्तिनिमित्तपुष्कलत्वात् ते -

**जसानिखिलं तत्त्वं ज्ञापयत्यात्मनो मुने।**

इति तेजो गुणेन - **[2]तस्यैव आत्मा विवृणुते तनूं स्वाम्** -

**[3]तेषामेवानुकम्पार्थमहमज्ञानजं तमः।**
**नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।।**

**ततो नाम्नानिरुद्धोऽयं स्वयमेवाभवन्मुने।**
**तदेकान्तवपुर्युक्तस्तादात्विकघनप्रभः।।**

**[4]कातल्कडल् पुरै यविलैवित्तकारमर् मेनि** इत्याद्युक्तरीत्या समुज्जीवनहेतुभूतवृन्तग्रहणपर्यन्त भगवत्कामवर्धकतया पुरुषोत्तमत्वपौष्कल्याच्च अनिरुद्धावस्थपरमेश्वरष्ठवाचकस्य विसर्गस्य अनादित्वादिविशिष्टपुरुषोत्तमपरत्वमुक्तमितिध्येयम्।

---

१. भ.गी.१५-१७ २. कठ.उ.१-२-२३ ३. भ.गी.१०-११
४. तिरुवायिमोलि.५-३-४

तत्र अनादिरित्युक्तमनादित्वम् **अनन्ताण्डं निरन्तरम् बिभर्ति पाति च** इति स्थूलरूपेण सूक्ष्मरूपेण वा सदातनसर्ववस्तुभरणाद्युक्तिबलादर्थसिद्धम्। परमेश इति शक्तिकार्यासङ्कोचोक्तिः। शक्तिमानित्येतत् तेजसोऽपि उपलक्षणम्। पुरुषोत्तम इति त्रिविधचेतनवैलक्षण्यमभिप्रेतम्। **परमेशो यः** इति यच्छब्दः असङ्कुचितपरमेशत्वस्य शक्तिविशिष्टपुरुषोत्तमत्वव्याप्त प्रसिद्धिपरः, [१]**लोकत्रयमाविश्य** इत्यादिषु तत्प्रसिद्धेः। तथा च परमेश्वरववाचको विसर्ग एव परमेश्वरनियतैः धर्मैः प्रकृतविधीयमानपथिकत्वप्राधान्ययोः आश्रयं स्वेतरसर्वव्यावर्तपूर्वकं विशेषतो व्यावर्तयतीति अभिप्रायेण **अनादिः** इत्यारभ्य **पुरुषोत्तमः** इत्यन्तेन विसर्गबोध्यविशेष्यस्वरूपनिष्कर्षः कृत इत्यनुसन्धेयम्।

तत्र अनादिरित्यनेन स्वरूपसिद्धौ चेतनसापेक्षाण्युपायान्तराणि व्यावर्त्यन्ते। परमेश इत्यनेन विसर्गवाच्यस्य अनिरुद्धस्य **विपरीतेऽपि नैवास्य प्रतिषेधाय पातकम्** इत्युक्तचेतनयातकानिरुद्धलक्षणप्रवृत्तिमत्त्वलक्षणनिरङ्कुशस्वातन्त्र्यबोधनफलसिद्धौ प्रतिबन्धकाभावादि सापेक्षाण्युपायान्तराणि व्याववर्त्यन्ते। शक्तिमानित्यनेन भगवत एकस्यैव प्राप्यत्वफलित्वफलोपायत्वाद्युपपादकविचित्रशक्तियोगोक्त्या स्वव्यतिरिक्तफलप्रददेवता स्वसाध्यफलादिसापेक्षाणि व्यावर्त्यन्ते।

पुरुषोत्तम इत्यनेन - **पूर्वमेवाहमास**मिति, **तत्पुरुषस्य पुरुषत्वम्** [२]**सहस्रशीर्षा पुरुषः** [३]**महापुरुषपूर्वज** [४]**पूर्वसंज्ञे वै शरीरेऽस्मिंच्छयनात्पुरुषो हरिः** [५]**निन्नतेन्दैयूरकत्तु** इत्याद्युक्तरीत्या सौलभ्याभिधानात् [६]**त्वयासौ पुरुषर्षभः** [७]**सतामेतदगर्हितम्** इत्याद्युक्तरीत्या वात्सल्याद्यभिधानात्, **यदि वा बहुदानाद्वै विष्णुः पुरुष उच्यते** इत्याद्युक्तरीत्या [८]**एन्नैयाक्किक्कोण्डेनक्केतन्नैत्तन्दकर्पकम्** इति, अर्थिकल्पकत्वादिरूपमहौदार्याभिधानात्, **यत्पूर्वस्मात्सर्वस्मात्पाप्मन ओषत्, तस्मात्पुरुषः** इत्याद्युक्तरीत्या सापेक्षरक्षकत्वरक्ष्यतारतम्यरूपविशेषालोचनसंश्रितविश्लेषसहिष्णुत्वादिलक्षणावद्यराहित्याभिधानात्, पुरुषोत्तमशब्दरूढ्याश्रियः पतित्वरूपपुरुषकारसम्बन्धाभिधानाच्च तादृशसौलभ्यादिविशिष्टस्य चेतनप्रवृत्त्यसहत्वलाभात् चेतननिवृत्त्यसहसाधनान्तरव्यावृत्तिरिति ध्येयम्।

---

१. भ.गी.१५-१७ २. पु.सू. ३. जितन्ते-१ ४,५. तिरुच्छन्दविरुत्तम् -६४
६. रामा.सु.का.२१-१९ ७. रामा.यु.का.१८-३ ८. तिरुवायिमोलि २-७-११

तदेवं सकलेतरव्यावृत्तं परमपुरुषमुद्देश्यत्वेन निष्कृष्य विधेययोः नकार-मकारार्थयोः उपायत्वफलप्रदत्वरूपफलित्वप्राधान्ययोः फलैकनिरूपणीयत्वात् फलाकाङ्क्षायां पराधिकरणोक्तरीत्या [१]**अमृतस्यैष सेतुः** इति सम्बन्धव्यपदेशेन [२]**तेनेदं पूर्णं पुरुषेण सर्वम्** इत्युक्तस्य विसर्गार्थस्य परमपुरुषस्यैव फलत्वेनान्वयार्हत्वसिद्ध्या विसर्गस्यैव आवृत्त्या अत्र फलबोधकत्वमित्यभिप्रेत्याह (तत्प्राप्तय इति) विसर्गवाच्यतयोक्त परमपुरुषप्राप्तय इत्यर्थः।

अत्र प्राप्यस्यैव भगवतः परार्थानुभवकैङ्कर्यप्रतिसम्बन्धितया प्राप्यत्वलक्षणफलत्वोपपादनार्थः। अन्यथा आवृत्तस्य विसर्गस्य लक्षणापत्तेः।

अथ विधेये दर्शयति प्रधानोऽयं पन्था इति अयं प्रधानः पन्थाश्चेति योजना। अयं शब्दः विसर्गप्रतिपादितोद्देश्यानुवादपरः। तथा च -

अनादिः परमेशः शक्तिमान् पुरुषोत्तमो यः, तत्प्राप्तये स एव पन्था उपायः प्रधानः फलप्रदश्चेति समुदितार्थः।

अथ ननु **तेन तेनाप्यतेतत्तन्न्यासेनैव महामुने, इदं शरणमज्ञानम्, भक्त्या प्रपत्त्या वा** इत्यादिषु न्यासादीनामेव उपायत्वाभिधानात्, कथं भगवतः तथात्वमित्यपेक्षायामुपायविषयकन्यासादिशब्दानां **न्यास इत्याहुर्मनीषिणो ब्रह्माणम्, न्यास इति ब्रह्म-परो हि ब्रह्म** इति श्रुत्युक्तरीत्या, **ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा, ब्रह्माणं विदधाति पूर्वम्, तुरीयोऽयं जगन्नाथो ब्रह्माण्डमसृजत्प्रभुः** इत्याद्युक्तव्यष्टिसृष्टिकृच्चतुर्मुखनियामकतया पुल्लिङ्गब्रह्मशब्दवाच्यसिद्धोपायभूतानिरुद्धपरत्वादविरोधं दर्शयति (नमननामवानिति)।

नमनम्-भक्तिप्रपत्त्यादिब्रह्मविद्या। **विनतविविधभूत** इत्यादिषु तथा दर्शनात्। तस्य यानि नामानि नमश्शरणन्यास भक्तिप्रपत्त्यादिशब्दरूपाणि, तान्यस्य नामितासम्बन्धेन सन्तीति **नमनानामवान्**। नमश्शब्दस्य न्यासशब्दादिनामक इत्यर्थः। यद्वा नमननामवान् इत्येतन्नमश्शब्दस्यैव रूढिवृत्त्या प्रकृतवाक्योद्देश्य भगवत्स्वरूपसमर्पकत्वप्रदर्शनपरम्। तदा च विसर्गस्यावृत्तिः अनपेक्षिता।

---

१. मुण्ड.उ.२-२-५ २. श्वेता.उ.३-९

यथा श्रुतो विसर्गः प्राप्यमात्रपरः। तथा च नमननामवानयं नमश्शब्द-रूढिप्रतिपाद्योभगवान्विसर्गवाच्यपरमपुरुषप्राप्यनिरूपितनकारमकारवाच्योपाय-त्वप्राधान्यैतदुभयवानित्यर्थः।

यथा पङ्कजादि पदजन्यबोधेषु तत्पदरूढिशक्यतावच्छेदक पद्मत्वाद्य-वच्छेदेन योगप्रवृत्ति निमित्तं पङ्कजनिकर्तृत्वादिकं भासते। तद्वदेव अत्रापि नमश्शब्दरूढिशक्यतावच्छेदकजगदुज्जीवनकृषिकर्तृत्वावच्छेदेन परमपुरूषप्राप्तिरूप-फलदाननिरूपितकर्तृकरणैक्यरूपो नमश्शब्दावयवार्थो भासत इति नमश्शब्द एव स्वावयवार्थरूपविधेयस्य रूढिवृत्त्या उद्देश्यसमर्पक इति भावः।

नमश्शब्दस्य जगदुज्जीवनार्थकृषिविशिष्टे भगवति रूढिस्तु, श्रीमत्परकाल-सूरि प्रथमप्रबन्धेषष्ठशतकान्ते (किडन्दनम्बि) इत्यादिदशकेप्रतिगाधान्त्यं (नामम् शोल्लिल् नमो नारायणमे) इति, **सर्वभूतमेकं नारायणम्** इति श्रुत्युक्त नपुंसकान्त-नमश्शब्दस्यापि भगवन्नामत्वाभ्यासादिभिः प्रसिद्धः।

नमननामवानित्यस्य नमस्काररूपविशेषसमर्पणपरत्वन्तु नोपपद्यते। नामवानित्यस्य वैयर्थ्यात्। तथा सति **तत्प्राप्तये प्रधानं वै पन्थानमनामिष्यते** इत्येतावत एव वक्तव्यत्वात्। नमस्कारस्य प्राधान्यमपि बाधितम्। तस्य फलप्रदत्वा-भावात्। मकारार्थस्य नकारार्थविशेषणत्वाश्रयणेन प्रधानोपायत्वस्य विधेयत्वोक्तौ नकारमकारयोः समासाश्रयणगौरवं मकारस्य उत्तरनिपातास्वारस्यञ्च प्रसज्यते। त्वन्मते प्रपत्तेः अशक्ताधिकारत्वेन अनुकल्पत्वोक्त्या प्रधानोपायत्वमपि बाधितमेव। कर्माद्यपेक्षया प्राधान्यविवक्षणे तदुक्तिवैयर्थ्यम्, प्राधान्यावधिवाचकपञ्चम्यन्त-शब्दान्तराध्याहारप्रसङ्गश्च। सिद्धान्ते तु फलप्रदगतप्राधान्यस्य उपायनिष्ठावधिकता-कत्वेन नकारस्यैव मकारोक्तप्राधान्यावध्याकाङ्क्षापूरकत्वात् नाध्याहारापेक्षा।

**नमस्कारः पन्थाः, ईश्वरः प्रधानपन्थाः** इत्यर्थवर्णनमपि अनुचितम्। उपायान्तरजन्यफलविषये भगवतः फलप्रदमात्रत्वेन प्रधानत्वायोगात् –

**[१]निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि।**
**प्रधानकारणीभूता यतो वै सृज्य शक्तयः।।**

---

१. विष्णु.पु.१-४-५१

इति। फलप्रदमात्रस्य [1]**निमित्तमात्रं भव सव्यसाचिन्** इतिवत् केवलाप्रधानत्वोक्त्या सृज्यशक्तिस्थानीयस्य नमस्कारस्यैव प्रधानकारणतायाः वक्तव्यत्वात्। नारायणशब्द परयोजनायां **सदानन्दमयः पन्थाः** इति भगवत एव पथित्वोक्तेः। तत्सूक्ष्मयोजनायां [2]**गतिशलम्बनं तेषां तेन नारायणः स्मृतः** इति करणेल्युडन्तायन शब्दस्य भगवदुपायत्वपरत्वोक्तेः।

तद्विवरणद्वयचरमश्लोकशरणशब्दाभ्यां करणे ल्युडन्ताभ्यां भगवतः उपायत्वस्य स्थिरीकरणात्।

लक्ष्मीतन्त्रे **प्रापयाम्यात्मनात्मानं निर्धूताखिलकल्मषम्** इति भगवत एकस्यैव प्राप्त्युपायत्वप्राप्यत्वप्रापकत्वानां कण्ठोक्तत्वात्। श्रुतौ च माण्डूक्य-तृतीयखण्डे **संविशत्यात्मनात्मानम्, य एवं वेद** इति तद्वचनात्। श्वेताश्वतरे **तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय** इति भगवद्व्यतिरिक्त-मोक्षोपायनिषेधपूर्वकं **प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारबन्धस्थितिमोक्षहेतुः** इति भगवत एव सोपपत्तिकं मोक्षोपायत्वमुक्त्वा नान्यो हेतुर्विद्यते ईशनाय इति [3]**उतामृतत्वस्येशानः** इत्युक्तमोक्षप्रवर्तनपर्यन्तभगवत्कर्तृकसकलजगदीशनस्य हेत्वन्तरं पुनरपि प्रतिषिध्य **यो ब्रह्माणम्** इत्यादिना मुमुक्षुणां भगवदेकोपायत्वाध्य-वसायं सिद्धोपायाधिकारिविशेषणमुक्त्वा **अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्** इति भगवत एव अमृतप्रापयितृत्वरूपप्राधान्यलक्षणपरत्वस्य उपायत्वलक्षण-सेतुत्वस्य चोक्तत्वात्।

कठवल्लीमुण्डकयोः **नायमात्मा** इत्यादिना श्रवणमननादीनाम् अनुपायत्वमुक्त्वा -

[4]**नासौ पुरुषकारेण न चाप्यन्येन हेतुना।**
**केवलं स्वेच्छयैवाहं प्रेक्षे कञ्चित्कदाचन॥**

इत्युक्तनिर्हेतुकविषयीकारलक्षणवरणकर्तुः भगवत एवोपायत्वोक्तेः, [5]**विष्णु-पोतं विना नान्यत्किञ्चिदस्ति परायणम्** [6]**त्वत्पादकमलादन्यन्नमेजन्मान्तरेष्वपि।**

---

१. भ.गी.११-३३ २. पाद्म.पु.उ.भा.२२६ ३. पु.सू.
४. भगवच्छास्त्रे ५. वि.ध.पु.१-५६ ६. जितन्ता.-१

निमित्तं कुशलस्यास्ति इत्यादिभिः **भगवद्व्यतिरिक्तोपायसामान्यनिषेधात्, अत्रापि नमश्शब्द स्थूलयोजनायां, फलेप्सातद्विरोधिनी** इत्युपायताबुद्धेः विरोधित्वाभिधानात्, तत्सूक्ष्मयोजनायां **न मे देहादिकं वस्तु स शेषः, परमात्मनः** इति चेतनगतसर्ववस्तूनां चेतनार्थत्वनिषेधपूर्वकं केवलभगवदर्थत्वोक्त्या तदन्तर्गतस्य नमनस्यापि चेतनफलार्थतयाचेतनार्थत्वरूपोपायत्वस्यापि निषिद्धत्वात्, नमः पदे स्वसम्बन्धसामान्यनिषेधेन स्वरक्षणोपायत्वप्रवृत्त्यर्हत्वरूपस्वातन्त्र्यस्यापि निषिद्धतया [१]**आत्मत्राणोन्मुखश्चेन्नम इति च पदं बान्धवाभावलोलश्शब्दं नारायणाख्यम्, स्वातन्त्र्यं निजरक्षणं समुचितावृत्तिश्च नान्योचिता तस्यैवेति हरेर्विविच्य कथितम्** इत्यादि साम्प्रदायिकपूर्वाचार्यश्रीसूक्तिसिद्धत्वाच्च, नमनस्योपायत्वायोगात्।

तस्मात् नमननामवान् विसर्गवाच्योऽयं भगवान् स्वप्राप्तये स्वयमेव पन्थाः - उपायः। फलप्रदानकर्तृतया प्रधानश्चेत्येव योजनास्वारसिकी। भगवत एव उपायत्वे फलप्रदत्वे च सति फलप्रदस्य प्राधान्यञ्च निरङ्कुशम्। फलप्रदोपाययोः भेदे हि फलप्रदस्य फलगतविशेषधर्मावच्छिन्नकार्यतानिरूपितकारणतारूपासाधारणकारणत्वाभावात्, फलोपायस्य कारणान्तराव्यवहितकारणताकत्वाभावाच्च उभयोः अप्राधान्यं भवति। फलप्रदोपाययोः ऐक्ये निरुक्तोभयविधाऽप्राधान्यस्यापि प्रसङ्गाभावेन प्रधानोपायत्वं पुष्कलम्। तस्मात् यथोक्त एवार्थः। तदेवम् अहिर्बुध्न्योक्तनमश्शब्दयोजनात्रयेऽपि चेतनकर्तृकस्वरक्षणार्थप्रवृत्तेः समूलोन्मूलितत्वेन तद्बलेन नमश्शब्दस्य उपायान्तरैदं पर्यसिद्धवचनमनुपपन्नमेव।

एतेन तद्द्वितीययोजनायाः साधनान्तराधिकार्यपेक्षितकर्तृत्वत्यागपरत्ववचनम्, तृतीययोजनायाः विकल्पेन साधनप्रपत्तितत्फलप्रदयोः प्राधान्यपरत्ववचनञ्च परास्तम्। द्वितीययोजनायां स्वातन्त्र्यसामान्यस्य निषिद्धत्वेन तत्र निरीश्वरवाद्यसाधारणस्वातन्त्र्यमात्रनिषेधोक्तेः अनुपपन्नत्वात्।

न हि ईश्वरम् अभ्युपगच्छतां नमः पदनिषेध्यतया त्वदुक्तस्य प्रधानकर्तृत्वलक्षणस्वतन्त्र्यस्य प्रसङ्गः स्यात्। येन तन्निषेधेन नमः पदसार्थक्यम्। तस्मात् त्वन्मते द्वितीययोजना व्यर्थैव।

---

१. अष्टश्लोकी

स्वातन्त्र्यसामान्यनिषेधपरत्वे तु भगवत्परत्वमभ्युपगच्छतामपि भगवदनुमत्यनिवारणमात्रेण **कृतप्रयत्नापेक्षस्तु** इत्युक्तरीत्या सांसारिकप्रयत्नवत्, कर्माधीनसुखसंगजनकबन्धकसत्वगुणोन्मेषबलेन निरतिशयसुखरूपस्वार्थमोक्षसाधनेष्वपि प्रवृत्तिसम्भवेन तादृशप्रवृत्त्यर्हताद्यापादकस्वातन्त्र्यनिषेधात्, नमश्शब्दद्वितीययोजना प्रयोजनवत्तरा।

न चैवम्, **कर्ता शास्त्रार्थवत्त्वात्** शास्त्रफलं प्रयोक्तरि इत्यादिविरोधः। **कर्ता शास्त्रार्थवत्त्वात्** इत्यस्य प्रयोज्यकर्तृप्रधानकर्तृसाधारण्येन शरीराधिष्ठानप्रयत्नहेतुत्वलक्षणकर्तृत्वसामान्यविषयत्वेनतद्बलेन निष्कृष्टात्मनः स्वातन्त्र्यासिद्धेः। तदधिकरणभाष्यदर्शितेन प्राप्ताप्राप्तविवेचनेनैव सांसारिकप्रवृत्तिष्विव साधनान्तरप्रवृत्तावपि जीवस्य कर्तृतायाः भगवदत्यन्तपारतन्त्र्यविरुद्धायाः गुणसङ्गकृतत्वसिद्ध्या तदनुकूलस्वातन्त्र्यस्यापि विशिष्टवेषनिष्ठत्वेन निष्कृष्टस्वरूपगतत्वायोगात्। [1]**कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ।**

पुरुषस्सुखदुःखानाम्, इत्यत्रश्रीगीताभाष्ये, **कार्यम्-शरीरम्, कारणानि-ज्ञानकर्मात्मकानि समनस्कानीन्द्रियाणि। तेषां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुः** इति स्वभोगतत्साधनप्रवृत्तिसामान्यस्य बन्धकाचित्सम्बन्धरूपविरोधिस्वरूपप्रयुक्ततायाः अनुगृहीतत्वात्।

[2]**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।**
**यः पश्यति तथात्मानमकर्तारं स पश्यति।।**

इति वचनभाष्ये सर्वाणिकर्माणि - **कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते** इति पूर्वोक्तरीत्या क्रियमाणानीति यः पश्यति, तथा आत्मानं ज्ञानाकारमकर्तारञ्च यः पश्यति, तस्य प्रकृतिसंयोगः, तदधिष्ठानम्, तज्जन्यसुखदुःखानुभवश्च कर्मरूपाज्ञानकृत इति च यः पश्यति, सः आत्मानं यथावस्थितं पश्यतीति साधनान्तरानुष्ठातृत्वतत्फलभोक्तृत्वयोः निष्कृष्टवेषास्पर्शित्वस्यानुगृहीतत्वात्।

---

१. भ.गी.१३-२०
२. भ.गी.१३-२९

[१]सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।

[२]तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेनचानघ।।
[३]ऊर्ध्वं गच्छन्ति सत्वस्थामध्ये तिष्ठनि राजसाः।

इति श्रीगीतावचनैः सुकृतपरम्परापरिणतप्रकृतिसम्भवसत्वस्य न्यासोपासनादिलक्षणसाधनान्तरात्मकज्ञानविशेषतत्फलमोक्षपर्यन्तसुखविशेषयोः संगजननद्वारा स्वरूपयाथात्म्यविनाशकरतया बन्धकत्वमुक्त्वा सर्वारम्भपरित्यागी गुणातीतस्स उच्यते इति भावनात्रयरहितस्यैव गुणत्रयातीतत्वं प्रतिपाद्य –

**यो मामव्यभिचारेण भक्तियोगेन सेवते।**
**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते।।**

इति साधनान्तरसङ्गरूपव्यभिचाररहितेन –

**साधनं भगवत्प्राप्तौ स एवेति स्थिरामतिः।**
**साध्यभक्तिस्स्मृता सैव प्रपत्तिरिति गीयते।।**

इत्युक्त भगवदेकोपायत्वाध्यवसायात्मकप्रपत्त्यात्मकभक्तियोगेन विना तादृशगुणात्ययस्यदुस्साधत्वमुक्त्वा, तादृशभक्तियोगस्यापि तद्विषयसत्यसङ्कल्पपरमकारुणिकाश्रितवात्सल्यैकजलधि भगवत्कर्तृकनिर्हेतुकविषयीकारजायमानकालकटाक्षशुद्धसत्त्वसदृशविलक्षणसत्वप्रवर्तनसदाचार्यसङ्घटनादिभगवत्कृषिफलत्वेन अनुपायत्वात्, भगवत एव चरमकारणतया, तस्मिन्नेवोपायत्वपर्यवसानं [४]**द्युभ्वाद्यायतनं स्वशब्दात्** इति सूत्रदर्शितं –

**ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च।**
**शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च।**

इति दर्शयित्वा, सत्वादिमूलकस्वप्रवृत्तेः बन्धकतायाः सप्रपञ्चमभिहितत्वेन तादृश प्रवृत्तिकर्तृतालक्षणस्वातन्त्र्यसामान्यस्य विरोधिनिवृत्तिपरे नमश्शब्दे निषेधोपपत्तेश्च।

---

१. भ.गी.१४-५ २. भ.गी.१४-६ ३. भ.गी.१४-१८ ४. ब्र.सू.

**शास्त्रफलं प्रयोक्तरि** इत्यस्यापि ऋत्विगादिषु अतिप्रसङ्गवारणाय प्रयोज्यकर्तृव्यतिरिक्तविषयत्वावश्यं भावस्य पूर्वमेवोक्तत्वात्, केवलकैङ्कर्यभूत-प्रह्वीभावाद्यव्यभिचारभक्तियोगपर्यन्तसेवाकर्तुः अत्यन्तपरतन्त्रस्य दासकर्मकरत्वेन तादृशस्वतन्त्रप्रयाक्तृतायाः तस्मिन्नसम्भवाच्च विरोधाभावात्।

तस्मान्नमः पदसूक्ष्मयोजनायाः चेतनगतसाधनान्तरविषयकप्रधानकर्तृत्वमात्र-निषेधपरत्वोक्तिरनुपपन्नैव। अत एव परयोजनायाः विकल्पेन प्रागुक्तार्थद्वयपरत्वमपि अनुपपन्नम्।

स्थूलयोजनायां चेतनकर्तृकप्रह्वीभावस्य **फलेप्सा तद्विरोधिनी** इति साधनत्वनिषेधात्, सूक्ष्मयोजनायां चेतनस्य साधनान्तरयोग्यत्वनिषेधाच्च,प्रपत्तेः साधनत्वस्यैव असिद्ध्या तत्प्राधान्यरूपप्रथमार्थस्य उक्त्यसम्भवग्रस्तत्वात्। **निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि** इत्युक्तरीत्या फलप्रदमात्रस्य अप्रधानोपायतया प्रधानोपायत्वासम्भवेन द्वितीयार्थस्यापि तथात्वाच्च। तस्मान्नमशशब्दस्य स्वातन्त्र्यसामान्यनिषेधपरत्व सिद्धान्त एव अहिर्बुध्न्यदर्शिततद्योजनात्रयस्वारस्यसिद्धिः।

अथ यच्चोक्तम् **गच्छध्वमेनं शरणं शरण्यं पुरुषर्षभाः** इत्युपदिष्टस्यार्थस्य **नमश्चक्रुर्जनार्दनम्** इति नमस्काररूपत्वावगमात्, नमशशब्दस्य साधनपरत्वमिति, तदप्यनुपपन्नम्। तत्र शरणशब्दस्थाने नमशशब्दस्य प्रयोगमहिम्ना नमशशब्दस्य सिद्धोपायपरत्वावगमात्, **जनार्दनं नमश्चक्रुः - शरणं चक्रुः उपायत्वेनाध्यवसित-वन्तः** इत्येव तदर्थत्वात्। ततश्च **नमश्चक्रुः** इत्यत्र नमशशब्दः परयोजनोक्तप्रकारेण सिद्धोपायपरएवेति, तत्र साध्योपायान्तरसिद्धि वर्णनमयुक्तम्। किञ्च **शरणं गन्तुमर्हथ नमश्चक्रुः** इत्याभ्यां नमस्कारशरणागत्योः अभेदप्रतीतावपि नमः शब्दस्य साधनान्तरपरत्वमसिद्धमेव। शरणागतेः साधनतायाः -

**[1]नारायणं सलक्ष्मीकं प्राप्तुं तच्चरणद्वयम्।**
**उपाय इति विश्वासो द्वयार्थः शरणागतिः।।**

**[2]इयं केवललक्ष्मीशोपायत्वप्रत्ययात्मिका।**
**स्वहेतुत्वधियं रन्धे किं पुनस्सहकारिणाम्।।**

**[3]त्वय्येवत्वदुपायधीरपि हितस्वोपायभावास्तुमे।**

---

१. न्या.सि.परि.२ २. श.ग.दी. ३. न्या.ति.-१०

इत्याद्यभियुक्तवचनैः [1]**मामेकं शरणं व्रज** [2]**तमेव शरणं गच्छ** [3]**त्वामेव शरणं प्राप्य** [4]**त्वमेवोपायभूतो मे, तदेकोपायता याञ्चा** इत्यादि तन्मूलप्रमाणैश्च शरणागतेः भगवदेकोपायत्वाध्यवसायात्मकत्वसिध्या साधनतायाः तत्स्वरूपविरुद्धत्वात्।

**फलेप्सातद्विरोधिनी, न मे सिद्धिरतोऽन्यथा, याः काश्चनकृतयो मम भगवति मम ममतानास्ति, तासुभगवत एवताः –**

**मत्कृतानि च कर्माणि मदीयमहमप्युत।**
**तवैव न ममेतीष्टं नमो भगवतैरिह।।**

इति। अहिर्बुध्न्यनिरुक्तशाण्डिल्यादिवचनैः नमश्शब्दस्य अनुपायभूतस्वयम्प्रयोजन-प्रह्वीभावपर्यन्तस्वसम्बन्धसामान्यनिवृत्तिपरत्वावगमेन साधनतायाः तत्स्वरूपविरुद्ध-त्वाच्च।

अथ यच्च दमयन्तीवृत्तान्तोदाहरणं, तदप्यसाधकम्। शरणम्प्रतिदेवानां प्राप्तकालममन्यत इत्यत्र शरणशब्दस्य स्वानुष्ठितसत्यभूतपातिव्रत्यधर्मफलप्रदत्व-लक्षणरक्षकत्ववरणमात्रपरतायाः –

[5]**हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः।**
**पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे।।**

**मनसा वचसाचैव यथानाभिचराम्यहम्।**
**तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे।।**

**यथा देवैस्स मे भर्ता विहितो निषधाधिपः।**
**तेन सत्येन मे देवा स्तमेव प्रदिशन्तु मे।।**

**यथेदं व्रतमारब्धं नलस्याराधने मया।**
**तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे।।**

**स्वं चैवरूपं कुर्वन्तु लोकपाला महेश्वराः।**
**यथाहमभिजानीयां पुण्यश्लोकं नराधिपम्।।**

---

१. भ.गी.१८-६६ २. भ.गी.१८-६२ ३. जितन्ता.
४. अहि.सं.३६-३८ ५. महा.भा.आर.प.५४-१७

**निशम्य दमयन्त्याः तत्करुणं प्रतिदेवितम्।**
**निश्चयं परमं तथ्यम् अनुरागञ्च नैषधे।।**

**मनोविशुद्धिं बुद्धिं च भक्तिं रागं च नैषधे ।**
**यथोक्तं चक्रिरे देवास्सामर्थ्यं लिङ्गधारणे।।**

इत्यनन्तर वचनैः सिद्धत्वेन तस्य प्रपत्तिपरत्वायोगात्। अत एव **वाचा च मनसा चैव नमस्कारं प्रयुज्यसा** इत्यस्य प्रपत्तिपरत्वासम्भवाच्च।

सत्यधर्मरूपसाधनान्तरविशिष्टा या दमयन्त्या आकिञ्चन्यभावेन प्रपत्त्यनर्हत्वात्, प्रपत्तिं कृत्वा, सत्यधर्मफलप्रार्थनायाः असङ्गतत्वाच्च। तस्मात् –

[1]**वाचा च मनसा चैव नमस्कारं प्रयुज्य सा।**
**देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत्।।**

इत्यत्र दमयन्तीनमस्कारः सत्यधर्मफलप्रार्थनाङ्गभूतः केवलनमस्कारात्मक एवेति तत्परवचनस्य अष्टाक्षरघटकनमश्शब्दसाधनप्रपत्तिपरत्वमसम्भावितमेव।

अथ **नमस्कारात्मकं यस्तुविधायात्मनिवेदनम्** इति वचनान्तरोदाहरणमपि व्यर्थम्। निवेदनशब्दस्य विज्ञानमात्रपरतायाः **ततस्तु ब्राह्मणं ताभ्यां धर्मव्याधेन्यवेदयत्** इत्यादि सिद्धत्वात्, **स्वातन्त्र्यं निजरक्षणं समुचितावृत्तिश्च नान्योचिता तस्यैवेति हरेर्विविच्य कथितम्** इति नमश्शब्दस्य भगवदुद्देशकचेतनकर्तृकस्वस्वरूपविज्ञानपरतायाः पूर्वाचार्यप्रदर्शितत्वाच्च, तद्वचनस्य तावन्मात्रपरत्वेन अन्यथासिद्ध्या नमस्कारस्य साधनप्रपत्तिरूपतायां तस्य प्रामाण्यायोगात्।

अथ यदुक्तं मूलमन्त्रनमश्शब्दस्य पूर्वोक्तस्य पदसमभिव्याहारबलात् साधनप्रपत्तिपरत्वासिद्ध्या तत्र स्वातन्त्र्यसामान्यनिषेधो अनुपपन्न इति, तदप्यनुपपन्नम्। प्रणवघटकाकारप्रतिपन्नभगवत्कर्तृकसर्वरक्षणस्य उपाध्यश्रवणेन निरुपाधिकत्वसिद्धेः लुप्तचतुर्थ्या शेषशेषिभावप्रतिपादनेन उपाधिसापेक्षतायाः तद्विरुद्धत्वात्, उकारे भगवदनन्यार्हत्वोक्त्या भगवत्कर्तृकरक्षणस्य तदनन्यार्हविनियोगविशेषमात्रफलकत्वसिद्ध्या, चेतनगतफलित्वापादकसाधनान्तरानुष्ठानस्य तद्विरुद्धत्वात्,

१. महा.भा.व.प.५७-१६

नमःपदान्तद्वयोत्तरखण्डोपबृंहिते मूलमन्त्रचरमपदे फलस्य केवलपारार्थ्याभिधानेन स्वफलार्थसाधनानुष्ठानस्य तद्विरुद्धत्वात्, करणेल्युडन्तायनशब्देन शरणशब्दोपबृंहितेन भगवत एवोपायत्वोक्तेः, करणस्य करणान्तरासहत्वाच्च।

पूर्वोत्तरपदसमभिव्याहाराभ्यां नमश्शब्दस्य साधनान्तरसमूलोन्मूलनपरतायाः एव सुस्पष्टमवगमात्, बद्धविषये भगवतः उपायसापेक्षत्वे कारुण्यवात्सल्यादिकल्याणगुणानाम् अनवकाशप्रसङ्गात्, भगवत्प्रवृत्तिविरोधिसाधनान्तरप्रवृत्तिनिवृत्तिमात्रेणैव सर्वमुक्तिप्रसङ्गपरिहाराच्च।

परञ्चेत्यादिकमपि अनुपपन्नम्। मकारोक्तज्ञानस्य लुप्तचतुर्थ्याकाराभिहितभगवदनन्यार्हशेषत्वविषयकत्वेन **स्वप्रयोजननिवृत्तिशेषत्वफलम्** इत्यनुगृहीतरीत्या तस्य स्वार्थप्रवृत्तिनिवर्तकत्वे न स्वार्थकर्तृत्वाधायकत्वायोगात्, शेषत्वज्ञानाधीनप्रयोज्यकर्तृतायाः **परप्रयोजनप्रवृत्तिप्रयत्नफलम्** इत्यनुगृहीतरीत्या केवलपरार्थत्वेन स्वातन्त्र्याक्षेपकत्वायोगात्, मूलमन्त्रचरमपदोक्तप्रार्थनायाः सिद्धोपायफलकेवलपरार्थकैङ्कर्यादिविषयकत्वेन स्वार्थविषयकत्वाभावात्, तत्प्रार्थनायाः **तद्विषयप्रीति चैतन्यफलम्** इत्यनुगृहीतरीत्या शेषत्वज्ञानफलत्वात् तत्प्रसक्तफलित्वशङ्कायाः अपि मन्त्ररत्नोत्तरखण्डनमश्शब्देन **याः काश्चन कृतयो मम भगवंति** इत्यादि निरुक्तविशदीकृतेन निवारितत्वाच्च तादृशमूलमन्त्रपदद्वयमध्यघटकस्य नमश्शब्दस्य स्वातन्त्र्यगन्धामहत्वात्।

अपरञ्चेत्यादिकमपि अनुपपन्नम्। उकारेण शेषत्वस्य अन्ययोगव्यवच्छेदेऽपि तदन्तरमकारेण ज्ञातृत्ववाचिनाकर्तृत्वभोक्तृत्वानुगुणस्वातन्त्र्याक्षेपशङ्कया प्रसक्तस्य स्वशेषत्वादेः नमः पदेन निवृत्त्या साफल्योपपत्तेः। मकारात्मकज्ञातृत्वश्रुतिमूलकस्वातन्त्र्यानुमानापेक्षया अन्यशेषत्वसामान्यव्यावर्तकोकारस्य प्राबल्ये सत्यपि, साधनान्तरविधायकशास्त्रान्तरोपोद्बलितचिरन्तनस्वभोगार्थ साधनप्रवृत्त्यर्थस्वातन्त्र्यवाननासहकृतश्रुति मूलकानुमानस्य प्रत्यक्षश्रुतिसङ्कोचकत्वोपपत्तेः। तस्मात्, यावतान्वशेषत्वं विशेषरूपेणन निषिध्येत, न तावत्पर्यन्तं स्वशेषत्वानिवृत्तिसिद्धिरिति नमः पदसाफल्यमुपपद्यत एव।

एतदुक्तं भवति काम्यशास्त्राद्युपोद्भलितानादिस्वातन्त्र्यवासनाविशिष्टानां स्वस्वातन्त्र्यं न निषेध्यमिति बाधनिश्चयसत्वादुकारस्य भगवत व्यतिरिक्तविषयतया

सङ्कोचसहस्य योग्यतानुसारात् स्वव्यतिरिक्तविषयतयापि सङ्कोचो भवेदिति तद्व्यावर्तनात् नमः पदसार्थक्यम्। नमः पदस्य स्वशेषत्वादि निवर्तनैदंपर्येणैव प्रवृत्तत्वात् तस्य उकारवत्सङ्कोचाभावात्। **पितावान् ज्ञानाविषयः किं प्रलापः करिष्यति** इति तस्यैव सर्वशास्त्रसारत्वेन प्रबलप्रमाणत्वाच्च, तेन अनादिस्वातन्त्र्य-भ्रमबाधे देहात्मभ्रमबाधवत् उपपद्यत एवेति नमः पदसार्थक्योपपत्तिरिति।

अथ, न च गोबलीवर्दन्यायादित्यारभ्य वैयर्थ्यादिदोषा दुष्परिहरा एवेत्यन्तेन उक्तमपि अनुपपन्नम्। अनभ्युपगमादुक्तोत्तरत्वाच्च।

अथ यच्च **मन्त्रब्रह्मणि** इत्यादि दिव्यसूक्तौ स्वस्थानस्थितनमश्शब्दस्य साधनान्तरपरतया व्याख्यानारोपपूर्वकम्, **अकारार्थायैव स्वमहमथमह्यं न** इत्यस्य नमः पदार्थाविषयकतया अन्यथाकरणेन नमः पदस्य स्वशेषत्वनिवर्तकत्वा-सिद्धिकथन्नं तदपि अनुपपन्नम्। **स्वातन्त्र्यं निजरक्षणं समुचिता वृत्तिश्च नान्योचिता तस्यैवेति हरेर्विविच्य कथितम्** इत्यनेन **गतिर्गम्यं शिक्षितम्** इत्यत्र सिद्धोपायरूपगति शिक्षणस्यैवाभिप्रेततायाः सुस्पष्टमवगमात् । **स्वस्यापि नार्हम्** इत्यनेन सिद्धोपायरूपगत्युपरञ्जकतया साधनान्तरप्रवृत्तिसामान्यनिवृत्तेरपि मध्यम नमः पदेन शिक्षितत्वावगमाच्च तस्य साधनान्तरप्रवृत्तिपरत्वोक्तेः विपरीतज्ञान-कार्यत्वात्। **अथ मह्यं न** इत्यस्य उत्तरान्वितनमः पदार्थफलोपधानप्रार्थनापरत्त्वेन तस्य प्रणवार्थानुसन्धानपरत्वोक्तेः अपि अन्यथाज्ञानकार्यत्वाच्च मूलमन्त्रगतप्रणवे **भगवत एवाहमस्मि** इति सिद्धवन्निर्देशबलेन **म्-आयैवास्मि** इति भगवच्छेष-त्वयोग्यताया मुक्तायां **नारायणाय** इत्यनेन नमश्शब्दस्य सहिते न अकारोक्तरक्षकत्व-विशेष्यसमर्पणानुपपत्त्या **म्-नारायणायास्मि** इति वाक्यान्तराश्रयणे पौनरुक्त्यापत्त्या च **म्-नारायणाय स्याम्** इत्येवम् अनुषङ्काध्याहाराभ्यां वाक्यभेदमाश्रित्य भगवच्छेषत्वयोग्योऽहं भगवच्छेष भूतो भवानीति **कदाहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि** इत्यनुगृहीतफलोपधानप्रार्थनावत् नमश्शब्देऽपि **अहमपि न मम, भगवत एवाहमस्मि** इति पूर्वपदान्वयग्राहकश्रुत्यनुसारे **म्-मः नास्मि** इत्येवं स्वशेषत्वयोग्यतायां निषिद्धायां **याः काश्चन कृतयो मम भगवति मम ममता नास्ति तासु भगवत एवताः** इति चरणपदार्थवृत्तिविषयकत्वग्राहकनिरुक्त-बलात्, **म्-मः न स्याम्** इत्येवमावृत्त्या वाक्यान्तरमाश्रित्य स्वशेषत्वनिषेधस्यापि

प्रार्थनीयतया तदभिप्रायेणैव **अकारार्थायैव स्वमहमथमह्यं न** इति नारायणपद-व्याख्यानावसरे पुनर्नमश्शब्दव्याख्यानोपपत्तेः अकारार्थायैव स्वं स्याम्, अथ मह्यं न स्याम् इत्यर्थः।

अकारार्थायैवेति लुप्तचतुर्थ्यन्तार्थफलोपधानभूतव्यक्तचतुर्थ्यन्तार्थकथनं स्वमिति मध्यमनमः पदोक्त भगवदेकरक्ष्यत्वादिपारतन्त्र्यफलोपधानकथनं शेषत्व-फलोपधानवत् पारतन्त्र्यफलोपधानस्यापि फलकोटिप्रविष्टत्वात्, **मह्यं न** इति प्रणवान्वित नमः पदार्थफलोपधानभूतचरमपदार्थकथनमिति विवेकः। **अथ मह्यं न** इत्यथशब्दः कल्पान्तरत्वद्योतकः। तेन यथा भृत्यस्य स्वार्थत्वं राजशेषत्वा-विरोधि, यथा च यजमानस्य फलस्वामितया स्वार्थत्वं यागशेषत्वाविरोधि, नैवं जीवात्मनः स्वार्थत्वं भगवच्छेषत्वाविरोधि।

किन्तु सर्वात्मनापि भगवच्छेषत्वात् स्वभोगार्थप्रवृत्त्यनर्हस्य तादृश-प्रवृत्तिमत्त्वं भगवत्प्रीतिन्यूनतापादकतया भगवच्छेषत्वविरोध्येवेति सूच्यते।

तदेवम्, **अकारार्थामैव** इत्यादिसूक्तौ अहं शब्देन स्वभोगोद्देश्यक प्रवृत्त्यनर्हत्वस्वप्रवृत्त्यद्देश्य भोगवत्त्वा नर्हत्वादृष्टद्वारकफलसाधनगोचरकृत्यनर्हत्व-लक्षणस्थानत्रयान्वितनमश्शब्दप्रतिपाद्यत्रिविधपारतन्त्र्यात्मकस्वत्वसहकृतप्रणव-प्रतिपाद्यभगवदनन्यार्हशेषतैकवेषं स्वस्वरूपमुक्त्वा, तस्य **अकारार्थायैव स्याम्, स्वं स्याम्, मह्यं न स्याम्** इति तादृशशेषत्वत्रिविधपारतन्त्र्यफलोपधानसामान्य-प्रार्थनायाः मूलमन्त्रचरमपदविवक्षित्वप्रदर्शनात् तदनुसारेण नमश्शब्दस्य विरोधित्रय-निवृत्तिपरत्वमेवावश्यकमिति, तस्य साधनान्तरपरत्वोक्तिरनुपपन्नैव।

किञ्च नमश्शब्दस्य **इन्द्रायेदं न मम** इतिवत् आत्मत्यागपरत्वे सम्बन्ध-सामान्यबोधकमकारोत्तरषष्ठीस्वारस्य भङ्गः। यागस्थले देवतामुद्दिश्य त्यज्यमानस्य पदार्थस्य त्यागविषयत्वेन रूपेणादृष्टद्वारा फलजननमुखेन त्यागाधिकारविशेषत्व-सत्त्वेन सम्बन्धसामान्यत्यागाभावात्, सम्बन्धसामान्यत्यागे यागस्य फलसाधनतायाः असिद्धिप्रसङ्गाच्च। न च **तेन तेनाप्यते तत्तन्न्यासेनैव महामुने** इति फलसाधनतया प्रतिपन्नं न्यासम्प्रति **नमसा यो करोद्देवेनस्वध्वरः** इत्यादिषु नमश्शब्दस्य करणमन्त्रत्वाभिधानबलात् निरुक्तसम्बन्धसामान्य षष्ठ्यस्वारस्यं सोढव्यमिति

वाच्यम्। **तदेको पायतायाञ्चा प्रपत्तिश्शरणागतिः** इति प्रपत्तिस्वरूपस्य **अर्थेनैव विशेषो हि** इत्यादि न्यायेन प्रपत्तव्य गतफलकरणत्वेनैव निरूपणीयतया तदनुसारेण प्रपत्तेः करणताश्रुतेः अन्यथानेयत्वात्, **भगवत्प्रवृत्तिविरोधिस्वप्रवृत्ति-निवृत्तिः प्रपत्तिः** इति पूर्वाचार्यसम्प्रदायानुसारेण प्रपत्तेः प्रतिबन्धकाभावविधया फलोपयोगस्य क्लुप्तत्वेन तेनैव प्रपत्तेः फलसाधनता श्रुतिसामञ्जस्ये तत्परित्यागेन अदृष्टद्वारकसाधनताकल्पनस्य दृष्टसम्भवन्यायपराहतत्वात्, स्वरसतः सम्बन्ध-सामान्यत्यागपरस्य नमश्शब्दस्य प्रपत्तिकरणमात्रत्वप्रमाणबलादपि विरोधिनिवृत्ति-त्वेनैव प्रपत्तेः साधनतायाः अवश्याङ्गीकरणीयत्वाच्च सम्बन्धसामान्यपरषष्ठी-स्वारस्यानुसारेणैव प्रपत्तेः दृष्टविधया फलसाधनत्वोपपादने सम्भवति तत्परित्यागायोगात्।

इत्थञ्च शरणागतिवाचकस्थाने क्वचिन्नमश्शब्दप्रयोगोऽपि शरणागतेः भगवत्प्रवृत्तिविरोधि निवृत्त्यात्मकत्वेनैवोपपद्यत इति अपरमपि अनुकूलम्।

अन्यथा हि नमस्कारसामान्यवाचिनो नमश्शब्दस्य शरणागतौ रूढिवृत्तिः कल्पनीयैवेति कल्पनागौरवम्। तस्मान्नमश्शब्दस्य विरोधिसामान्यनिवृत्तिपरत्वमेव युक्तम्।

न च नमश्शब्दस्य उपायपरत्वाभावे तस्योपाय विरोधिनिषेधपरत्वांशे अप्रसक्तप्रतिषेधप्रसङ्गः। उपायविरोधित्वेन रूपेण उपायविरोधिनिषेधे उपायप्रसङ्ग-स्यापेक्षितत्वेऽपि स्वरक्षणार्थप्रवृत्तित्वेन रूपेण तन्निषेधस्य तत्प्रसङ्गानपेक्षणात्। अकारे भगवतो निरुपाधिकरक्षकत्वोक्त्या नारायणपदे करणे व्युत्पन्नायनशब्देन भगवत एवोपायत्वोक्त्या च पूर्वोत्तरपदयोः उपायस्य प्रसक्तत्वेन तन्मध्यघटकेन नमश्शब्दे तद्विरोधिनिषेधोपपत्तेश्च। अस्मिन्नेव नमश्शब्दे पूर्वोत्तरस्थानद्वयान्वयबलेन स्वरूपांशे फलांशे च अत्यन्तपारतन्त्र्यभिधानात्, तद्बलेन भगवत एव उपायत्व-सिद्ध्या स्वस्थानान्वितनमश्शब्देन तद्विरोधिनिषेधो प्रपत्तेः वृत्तिकारप्रदर्शितत्वाच्च।

न चैवं सुषिप्तिप्रलययोः सर्वमुक्तिप्रसङ्गः। तदानीमपि संस्काररूपेण विरोधित्रयसत्त्वेन तदयोगात्, न चैवं तादृशसंस्कारस्य दुस्त्यजत्वेन कदापि मोक्षासिद्धिप्रसङ्गः। यथावस्थित नमःपदार्थश्रवणजन्यसंस्कारविशेषेणैव तन्निवृत्त्यभ्युपगमात्, चिरकालाभ्यस्तानामपि देहात्मभ्रमादीनां शास्त्राभ्यासबलेन

सवासननिवृत्तिदर्शनात्, यथावस्थितनमः पदार्थनिष्ठायाः उत्तेजकत्वाभ्युपगमाद्वा विरोधाभावात् -

**परशेषत्वधीमात्रमधिकारिविशेषणम्।**
**पश्चादात्मापहारस्य निरोधाय च कल्पते।।**

इति वेदान्तचार्यसूक्त्या शास्त्रजन्यशेषत्वज्ञानस्य सवासनस्वतन्त्रात्मभ्रमादि-निवर्तकत्वसिद्ध्या शास्त्रज्ञानस्यैव अनादिवासनानिवर्तकतायाः भवतापि स्वीकरणीयत्वाच्च।

अथ यदुक्तं चेतनकर्तृकस्वरक्षणार्थव्यापारस्य भगवत्कर्तृकरक्षणव्यापारौप-यिकप्रसादहेतुत्वात् तद्वैषम्यनैर्घृण्यपरिहारत्वाच्च भगवत्प्रवृत्त्यनुकूलतया तद्विरोधित्वं दुरुपपाधमिति, तदप्यनुपपन्नम्। चेतनकर्तृकसाधनानुष्ठानस्य भगवत्कर्तृक-स्वार्थकैङ्कर्यपर्यन्तफलान्तरप्रदानानुकूलत्वसम्भवेऽपि केवलपरार्थानुभवकैङ्कर्य-रूपपरमपुरुषार्थप्रदानानुकूलत्वायोगात् **शास्त्रफलं प्रयोक्तरि** इति न्यायेन साधनानुष्ठानस्य फलगतपारार्थ्यभञ्जकत्वात्, ब्रह्मशास्त्रश्रवणवल्कलन्यायेन भगवन्निष्ठफलकरणताविरोधित्वाच्च अनाद्यज्ञाननिबन्धनस्वप्रवृत्तेः भगवत्प्रवृत्ति-विरोधित्वेनैव वैषम्यनैर्घृण्ययोः परिहृततया तदर्थादृष्टसाधनान्तरकल्पनायोगाच्च। एतेन स्वभोगान्वयस्य भगवत्प्रवृत्त्यनुकूलत्वोपपादनमपि अपास्तम्। यावच्छक्ति-निषिद्धकाम्यसर्वफलान्तरान्वेषणप्रसङ्गात्, तथासतीत्येव भगवदौदार्यप्रकाशाति-शयसम्भवात्, सार्वभौमलीलाशुकन्यायस्य तदैवासङ्कोचसम्भवाच्च।

अपि चेत्यादिकमपि अयुक्तम्। भगवद्दीयमानकेवलपरार्थानुभवकैङ्कर्य-विषयकचैतन्यकार्यानुषङ्गिकप्रीतेः स्वरूपानुरूपायाः सत्वेन तयैव चेतनानामचेतन-वैलक्षण्यादिसिद्धेः, स्वभोगोद्देश्यकप्रवृत्तिस्वप्रवृत्त्युद्देश्यभोगाश्रयत्वयोः एव नमश्शब्देन निषेधात्। एवं चेतनस्य स्वातिशयत्वावच्छिन्नविषयकेच्छायाः स्वस्वरूप-विरुद्धत्वेऽपि परातिशयत्वमात्रावच्छिन्नविषयकेच्छायाः स्वस्तवरूपानुरूपत्वानपायेन तादृशेच्छाविषयकेवलपरातिशयप्रापणतद्विरोधिस्वातिशयनिवर्तनाभ्यामेव भगव-त्कर्तृकाचेतनरक्षापेक्षया चेतनरक्षावैलक्षण्योपपादनसम्भवाच्च।

न चैवं **सर्वस्स्वार्थं समीहते** इति न्यायविरोधः। तस्य स्वातन्त्र्याभिमानिमात्रविषयत्वात्, भगवदत्यन्तपारतन्त्र्यज्ञानवतां [1]**तनक्केयाक एनैक्कोल्लुमीते, न हि मां निर्विशङ्कस्त्वम्** इत्याद्युक्तरीत्या केवलपरातिशयस्यैव इष्यमाणत्वोपपत्तेः। नमः पदरूपप्रबलप्रमाणेन निषेधादेव स्वातिशये बलवदनिष्ठानुबन्धिताया ज्ञाततया स्वरूपज्ञानिनां तद्विषयकेच्छायाः असम्भावितत्वाच्च। यदि स्वार्थानुभवादेः शास्त्रनिषेधे सत्यपि सुखरूपतामात्रेण स्वरूपज्ञानामपि तदिच्छासम्भवोन विरुद्ध्येत तदा स्वर्गादीनां कैवल्यस्य च सुखरूपत्वाविशेषात् भगवद्विषये तत्प्रार्थनमपि अविरुद्धं स्यात्। फलान्तरस्य पारमैकान्त्य विरुद्धत्वात् तत्प्रार्थनं विरुद्धमेवेति चेत्, स्वातिशयोद्देशस्यापि अनन्यार्हताविरोधित्वात् स्वार्थानुभवादिप्रार्थनमपि स्वरूपविरुद्धमेवेति पश्यतु भवान्।

किञ्च नमः पदोक्तविरोधिनिवृत्तित्रयस्य **भावान्तरमभावः** इति न्यायेन ज्ञानत्रयात्मकत्वात्तत्र चरमविरोधिनिवृत्तेः स्वभोगान्वयनिवृत्तिप्रार्थनात्मकत्वेन इच्छारूपतया तद्विषयप्रापणतद्विरोधिस्वभोगान्वयनिवर्तनाभ्यामेव चेतनविषये भगवतो रक्ष्यरक्षकभावदिवैलक्षण्यसिद्धेश्च।

न चैवं स्वरक्षणे स्वान्वयप्रसङ्गिः। विरोधिनिवृत्त्यात्मकज्ञानत्रयस्य अन्वयव्यतिरेकाभ्यां मोक्षसाधनतासिद्धेरिति वाच्यम्।

तादृशज्ञानत्रयस्य केवलश्रवणजन्यज्ञानरूपत्वेन विधेयतया तस्य साधनत्वायोगात्, निर्हेतुककटाक्षसत्वप्रवर्तनशास्त्रप्रधानव्याप्तिसृष्ट्यवतारादिभिः चेतनोज्जीवने भगवतः प्रथमप्रवृत्तत्वेन तद्विषये चेतनेच्छायाः अनुमतिमात्ररूपत्वेन प्रार्थनायाः अपि साधनत्वायोगात्। **परशेषत्वधीमात्रमधिकारिविशेषणम्** इति स्वरूपज्ञानमात्रस्य अधिकारिविशेषणतायाः वेदान्ताचार्यैः अपि अनुगृहीतत्वात्, फलप्रार्थनायाः अर्थित्वात्मकत्वाच्च तादृशज्ञानत्रयस्यापि केवलाधिकारिविशेषणमात्रत्वेन तस्य साधनत्वायोगाच्च।

न चैवमपि निरुक्तज्ञानत्रयस्य विरोधिनिवृत्तिरूपतया प्रतिबन्धकाभावस्य कारणत्वमते तस्य साधनतायाः दुरपह्नवत्वात्, साधनान्तरान्वयदोषो दुष्परिहर

१. तिरुवायिमोलि २-९-४.

एवेति वाच्यम्। अस्यचोद्यस्य भवन्मतेऽपि तुल्यत्वात्, प्रपत्त्यनन्तरकालीन-ब्रह्मविदपचारादिप्रतिबन्धकवर्जनरूपयत्नस्य प्रतिबन्धकाभावविधयामोक्षसाधन-रूपत्वात्, यदि तादृश ब्रह्मविदपचारपरिहारादीनां भगवदनिष्टवर्जनात्मककैङ्कर्य-रूपतया स्वयम्प्रयोजनतयैवानुष्ठानात्, मोक्षोद्देश्यकसाधनप्रवृत्तिरूपत्वाभावात् न दोष इत्युच्येत, तदा प्रकृतेऽपि दीयतां दृष्टिः।

किञ्च सिद्धान्ते अदृष्टद्वारकफलसाधनगोचरप्रवृत्तेरेव अनन्यशरणत्व-सर्वलोकशरण्यत्वरूपस्वस्वरूपपरस्वरूपयोः विरुद्धत्वात्, **शास्त्रफलं प्रयोक्तरि** इति न्यायेन भोक्तृत्वापादकतया केवलपारार्थरूपपुरुषार्थस्वरूपविरोधित्वाच्च अवश्यपरिहरणीयतया दृष्टसाधनप्रवृत्तेः अनुपपत्त्यभावाच्च। अपि च **सर्वधर्मान् परित्यज्य** इत्यादिषु चोदनालक्षणार्थानामेव मोक्षसाधनानां निषेधादविधेयज्ञान-नामनिषिद्धतया निरुक्तविरोधित्रयनिवृत्त्यात्मकज्ञानत्रयस्याविधेयतायाः पूर्वमोवोक्त-त्वाच्च विरोधाभावात्। **(एतावत्पर्यन्तं केषांचित्पुस्तकानां पाठः)**

## तत्र पूर्वपक्षः

उकारनमश्शब्दयोः समन्वयाधिकरणोक्तं प्रयोजनपर्यवसायितया प्रामाण्यं न सम्भवत्येव। भगवदन्यशेषत्वादिनिवृत्तेः स्वतः प्रयोजनत्वाभावात्। भगवदन्यान्त-र्गतस्वव्यतिरिक्तदेवतान्तरादिप्रीतेः स्वाभ्युदयशिरस्कतया संसारिचेतनानाम् इष्ट-साधनत्वेन तत्प्रीत्यर्थव्यापाररूपतच्छेषत्वस्यापीष्टतया तन्निष्पत्तिपरस्य प्रयोजन-पर्यवसायित्वासम्भवाच्च।

भगवदन्यान्तर्गतस्वाभ्युदयशिरस्कव्यापाररूपस्वशेषत्वस्य संसारिचेतनानां सुतरामिष्टत्वेन तन्निवृत्तिपरस्यापि तदसम्भवाच्च। मुमुक्षुणामपि **अन्नवानन्नादो भवति** इत्यादि प्रमाणानुसारेण विद्यानुगुणस्य पशुपुत्रवृष्ट्यन्नादेपेक्षिततया तत्तत्फल-साधनानुष्ठानमुखेन तत्तत्फलप्रधानादिदेवतान्तरप्रसादमुखेन च तत्तत्फललाभस्य वक्तव्यतया च देवतान्तरशेषत्वस्य चाभीष्टतया, तन्निवृत्तिप्रतिपादकस्य मुमुक्षु-विषयेऽपि प्रयोजनपर्यवसानासम्भवाच्च।

न च अन्यशेषत्वादेः इष्टविरोधित्वेन तन्निवृत्तेः प्रयोजनत्वं सम्भवतीति वाच्यम्। गृहारामक्षेत्रादिषु यजमानभार्यापुत्रादिशेषत्वतद्रक्ष्यत्वतद्भोगार्थत्वदर्शनेन

भगवच्छेषवृत्तितन्मुखोल्लासतत्कृतरक्षणानां चेतनेष्टत्वेऽपि स्वभोगस्वरक्षण-स्वभोगार्थप्रवृत्तीनां तद्विरोधित्वस्य सार्वजनीनानुभवबाधितत्वात्।

एतेन भगवदन्यशेषत्वादेः स्वशेषत्वाविरोधित्वे **मः नास्मि** इत्येवं स्वसम्बन्धसामान्यस्य निषेध्यत्वेनोक्तिर्विरुध्यत इत्यपास्तम्। **असिद्धमत्यन्तासिद्धेन** इति न्यायात् शेषत्वस्य सर्वलोकसिद्धत्वेन तन्निषेधस्यैवासम्भवे सम्बन्धसामान्यबलेन एकस्मिन्नुभयशेषत्वस्वरक्ष्यत्वस्वभोग्यत्वानां निषेधस्य दूरापास्तत्वात्।

किञ्च इष्टं किञ्चिन्निर्दिश्य तद्विरोधिनिवृत्तिप्रतिपादनेन नमसः प्रयोजन-पर्यवसानं वाच्यम्। न चात्रविरोधप्रतियोगिभूतं किञ्चिदिष्टनिर्दिष्टम्। न च प्रणवनिर्दिष्टं भगवच्छेषत्वेन विरोधप्रतियोगिभूतमिष्टमितिवाच्यम्। आयास्मीत्येवं नित्यवत् श्रवणानुसारेण अकारोक्त सकलकल्याणगुणविशिष्टभगवत्प्रीतीच्छाजन्य-प्रवृत्त्यर्हत्वस्यैव प्रणवविधेयतया तस्य नित्यसिद्धस्य इच्छाविषयत्वायोग्यतया च प्रणवे विरोधप्रतियोगिभूतेष्टस्य निर्देशासम्भवाच्च।

एतेन नमश्शब्दे स्वरक्षणे स्वान्वयनिषेधेन रक्षकत्वेन अकारोक्तस्य भगवद्व्यापारस्यैव फलकरणत्वात्मकोपायत्वेनार्थसिद्धतया, तद्विशिष्टवेषेण उपायभूतं भगवत्स्वरूपं नमश्शब्द एव विरोधप्रतियोगिभूतमिष्टं सिद्धमित्यपास्तम्। अस्मच्छब्दपर्यायेण मकारेण ज्ञातृत्वादिनैव आत्मस्वरूपनिर्देशेन तद्रक्षकत्वसम्बन्ध-निषेध इत्यत्र मानाभावात्, स्वरक्षणार्थ प्रवृत्तेः सर्वलोकसिद्धत्वेन तन्निषेधस्य बाधितत्वाच्च स्वरक्षणार्थप्रवृत्तेः लोकसिद्धतया तदर्हत्वस्यैव आत्मस्वरूपे वक्तव्यत्वेन स्वरक्षणार्थप्रवृत्त्यर्हत्वनिषेधस्य अयोग्यत्वाच्च।

स्वरक्षणार्थप्रवृत्त्यर्हत्वनिषेधे स्वरक्षणार्थप्रवृत्तेः निषेध्यत्वालाभेन भगवतो जीवरक्षणार्थ प्रवृत्तेः आर्थिकसाधनत्वालाभप्रसङ्गाच्च। स्वरक्षणार्थप्रवृत्तिनिषेधस्य प्रतिपाद्यत्वसिद्धौ भगवतो जीवरक्षणप्रवृत्तेः उपायत्वसिद्धिः। तत्सिद्धौ उपायरूपेष्ट-विरोधिनिवृत्तिरूपत्वेन स्वरक्षणार्थप्रवृत्तिनिषेधस्य प्रतिपाद्यतत्वसिद्धिः इत्यन्योन्या-श्रयापाताच्च। **प्रसह्यमां प्रापय दास्यमेव ते** इत्युक्तन्यायेन जीवस्य स्वरक्षणार्थ प्रवृत्तिसम्भवेऽपि सर्वज्ञस्य सर्वशक्तेः परमकारुणिकस्य जीवरक्षणार्थप्रवृत्तिसम्भवेन, जीवप्रवृत्त्या भगवत्प्रवृत्तिव्याहतेः उक्त्यसम्भवपराहतत्वाच्च।

एतेनैव **नारायणाय स्याम्** इति मूलमन्त्रगततृतीयवाक्येन नारायणप्रीतिच्छा-जन्यप्रवृत्तिविशिष्टवेषेण जीवात्मनः प्राप्यत्वलक्ष्यसाध्यतायाः उक्तत्वेन तत् प्राप्यत्वोपपादककैङ्कर्यलक्षणप्रवृत्तेः भगवत्प्रीतिसाधनत्वेन चेतनेष्टतया तादृशप्राप्यभूत-कैङ्कर्यं विरोधिप्रतियोगिभूतमिष्टं निर्दिष्टमिति, तद्विरोधिस्वभोगार्थप्रवृत्तिनिषेध-प्रार्थनाप्रतिपादकस्य **मः न स्याम्** इत्येवं रूपमूलमन्त्रगतचतुर्थवाक्यरूपनमश्शब्दस्य काकाक्षिन्यायेन तृतीयवाक्यैकवाक्यतया अन्वितस्य पुरुषार्थपर्यवसायित्वं सम्भवतीति अपास्तम्। निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट्। भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते इति सर्वलोकसिद्धानुभवानुसारि श्रीभाष्यसूक्तिविरोधेन स्वभोगार्थप्रवृत्तनिषेधप्रार्थनाप्रतिपादकवाक्यकल्पनाया एवायुक्तत्वात्। अपि च स्वभोगार्थप्रवृत्तेः भगवदेकभोगार्थप्रवृत्तिविरोधित्वेऽपि तादृशस्वभोगार्थप्रवृत्तिनिवृत्तेः प्रार्थनीयत्वोक्तावपि स्वभोगार्थप्रवृत्तिनिवृत्तेः फल (हेतु) त्वं विना तुरीयवाक्यस्य प्रयोजनपर्यवसानं सम्भवति।

न च, इष्टविरोधिनिवृत्तेः प्रार्थनीयत्वोक्त्यैव इष्टसाधनतासिद्धिरिति वाच्यम्। (व्यक्तचतुर्थी प्रतिपाद्यप्रार्थनाविषयत्वोपपादकभगवत्प्रीतेः करणव्युत्पन्नायन् परश्रुत्यैव सिद्धसाध्यसमभिव्याहारन्यायानुगृहीतया इष्टसाधनतासिद्धिरिति तत्कल्पनानवकाशात्)

न च अयनपदप्रतिपन्नोपायस्य अनादिसिद्धितया तत्करणत्वोपपादकानुरञ्ज-कव्यापारापेक्षायां तद्विरोधिस्वभोगार्थप्रवृत्तिनिवृत्तिः प्रार्थनीयत्वोक्तिमुखेन तदुपरञ्जक-कत्वेन विवक्षितेति वाच्यम्। स्वभोगार्थप्रवृत्तिनिवृत्तेः सुषुप्तिप्रलयादिसाधारणतया सिद्धोपायोपरञ्जकत्वासम्भवात्। अन्यस्य च उपरञ्जकव्यापारस्य अत्राश्रवणात् तत्सत्वे तेनैव अनतिप्रसङ्गेन प्रकृतोपरञ्जकत्वोक्तिवैफल्यात्।

अत एव द्वितीयवाक्येन स्वरक्षणे स्वान्वयनिवृत्तिरुपरञ्जकत्वेन विवक्षितेति निरस्तम्। उक्तदोषद्वयग्रस्तत्वात्। द्वितीयवाक्येन स्वरक्षणे स्वान्वयानर्हत्वस्यैव प्रतिपादनेन तुरीयवाक्यवेषेणेष्टविरोधिनिवृत्तेरनुक्तत्वाच्च। अत एव मः नास्मीत्येवं स्वभोगान्वयनिषेधमुखेन द्वितीयवाक्यस्य उपरञ्जकपरत्वमप्ययुक्तम्। प्रणवे भगवद्भोगार्थप्रवृत्त्यर्हतायाः एवोक्तत्वेन द्वितीयवाक्ये प्रणवैकवाक्यतामाश्रित्यापि

तदन्यस्वभोगार्थप्रवृत्तिनिवृत्तिरूपस्वरूपविरोधिनिवृत्तिः। विपरीतप्रवृत्तेः अनुरूपवृत्तियोग्यताविरोधित्वासम्भवात्। एतेन प्रणवस्थो अकारोऽपि न प्रयोजनपर्यवसायीति सिद्धम्।

यत्तु प्रमाणश्रेष्ठमूलमन्त्रस्थोकार नमश्शब्द बलादेव स्वशेषत्वादेः भगवच्छेषत्वादिविरोधित्वं कल्प्यत इति तदयुक्तम्। त्रिपाद्यधिकरणन्यायेन योग्यतानुसारेणैव शब्दस्य प्रामाण्यात्, प्रकृते च लोकविरोधस्य विरोधप्रतियोग्य लाभस्य समभिव्याहारविरोधस्य उपरञ्जकाभावस्य बहुधोपपादितत्वात्।

यदपि **द्व्यक्षरस्तु भवेन्मृत्युः** इत्युपबृह्मणेन स्वशेषत्वादेः भगवच्छेषत्वादि विरोधित्वं सिद्धमिति तदप्ययुक्तम्। त्रिवर्गार्थप्रवृत्तेरनित्यफलकत्वस्य मोक्षार्थप्रवृत्तेः नित्यफलकत्वस्य तत्र विवक्षिततत्वेन स्वशेषत्वादेः भगवच्छेषत्वादिविरोधित्वपरत्वेमानाभावात्।

यदपि विरोधप्रतियोगिभूतेष्टलाभाय न पूर्वोत्तरवाक्यसमभिव्याहारपर्यालोचनाक्लेशः कार्यः। नमश्शब्देनैव स्वरूपोपायफलरूपविरोधप्रतियोगिप्रदर्शनादिति, तदपि मन्दम्। स्वरक्षकत्वस्वभोक्तृत्वानर्हत्वरूपस्य विरोधप्रतियोगितया प्रदर्शनस्य पूर्वमेव निरस्तत्वेन पुनः प्रदर्शनोक्ति वैफल्यात्।

नमश्शब्देनार्थसिद्धोपायस्य विरोधप्रतियोगित्वेन प्रदर्शनस्यापि पूर्वमेव निरस्ततया पुनः तत्प्रदर्शनोक्तिवैफल्याच्च। नमश्शब्देन स्वभोगार्थप्रवृत्तिनिषेधस्य प्रार्थनीयत्वोक्त्या फलस्य विरोधप्रतियोगित्वेन प्रदर्शनस्यापि पूर्वमेव निरस्ततया पुनः तत्प्रदर्शनोक्तिवैफल्याच्च।

यत्तु शेषत्वज्ञानकार्यतया दिव्यदेशविषये नमस्कारोक्त्या नमश्शब्दस्य स्वरूपप्रदर्शकत्वमिति तदपि मन्दम्। नमनक्रियायाः शेषत्वज्ञानकार्यत्वेऽपि मूलमन्त्रस्य नमश्शब्दस्य खण्डतया नमनक्रियामुखेन शेषत्वलक्षणस्वरूपप्रदर्शकत्वासम्भवात्। यच्च **वेङ्कटेशाय नमः** इत्युक्त्या उपायः प्रदर्श्यत इति तदपि मन्दम्।

**नमश्चक्रुर्जनार्दनम्** इत्यादि प्रयोगबलेन नमश्शब्दस्य उपायद्योतकत्वेऽपि तस्य अखण्डितया मूलमन्त्रस्थ सखण्डनमश्शब्दस्य तत्प्रदर्शकत्वानुपपत्तेः। **वेङ्कटेशाय नमः** इति श्रीशठकोपदिव्यसूरिसूक्तेः **वेङ्कटेशशेषभूतोऽहं, मः**

**नास्मि** इत्यर्थकतया अखण्डनमश्शब्दघटकत्वेन नमश्शब्दस्योपायपरत्वे तस्याः प्रमाणतया प्रदर्शनानुपपत्तेश्च।

यच्च प्रेमातिशयेन मङ्गलाशासनदशायां नमः शब्दप्रयोगान्नमश्शब्देन फलं प्रतीयत इति तदपि मन्दम्। नमश्शब्दस्य मङ्गलाशासनदशायां प्रयोगेऽपि स्वभोगनिवृत्तिप्रार्थनाप्रतिपादकतया परमपुरुषार्थलक्षण भगवत्समृद्धिरूपमङ्गल-प्रार्थना प्रतिपादकतया परमपुरुषार्थलक्षणभगवत्समृद्धिरूपमङ्गलप्रार्थनाप्रतिपादक-त्वाभावेन फलप्रदर्शकत्वा सम्भवात्, स्वभोगनिवृत्तेः फलत्वेन प्रदर्शनस्य पूर्वमेव निरस्तत्वाच्चेति।

## अत्रायं सिद्धान्तः

उकारनमश्शब्दयोः समन्वयाधिकरणोक्तं प्रयोजनपर्यवसायितया प्रामाण्यं सम्भवत्येव। अन्यशेषत्वादिनिवृत्तेः स्वतः प्रयोजनत्वाभावेऽपि अन्यशेषत्वादेः भगवच्छेषत्वरूपेष्टविरोधित्वेन तन्निवृत्तेः प्रयोजनत्वसम्भात् -

**वासुदेवे मनो यस्य जपहोमार्चनादिषु।**
**तस्यान्तरायो मैत्रेयदेवेन्द्रत्वादिकं फलम्।।**

**क्वनाकपृष्ठगमनं पुनरावृत्तिलक्षणम्।**
**क्वजपो वासुदेवेति मुक्तिबीजमनुत्तमम्।।**

[1]**यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते।**
**साहानिस्तन्महच्छिद्रं साभ्रान्तिः सा च विक्रिया।।**

**एकस्मिन्नप्यतिक्रान्ते मुहूर्तेध्यानवर्जिते।**
**दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम्।।**

इत्यादिस्मृत्युपबृंहितया **यदाह्येवैष एतस्मिन्नदृश्येनात्म्ये** इत्यादि **तस्यैव भयं विदुषोमन्वानस्य** इत्यन्तश्रुत्या भगवच्छेषतैकरसं सात्विकाग्रेसरं प्रति भगवदन्यशेषत्वादेः स्वतोनिष्टत्वेन तन्निवृत्तेः प्रयोजनत्वसम्भवाच्च।

---

१. गारु.पु.२२२-२२

अत एव –

**वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः।**
**न शौरिचिन्ताविमुखजन संवास वैशसम्।।**

इति स्मृतौ भगवदन्यपरत्वस्य स्वतोनिष्टत्वमुक्तम्। अत एव च **भोगा इमे विधिशिवादिपदञ्च किं च स्वात्मानुभूतिरिति या किलमुक्तिरुक्ता सर्वं तदूषजलजोषमहंजुषेयहस्त्यद्रिनाथ तव दास्य महारसज्ञः** इति श्रीवत्साङ्कमिश्रैः अन्यशेषत्वफलभूतयोः ऐश्वर्यकैवल्ययोः अत्यन्तानिष्टत्वमनुगृहीतम्।

**पश्यत्येनं जायमानं ब्रह्मारुद्रोऽथवा पुनः।**
**रजसा तमसाचास्य मानसं समभिप्लुतम्।।**

इत्याद्युक्तिरीत्या अन्यशेषवृत्तिफलीभूतदेवतान्तरानुग्रहस्य रजस्तमोवर्धकतया -

**जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।**
**सात्त्विकस्सतु विज्ञेयः स वै मोक्षार्थचिन्तकः।।**

इत्याद्युक्तसत्वोद्रेककार्यमोक्षार्थचिन्तारूपभगवच्छेषवृत्तिविरोधित्वेन अन्यशेषत्वस्य, तन्निवृत्तेः व्यमुकारमशशब्दयोरुपपद्यते।

भगवदन्यान्तर्गतस्वव्यतिरिक्तदेवतान्तरादिप्रीतेः स्वाभ्युदयशिरस्कतया संसारिचेतनानाम् इष्टसाधनत्वेन तत्प्रीत्यर्थव्यापाररूपतच्छेषत्वस्यापि इष्टत्वेऽपि तस्य अल्पास्थिरत्वबहुदुःखसाध्यत्वबहुदुःखोदर्कत्वादिदोषफलपर्यवसायित्वेन परसत्वनिष्ठानां स्वतो निष्टत्वेन रजस्तमोवर्धकतया भगवच्छेषवृत्तिप्रतिबन्धकत्वेन च अनन्तस्थिरफलपर्यवसायिसुकरात्यर्थप्रियसात्विकाग्रेसरपरिगृहीतभगवच्छे-षत्वविरोधित्वेनतदज्ञाननिबन्धनपामरचेतनपरिगृहीतान्यशेषत्वनिवृत्तिपरस्य प्रयोजन-पर्यवसायित्वसम्भवात्। अन्यथा देहनिवृत्तिपूर्वकस्वर्गादिसाधनधर्मार्थप्रवृत्तेः देहात्म-भ्रमशालिसर्वजनानिष्टत्वेन आमुष्मिकफलतत्साधनपराणाम् अप्रामाण्यापत्तेश्च।

अत एव भगवदन्यान्तर्गतस्वाभ्युदयशिरस्कव्यापाररूपस्वशेषत्वस्य संसारिचेतनानां सुतरामिष्टत्वेऽपि तन्निवृत्तिपरस्यापि प्रयोजनपर्यवसायित्वसम्भवाच्च। स्वशेषत्वस्यापि सर्वपापमूलभूतत्वेन प्रमाणप्रतिपन्नत्वात् मुमुक्षूणाम्, **अन्नवानन्नादो**

**भवति** इत्यादि प्रमाणानुसारेण विद्यानुगुणस्य पशुपुत्रवृष्ट्यादेः अपेक्षितत्वेऽपि तस्य फलस्य **सर्वेऽस्मै देवा बलिमावहन्ति, तस्य देवा असन्वशे, तस्मै ब्रह्म च ब्रह्मा च आयुः कीर्तिं प्रजां ददुः** इत्यादि प्रमाणानुसारेण भगवद्भक्तानुवर्तनजनितभगवत्प्रसादापेक्षदेवतान्तरानुवर्तनलब्धत्वेन अनुषङ्गफलतया महोदारभगवत्प्रसादलब्धत्वेन च तत्तत्फलसाधनानुष्ठानपूर्वकतत्तत्फलप्रधानाधिकृतदेवतान्तरप्रसादमुखेन तल्लाभस्य अवक्तव्यतया देवतान्तरशेषत्वस्य अनभिमतत्वेन तन्निवृत्तिप्रतिपादकस्य मुमुक्षुविषयेऽपि प्रयोजनपर्यवसानसम्भवाच्च।

एतेन गृहारामक्षेत्रादिषु जायमानभार्यादिशेषभूतेषु तद्रक्ष्यत्वतद्भोगार्थत्वदर्शनेन भगवच्छेषवृत्ति तन्मुखोल्लासतत्कृतरक्षणानां चेतनेष्टत्वेऽपि स्वभोगस्वरक्षणस्वभोगार्थप्रवृत्तीनां तद्विरोधित्वं सार्वजनीनानुभवबाधितमिति निरस्तम्। गृहारामक्षेत्रादेः भार्यादिरक्ष्यत्वतद्भोगार्थत्वयोः यजमानशेषत्वविरोधित्वे मानाभावेन पूर्वोक्तरीत्या देवतान्तरशेषत्वस्वशेषत्वयोः बहुधा भगवच्छेषत्वविरोधित्वस्य प्रयोजकत्वेन च भगवच्छेषवृत्तितन्मुखोल्लासतत्कृतरक्षणानां स्वभोगस्वरक्षणस्वभोगार्थप्रवृत्तीनाञ्च भ्रान्तचेतनेष्टत्वेऽपि तदनुभवबाधस्य अकिञ्चित्कारत्वेन मुमुक्षुविषये अन्यशेषत्वनिषेधपरस्येव **स्वशेषत्वस्य भगवच्छेषत्वविरोधित्वमव्याहतम्** इति, तन्निवृत्तिपरस्य प्रयोजनपर्यवसायितया प्रामाण्योपपत्तेः।

किञ्च भगवदन्यशेषत्वादेः स्वशेषत्वाविरोधित्वे **मः नास्मि** इत्येवं सम्बन्धसामान्यस्य निषेध्यत्वेनोक्तिः विरुध्यते। प्रणवे आयस्मीति भगवच्छेषत्वे जीवानुयोकत्वस्य शाब्दतया, अकारविवरणे नमश्शब्देऽपि **अकारार्थायैव स्वमहमथमह्यं न** इति श्रीपराशरभट्टार्यानुगृहीतरीत्या चतुर्थ्यन्तमकारस्याम्नातव्यत्वेऽपि सम्बन्धसामान्यवाचिषष्ठ्यन्तमकारप्रयोगस्य प्रणवे जीवानुयोगिकत्वेन समभिव्याहारसिद्धभगवद्रक्ष्यत्वविरोधिस्वरक्ष्यत्वस्यापि निषेधपरतयैव साफल्यमिति वक्तव्यत्वात् पूर्वोक्तरीत्या एकस्मिन्नुभयशेषत्वस्वरक्ष्यत्वस्वभोग्यत्वानां निषेधसम्भवेन **असिद्धमत्यन्तासिद्धेन** इति न्यायानवताराच्च।

अत एव [1]**स्वर्गेऽपि पातभीतस्य क्षयिष्णोः नास्ति निर्वृतिः**, [2]**एते वै निरयास्तातस्थानस्य परमात्मनः** इत्यादिषु स्वर्गाद्यामुष्मिकफलस्य दुःख-

१. विष्णु.पु.६-५-५०  २. जितन्ता १-४.

मिश्रत्वाऽस्थिरत्वोक्तिमुखेन, मुमुक्षून् प्रति स्वतः प्रतिकूलत्वोक्तिमुखेन च तस्य निरतिशयसुखरूपत्वज्ञानम् दुर्वासनामूलभ्रान्तिरिति सूचितम्। अत एव –

**[१]शंपाचलंबहुलदुःखमनर्थहेतुः**
**अल्पीय इत्यपि विमृष्टमदृष्टदोषम्।**
**दुर्वासनाद्रढिमतस्सुखमिन्द्रियोत्थं**
**हातुं न मे मतिरलं वरदाधिराज।।**

इति श्रीवत्साङ्कमिश्रैः अनुगृहीतम्।

अतो भ्रान्तिरूपनिरतिशयसुखानुभवबाधस्य अप्रयोजकतया देवतान्तं शेषत्वस्वशेषत्वस्वभोग्यत्वानां भगवच्छेषत्वाद्यविरोधित्वे प्रमाणाभावात् मूलमन्त्रस्थ-सम्बन्धसामान्यवाचिषष्ठीघटितनमश्शब्दश्रुतिविरोधो दुर्वार इति नमश्शब्दश्रुति बलेनैव तेषां तद्विरोधित्वं सिद्धमिति दिक्।

यदपि किञ्चेत्यादिना निर्देशासम्भवादित्यन्तेन भगवच्छेषत्वलक्षणं स्वरूपं विरोधप्रतियोगिभूतेष्टतया निर्देष्टुम् अयोग्यमिति, तदप्ययुक्तम्। भगवदनन्यार्ह-शेषत्वव्यापकतया व्यङ्ग्यस्य भगवदेकप्रीत्यर्थप्रवृत्तिफलोपधानस्य अन्यशेषत्वादि विरोधप्रतियोगिभूतेष्टत्वसम्भवेन तद्द्वारा भगवच्छेषत्वलक्षणस्वरूपस्य विरोधि-प्रतियोगित्वाभिप्रायेणनिर्देशसम्भवात्।

यदप्येतेनेत्यादिना उक्त्यसम्भव पराहतत्वाच्च इत्यन्तेन, जीवरक्षणार्थ-प्रवृत्तिविशिष्टवेषेण उपायत्वेन नमश्शब्देनार्थसिद्धं भगवत्स्वरूपमेव तद्विशिष्टवेषेण जीवगतस्वरक्षणविरोधप्रतियोगिभूतमिष्टमित्येतन्न्यायषट्कबाधितत्वेन उक्त्यसम्भव-ग्रस्तमित्युक्तं, तदप्ययुक्तम्। अकारोक्तरक्षकत्वस्य प्रतियोगिसाकाराकाङ्क्षतया मकारोक्तजीवस्यैव रक्षणप्रतियोगित्वयोग्यतया आकाङ्क्षायोग्यतासहकृतमकार-समभिव्याहारस्यैव अकारोक्तरक्षणे अर्थात् जीवप्रतियोगिकत्वसाधकतया, सम्बन्ध-सामान्यवाचिषष्ठीघटित नमश्शब्दस्यैव प्रकृतजीवगतभगवद्रक्ष्यत्वप्रतिकोटिस्वरक्ष्य-त्वसम्बन्धस्यापि निषेधेमानत्वात्, स्वरक्षणार्थप्रवृत्त्यर्हत्वस्यैव निषेध्यतया तन्निषेधस्य अबाधितत्वाच्च।

---

१. व.रा.स्त.७८

स्वरक्षणार्थप्रवृत्त्यनर्हत्वश्रुतिबलेन स्वरक्षणार्थप्रवृत्तेः स्वरूपयाथात्म्याज्ञाननिबन्धनत्वेन स्वरक्षणार्थप्रवृत्तिबलेन तदर्हत्वकल्पनस्य अमूलकत्वाच्च स्वरक्षणार्थप्रवृत्त्यर्हत्वनिषेधेऽपि तद्व्यापकतया स्वरक्षणार्थप्रवृत्तिनिषेधसिद्ध्या भगवतोजीवरक्षणार्थप्रवृत्तिविशिष्टवेषेण आर्थिकसाधनत्वलाभसम्भवाच्च।

स्वरक्षणार्थप्रवृत्तिनिषेधे विरोधिनिवृत्तितया पुरुषार्थत्वज्ञानस्य आर्थिकोपायरूपविरोधप्रतियोगिज्ञानसापेक्षत्वेऽपि, स्वरूपेण स्वरक्षणार्थप्रवृत्तिनिषेधस्य पूर्वोक्तरीत्या नमश्शब्देन सिद्धतया तद्बलेन तदुपरक्तजीवरक्षणार्थ प्रवृत्तिविशिष्टभगवत्स्वरूपस्य मुक्तिफलोपधायकत्वसम्भवेन, तन्मुखेन अयनपदोक्तस्वरूपयोग्यतारूपोपायत्वोपपादनसम्भवेन,भगवतः आर्थिकोपायत्वसिद्ध्या तस्य स्वरक्षणार्थप्रवृत्तिविरोधप्रतियोगित्वालाभसम्भवेन अन्योन्याश्रयानवकाशाच्च।

**सर्वज्ञोऽपि हि विश्वेशस्सदा कारुणिकोऽपि सन्।**
**संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते।।**

इत्यादि प्रमाणानुसारेण सर्वजीवेष्टप्रापणानिष्टनिवर्तनैकदीक्षितस्य भगवतो लीलारसप्रवृत्तस्य अनादिसङ्कल्पाधीनजीवगतप्राकृतभोगापेक्षायां सत्यां –

**जन्मान्तरसहस्त्रेषु तपोज्ञानसमाधिभिः।**
**नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते।।**

इत्याद्युक्तरीत्या प्राकृतभोगापेक्षानिवर्तनपूर्वकस्वभोगापेक्षासम्पादनेनैव स्वभोगापदानस्य वक्तव्यतया, जीवस्य स्वरक्षणार्थप्रवृत्तेः इष्टत्वे तदिच्छा निरसनपूर्वकं स्वाम्येव अस्मद्रक्षणार्थं प्रवर्ततामिति इच्छासम्पादनं विना रक्षणफलोपधायकजीवरक्षणार्थप्रवृत्तेः असम्भाविततया जीवप्रवृत्त्या भगवत्प्रवृत्तिव्याहतेः सूपपादितत्वाच्च।

अत एव जननीकृतशिशुभृद्भक्षणप्रवर्तन न्यायेन भगवतो जीवप्राकृतभोगसाधनप्रवर्तनमित्याचार्यैः अनुगृहीतम्।

अत एव केवलाधिकारिविषये स्वसङ्कल्पसिद्धयावदात्मभाव्यात्मप्राप्त्यपेक्षानुसारेण नित्यनरकरूपकैवल्यापदानमाचार्यानुगृहीतमुपपद्यते। अत एव च निरङ्कुशस्वतन्त्रलीलापरवशस्वसङ्कल्पसिद्धनित्यप्राकृतभोगेच्छानुसारेण भगवता

केचिज्जीवानित्यबद्धाः कृता इति लीलाविभूतेः नित्यत्वप्रमाणमुपपद्यत इति आचार्यैः अनुगृहीतमिति दिक्।

न चैवम् —

[१]**अये दयालोवरदक्षमानिधे विशेषतो विश्वजनीनविश्वद।**
**हितज्ञ सर्वज्ञ समग्रशक्तिक प्रसह्य मां प्रापय दास्यमेव ते।।**

इति श्रीवत्साङ्कमिश्रसूक्तिविरोधः। [२]**सर्वं तदूषजलजोषमहं जुषेय हस्त्यद्रिनाथ तवदास्य महारसज्ञः** इति तदीयसूक्त्यन्तरानुसारेण दास्यरूपविरोधिनिरसनपूर्वकदास्यरुचिसम्पादनमुखेन दास्यप्रदानप्रार्थनस्यैव तत्रापि विवक्षितत्वात्।

इत्थं तृतीयवाक्येन **नारायणाय स्याम्** इत्यनेन प्रार्थनीयत्वेनव्यङ्ग्यार्थकैङ्कर्यमेव विरोधप्रतियोगिभूतमिष्टमिति तद्विरोधिनिवृत्तिप्रार्थनापरस्य **म - मः न स्याम्** इति काकाक्षिन्यायेन तृतीय वाक्यैकवाक्यतया अन्वितस्य नमश्शब्दस्य प्रयोजनपर्यवसायितया प्रामाण्यमपि युक्तम्।

न च **निरस्ताखिलदुःखोऽहम्** इति श्रीभाष्यसूक्तिविरोधिनः तादृशवाक्यकल्पनमेव अयुक्तमिति वाच्यम्। तत्सूक्तौ भगवद्भोगार्थतया स्वभोगेष्टत्वस्यैव विवक्षितत्वेन स्वभोगे स्वतइष्टत्वस्याविवक्षितत्वात्। **मम न स्याम्** इत्यनेन स्वत इष्टभोगनिषेधस्य भगवदिष्टत्वं विना स्वतइष्टत्वनिषेध्यस्य च प्रार्थनीयत्वेन उक्तत्वाच्च।

यदपि अपिचेत्यादिना विस्तरेण स्वभोगार्थप्रवृत्तिनिवृत्तिः, सुषुप्तिप्रलयसाधारण्येन अयनपदोपात्तसिद्धोपायोपरञ्जितेति तत्प्रार्थनाप्रतिपादकतुरीयवाक्यकल्पनं व्यर्थमित्युक्तं तदप्ययुक्तम्। मकारेण ज्ञातृत्ववाचिना जीवोपादानस्य **नारायणाय स्याम्** इति निर्दिष्टसाध्यार्थोपपादकशेषवृत्तौ **मम न स्यामिति** प्रार्थनीयत्वेन साध्यभूतायां स्वभोगनिवृत्तौ च सिद्धसाध्यसमभिव्याहारन्यायेन मूलमन्त्रजनितस्वरूपयाथात्म्यज्ञानरूप हेतुपरतया, तादृशज्ञानपूर्वकस्वभोगार्थ प्रवृत्तिनिवृत्तेः सुषुप्तिप्रलययोः नास्ति प्रसङ्गात्, उपायस्योपायान्तरादूषकत्वेन उपरञ्जकान्तरसत्वे बाधकाभावाच्च।

---

१. व.रा.स्त.९३ २. व.रा.स्त.८१

अत एव द्वितीयवाक्येन स्वरक्षणे स्वान्वयनिवृत्तिरुपरञ्जकत्वेन विवक्षितेति युक्तम्। स्वतइष्टस्वगतफलनिवृत्तेरिव स्वत इष्टान्यगतफलकत्वनिवृत्तेरिवच अन्यगतफलं प्रति अदृष्टद्वारकसाधनानुष्ठाननिवृत्तेरपि मूलमन्त्रोक्तस्वरूपयाथात्म्यज्ञानपूर्विकाया: सिद्धोपायोपरञ्जकत्वस्योपपादितत्वात्।

द्वितीयवाक्येनस्वरक्षणे स्वान्वयानर्हस्यैव प्रतिपादनेऽपि तद्व्यापकीभूतस्वरक्षणार्थप्रवृत्तिनिवृत्तेः व्यङ्ग्यत्वेन तेन वाक्येन तस्या उपरञ्जकत्वसूचनसम्भवाच्च। अत एव च स्वभोगान्वयनिषेधमुखेन तस्योपरञ्जकपरत्वमपि युक्तम्। प्रणवेशेषवृत्त्यर्हत्वक्त्या नमश्शब्दे स्वशेषवृत्त्यर्हत्वनिषेधात्,तद्व्यापकस्वशेषवृत्ति निवृत्तेः सूचनसम्भवात्। विपरीतप्रवृत्तेः अनुरूपवृत्तियोग्यताविरोधित्वाभावेऽपि विपरीतवृत्त्यनर्हत्व व्यापकतन्निवृत्तेः अनुरूपप्रवृत्तियोग्यताव्यापारत्वफलोपधानविरोधित्वेन तत्सूचकनमश्शब्दस्य प्रयोजनपर्यवसानसम्भवात्। एतेन प्रणवस्थोकारोऽपि प्रयोजनपर्यवसायीति सिद्धम्।

अत्रेदमनुसन्धेयम्। भगवत्प्रीत्यर्थप्रवृत्त्यनर्हत्वरूपप्रणवोक्तस्वरूपापेक्षया तद्व्यापकीभूत भगवत्प्रीत्यर्थ प्रवृत्तिफलोपधानप्रतिबन्धकत्वेन आत्मात्मीयेषु भगवच्छेषत्वाभावज्ञानस्य **अहमेव, ममैवेदम्** इत्येवं रूपस्य विरोधितया तन्निवृत्तिः भावान्तराभाववादे **अहं मदीयञ्च भगवानेव** इत्येवं शेषशेषिभावगर्भशरीरशरीरिभावनिबन्धनतादात्म्यज्ञानम्।

इत्थं नमश्शब्दोक्तमोक्षार्थभगवत्प्रसादद्वारकव्यापारनर्हत्वभगवदिष्टत्वज्ञानजन्यभगवत्प्रतीच्छानर्हत्वतादृशस्वभोगेच्छानर्हत्वतादृशस्वभोगेच्छाजन्यप्रवृत्तिसाध्यभोगानर्हत्वरूपस्वसम्बन्धचतुष्टयानर्हत्वव्यापकीभूततादृशव्यापारतादृशेच्छाद्वयतादृशभोगरूपचतुष्टया भावोपरक्तनमश्शब्दव्यङ्ग्यसिद्धोपायापेक्षया स्वसङ्कल्पाधीनचेतनेष्टानुवर्तनस्वभावयुक्त भगवच्चेतनरक्षणार्थप्रवृत्तिप्रतिबन्धकत्वेन तादृशव्यापारतादृशेच्छाद्वयतादृशभोगानां तत्तदर्हताज्ञानभिन्नानां विरोधितया तन्निवृत्तिरपिभगवतो दुःखनिवृत्तिफलोपधायकत्वे तदभावे वा तादृशव्यापारतादृशेच्छाद्वयतादृशभोगरूपचतुष्टयं मम नास्तीति ज्ञानम्।

एवं **मः न स्याम्** इति प्रार्थनीयत्वेनोक्त तादृशनिवृत्तिफलोपहितव्यक्तचतुर्थ्यन्तपदघटितवाक्यव्यङ्ग्यकैङ्कर्यरूपप्राप्यापेक्षया तादृशधर्मचतुष्टयस्य

प्रतिबन्धकत्वेन तन्निवृत्तिरपि **मः न स्याम्** इत्युक्तताद्दशधर्मचतुष्टयनिवृत्तिप्रार्थना-रूपज्ञानावस्थाविशेष एव। अतः मकारनमश्शब्दसमभिव्याहारबलेन पूर्वोक्तज्ञानत्रय-रूपपूर्वोक्तनिवृत्तिचतुष्टयमेव सिद्धोपायोपरञ्जकमिति न सुषुप्तिप्रलयाद्यतिप्रसङ्ग-शङ्कावकाश इति।

इत्थञ्च प्रमाणश्रेष्ठमूलमन्त्रस्थोकारनमश्शब्दबलादेवस्वशेषत्वादेः भग-वच्छेषत्वादिविरोधित्वं कल्प्यत इति युक्तम्।

योग्यतानुसारेण शब्दस्य बोधकत्वेऽपि प्रकृते लोकविरोधस्य विरोध-प्रतियोग्यलाभस्य समभिव्याहारविरोधस्योपरञ्जकाभावस्य च बहुधापरिहृतत्वात्। किञ्च **द्व्यक्षरस्तु भवेन्मृत्युः** इत्युपबृंहणेन स्वशेषत्वादेः भगवच्छेषत्वादिविरोधित्वं सिद्धम्।

न च त्रिवर्गार्थप्रपत्तेरनित्यफलकत्वस्य मोक्षार्थप्रवृत्तेः नित्यफलकत्वस्य च तत्र विवक्षिततत्वेन स्वशेषत्वादेः भगवच्छेषत्वादि विरोधित्वपरत्वमानाभाव इति वाच्यम्। **सर्वमष्टाक्षरान्तस्थम्** इत्याद्यनुसारेण **द्व्यक्षरस्तु भवेन्मुत्युः** इति वचनस्य मूलमन्त्रस्थ नमश्शब्दविवरणत्वावश्यम्भावेन मूलमन्त्रे प्रणवेन भगवच्छे-षत्वभगवद्रक्ष्यत्वयोः उक्त्या, तत्रत्य नमश्शब्देन तदुभयनिषेधस्य वक्तव्यत्वेन द्व्यक्षरस्त्वित्यादिवचनेऽपि मृत्युशब्देनासङ्कुचितसर्वप्राणिप्रणयहेतुभूतभगवत्प्राप्ति-प्रतिबन्धरपप्राणवियोग-हेतुस्वसम्बन्धस्वरूपस्वभोग्यस्वरक्ष्यत्वात्मकार्थप्रतिपादक-त्वस्यैव विवक्षिणीयत्वात्। ममेत्यनेन अदृष्टद्वारकफलसाधनगोचरप्रवृत्तिमत्त्व-लक्षणस्य भगवद्भोगे स्वभोगे च स्वत इष्टत्वलक्षणस्य च लोकसिद्धसंबद्धस्य असङ्कोचेन ग्रहणसम्भवे तत्त्यागायोगाच्च। मृत्युशब्दस्य मरणहेतुशक्तस्य अनित्य-फलकेलक्षणाप्रसङ्गाच्च।

**त्र्यक्षरं ब्रह्मणः पदम्** इत्यनेन कार्यकारणयोः अभेदोपचारेण ब्रह्मप्राप्ति-हेतुत्वस्योक्ततया मृत्युशब्देन तद्विरोधित्वस्यैव विवक्षणीयत्वाच्च, न ममेति च शाश्वतम् इत्यनेन शाश्वतब्रह्मप्राप्तिहेतुत्वस्यैव पूर्ववाक्यानुसारेण विवक्षिततत्वेन ममेति द्व्यक्षरो मृत्युः इत्यनेनापि तद्विरोधित्वस्यैव विवक्षणीयत्वाच्च –

**चेतनस्य यदा मम्यं स्वस्मिन् स्वीयेचवस्तुनि।**
**मम इत्यक्षरद्वन्द्वं तदा मम्यस्य वाचकम्।।**

इत्यादि वचनानुसारेण ममेत्यस्य स्वत इष्टस्वपरभोगवत्त्वलक्षणाहङ्कारममकार-परत्वस्य वक्तव्यतया, द्व्यक्षरस्त्वित्यादौ तन्निषेधस्यापि विवक्षणीयत्वाच्च।

अपि च नमश्शब्देनैव स्वरूपोपायफलरूपविरोध प्रतियोगिप्रदर्शनात् न तदलाभो दोषः। नमश्शब्द एव स्वरूपोपायफलरूपः। स च श्रूयमाणस्सन् स्वरूपादिप्रदर्शक इति, तन्मुखेन विरोधप्रतियोगिलाभस्य विवक्षिततत्वेन पुनस्स्व-रूपादिप्रदर्शनोक्तिवैफल्याभावात्। तथा हि शेषत्वज्ञानकार्यतया दिव्यदेशविषये नमस्कारोक्त्या नमश्शब्दः स्वरूपप्रदर्शकः।

न च नमनक्रियायाः शेषत्वज्ञानकार्यत्वेऽपि मूलमन्त्रस्थ नमश्शब्दस्य सखण्डतया, नमनक्रियामुखेन शेषत्वलक्षणस्वरूपप्रदर्शकत्वं न सम्भवतीति वाच्यम्। सखण्डस्यापि नमश्शब्दस्य तन्त्रेण अखण्डवेषेण नमनक्रियास्मारकत्वस्यापि सम्भवेन भगवच्छेषत्वरूपस्वरूपे अनन्यार्हत्वदार्ढ्यापादकतया दिव्यदेशनमनक्रिया-रूपतदीयशेषत्वस्य श्रीशठकोपमुनिसूक्तौ प्रदर्शिततया शेषवृत्तिरूपनमनक्रियावाचि नमश्शब्दोच्छारणस्य स्वरूपत्वसम्भवेन च नमः शब्दस्य स्वरूपप्रदर्शकत्व-सम्भवात्।

एवं **वेङ्कटेशाय नमः** इति श्रीशठकोपमुनिसूक्त्या नमः शब्दः उपायप्रदर्शकः। न च मूलमन्त्रस्थसखण्ड **नमश्**शब्दस्य उपायप्रदर्शकत्वानुपपत्तिरिति वाच्यम्। उपायोपरञ्जकस्वसम्बन्धनिवृत्ति सूचकतया [१]**भूयिष्ठान्ते नम उक्तिं विधेम** इत्यादिवचनसिद्धतया च नमश्शब्दस्यैव उपायत्वसम्भवेन श्रूयमाणस्य तस्य उपायप्रदर्शकत्वोपपत्तेः।

अत एव **वेङ्कटेशाय नमः** इति श्रीशठकोपमुनिसूक्तेः **वेङ्कटेशशेष-भूतोऽहं, मः नास्मि** इत्यर्थकतया अखण्डनमश्शब्दघटितत्वेन नमश्शब्दस्य उपायप्रदर्शकत्वे तस्याः प्रमाणत्वेन प्रदर्शनानुपपत्तिरिति निरस्तम्। फलोपधानमुखेन अयनपदोपात्तभगवदुपायत्वोपपादकस्वसम्बन्धरूपविरोधिनिवृत्तिपरस्य सखण्ड-

---

१. यजुर्वेदः

नमश्शब्दस्यैव स्वरूपानुरूपोपायत्वेन **अंजलिभरं वहते** इत्यनुगृहीतरीत्या भगवद्बुध्या महाभारत्वेन च प्रतिपादनमुखेन **वेङ्कटेशाय नमः** इत्यादि श्रीशठकोपमुनिसूक्तौ **भूयिष्ठां ते नम उक्तिं विधेम** इति श्रुतिवाक्यविवरणेन श्रूयमाणस्य नमश्शब्दस्य स्वात्मकोपाय प्रदर्शकतया तस्याः सूक्तेः प्रमाणत्वेन प्रदर्शनोपपत्तेः।

इत्थं प्रेमातिशयेन मङ्गलाशासनदशायां प्रयुज्यमानत्वेन स्वस्यालभ्यलाभत्वेन च नमश्शब्दस्य दिव्यसूर्यनगृहीततया श्रूयमाणो नमश्शब्दः फलप्रदर्शकः।

न च स्वभोगनिवृत्तिप्रार्थनाप्रतिपादकनमश्शब्दस्य परमपुरुषार्थरूपभगवत्सम्बन्धप्रार्थना प्रतिपादकत्वाभावेन स्वभोगनिवृत्तेः फलत्वाभावे न च फलप्रदर्शकत्वासम्भव इति वाच्यम्।

उत्तरवाक्येव्यक्तचतुर्थ्यन्तेन भगवत्प्रियतया भगवत्प्रीतिप्रार्थनाप्रतिपादनानन्तरं भगवत्प्रियत्व सीमाभूमितयाव्यक्तनमश्शब्देन स्वभोगनिवृत्तिप्रार्थनायाः प्रतिपादनेन पूर्वमेव स्वभोगनिवृत्तेः फलत्वोपपादनेन **नित्याञ्जलिपुटा हृष्टानम इत्येववादिनः** इति मुक्तलक्षणवचनेन च, प्रार्थनीयत्वेन स्वभोगनिवृत्तिप्रतिपादकस्य नमश्शब्दस्यैव भगवत्प्रियतमत्वेन परमपुरुषार्थतया श्रूयमाणस्य तस्य फलप्रदर्शकतायाः अव्याहत्वादिति।

इदञ्चाधिकरणं द्वादशसूत्र्यात्मकम्। तत्र नमश्शब्दस्य स्वरक्षणान्वयफलविषयाहङ्कारममकारफलान्वयरूपविरोधिचतुष्टयनिवृत्तिपरत्वेन प्रयोजनपर्यवसायितया प्रामाण्यमुच्यते प्रथमसूत्रेण –

**मू।। (१०२) सू।। इत्ताल् विरोधियैक्कलिक्किरतु**

(इत्ताल्, आकनमः, एन्गिरवित्ताल्) इति सूत्रद्वयव्यवहितपूर्वाधिकरणसूत्रनिर्दिष्टनमश्शब्देनेत्यर्थः। (विरोधियै) प्रतिबन्धकत्ते।

(कलिक्किरतु) निषेधिक्किरतु। (इम्मन्त्रम्) इति शेषः। महावाक्यरूपो मूलमन्त्रः, नमश्शब्दरूपस्वैकदेशरूपद्वितीयवाक्येन अयनपदोक्त भगवदुपायत्वोपपादकं विरोधिनिवृत्तिरूपं स्ववाक्यार्थैकदेशं प्रतिपादयतीत्यर्थः।

अथ विरोधित्रयनिवृत्तिपरत्वं वक्ष्यन् तदुपोद्घातत्वेन प्रणवोक्तशेषत्वविरोधिनिवृत्तिमात्रपरत्वभ्रमो निवर्त्यतेद्वितीयसूत्रेण-

**मू।। (१०३) सू।। विरोधितान् मून्रु** इति। (तान्) इत्यनेन अत्रत्यविरोधिस्वरूपवाचिना शङ्कितैकविरोधि व्यावृत्तिरुच्यते। (मून्रु इति) अन्यथा, सम्बन्धसामान्यवाचि षष्ठीश्रुतिविरोध इति भावः।

अथ इष्टविरोधिनिवृत्तिपरत्व एव पुरुषार्थपर्यवसायितया प्रामाण्यसिध्या विरोधिप्रतियोगिभूतमिष्टत्रयं निर्दिश्यते तृतीयसूत्रेण –

**मू।। (१०४) सू।। अतावतु-स्वरूपविरोधियुम्, उपायविरोधियुम्, प्राप्यविरोधियुम्** इति। स्वरूपशब्देन-स्वं रूपमिति व्युत्पत्त्या प्रणवोक्त भगवत्प्रीतीच्छाजन्यप्रवृत्त्यर्हत्वरूपशेषत्वलक्षणस्वभाव उच्यते तद्व्यापकीभूतभगवत्प्रीत्यर्थप्रवृत्तिफलोपधानप्रतिबन्धकं स्वप्रीत्यर्थप्रवृत्तिफलोपधानं विरोधिपदेन विवक्षितम्।

तन्निवृत्तिः स्वप्रीत्यर्थप्रवृत्त्यनर्हत्वपरेण नमश्शब्देन व्यापकतया व्यज्यत इत्यभिप्रायेण (स्वरूपविरोधियुम्) इत्युक्तम्।

उपायशब्देन जीवरक्षणार्थप्रवृत्ति-विशिष्टकरणव्युत्पन्नायनपदोपात्तं व्यक्तचतुर्थी व्यङ्ग्यप्रीतिविशेषरूपपरमपुरुषार्थकरणभूतं भगवत्स्वरूपप्रतिबन्धकमदृष्टद्वारकभगवत्प्रीतिसाधनगोचरप्रवृत्तिमत्त्वं विरोधिपदेन विवक्षितम्। तन्निवृत्तिः-अदृष्टद्वारक भगवत्प्रीत्यर्थप्रवृत्त्यनर्हत्वपरेणनमश्शब्देन व्यापकतया व्यज्यत इत्यभिप्रायेण (उपायविरोधियुम्) इत्युक्तम्।

प्राप्यशब्देन **नारायणाय स्याम्** इत्युक्तस्य प्राप्यतया जीवात्मसाध्यत्वस्य उपपादकं भगवत्प्रियतमत्वेन परमपुरुषार्थभूतं कैङ्कर्यमुच्यते। तत्प्रतिबन्धकं **मः न स्याम्** इति तुरीयवाक्येन प्रार्थनीयत्वेनोक्तं स्वत इष्टस्वपरभोगवत्त्वं विरोधिपदेन विवक्षितम्। तन्निवृत्तिः काकाक्षिन्यायेन अन्वितनमश्शब्देन स्वार्थानुभवकैङ्कर्यनिवृत्तिफलोपधानस्य प्रार्थनीयत्व परेण कण्ठतो लभ्यत इत्यभिप्रायेण (प्राप्यविरोधियुम्) इत्युक्तम्। अपि शब्दत्रयं समभिव्याहृतविरोधिनां मिथस्समुच्चयपरम्। (अतावतु) इत्यस्य एतद्विरोधित्रयं सामान्येन पूर्वोक्तविरोधित्रयं भवितुमर्हतीत्यर्थः।

अथ उक्तविरोधित्रयनिवृत्तेः स्वापमदमूर्च्छाप्रलयेष्विति प्रसङ्गात् न सिद्धोपायफलोपधायकत्वोपपादकतया तदुपरञ्जकत्वमुपपद्यत इति शङ्कायाम्, **म् - मः नास्मि, म्-मः न स्याम्** इत्यत्र समर्पकमकारेण आत्मनो ज्ञातृत्वेन

निर्देशमहिम्ना भावान्तराभावन्यायेन आत्मस्वरूपयाथात्म्यज्ञान प्रयुक्तविरोधित्रय-निवृत्तिः विवक्षितेति नातिप्रसङ्ग इत्यभिप्रेत्य विरोधित्रयनिवृत्तेः आत्मयाथात्म्यज्ञानत्रय-रूपत्वं सूत्रत्रयेण वदन् प्रथमं स्वरूपविरोधि निवृत्तिरूपमात्मयाथात्म्यज्ञानमाह चतुर्थसूत्रेण -

**मू।। (१०५) सू।। स्वरूपविरोधिकलिकै यावतु, यानेनीयेन्नुडै मैयुम् नीये एन्निरुक्कै** इति। **अहमपि त्वमेव। आत्मीयमपि त्वमेव** इत्येवं श्रीशठकोप-मुनिसूक्त्यनुगृहीता, शेषशेषिभावशरीरशरीरिभावनिबन्धनात्मात्मीयतादात्म्याध्य-वसायरूपनिष्ठा, प्रणवोक्तशेषत्वरूपव्यापकीभूतभगवत्प्रीतीच्छाजन्यप्रवृत्तिविरोध्या-त्मात्मीयस्वातन्त्र्यबुद्धिनिवृत्तिर्भवितुमर्हतीति अर्थः।

(यानेयेन्ननते येन्निरुन्देन्) इति श्रीशठकोपमुनिसूक्त्यनुगृहीतात्मीत्मीय-स्वातन्त्र्याध्यवसायरूपनिष्ठायाः स्वभोगार्थप्रवृत्तिहेतुतया स्वभोगार्थप्रवृत्तिवत् स्वरूपविरोधित्वात् भावान्तराभावादेतद्ज्ञानप्रतिबन्धकज्ञानस्यैव तद्ज्ञाननिवृत्ति-रूपत्वाच्चेति भावः।

अथ उपायविरोधिनिवृत्तिरूपं स्वरूपयाथात्म्यज्ञानं प्रदर्श्यते पञ्चसूत्रेण -

**मू।। (१०६) सू।। उपायविरोधिकलिकैयावतु - कलैवाय् तुन्बम्**
**कलैयातोलिवाय् कलैकण् मट्रिलेन् एन्निरुक्कै**

इति। (कलैवाय् तुन्बम् कलैयातोलिवाय् कलैकण् मट्रिलेन्) इति श्रीशठकोप-मुनिसूक्त्यनुगृहीता -

**भवदभिमतनित्यकैङ्कर्यविरोधिरूपदुःखनिवर्तकस्त्वं भूयाः मा वा। भवद्व्यतिरिक्तविरोधिनिवृत्त्युपायरहितोऽहम्** इति दृढाध्यवसायरूपानिष्ठा-चेतरक्षण-प्रवृत्तसिद्धोपायविरोधिस्वरक्षणान्वयनिवृत्तिः भवितुमर्हतीति अर्थः।

अथ प्राप्यविरोधिनिवृत्तिरूपं स्वरूपयाथात्म्यज्ञानं प्रदर्श्यतेषष्ठसूत्रेण -

**मू।। (१०७) सू।। प्राप्यविरोधिकलिकैयावतु - मट्रै नम् कामङ्गल्**
**माट्रु एन्निरुक्कै**

इति। (मट्रैनम् कामङ्गल् माट्रु) इति श्रीगोदासूक्त्यनुगृहीता भवदिष्टज्ञानाधीना

अस्मदिच्छाविषयानिवर्तयेत्यध्यवसायरूपा निष्ठा, भगवदभिमतनित्यकैङ्कर्यरूपप्राप्यविरोधिनिवृत्तिः भवितुमर्हतीत्यर्थः। अत्र पञ्चमषष्ठसूत्रयोः उपायान्तरानर्हत्वरूपाकिञ्चन्याध्यवसायस्य उपायान्तरप्रवृत्तिप्रतिबन्धकत्वम्, प्रवृत्त्युद्देश्यतया प्रधानभूतभगवद्भोगे आनुषङ्गिकस्वभोगे भगवदिच्छानधीनेच्छाविषयकत्वस्य तादृशेच्छाधीनप्रयत्नस्य तदधीनप्रवृत्तेः तत्कृतभोग्यस्य च अनर्हत्वज्ञानतत्पञ्चकनिवृत्तिप्रार्थनयोः तत्पञ्चकप्रतिबन्धकत्वं चाभिप्रेतम्।

इत्थं प्रमाणतममूलमन्त्रस्थनमश्शब्दादेवषड्विधस्वसम्बन्धस्य स्वरूपोपायपुरुषार्थविरोधितया तन्निवृत्तिः नमश्शब्दार्थ इत्युक्तम्। अथ अस्मिन्नर्थे प्रमाणतया उपब्रह्मणवचनं सूचयितुं प्रथमं तद्वचनस्य, म इत्यनेन फलितस्य स्वसम्बन्धस्य विरोधित्वप्रतिपादनमुखे प्रामाण्यं सूच्यते सप्तमसूत्रेण –

## मू।। (१०८) सू।। मः एन्नैस्वरूपनाशम्

इति। अत्र नाशो मरणम्। यथा शरीरस्य पञ्चवृत्तिप्राणवियोगो मरणम्। एवमात्मस्वरूपस्य असङ्कुचितसर्वप्राणिप्राणहेतुभूतपरमात्मवियोगो मरणम्। तद्वियोगश्च-अद्वेष प्रभृतिकैङ्कर्यपर्यन्ततत्सम्बन्धाभावः। स्वरूपशब्दः - जीवात्मस्वरूपपरः। नाशशब्दः - तद्धेतुभूतार्थप्रतिपादकपरः।

तथा च **मः** इत्युक्तिः अद्वेषप्रभृतिनित्यकैङ्कर्यपर्यन्तभगवत्सम्बन्धप्रतिबन्धकषड्विधस्वसम्बन्धप्रतिपादकेत्यर्थः। **द्व्यक्षरस्तु भवेन्मृत्युः ममेति-द्व्यक्षरो मृत्युः** इति विवरणिविवरणीभूतप्रथमतृतीयपादयोः ममेति निर्देशे जीवात्मनः परमात्मवियोगरूपमरणहेत्वर्थप्रतिपादकत्वपरतया सामान्यविशेषरूपेण विरोधिपरत्वस्य दृढीकृतत्वात्, तयोः पादयोः **मः** इति षष्ठ्यन्तविवरणरूपत्वाच्चेति भावः।

अथ नमश्शब्देन फलितस्य षड्विधविरोधिनिषेधस्य प्रतिपादनमुखेन प्रामाण्यं सूच्यते अष्टमसूत्रेण –

## मू।। (१०९) सू।। नमः एन्नौ - स्वरूपोज्जीवनम्

इति। अत्र उज्जीवनम्-प्राणप्राप्तिः। यथा शरीरस्य पञ्चवृत्तिप्राणसम्बन्धो जीवनम्,

पर्यन्तपरमात्मसम्बन्धः। स्वरूपशब्दः - जीवात्मस्वरूपपरः। उज्जीवनशब्दः - तद्धेतुभूतार्थ प्रतिपादकपरः।

तथा च नम इत्युक्तिः नित्यकैङ्कर्यान्तविरोधिषड्विधस्वसम्बन्धनिवृत्ति-प्रतिपादकेत्यर्थः। **त्र्यक्षरं ब्रह्मणः पदम् न ममेति च शाश्वतम्** इति विवरणविवरणीभूत द्वितीय चतुर्थपादयोः न ममेति निर्देशे जीवात्मनः परमात्म-सम्बन्धरूपोज्जीवनहेत्वर्थप्रतिपादकत्वपरतया सामान्यविशेषरूपेण विरोधिनिवृत्ति-परत्वस्य दृढीकृतत्वात्, तयोः पादयोः सखण्डनमश्शब्दोपबृंहणरूपत्वाच्चेति भावः।

तृतीयसूत्रे प्रथमद्वितीयपदार्थपर्यालोचनया स्वरूपपदार्थपर्यालोचनया च नमश्शब्दार्थविरोधिनिवृत्तौ विरोधिप्रतियोगिभूतेष्टलाभ इत्युक्तम्। अथ स्वपदश्रवण-मात्रेण स्वस्यैव स्वरूपोपायपुरुषार्थरूपेण विरोधिप्रतियोगीष्टरूपतया तल्लाभ इत्युच्यते नवमसूत्रेण -

**मू।। (११०) सू।। इतुतान् स्वरूपत्तैयुम् उपायत्तैयुम् फलत्तैयुम् काट्टुम्**

इति। (इतु) नमः पदमित्यर्थः। तानिति स्वशब्देन असाधारणाकारविशिष्ट-स्वरूपपरामर्शिना, नमः पदमेवेत्यर्थो लभ्यते। अवधारणेन पूर्वोत्तरपदार्थपर्यालोचनं स्वपदार्थपर्यालोचनञ्च व्यावर्त्यते। स्वरूपशब्देन प्रणवोक्तशेषत्वव्यापकीभूतशेष-वृत्त्यात्मकनमश्शब्दरूपं एवोच्चारणमात्रेण स्वात्मकस्वरूपादिगोचरश्रावणप्रत्यक्ष-जनकमित्यर्थः।

अथ नमश्शब्दस्य स्वरूपात्मकत्वे प्रमाणं प्रदर्श्यते दशमसूत्रेण –

**मू।। (१११) सू।। [1]तोलैविल्लिमङ्गलम् तोलुम् एन्नैयाले स्वरूपम् शाल्लिट्रु**

इति। (तोलै विल्लिमङ्गलम्) इति दिव्यदेशनामधेयम्। तं दिव्यदेशं सेवमानां नायिकामित्यर्थः। (तोलुमिवलै) इति सूक्तिविशेषश्रवणात्।

तथा च श्रीशठकोपमुनिसूक्तिभिः अनन्यार्हशेषत्वज्ञानदार्ढ्यफलीभूततदीय-सेवायाः नमनक्रियारूपत्वोक्त्या अत्र नमश्शब्दप्रयोगात् तन्त्रेण नमनक्रिया वाचितया शेषवृत्तिरूपाखण्डनमश्शब्द उच्चरित इत्यर्थः।

१. तिरुवायिमोलि ६-५

अथ नमश्शब्दस्य उपायरूपत्वे प्रमाणं प्रदर्श्यते एकादशसूत्रेण –

**मू।। (११२) सू।। [1]वेङ्गडत्तुरैवैर्क्कु नमः एन्गैयाले उपायम् शोल्लिट्रु**

इति। (वैङ्गडत्तुरैवार्क्कु नम वेन्नलाम् कडमै अतुशुमन्दार् कट्के) इति श्रीशठकोपमुनिभिः, **वेङ्कटेशाय नमः** इत्युक्तिरूपस्वरूपानुरूपोपायं भगवद्बुध्या महाभारं वहतां विरोधिनिवृत्तिर्भवतीति स्वसम्बन्धात्मकविरोधिनिवृत्ति प्रतिपादकतया नमश्शब् एवोपाय इत्यनुगृहीत तया अत्र नमश्शब्दरूप उपायः उच्चरितः इत्यर्थः।

अथ नमश्शब्दस्य फलरूपत्वे प्रमाणमुच्यते द्वादश सूत्रेण –

**मू।। (११३) सू।। अन्दितोलुम् शोल्, एन्गैयाले फलम् शोल्लिट्रु**

इति। (अन्दितोलुम् शोल्लुप्पेट्रेन्) इति श्रीशठकोपमुनिभिः भगवत्प्रेमसीमाभूतमङ्गलाशासनदशायां सेव्यमानसूक्तिरूपनमश्शब्दस्य अलभ्यलाभत्वेनानुगृहीततया भगवदत्यन्ताभिमतषड्विधस्वसम्बन्धानिवृत्तिप्रार्थनाप्रतिपादकतया फलभूतं नमः पदमुक्तमित्यर्थः।

**।। इति शुद्धसत्त्वरामानुजाचार्यैः कृते रहस्यत्रयमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयपादे नमश्शब्दप्रयोजनसमर्थनं नाम तृतीयाधिकरणं समाप्तम्।।**

१. तिरुवायिमोलि ३-३-६.

श्रीमते रामानुजाय नमः

# प्रथमाध्यायस्य तृतीयपादे नमश्शब्दव्यङ्ग्यार्थविशेषसमर्थनं नाम चतुर्थाधिकरणम्

पूर्वस्मिन्नधिकरणद्वये नमश्शब्दवाक्यार्थः तत्कथनप्रयोजनञ्चोक्तम्। अत्र नमश्शब्दस्य व्यङ्ग्यार्थविशेषो निरूप्यते।

## तत्र संशयः

भागवतशेषत्वं नमश्शब्दस्य व्यङ्ग्यार्थो न वेति। तदर्थं तस्य व्यङ्ग्यार्थत्वे उकारार्थविरोधि अस्ति न वेति। तदर्थं भागवतशेषत्वं भगवच्छेषत्वानन्यार्हत्व-दार्ढ्यापादकतया उत्कृष्टार्थो न वेति। तदर्थं तस्य उत्कृष्टार्थत्वे श्रीपरकालदिव्य-सूरिसूक्तिः प्रमाणं न वेति। तथेदपरं चिन्तनीयम्। भागवतशेषत्वस्य नमश्शब्द-व्यङ्ग्यत्वे अकारोकारव्यङ्ग्यत्वविरोधो अस्ति न वेति। तदर्थं भागवतशेषत्वस्य अकारोकारव्यङ्ग्यत्वमस्ति न वेति।

## तत्र पूर्वपक्षः

भागवतशेषत्वं न नमश्शब्दव्यङ्ग्यार्थः। वाक्यान्वयाधिकरणन्यायेन केवलभगवत्प्रीत्युद्देश्यकप्रवृत्त्यर्हत्वस्यैव त्रिविधचेतनाचेतनवर्गेषु [१]**आत्मनस्तु कामाय** इत्यादि श्रुतिसिद्धतया, तथैव श्रीवत्साङ्कमिश्रसुतैः –

**[२]उपादत्ते सत्तास्थितिनियमनाद्यैः चिदचितौ**
**स्वमुद्दिश्य श्रीमानिति वदति वागौपनिषदी।।**

इत्यनुगृहीततया स्वशेषत्वनिषेधरनमश्शब्दस्य अन्यशेषत्वनिषेधोपलक्षणतया भगवदन्यभागवतशेषत्वे नमश्शब्दव्यङ्ग्यत्वस्य स्वव्याघातपराहतत्वात्।

---

१. बृह.उ.६-५-६
२. श्री.रा.स्त.२-८

किञ्च प्रणवस्थोकारेण अनन्यार्हशेषत्वस्य प्रथमप्रतीततया तद्व्याघातेन न भागवतशेषत्वस्य नमश्शब्दव्यङ्ग्यत्वसम्भवः।

एतेन भागवतशेषत्वस्य नमश्शब्दार्थदार्ढ्यापादकतया नमश्शब्देन अवश्यानुसन्धेयत्वमपि अपास्तम्। भागवतशेषत्वस्य भागवदन्यशेषत्वरूपत्वेन स्वशेषत्वोपपादकतया स्वशेषत्वनिवृत्तिदार्ढ्यापादकत्वस्य शङ्कितुमशक्यत्वात्।

अपि च लोके तदनुबन्धिविषयकप्रीतेः तद्विषयकप्रीत्यतिशयकार्यत्वदर्शनेन भागवतशेषत्वस्य लुप्तचतुर्थ्यन्ताकारेणैव प्रथमोपस्थितेन आर्थिकसिद्धिर्युक्ता, तथा च पुनरिहतत्सिद्धिकथनं व्यर्थम्।

इतरच्च यदि भागवतशेषत्वम् अन्यशेषत्वनिवृत्तिदार्ढ्यापादकम्, तदा उकारेणैव प्रथमोपस्थितेः न तत् सिद्धेः, पुनः नमश्शब्देन तत्सिद्धिकथनमयुक्तम्। एतेन भागवतशेषत्वस्य नमश्शब्दव्यङ्ग्यत्वे श्रीपरकालसूरिसूक्तिः प्रमाणमिति निरस्तम्।

**[१]तन्मन्त्रं ब्राह्मणाधीनम्, यथा देवे तथा गुरौ, प्रसीदति वै विद्या विना सदुपदेशतः [२]गुरुमेवाभिगच्छेत् [३]आचार्यात् दैवविद्या विदिता –**

**[४]विष्णोः कटाक्षमद्वेषमाभिमुख्यञ्च सात्त्विकैः।**
**सम्भाषणं षडेतानि स्वाचार्यप्राप्तिहेतवः।।**

इत्यादिवचनानुसारेण **सद्भिरेव सहासीत, गुरुसन्निधिमात्रेण, बोधयन्तः परस्परम्-**

**श्रुतार्थसंशयोच्छित्त्यै बोधयन्तः परस्परम्।**
**साधवस्त्वभिगन्तव्याः सन्तस्संगस्य भेषजम्।**
**साधूनां दर्शनं पुण्यं सद्यस्साधुसमागमः ।।**

**संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेत् भूयः श्रुतिमन्विच्छन्** इत्यादिवचनानुसारेण भागवतसन्दर्शन सल्लापसहवासादेः तत्वज्ञानोत्पादकतया सिद्धतत्वज्ञानदार्ढ्यापादकतया च भागवतानुवर्तनं मन्त्रार्थज्ञानादपि उत्कृष्टमित्यभिः प्रायेण साधनतया भागवतशेषवृत्तिपरत्वेन तत्सूक्तेः फलतया तच्छेषवृत्तिपरत्वस्य उकारनमश्शब्दविरोधेनामूलकत्वात्।

---

१. विह.सं.२२ २. छा.उ.१-२
३. छा.उ.४-९-३ ४. विष्णु.पु.४-९-३

किं बहुना ? स्वोक्तिविरोधेन अकारोकारनमश्शब्देषु केनापि भागवत शेषत्वं व्यङ्ग्यत्वमयुक्तमिति।

## सिद्धान्तस्तु

**भागवतशेषत्वं नमश्शब्दव्यङ्ग्यार्थ एव।**
**अनादृतसुतं गेहे पुरुषं नाभिनन्दति।**

**तथानर्चितसद्भक्तं भगवान्नाभिनन्दति।।**
**मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत्।।**

**तस्मात्परतरं प्रोक्तं तदीयाराधनं नृप।**
**सिद्धिर्भवतिवानेति संशयोऽच्युतसेविनाम्।**
**न संशयोऽस्तितद्भक्त परिचर्यारतात्मनाम्।।**

इत्यादि प्रमाणानुसारेण षाड्गुण्यपरिपूर्तिलक्षणगुणानुभवजनितश्रीमन्नारायणविषयकपरमभक्तिशालित्वरूपभागवततत्वलक्षणस्य गुणानुभवजनितभागवतशेषवृत्तेः तादृशभागवतनिष्ठायाः भगवत्प्रीत्यतिशयहेतुभूतप्रवृत्तिमत्त्वरूपभगवच्छेषत्वात्मकतया निषेधस्य विहितेतरविषयतया च, [1]**न वा अरे पत्युः कामाय** इत्यादि वाक्येषु भगवत्प्रीत्यनुद्देश्यकप्रकृतिसम्बन्धनिबन्धनस्वप्रीति मात्रोद्देश्यक स्वसम्बन्धिप्रीतिसम्पादनार्हत्व भगवत्प्रीतिमात्रोद्देश्यक प्रवृत्त्यर्हत्वयोः एव विवक्षितत्वेन, अत एव **स्वमुद्दिश्यश्रीमान्** इति सूक्तिविरोधाभावेन च नमश्शब्दस्य भगवच्छेषत्वानात्मकान्यशेषत्वसामान्यनिवृत्त्युपलक्षणतया, भगवदन्यभागवतशेषत्वेन नमश्शब्दव्यङ्ग्यत्वस्य व्याघातगन्धाभावात्।

अत एव किञ्चेत्याद्यपि निरस्तम्। **आयास्मि** इति प्राथमिकवाक्ये भागवतशेषत्वरूपभगवच्छेषत्वस्यापि असङ्कोचेन शब्दतः विहितत्वेन उकारस्य भगवच्छेषत्वानात्मकान्यशेषत्वसामान्यनिषेधद्योतकत्वस्यैव न्याय्यत्वात् अत एव नमश्शब्देन भगवत्प्रीतीच्छां भगवदिष्टत्वज्ञानं विना च स्वप्रीत्युद्देश्यकप्रवृत्त्यर्हत्वस्यैव निषेध्यतया अन्यशेषत्वसामान्यनिषेधोपलक्षणेनापि नमश्शब्देन भागवतशेषत्वस्यापि व्यङ्ग्यत्वे बाधकाभावाच्च।

---

१. बृह.उ.

किञ्च भागवतशेषत्वस्य दार्ढ्योपादकतया सारार्थत्वेन नमश्शब्दानुसन्धेयत्वात् स्वार्थोपपादकस्य स्वेन निषेधे व्याघातो दुर्वारः। भगवच्छेषत्वात्मकभागवतशेषत्वस्य तदनात्मकान्यशेषत्वरूपत्वाभावेन तदात्मकस्वशेषत्वविरोधितया तादृशस्वशेषत्वनिवृत्तिदार्ढ्योपादकत्वस्य सुघटितत्वात्।

अपि चेत्याद्यप्ययुक्तम्। भगवतशेषत्वस्य भगवच्छेषवृत्तिदार्ढ्योपादकत्वाभ्युपगमे अकारेण प्रथमोपस्थितभगवच्छेषत्वोपपादकस्य तस्य उकारनमश्शब्दाभ्यां निषेधासम्भवेन स्वोक्तिव्याघातप्रसङ्गात्, रजस्तमोवर्धकान्यशेषत्वस्य भगवत्स्वरूपयाथात्म्यज्ञानादिविरोधित्वेन भगवदत्यन्ताप्रियतया, भगवच्छेषत्वस्य तन्निवृत्त्युपपादकत्वे भगवच्छेषत्ववर्धकभागवतशेषत्वे तन्निवृत्तिदार्ढ्योपादकत्वस्य कैमुत्यन्यायसिद्धतया वैयधिकरण्यशङ्कायाः अनवकाशपराहतत्वात्।

अन्यच्चेत्यपि अयुक्तम्। अन्यशेषत्वविरोध्यर्थस्य प्रथमतः एक उपस्थितौ उकारेण अन्यशेषत्वनिषेधस्य अप्रसक्तप्रतिषेधत्वापातेन भगवच्छेषत्वस्य अन्यशेषत्वरोधित्वाज्ञानेन गृहक्षेत्रपुत्रकलत्रादिन्यायेन आत्मस्वरूपे भगवच्छेषत्वमन्यशेषत्वञ्च सम्भवतीति प्रसक्तस्यार्थस्य प्रतिषेध इति वक्तव्यत्वेन [1]**यम्मुहूर्तं क्षणं वापि, वरं हुतवहज्वाला** इत्याद्युक्तभगवत्प्रेमातिशयकार्यभागवतशेषत्वस्य प्रथममुपस्थितौ तादृशप्रसक्तेः असम्भावितत्वेन च भगवच्छेषत्वोपपादकस्यापि भागवतशेषत्वस्य अकारतात्पर्यविषयत्वासम्भवात्। उपपादकोपमर्देन प्रसक्तिसम्पादनस्य आशामोदकमात्रत्वेन गौरवमात्रफलकत्वाच्च। निष्कलङ्कार्थप्रतिपादनस्य विरोध्युदयाऽसहवाक्ये नैव कर्तव्यत्वाच्च।

अत एव इतरच्चेत्याद्यपि निरस्तम्। नमः शब्दस्य अप्रसक्तप्रतिषेधत्वपरिहाराय उकारस्य अन्यशेषत्वनिवृत्तिविरोध्युदयनहत्वेन वक्तव्यतया तन्निवृत्त्यपपादकस्यापि भागवतशेषत्वस्य तत्र विवक्षितत्वासम्भवात्। भागवतशेषत्वस्य नमश्शब्दव्यङ्ग्यत्वेऽपि परकालदिव्यसूरिसूक्तिः प्रमाणमित्यपि युक्तमेव। अनेकार्थप्रतिपादके मूलमन्त्रे भागवतशेषत्वमेव सारार्थतया अभिनिवेशनगृहीतमित्युक्तौ फलभूतभगवच्छेषत्वप्रतिपादके मन्त्रेतदुपपादकतयाफलभूत भागवतशेषत्वस्यैव

---

१. गारु.पु.२२२-२

प्रतिपादनीयत्वेन मन्त्रार्थयाथात्म्यज्ञानोत्पादकतया तद्वर्धकतयासाधनभूतभागवतशेषत्वस्य अप्रसक्तत्वात्।

अत एव स्वतः प्रियतया फलभूतान्यशेषत्वस्यैव उकारनमश्शब्दाभ्यां निषेध्यतया तदुपपादकस्यापि भागवतशेषत्वस्य फलरूपस्यैव विवक्षणीयत्वाच्च। मूलमन्त्रसारार्थभूतभागवतशेषत्वप्रतिपादक श्रीपरकालदिव्यसूरिसूक्तौ फलभूतभागवतशेषत्वमेव अनेकार्थेषु भगवच्छेषत्वोपापादकतया सारार्थकत्वेन अभिनिवेशेन गृहीतमित्यर्थस्य अवश्यवक्तव्यत्वात्।

लोकरीत्याभगवत्प्रेमातिशयकार्यतया भगवत शेषत्वं भगवच्छेषत्वोपपादकमित्यत्र साधनभूतभागवतशेषत्वप्रसक्तेरनवकाशाच्च।

**संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे।**
**कदाचित्केशवे भक्तिस्तद्भक्तैर्वा समागमः।।**

**अमृताद्दतिरीप्सितार्थलाभोनिधिसन्दर्शनमैन्द्रमाधिपत्यम्।**
**अपवर्थफलोदयोऽपि पुंसां न तुलामर्हति सत् समागमस्य।।**

**भक्तैर्भागवतैस्सह [१]अडियार्कल् कुलाङ्गुलुडन् कूडूवनेन्नुकोलो** इत्यादिभिः भागवतानां परमप्राप्यत्वेन उक्ततया फलभूतभागवतशेषत्वस्यापि प्रामाणिकत्वाच्च।

अत एव परकालदिव्यसूरिसूक्तौ भागवतशेषत्वे मूलमन्त्रव्यङ्ग्यत्वसिद्धावपि नमश्शब्द व्यङ्ग्यत्वसिद्धौ मानाभाव इत्यापि शङ्का निरस्ता। निष्कलङ्कार्थस्य विरोध्युदयासहस्थल एव वक्तव्यत्वेन तत्सूक्तौ भागवतशेषत्वेनमश्शब्दव्यङ्ग्यत्वस्यैव विवक्षितत्वात्।

कि बहुनेत्याद्यप्ययुक्तम्। भागवतशेषत्वे भगवच्छेषत्वोपपादकस्य अन्यशेषत्वनिवृत्त्युपपादकत्वस्योक्तिविरोधस्य चोपपादितत्वात्। तथा नमश्शब्द एव भागवतशेषत्वस्य आर्थिकसिद्धिर्युक्तेत्युपपादितत्वाच्चेति। अतः भागवतशेषत्वं नमश्शब्दव्यङ्ग्यमेवेति। इदञ्चधिकरणम् सूत्रत्रयात्मकम्। तत्र भगवतशेषत्वस्य नमश्शब्दव्यङ्ग्यत्वं प्रमाणेक्तिपूर्वकं प्रदश्यते प्रथमसूत्रेण (उल्लतुमिति)।

---
१. तिरुवायिमोलि २-३-१

**मू।। (११४) सू।। उट्रदुम् उन्नडियार्क्कडिमै एन्गिरपडिये इतिले भागवतशेषत्वमनुसन्धेयम्**

इति। (उल्लतुम्) अभिनिवेशेन गृहीतमित्यर्थः। (उन्नडियार्क्कडिमै) अर्चावतार-विषयप्रावण्यातिशयशालिविषये तादृशप्रावण्यातिशयरूपगुणानुभवजनितशेषवृत्तिः इत्यर्थः। अकारेण कल्याणगुणपूर्तेः उक्ततया गुणानुभवजनितप्रीतिकारितशेषवृत्तेः एवलुप्तचतुर्थी व्यङ्ग्यतया, गुणपूर्तेः अर्चावतार एव विद्यमानतया च [1]**कण्णपुरत्तु-रैयम्माने** इति सम्बोधनेन अर्चाविग्रहावच्छिन्नभगवद्गुणानुभवजनितप्रीतिकारित-शेषवृत्तिमद्भागवतविषये तादृश प्रावण्यतिशयरूपगुणानुभवजनितफलभूतशेषवृत्तिः आदशतिशयेन गृहीतार्थ इत्यर्थः।

(उल्लतुमिति) च शब्देन [2]**मट्रुमोर् दैवमुलतेन्निरुप्पारोडुट्रिलेन्** इत्युक्तानुष्टेयार्थः समुच्चीयते। मूलमन्त्रार्थेषु भगवच्छेषवृत्त्यपेक्षया अन्यशेषत्वनिवृत्ति-रेव, [3]**मरन्दुम् पुरन्दोलामान्दर्** इत्यनुगृहीतरीत्या अवश्यानुष्ठेयत्वात्, मन्त्रार्थेषु भगवच्छेषत्वान्यशेषत्वनिवृत्तिदार्ढ्यापादकतया भागवत्शेषत्वस्य अवश्यं ज्ञातव्य-त्वाच्च। (एन्गिरपडिये) इत्युक्तप्रकारेणेत्यर्थः प्रकाशश्च अर्थान्तरदार्ढ्यापादकतया आदरणीयत्वम्। (इतिले) नमश्शब्द इत्यर्थः। विरोध्युदया सहस्थलत्वादिति भावः। (भगवतशेषत्वम्) भगवद्गुणानुभवजनितप्रीतिमाद्विषये फलभूतशेषवृत्तिः इत्यर्थः। (अनुसन्धेयम्) सदा ज्ञातव्यमिति भावः।

अथ प्रथमातिक्रमे कारणाभावात् भगवच्छेषत्वस्याप्युपादत्वाच्च अकारेणैव भागवत्शेषत्वसिद्धिरिति पक्षान्तरं प्रदर्श्यते द्वितीयसूत्रेण ( इतु) इति भागवतशेषत्व-मित्यर्थः। अकारस्य लुप्तचतुर्थ्यन्तत्वेन भगवच्छेषत्वरूपोपाद्य लाभादिति भावः। (एन्नुम् शोल्लुवर् कल्) इत्यपि वदन्तीत्यर्थः। (शोल्लुवर् कल्) इति पक्षान्तरास्वर-सबीजन्तु अन्यशेषत्वविरोध्यर्थस्य पूर्वमेव प्रतिपत्तौ, उकारस्य अप्रसक्तप्रतिषेधत्वा-पत्तिरिति।

अथ नमश्शब्दस्य उकारविवरणमात्रत्वेन तत्र पूर्वोपमर्दन अन्यशेषत्व-प्रसक्तेः पुनरव्यक्तत्वात्, प्रथमातिक्रमे कारणाभावाच्च उकार एव अन्यशेषत्वनिवृत्ति-दार्ढ्यापादकतया भागवतशेषत्वसिद्धिरिति पक्षान्तरं प्रदर्श्यते तृतीयसूत्रेण।

---

१,२. पेरियतिरुमोलु ८-१०-३ ३. तिरुवन्तादि ४-६८

अत्र पूर्वसूत्रात् (इतु) इति धर्मिनिर्देशकपदमनुषञ्जनीयम्। (इतु) भागवतशेषत्वमित्यर्थः। (उकारत्तिले) इत्यनन्तरम् **अनुसन्धेयम्** इत्यनुषङ्गः। (एन्नुम् शोल्लुवर् कलिति) प्राग्वत्। पक्षान्तरास्वरसबीजन्तु उकार एव अन्यशेषत्व-निवृत्तिदार्ढ्यापादकभागवतशेषत्वप्रतीतौ नमश्शब्दे पुनरन्यशेषत्वप्रसक्त्यभावाद-प्रसक्त प्रतिषेधापत्तिरिति।

न च नमश्शब्दस्य उकारविवरणमात्रत्वात् न पूर्वोपमर्देन अन्यशेषत्व-प्रसक्तिरपेक्षितेति वाच्यम्। अन्यशेषत्वनिवृत्तावपि स्वशेषत्वं निवर्त्यते। शेषत्वसम्मतौ सत्यां भगवद्वैलक्षण्यज्ञानेन अन्यशेषत्वनिवृत्तिसम्भवात्। शेषत्वस्यैव असम्मत्या स्वातन्त्र्यबुद्धिमतो भगवद्वैलक्षण्यज्ञानेन अन्यशेषत्वनिवृत्तिसम्भवात्। शेषत्वस्यैव असम्मत्या स्वातन्त्र्यबुद्धिमतो भगवद्वैलक्षण्यमपि अनादृत्य हिरण्यकशिपुपौण्ड्र-कवासुदेवादिन्यायेन स्वशेषत्वस्यैव स्वारसिकत्वाच्चेति विशिष्य स्वशेषत्वस्य प्रसज्य प्रतिषेध इति च वक्तव्यत्वात्। अन्यथा विवरणवैयर्थ्यात्।

एवम् उकारेण अन्यशेषत्वनिवृत्तावपि स्वशेषत्वं न निवर्त्यते। अन्यथा मकारोपात्त भोक्तृत्वानुपपत्तैरिति, स्वशेषत्वस्य प्रसक्तौसत्याम् [१]**अहमन्नम्, अहमन्नादः** इति श्रुत्या भोक्तृत्वस्य भोगतिशयसम्पादकतया भोग्यताशेषत्वात् स्वशेषत्वनिवृत्तिः सम्भवतीत्यभिप्रायेण नमश्शब्दप्रवृत्तिरिति वक्तव्यत्वाच्च।

अथ स्वशेषत्वविरोध्यर्थस्य फलभूतभागवतशेषत्वस्य उकारेण प्रथममुपस्थितौ शेषत्वप्रसक्तिरेव न स्यादिति फलभूतस्वशेषत्वनिवृत्तिपरेण नमश्शब्देनैव फलभूतभागवतशेषत्वसिद्धिरिति युक्तम्। न चैवं साधनभूतभागवत-शेषत्वस्य साधनभूतान्यशेषत्वनिवृत्तिसिद्धेश्च। तस्मात् विरोध्युदयासहनमश्शब्द एव अप्रतिहतभागवतशेषत्वसिद्धिः युक्तेति दिक्।

**।। इति श्रीकृष्णपादलोकगुरुविरचिते रहस्यत्रयमीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयपादे नमश्शब्दव्यङ्ग्यार्थविशेषसमर्थनं नाम चतुर्थाधिकरणं समाप्तम्।।**

---

१. तै.उ.भृ.व.

श्रीमते रामानुजाय नमः

# प्रथमाध्यायस्य तृतीयपादे अचित्पारतन्त्र्यसमर्थनं नाम पञ्चमाधिकरणम्

पूर्वस्मिन्नधिकरणे नमश्शब्दस्य स्वशेषत्वांशे प्रसज्य प्रतिबन्धकत्वमुक्तम्। तदिह आक्षिप्य समाधीयते। तत्र संशयः। नमश्शब्दः स्वशेषत्वांशे प्रसज्य प्रतिषेधको न वेति। तदर्थमुकारेण अन्यशेषत्वसामान्यनिषेधेऽपि स्वशेषत्वांशस्य प्रसक्तिरस्ति न वेति। तदर्थं जीवस्य स्वशेषत्वं परशेषत्वञ्च विद्यते न वेति। तदर्थं चेतनस्य परशेषत्वमात्रम्, उत स्वशेषत्वमपीति। तथा भगवतः स्वशेषत्वमात्रम्, उत परशेषत्वमपीति। तथेदमपरं चिन्तनीयम्। प्रसक्तस्यापि स्वशेषत्वस्य नमश्शब्देन निवृत्तिः सम्भवति न वेति। तदर्थं शेषत्वपरिपालनरूपस्वशेषत्वस्य ईश्वरेण भोगार्थभङ्गः सम्भवति न वेति। तद्भङ्गपरिहारार्थं स्वशेषत्वस्य रक्षणाय ईश्वरभोगभङ्गः प्रसज्यते न वेति च। तदर्थम्, ईश्वरभोगभङ्गहेतुः पूर्वोत्तरवाक्ययोः प्रतिपन्नो न वेति।

## तत्र पूर्वपक्षः

नमश्शब्देन स्वशेषत्वांशस्य प्रसज्यप्रतिषेधोन सम्भवत्येव। उकारेण असङ्कोचेन अन्यशेषत्वसामान्यनिषेधकेन स्वशेषत्वस्यापि निषेधेन तस्य पुनरुत्थानायोगात्।

न च शेषत्वसम्मतिसत्त्वे भगवद्वैलक्षण्यज्ञानेन अन्यशेषत्वनिवृत्त्या भगवच्छेषत्वयोग्यतायामपि शेषत्वासम्मतौ –

**जन्मान्तरसहस्रेषु या बुद्धिर्भाविता नृणाम्।**
**तामेव भजते जन्तुरुपदेशो निरर्थकः।।**

इत्युक्तरीत्या भगवद्वैलक्षण्यज्ञानमपि अप्रयोजकीकृत्य स्वशेषत्वानुवृत्त्या भगवच्छेषत्व-

योग्यतायाः अपि निरोधेन अन्यशेषत्वनिवृत्तावपि स्वशेषत्वस्य प्रसक्तिस्सम्भवतीति वाच्यम्। भगवत्कटाक्षविशेषाधीनाद्वेषाभिमुख्यशालिनः पुरुषस्य सात्त्विकसम्भाषणादिमुखेन शास्त्रबलेनैव देहात्माभिमानस्वातन्त्र्यबुद्ध्योः निवृत्तेः वक्तव्यतया, शास्त्रशिखामणिभूतमूलमन्त्रस्थोकारेण अन्यशेषत्वसामान्यनिषेधे तद्विश्वासशलिनः स्वशेषत्वनिवृत्तेः दुरुपह्नवत्वात्। शेषत्वज्ञानं भगवच्छेषत्वयोग्यतापादकम्। स्वातन्त्र्यज्ञानन्तु तद्योग्यतायाः अपि विरोधीत्येतावता देवतान्तरशेषत्वज्ञानापेक्षया [1]**किन्तेन न कृतं पापम्** इत्युक्तरीत्या महापापत्वलक्षणक्रौर्यातिशयसिद्धावपि अद्वेषाभिमुख्यशालिनः पुरुषस्य अविशेषेण उकारबलेन स्वशेषत्वान्यशेषत्वनिवृत्त्योः दुर्वारत्वात्।

न च **स्वर्गकामो यजेत, मुमुक्षुर्ब्रह्मोपासीत** इत्यादिशास्त्रविरोधेन जीवस्य स्वशेषत्वनिषेधो न सम्भवतीति वाच्यम्। एवं सति [2]**तमेवं विद्वानमृतइह भवति** [3]**तमेवं विदित्वातिमृत्युमेति, तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ -**

**[4]ब्रह्माणं शितिकण्ठञ्च याश्चान्या देवतास्स्मृताः।**
**प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम्।।**

इत्यादि वचनोपबृंहतोकारबलेन सिद्धस्य देवतान्तरशेषत्वनिषेधस्यापि भङ्गप्रसङ्गात्।

[5]**वायुर्वैक्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति** [6]**तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति** [7]**येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः** [8]**लभते च ततः कामान्मयैव विहितान् हि तान्।** [9]**देवान् भावयितावेन ते देवा भावयन्तु वः** इत्यादि प्रमाणबलेन देवतान्तरशेषत्वस्यापि विहितत्वात्। अज्ञान् प्रति तद्विधानमित्युक्तौ **स्वर्गकामो यजेत** इत्याद्युक्तफलित्वकर्तृत्वांशेऽपि तदुक्तिसम्भवेन स्वशेषत्वनिषेधे बाधकाभावात्।

किञ्च एवं सति, अचितोऽपि स्वशेषत्वापत्तिः। स्वातिशयेच्छया उपादेयत्वस्य गृहारामक्षेत्रादौ भोगमोक्षार्थमुपादेये शरीरे भगवल्लीलोपकरणे

---

१. म.भा.उ.प.४२-३४ २. पु.सू. ३. श्वेता.उ.३-८
४. महा.भा.शा.प.३५८ ५. यजुर्वेदे २-१-१ ६. यजु.वे.२-४-२४
७. भ.गी.९-२३ ८. भ.गी.७-२२ ९. भ.गी.३-११

प्रधानादौ च सत्वात् तथा च [1]**अचेतना परार्था च** इत्यादिषु अचितः केवल-पारार्थ्योक्तिविरोधः।

अचितः केवलस्वातिशयार्थमुपादेयत्वाभावेन स्वशेषत्वाभावोक्तौ जीवस्यापि भगवल्लीलाभोगार्थमुपादेयत्वेन केवलस्वातिशयार्थमुपादेयत्वाभावात्, स्वशेषत्वं नास्तीति तुल्यम्।

अपि च केवलं स्वातिशयेच्छया उपादेयस्यैव शेषपादार्थत्वे अचितः केवलपरार्थत्वभङ्गप्रसङ्गः। अचित्स्वरूपस्य स्वातिशयार्थमपि उपादेयत्वेन केवल-परातिशयेच्छया अनुपादेयत्वात्।

यदि च अचितः स्वातिशयेच्छाजन्यपरातिशयेच्छया अनुपादेयत्वात्, स्वेतरातिशयेच्छाधीनस्वाति शयेच्छाजन्यप्रवृत्तिविषयत्वं स्वापेक्षया शेषत्वमिति, अचितः स्वातिशयेच्छानधीनपरातिशयेच्छाजन्यप्रवृत्तिविषयत्वात्, परार्थत्वं सम्भवति। परातिशयेच्छानधीनस्वातिशयेच्छाजन्यप्रवृत्तिविषयत्वाभावात्, स्वशेषत्वञ्च न सम्भवतीत्युच्येत। तदा जीवस्यापि भगवदितरातिशयेच्छानधीनभगवदतिशयेच्छा-जन्यप्रवृत्तिविषयत्वात् भगवच्छेषत्वं जीवेतरातिशयेच्छानधीनजीवातिशयेच्छा-जन्यप्रवृत्तिविषयत्वाभावात् स्वेशेषत्वाभावश्च सम्भवतीति तुल्यम्।

अन्यच्च **स्वातिशयेच्छामात्रानधीनप्रवृत्तिविषयत्वं स्वस्य शेषत्वम्** इत्युक्तौ, भगवतः स्वशेषत्वं न स्यात्। भगवत्प्रवृत्तेः सर्वस्या अपि जीवातिशयेच्छयापि जन्यत्वेन भगवतः स्वातिशयेच्छामात्रजन्यप्रवृत्तिविषयत्वाभावात्। स्वेतरातिशयेच्छा-नधीनस्वातिशयेच्छाजन्यप्रवृत्तिविषयत्वात् भगवतः न परार्थत्वमित्युक्तौ जीवस्य स्वातिशयेच्छानधीनभगवदतिशयेच्छाजन्यप्रवृत्तिविषयत्वात्। स्वेतरातिशयेच्छा-नधीनस्वाति-शयेच्छाजन्यप्रवृत्तिविषयत्वाभावेन स्वातिशयेच्छानधीनभगवदिच्छाजन्य-प्रवृत्तिविषयत्वेन च सारार्थत्वाभावः परार्थत्वञ्च दुर्वारमिति।

तस्मात् जीवस्य स्वशेषत्वाभावः न बाधित इति। जीवे स्वशेषत्वाभावस्य अन्यशेषत्वसामान्यनिषेधपरेण उकारेण प्रतिपादनसम्भवात्, तन्निषिद्धस्य स्वशेषत्वस्य विशिष्य पुनः प्रसक्तिः न सम्भवतीति सिद्धम्।

---

१. परमसंहिता

न च ईश्वरस्य **स्वरूपं स्वातन्त्र्यं भगवतः** इत्यनुगृहीतरीत्या स्वतन्त्रत्वात् भागवतः स्वार्थपरत्वं परार्थत्वाभावश्च अकारेण प्रतिपन्नः।

अकारस्य समस्तशब्दमूलत्वलक्षणसमस्तशब्दव्याख्येयत्वात्मसर्वशब्द-प्रकृतित्वेन रक्षणवाचिधातुनिष्पन्नत्वेन लुप्तचतुर्थ्यन्तत्वेन च सर्वकारणत्व-सर्वरक्षकत्वसर्वशेषित्वानां भगवति प्रतिपन्नत्वेन चैतन्यरहितत्वेन ममेदमिति वक्तुम् अयोग्यत्वात् परतन्त्रभूतमचिद्वस्तु परार्थतयैव प्रणवे प्रतिपन्नम्। [1]**तदुपकरणं वैष्णवमिदम्** इत्यनुगृहीतरीत्या जीवोपकरणभूतं परिदृश्यमानम् अचिद्वस्तुजातं व्याप्यव्यापकन्यायेन प्रणवे भगवच्छेषतया उक्तजीवापेक्षया शेषभूतमित्यर्थतः सिद्धेः। जीवस्तु लुप्तचतुर्थीलब्धशेषत्वबलात्, मकारोक्तज्ञातृत्वबलाच्च स्वार्थत्वपरार्थत्वयोः साधारणे धर्मीति प्रणवे प्रतिपन्नः। अतः जीवे स्वशेषत्वस्य पुनः प्रसक्तिः सम्भवतीति वाच्यम्।

स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिकत्वलक्षणस्वातन्त्र्यशालिनः-भगवतः स्वप्रयोजनेच्छां विना क्वापि प्रवृत्तिराहित्यलक्षणस्वार्थपरता सत्वेऽपि परातिशयेच्छाधीनसृष्ट्यादिलक्षणस्वविषयकप्रवृत्तेः [2]**सोऽकामयत बहुस्यां प्रजायेयेति** [3]**तदात्मानं स्वयमकुरुत** [4]**स एव सृज्यस्स च सर्गकर्ता** इत्यादि श्रुतिसिद्धत्वेन पारार्थ्यस्य दुरपह्नवत्वात्, अचितश्चैतन्यरहितत्वेन स्वातिशयेच्छया स्वविषयकप्रवृत्त्ययोग्यत्वेन केवलपरेच्छाधीनस्वविषयक प्रवृत्तिकत्व लक्षणपार-तन्त्र्यसत्त्वेऽपि स्वगतातिशयविषयकजीवेश्वरेच्छाधीनस्वाविषयप्रवृत्तिकत्वलक्षण-स्वशेषत्वस्य दुर्वारत्वाच्च। स्वप्रयोजनेच्छां विना स्वविषयकप्रवृत्तिराहित्यलक्षण-स्वार्थपरत्वस्य स्वशेषत्वशब्दार्थत्वाभावाच्च।

**इच्छया यदुपादेयं तस्यातिशयसिद्धये।**
**उभयानुभयैकैकजुषातौ शेषशेषिणौ।।**

इति अतिशयेच्छाप्रवृत्तिरहितानामपि स्वगतातिशयविषयकान्यदीयेच्छाधीनप्रवृत्ति-विषयत्वमादायस्वशेषत्वस्य स्वविषयकप्रवृत्तिहेतुभूतान्यदीयेच्छाविषयातिशयभाक्त्व-मादाय स्वशेषित्वस्य च वेदान्ताचार्यैः अनुगृहीतत्वात्, जीवस्य भगवदतिशयविषयक-

---

१. अष्टश्लोकी २. तै.उ.आ.व.६ ३. तै.उ.आ.व.७ ४. विष्णु.पु.१-२-७०

स्वेच्छाधीनस्वविषयकप्रवृत्तिकत्वेन भगवच्छेषतया अकारेण प्रतिपन्नस्यापि स्वातिशयविषयकेच्छाधीनस्वविषयकप्रवृत्त्यनर्हत्वस्य उकारेण सिद्धतया मकारोक्तज्ञातृत्वबलात् स्वगतातिशयविषयकस्वेच्छाधीनप्रवृत्तिकत्वरूपस्वार्थपरत्वस्य सर्वलोकसिद्धस्यापि उकारोक्तस्वरूपयाथात्म्यज्ञानकार्यतया स्वशेषत्वाभावस्यैव वक्तव्यत्वाच्च। तस्मादुकारनिषिद्धस्य स्वशेषत्वस्य न पुनः प्रसक्तिसंभवः।

अस्तु वा कथञ्चित् तत्प्रसक्तिः। तथापि नमश्शब्देन पुनः तन्निषेधो न सम्भवत्येव। तथाहि स्वातिशयेच्छाजन्यप्रवृत्तिविषयत्वरूपस्वशेषत्वस्य निषेधः, स्वातिशयाभावात्, स्वातिशयेच्छाभावात् स्वातिशयेच्छाजन्यत्वाभावात्, तादृशप्रवृत्त्यभावाद्वान सम्भवति। **नारायणाय स्याम्** इति भगवत्प्रतीच्छाजन्यप्रवृत्तिप्रार्थनाप्रतिपादकतृतीयवाक्येनापि तादृशप्रवृत्तिरूपस्वातिशयस्य, तत्प्रार्थनीयाः प्रवृत्तौ तज्जन्यत्वस्य, तादृशप्रवृत्तेश्च सिद्धत्वेन तन्निषेधतद्व्याघातपातात्। प्रार्थनाविषयत्वोक्त्या कैङ्कर्यस्य स्वातिशयरूपत्वात् प्रार्थनायाः कैङ्कर्यरूपफलपर्यन्तत्वाभावे प्रार्थनाप्रतिपादकवाक्याप्रामाण्यापत्तेः। अतएव प्रवृत्तौ स्वातिशयेच्छाजन्यत्वस्य तादृशप्रवृत्तिमत्त्वस्य च सिद्धेश्च।

न च कैङ्कर्यरूपस्वातिशयस्य भगवत्प्रीत्यर्थतया अनन्यार्थस्वातिशयेच्छाजन्यप्रवृत्तिनिषेधः सम्भवतीति वाच्यम्। तस्य स्वातिशये अनन्यार्थत्वनिषेधरूपतया **नारायणाय स्याम्** इत्यनेनैव स्वातिशये अन्यार्थत्वस्य सिद्धतया च नमश्शब्दवैयर्थ्यापातात्। अत एव जीवगतातिशयस्य भगवधीनतया अनन्याधीनस्वातिशयेच्छाजन्यस्वविषयकप्रवृत्तिकत्वरूपस्वसम्बन्धो नमश्शब्देन निषिध्यत इत्यपास्तम्। तादृशनिषेधस्यापि स्वातिशये अनन्याधीनत्वस्य सर्वकारणत्वसर्वरक्षकत्वबोधकाकारेणैव सिद्धतया च नमश्शब्दवैयर्थ्यस्य दुरुध्यरत्वात्। उक्तरीत्या अनन्यार्थत्वानन्याधीनत्वनिषेधपरत्वे उकारस्यापि वैयर्थ्यापाताच्च। अन्ययोगव्यवच्छेदपराभ्याम् उकारनमश्शब्दाभ्याम् भगवदपेक्षया यादृशशेषत्वविधानं तादृशशेषत्वस्यैव अन्यापेक्षयापि निषेद्धव्यत्वेन अनन्यार्थत्वानन्याधीनत्वविशिष्टशेषत्वनिषेधस्य व्युत्पत्तिविरुद्धत्वाच्च।

एतेन स्वप्रीतिलक्षणस्वातिशयेच्छाजन्यस्वविषयकप्रवृत्तिकत्वनिषेधो नमश्शब्देनेत्यपास्तम्।

[1]**रसंह्येवायं लब्ध्वानन्दीभवति,** [2]**सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति** [3]**ईरिलिन्बत्तिरुवेल्लम् यान् मूल्गिनन** [4]**वीविलिन्बम्मिग एल्लैनिगल्न्द** [5]**अमुतमुण्डुकलित्तेने** इत्यादिषु जीवस्य प्रीतिरूपातिशयभक्त्वोक्ति विरोधात् [6]**कदाऽहमैकान्तिकनित्यकिङ्करः ?** [7]**अशेषशेषतैकरतिरूपनित्य-किङ्करो भवानि** [8]**वलुविलावडिमैशेय्यवेण्डुं नाम्** इत्यादि व्यक्तचतुर्थ्यन्तविवरणेषु स्वप्रीत्यर्थकैङ्कर्यप्रार्थनावलिविरोधाच्च।

**एतेनैव भोगदशायाम् ईश्वरेण शेषत्वापलापे क्रियमाणे शेषत्व-रक्षणार्थमीश्वरभोगनिरोधो निषिध्यते। नमश्शब्देन** इत्यपि दूरोत्सारितम्। भोगदशायाम् ईश्वरेण यतेष्टातिविनियोगे क्रियमाणे शेषत्वापलापाप्रसक्तेः। यथेष्ट-विनियोगरूपभगवद्भोगनिरोधहेतोः अप्रसक्तत्वाच्च। लुप्तव्यक्तचतुर्थ्यन्ताभ्यां यथेष्टविनियोगार्हत्वरूपभगवद्भोगनिरोधहेतोः अप्रसक्तत्वाच्च। लुप्तव्यक्तचतुर्थ्यन्ताभ्यां यथेष्टविनियोगार्हत्वरूपशेषत्वस्यैव प्रतीतेश्च।

अत एव नमश्शब्देन स्वप्रीतिच्छाजन्यप्रवृत्त्यर्हत्वस्यैव निषेधः। न तु तादृशप्रसक्तिरिति न नित्यकैङ्कर्यप्रार्थना। तदनुष्ठानविरोध इति निरस्तम्। तदनर्हस्य उपाधिदशायां भ्रान्त्या तत्सम्भवेऽपि सर्वोपधिविनिर्मोक्ष दशायां तदसम्भवादिति।

## अत्रायं सिद्धान्तः

नमश्शब्देन स्वशेषत्वांशस्य प्रसज्यप्रतिषेधः सम्भवत्येव। एतत्पादीय-द्वितीयाधिकरणन्यायेन विशिष्यनिषेधेन स्वशेषत्वस्य अन्यशेषत्वापेक्षया क्रौर्यातिशय-मात्रसिद्ध्या अद्वेषाभिमुख्यशालिनि पुरुषे अन्यशेषत्वनिवृत्तावपि स्वशेषत्वानुवृत्तेः उकारविरोधेनासम्भवेऽपि **स्वर्गकामो यजेत** इत्यादेः [9]**त्रैगुण्यविषया वेदाः** इत्याद्युक्तरीत्या अज्ञजनविषयत्वेऽपि अपौरुषेयनित्यनिर्दोषवेदस्य बलवद्बाधकाभावे स्वार्थे प्रामाण्यावश्यम्भावेन जीवगतातिशयेच्छायाः तज्जन्यजीवविषयकप्रवृत्तेश्च जीवेश्वरोभयगतत्वस्य प्रामाणिकतया स्वगतातिशयेच्छाजन्यप्रवृत्तिविषयत्वलक्षण-

१. तै.उ.आ.व.७-१ २. तै.उ.आ.व.२-२ ३. तिरुवायिमोलि २-६-८
४. तत्रैव ४-५-३ ५. तत्रैव १०-८-६ ६. स्तो.र.४६
७. शरणागतिगद्ये ५ ८. तिरुवायिमोलि ३-३-१ ९. भ.गी.२-४५

स्वशेषत्वस्य जीवस्वरूपे दुर्निवारत्वेन, देवतान्तरशेषत्वस्य पूर्वोक्तप्रमाणोपबृंहितोकारबलेन [1]**न तु मामभिजानाति** [2]**यजन्त्यविधिपूर्वकम्** इत्याद्यनुसारेण निषेधसम्भवेऽपि जीवे स्वशेषत्वस्य निषेधासम्भवात्।

अन्यशेषत्वस्य पामराणां प्राणधारकान्नप्रदातृसेवान्यायेन अन्तर्याम्यज्ञानकृतत्वेन औपाधिकत्वेऽपि [3]**यो वेद सोऽश्नुते** इत्यादिप्रतिपन्नयोः सर्वज्ञयोगिमुक्तात्मस्वरूपे तयोः कर्तृत्वभोक्तृत्वयोः औपाधिकत्वासम्भवेन देवतान्तरशेषत्वानर्हत्वस्यैव उकारेण प्रतिपादनासम्भवाच्च।

किञ्चेत्याद्यप्ययुक्तम्। (अकारत्तिले कल्याणगुणङ्गलैच्चोल्लु कैयाले इन्दशेषत्वम्, गुणत्तालेवन्दतु) इति द्वितीयपादाष्टमाधिकरणोक्तन्यायेन गुणानुभवजनित-प्रीतिकारितकैङ्कर्यरूपस्वयम्प्रयोजनशेषवृत्त्यर्हत्वस्यैवलुप्त चतुर्थ्यन्ताकारेणोक्ततया, केवलं स्वातिशयेच्छया उपादेयत्वस्य शेषशब्दार्थत्वाभावेऽपि, स्वातिशयेच्छया उपादेयत्वस्य शेषशब्दार्थत्वेऽपि अचितः प्रणवोक्तशेषत्वविशेषस्य निषेधसम्भवेन, जीवेतदसम्भवेन च अचितः विवक्षितस्वशेषत्वासम्भवेऽपि जीवे तत्सम्भवात्। **मुमुक्षुर्ब्रह्मोपासीत** [4]**मुमुक्षुर्वै शरणमहं प्रपद्ये** [5]**यो वेदः सोऽश्नुते** [6]**रसं ह्येवायं लब्ध्वा आनन्दीभवति** इत्यादिषु जीवे स्वगतातिशयस्य तदिच्छायाः तज्जन्यप्रवृत्तेः च प्रसिद्धत्वात्।

अपि चेत्याद्यपि अयुक्तम्। परगतातिशयविषयकस्वकीयेच्छाजन्यस्वकीयप्रवृत्तिविषयत्वलक्षणपरशेषत्वस्य गुणज्ञाननिबन्धनस्य अचेतने असम्भवेऽपि परगतातिशयविषयकपरकीयेच्छाजन्यपरकीयप्रवृत्तिविषयत्वमादाय पारार्थ्यसम्भवात्, अन्येच्छानधीनस्वातिशयेच्छाजन्यप्रवृत्तिविषयत्वं स्वशेषत्वमिति अनभ्युपगमेन जीवस्य स्वशेषत्वाभावाऽप्रसक्तेश्च।

अन्यच्चेत्याद्यप्ययुक्तम्। परगतातिशयेच्छामात्रजन्यप्रवृत्तिविषयत्वस्य अन्यातिशयेच्छानधीनपरातिशयेच्छाजन्यप्रवृत्तिविषयत्वस्य च शेषशब्दार्थत्वानभ्युपगमेनपरातिशयेच्छाजन्यप्रवृत्तिविषयत्वमात्रस्य तदभ्युपगमेन च जीवस्य परार्थत्वोपपत्तेः।

---

१. भ.गी.९-२४  २. भ.गी.९-२३  ३. तै.उ.आ.व.१
४. श्वेता.उ.६-१८  ५. तै.उ.आ.व.१  ६. तै.उ.आ.व.७-१

आकारेण असङ्कुचितसर्वकारणत्वसर्वरक्षकत्वोक्तिबलेन स्वमुद्दिश्येत्यादिसम्प्रदायसिद्धस्य अन्यातिशयेच्छानधीनस्वातिशयेच्छाजन्यस्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिकत्वरूपस्वार्थत्वस्य भगवत्स्वरूपे अव्याहतत्वाच्च।

तस्मात् जीवस्य स्वशेषत्वाभावो बोधितः। जीवेस्वशेषत्वभावस्य अन्यशेषत्वसामान्यनिषेधपरेणाप्युकारेण प्रतिपादनासम्भवात्। तदनिषिद्धस्य स्वशेषत्वस्य विशिष्य पुनःप्रसक्तिः सम्भवतीति सिद्धम्, किञ्च, न केवलम् [1]**उपादत्ते सत्तास्थितिनियमनाद्यैः** इत्यनुगृहीतरीत्या प्रमाणान्तरेण भगवतः केवलस्वार्थत्वम् [2]**अचेतना परार्था च** इत्यादि प्रमाणान्तरेण अचितः केवलपरार्थत्वम् [3]**यो वेद सोऽश्नुते** इत्यादि प्रमाणान्तरेण चितः स्वार्थत्वं परार्थत्वञ्च अवगन्तव्यम्। अपि तु प्रणवेनैव तत्त्वत्रयस्यापि वैचित्रिकं केवलशेषित्वं शेषशेषत्वञ्चावगन्तुं शक्यते।

तथाहि निरुपाधिकासङ्कुचितसर्वकारणत्वनिरुपाधिकासङ्कुचितसर्वरक्षकत्वयोः श्रीमन्नारायणे अकारेण प्रतिपादिततया अन्यगतातिशयेच्छानधीनस्वातिशयेच्छाजन्यसर्वविषयकप्रवृत्तिमत्त्वलक्षणं केवलशेषित्वं भगवतो लभ्यते। परातिशयेच्छाजन्यप्रवृत्तिविषयत्वमात्रलक्षणपारार्थ्यस्य भगवति प्रामाणिकत्वे वैवक्षिकस्य निरुक्तकेवलस्वार्थत्वस्य दुरपह्नवत्वात्।

जीवोपकरणतया लोकसिद्धस्याचितः व्याप्यव्यापकन्यायेन भगवच्छेषतया प्रणवे अर्थतासिद्धस्य तत्त्वत्रयभोग्यतालक्षणगुणानुभवजनितप्रीतिकारिततत्त्वत्रयगतातिशयसिद्धस्वविषयकस्वकीयेच्छाजन्यतत्त्वत्रयविषयकस्य स्वकीयप्रवृत्तिकत्वलक्षणजीवगतशेषत्वराहित्येन अचितः वैवक्षिककैवल्यपारार्थ्यमर्थात् अवगम्यते। अचितः स्वगतातिशयविषयकजीवेश्वरेच्छाधीनस्वविषयकप्रवृत्तिकत्वलक्षणस्वशेषत्वस्य सत्त्वेऽपि निरुक्तवैवक्षिकस्वशेषत्वाभावस्य दुर्वारत्वात्।

स्वप्रयोजनेच्छां विना स्वविषयकप्रवृत्तिराहित्यरूपस्वार्थपरत्वस्य स्वशेषशब्दार्थत्वाभावेऽपि निरुक्तवैवक्षिकस्वार्थत्वनिषेधे बाधकाभावाच्च। अत एव इच्छाप्रवृत्तिरहितानामपि शेषशेषिभावस्य अभियुक्तैः अनुगृहीतत्वेऽपि विरोधाभावाच्च।

---

१. श्री.रा.स्त.२-८ २. परमसंहिता ३. तै.उ.आ.व.१

जीवस्य लुप्तचतुर्थ्यन्ताकारेण भगवत्प्रीतीच्छाजन्यप्रवृत्त्यर्हत्वपरेण तादृशप्रियत्वप्रयत्नफलोपधानावगमात्, व्यक्तचतुर्थ्यन्तघटितवाक्येन प्रार्थनीयत्वेन तादृशप्रयत्नफलोपधानस्य शब्दतोऽवगमात्, तादृशप्रयत्नप्रार्थनायाः **स्याम्** इत्यध्याहृतपदेनावगमात्, मकारेण **मन-ज्ञाने, मदी-हर्षे** इत्यादि धातुनिष्पन्नेन कर्तरि व्युत्पन्नेन कर्तृत्वभोक्तृत्वयोः शब्दतः अवगमाच्च गुणानुभवजनितप्रीतेः तदिच्छायाः तज्जन्यप्रयत्नस्य च सत्वावगमेन वैवक्षिकं पुरुषोक्तं स्वार्थत्वमवगम्यते। ज्ञातृत्वकर्तृत्वभोक्तृत्वानां निष्कृष्टत्रिविधात्मकवाचिमकारघटितमूलमन्त्रस्य वाक्यत्रयेण शुद्धात्मनः स्वाभाविकधर्मतया अवगतत्वेन उकारेण स्वातिशयेच्छाजन्य-प्रवृत्त्यनर्हत्वस्य सन्दंशविरोधेन बोधयितुमशक्यतया स्वगतातिशयविषयकस्वेच्छाधीन-प्रवृत्तिकत्वरूपस्वार्थपरत्वस्यउकारोक्तस्वरूपयाथात्म्याज्ञानकृतत्वासम्भवात्।

तस्मात् लुप्तव्यक्तचतुर्थीद्वयक्रियापदद्वयश्रुतमकारानुषक्तमकारत्रय-प्रतिपन्नज्ञानेच्छाकृतिभोक्तृत्वविरोधेन स्वशेषत्वस्य उकारेण निषिद्धतया पुनः प्रसक्तिः सम्भवतीति सिद्धम्।

इत्थं प्रसक्तस्य स्वशेषत्वस्य नमश्शब्देन पुनः प्रतिषेधः सम्भवत्येव। स्वतइष्टस्वातिशयस्य तदिच्छायाः तादृशस्वयत्नस्य च निषेधसम्भवात् स्वत इष्टत्वञ्च भगवदिष्टत्वज्ञानानधीनेच्छाविषयत्वम्। स्वतो भगवदिष्टत्वञ्च, भगवदन्यगतातिशयेच्छानधीन भगवदिच्छाविषयत्वम्। स्वातिशयस्वप्रयत्नयोः स्वत इष्टत्वाभावादपि स्वशेषत्वनिषेधोयुज्यत एव।

तयोः स्वत इष्टत्वञ्च, भगवदतिशयेच्छानधीनेच्छाविषयत्वम्। उकारेण सामान्यतः निषेधस्वारस्यात्, विशिष्यदार्ढ्यार्थं पुनः निषेधस्वारस्याच्च, चतुर्थीद्वय-क्रियापदद्वय मकारचतुष्टयप्रपन्नानां ज्ञानकृतिभोगानां भगवदतिशयेच्छाधीनेच्छा-विषयाणां विधिः, स्वातिशयेच्छायाश्च भगवदतिशयेच्छाधीनाया विधिः, भगवदतिशयेच्छानधीनेच्छाविषयाणां तेषां भगवदतिशयेच्छानधीनायाः तस्याश्च निषेध इत्यवगम्यते।

एतेन नमश्शब्दस्य नारायणशब्देन व्याघातापातो निरस्तः। प्रार्थनाप्रति-पादकचतुर्थ्यन्तशब्दप्रामाण्यानुसारेण कैङ्कर्यस्य स्वगतातिशयत्वसिद्धावपि

चतुर्थ्यन्तशब्देन प्रवृत्तौ स्वातिशयेच्छाजन्यत्वस्य तादृशप्रवृत्तिमत्त्वस्य च सिद्धावपि भगवदतिशयेच्छानधीनेच्छाविषयस्वगतातिशयतदिच्छाजन्यप्रवृत्त्योः विशिष्टवेषेण निषेधसम्भवात्।

अत एव अनन्यार्थत्वानन्याधीनत्वनिषेधे नमश्शब्दवैयर्थ्यमिति दूषणमपिनात्रप्रसरति। स्वातिशयस्वप्रवृत्त्योः अकारनारायणशब्दाभ्यां लुप्तव्यक्तचतुर्थीभ्याञ्च अन्याधीनत्वान्यार्थत्वसिद्धिवत्, भगवदतिशयेच्छानधीनेच्छाविषयत्वनिषेधस्य भगवदतिशयेच्छाधीनेच्छाविषयत्वसिद्धावप्यलाभात्। भगवदतिशयेच्छाधीनेच्छाविषये भगवदतिशयेच्छानधीनेच्छाविषयत्वस्यापि कदाचित्तस्याविरोधेन सम्भवात्। भगवदतिशयेच्छाजन्यप्रवृत्तिविषयत्वेनोक्तस्यापि भगवदतिशयेच्छाधीनस्वातिशयेच्छाजन्यप्रवृत्तिविषत्वस्य च अविरोधेन सम्भवाच्च। भगवदतिशयस्वातिशयोभयविषयकेच्छाप्रवृत्त्योः युगपत्सम्भवाच्च। अत एव उकारवैयर्थ्यापातोऽपि दूरोत्सारितः।

यदपि व्युत्पत्तिविरोधोद्भावनम्, तदपि मन्दम्। अतोवच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिबाधेन सामान्यनिषेधशास्त्राणां विशेषविहितेतरविषयत्वस्य न्यायविद्भिः निर्णीततया प्रकृतापि [१]**योवेद सोऽश्नुते** [२]**आनन्दी भवति** [३]**यान् मूल्किनन्** [४]**एल्लैनिकल्न्दनन्** इत्यादि विशेषशास्त्रानुसारेण क्रियापदद्वयभकारचतुष्टयानुरोधेन लुप्तव्यक्तचतुर्थ्यन्ताभ्यां भगवदतिशयेच्छाजन्यप्रवृत्त्यर्हत्वतत्फलोपधान प्रार्थनामात्रप्रतिपादनेऽपि श्रुतानुषक्तनमश्शब्दाभ्यां स्वतइष्टस्वातिशयेच्छाजन्य प्रवृत्त्यर्हत्वतादृशप्रवृत्तिनिषेधप्रार्थनयोरेव प्रतिपादनस्य अकामेनाप्याश्रयणीयत्वात्।

**अथ मह्यं न** इत्यनुगृहीतरीत्या **न मे** इति चतुर्थ्यन्तनिर्देशं विहाय षष्ठ्यन्तनिर्देशस्य विवक्षितसम्बन्धनिषेधतात्पर्यग्राहकतया पूर्वं कण्ठतः अनुक्तस्य स्वरक्तत्वस्येव स्वत इष्टस्वातिशयेच्छा जन्यप्रवृत्त्यर्हत्वत्वत्प्रवृत्तिनिषेधप्रार्थनयोः श्रुतानुषक्तनमश्शब्दाभ्यां प्रतिपायितुमुचितत्वाच्च।

अत एव निर्हेतुकभगवत्कटाक्षलब्धदिव्यज्ञानैः श्रीपराङ्कुशमुनिदिव्यसूरिभिः द्वितीयशतके प्राप्यनिष्कर्षपरे नवमदशके [५]**एम्मावीट्टुत्तिरमुम् शेप्पम्**

---

१,२. तै.उ.आ.व.१ ३. तिरुवायिमोलि २-६-८
४. तत्रैव. ४-५-३ ५. तत्रैव २-९-१

इत्यस्मदिति विलक्षणमोक्षप्रसक्तिमपि न ब्रूमः इत्युपक्रम्य **तनक्केयाकवेनैक्कोल्लुमीदे** इति स्वेष्टतयैव अस्मदङ्गीकाररूपा **अथ सम्पत्स्ये** इत्यादिप्रसिद्धा अस्मत्सम्पदित्यनुगृहीतम्।

अत एव श्रुतिशतशिरस्सिद्धं स्वं पारार्थ्यमध्यापयन्त्या श्रीमत्या गोदादेव्या [१]**उनक्केनामाट्येय् वोम् मट्रैनम् कामङ्ग्ल् माट्रु** इति भवदिष्टार्थमैववयं शेषवृत्तिं कुर्मः। भवदिकाष्टत्वेनाज्ञातानि भवदतिशयेच्छानधीनास्मदिच्छाविषयभूतानि निवर्तय इति प्रबन्धतात्पर्यविषयस्य निष्कर्षावसरे अनुगृहीतमिति दिक्।

किञ्च भगवदतिशयविषयकस्वकीयेच्छानधीनस्वातिशयविषयक स्वकीयेच्छाधीनप्रवृत्त्यनर्हत्वमात्रं नमश्शब्दार्थः। वस्तुतः भगवदिच्छाविषयत्वरहितायाः **भगवत्प्रीतिर्भूयात्, तदर्थं मत्प्रीतिर्भूयात्** इतीच्छयाकृतायाः अपि प्रवृत्तेः आत्मस्वरूपानुगुणत्वापत्तेः। न चेष्टापत्तिः। **चितः परमचिल्लाभे प्रपत्तिरपि नोपथिः** इति प्रमाणबलेन वस्तुतः भगवदनिष्ठायाः भगवत्प्रीत्यर्थस्वप्रीतिहेतुशेषवृत्तिपर्यवनसायिन्याः प्रपत्तेः निष्फलत्वानिष्टावहत्वसिद्धान्तस्य भङ्गप्रसङ्गात्।

नापि भगवदिष्टत्वज्ञानानधीनस्वातिशयविषयकस्वकीयेच्छाधीनप्रवृत्त्यनर्हत्वमात्रं नमश्शब्दार्थः। भगवदिष्टत्वज्ञानपूर्वकं **भगवतो मम च भूयात्** इति प्रीतीच्छाया कृतायाः अपि शेषवृत्तेः आत्मस्वरूपानु गुणत्वापत्तेः। नचेष्टापत्तिः। [२]**(तनक्केयाकवेनैक्कोल्लुमीदे), तनक्कुम् नमक्कु माकवोण्णातु,** [३]**स्वस्यापि नार्हं ततः स्वस्य परस्य च नार्ह**मित्यादिसूक्तिबलेन तुल्यवत् स्वपराभिमतशेषवृत्तेः निष्फलत्वानिष्टावहत्वसिद्धान्तस्य भङ्गप्रसङ्गात्। चेतनस्य स्वर्गादिभोगार्थमित्याद्यभिमतज्योतिष्टोमादेरपि वात्सल्यातिशयेन जनन्यभिमतशिशुमृत्तिकाभक्षणवत् भगवदभिमतत्वेन तस्यापि स्वरूपानुरूपत्वप्रसङ्गाच्च।

नापि स्वतो भगवदिष्टत्वज्ञानभगवद्गतातिशयविषयकस्वकीयपरकीयेच्छोभयानधीस्वगतातिशयविषयकस्वकीयेच्छाधीनप्रवृत्त्यनर्हत्वं नमश्शब्दार्थः। भगवन्निकर्षावहस्वगतातिशयेच्छाधीनव्यापाराणां भगवद्गतातिशयविषयकस्वकीयेच्छाविषयाणां स्वतो भगवदिष्टत्वेन ज्ञातानां स्वरूपानुगुणत्वप्रसङ्गात्।

---

१. तिरुप्पावै २९ २. तिरुवायिमोलि २-९-४ ३. अष्टश्लोकी

नापि स्वतो भगवदिष्टत्वज्ञानभगवद्गतातिशयविषयकस्वकीयपरकीयेच्छोभव्यानधी स्वगतातिशयविषयकस्वकीयेच्छाधीन प्रवृत्त्यनर्हत्वं नमश्शब्दार्थः। भगवन्निकर्षावहस्वगतातिशयेच्छाधीनव्यापाराणां भगवद्गतातिशयविषयकस्वकीयेच्छाविषयाणां स्वतो भगवदिष्टत्वेन ज्ञातानां स्वरूपाननुगुणत्वप्रसङ्गात्। नचेष्टापत्तिः। [१]**तं पादेनाध्यारोहति** [२]**अङ्के भरतमारोप्य** इत्यादिप्रतिपन्नानां नित्यसूरिदिव्यदेहस्वपादविन्यास भगवदङ्कारोहणाधीनाननुष्ठानपराहतत्वप्रसङ्गात्। [३]**क्षोदीयानपि दुष्टबुद्धिरपि** इत्यादिरीत्या ज्ञानाधिकैः भगवतः स्तोत्रेप्यनर्हत्वस्य अनुगृहीतत्वेन **कल् वन् वैष्णेय् तोडुउण्ड कल्वा वेन्बन्** इति नित्यसूरिपरिषत्सेव्यविषये नवनीतचौर्यनिबन्धनसौशील्यानुसन्धानमतिनीचस्य ममायोग्यमिति भक्तिपरवशैः अनुगृहीतत्वेन च, पादस्पर्शाङ्कारोहाद्यननुष्ठानस्य कैमुतिकन्यायप्राप्तत्वात्।

अत एव [४]**अहं वेद्मि महात्मानम्** इत्युक्तरीत्या भगवत्प्रभावातिशयपरिज्ञानशालिनां विश्वामित्रादीनाम् [५]**इमौ स्म मुनिशार्दूल किङ्करौ समुपस्थितौ** [६]**शाधि किंङ्करवावते** इत्यादि प्रतिपन्नस्वामिकृतशेषवृत्तिस्वीकारोऽपि भज्येत। तत एव च [७]**संबाहुभ्यां नमति सम्पतत्रैर्द्यावा पृथिवी जनयन् देव एकः** इत्यादि प्रमाणासिद्धम्। जगत्कारणत्वेन सर्वस्मात्परस्य भगवतः स्वातन्त्र्यकृताऽप्रतिहतसङ्कल्पेन स्वाश्रितविषये दूत्यसारथ्यादिवत् कृतं बाहुभ्यां नमनमपि नोपपद्येत।

तस्मात् स्वतो भगवदिष्टत्वज्ञानेन भगवत्प्रीतीच्छाधीनेच्छाविषयत्वेन च स्वरूपत्वं सम्भवतीति न कोऽपिदोषः।

न च, तादृशस्वातिशयेच्छाधीनप्रवृत्तिमत्वस्य स्वरूपत्वे स्वामिप्रीत्युद्देशेन स्वनिकर्षावहव्यापारवत्त्वं सर्वलोकसिद्धं भज्येतेति वाच्यम्। स्वतो भगवत्प्रियत्वज्ञाननिरुपाधिकभगवत्प्रीतीच्छोभयाधीनोत्कर्षापकर्षसाधारण यत्किञ्चिदिच्छाधीनप्रवृत्तिमत्त्वमेव स्वरूपमिति लाभेन भगवदिष्टत्वज्ञानेन भगवत्प्रीतीच्छया च कृतस्य स्वनिकर्षावहव्यापारस्य अत्यन्तस्वरूपानुरूपत्वसम्भवात्। न च **अहमपि न मम** इत्यपि शब्दसूचितस्य –

---

१. कौषी.उ.१-४ २. रामा.यु.का.१३०-४१ ३. श्रीस्तवे.५ ४. रामा.बा.का.१९-१४
५. रामा.बा.का.३१-१४ ६. रामा.बा.का. ७. तै.उ.ना.व.१-३

**[1]चेतनस्य महयं स्वस्मिन् स्वीये च वस्तुनि।**
**मम इत्यक्षरद्वन्द्वं तदा मम्यस्य वाचकम्।।**

इत्याद्युपबृंहितस्य भगवद्भोगे स्वतो मदिष्टत्वलक्षणममकारस्यापि नमश्शब्देन निषेध्यतया तदलाभप्रसङ्ग इति शङ्कापि सम्भवति। स्वपरातिशयसाधारण्येन यत्किञ्चिदिच्छाजन्यप्रवृत्तेरेव निषेध्यतया स्वतइष्टभगवद्भोगार्थव्यापारस्य अनिषेध्यत्वालाभात्।

न च परगतातिशयाधानेच्छया उपादेयत्वस्यैव शेषशब्दप्रवृत्तिनिमित्तत्वेन भगवन्निकर्षावहभगवत्प्रीत्यर्थ व्यापारस्य कथं शेषवृत्तिरूपत्वम् ? येन तल्लाभाय भगवत्प्रीतीच्छानधीनयत्किञ्चिदिच्छाजन्यव्यापारस्य निषेध्यत्वमुच्यतेति वाच्यम्। स्वामिनिकर्षावहव्यापारस्य शेषवृत्तिरूपत्वाभावेऽपि स्वामिप्रियत्वेन प्रमाणसिद्धतया स्वरूपत्वलाभाय तादृशयत्किञ्चिदिच्छाधीनव्यापारस्य निषेध्यत्वविवक्षासम्भवात्। निषेध्यावाचिपदस्य चतुर्थ्यन्तत्वं विनाषष्ठ्यन्तबलादेव स्वतो भगवदिष्टत्वज्ञानाधीनत्वादिविशेषणविशिष्टवैवक्षिकानिषेध्यत्वलाभात्।

न च भगवन्निकर्षावहव्यापारस्य भगवदिष्टत्वज्ञानेनैव स्वरूपलाभेन तन्निषेधाप्रसक्त्या तदप्रतिषेधाय निषेध्यविशेषनिषेधस्य अप्रसक्तप्रतिषेधत्वापत्तिरिति वाच्यम्।

**[2]पतिं विश्वस्यात्मेश्वरम् [3]पतिं पतीनां परमं परस्तात् [4]स कारणं करणाधिपाधिपः [5]दासभूतास्स्वतस्सर्वे, स्वत्वमात्मनि सञ्जातम्** इत्यादि प्रसिद्धस्य परगतातिशयाधानेच्छया उपादेयत्वस्वरूपशेषत्वप्रतिसम्बन्धिनः चिदचिद्विषयकप्रवृत्तिहेतुभूतेच्छाविषयातिशयभाक्त्वयोग्यतारूपस्वामित्वस्यैव भगवद्गतस्य सर्वचेतनसाधारणतया ज्ञातस्य भगवदिष्टत्वेन ज्ञातेऽपि तन्निकर्षावहव्यापारे निषेध्यत्वप्रसङ्गकत्वात्। न केवलं **पतिं, विश्वस्य** इत्यादिप्रमाणान्तरमुक्तव्यापारे निषेध्यता प्रसञ्जकम्। अपि तु लुप्तचतुर्थ्यन्तेन भगवदतिशयाधानेच्छया उपादेयत्वलक्षणशेषवृत्तिप्रतीत्या व्यक्तचतुर्थ्यन्तेन भगवत्प्रीतिरूपातिशयेच्छया प्रवृत्तिमत्व-

१. अहि.सं.५२-२५ २. तै.उ.ना.व.१० ३. श्वेता.उ.६-७
४. श्वेता.उ.६-९ ५. रामा.यु.का.

प्रार्थनेन शेषवृत्तिप्रतीत्या च मूलमन्त्र एव प्रथमतृतीयपदद्वयं भगवन्निकर्षावहव्यापार-निषेधप्रसञ्जकमित्यनुसन्धेयम्।

यथेष्टविनियोगार्हशेषशब्देन कथ्यते इत्यत्र विनियोगशब्दस्य **परगतातिशयाधानेच्छया** इत्यादि सूक्त्यनुसारेण अतिशयाधानपरतया भगवन्निकर्षावहस्वातिशयावहव्यापारस्य भगवत्कर्षकस्य शेषत्वापलाप प्रसञ्जकत्वात्, तेन तदप्रसक्तिः नोक्ति सम्भवमर्हति। अत एव लुप्तव्यक्तचतुर्थ्यन्ताभ्यां यथेष्टविनियोगार्हत्वप्रतीत्या तदप्रसक्तिरित्यपास्तम्।

अत एव च स्वप्रीत्यर्थप्रवृत्त्यनर्हस्य मोक्षदशायां स्वप्रीत्यर्थप्रवृत्तिः न स्यादित्यपि दूरोत्सारितम्। स्वतो भगवदिष्टत्वज्ञाननिरूपाधिक भगवत्प्रीतीच्छोभयानधीनयत्किञ्चिद्व्यापारविषयकस्वकीयेच्छाधीनप्रवृत्त्यनर्हत्वस्य निषेध्यतया स्वतो भगवदिष्टत्वज्ञानस्वतो भगवद्गत प्रीतिविषयकस्वकीयोच्छोभयाधानयत्किञ्चिद्व्यापारेच्छाजन्यप्रवृत्तिमत्त्वस्य मोक्षदशायामपि सम्भवात्।

अत एव श्रीपराङ्कुशमुनिदिव्यसूरिभिः द्रमिडोप निषन्नवमशतकषष्ठदशके स्वविषयकव्यामोहातिशयकृतभगवदीयशेषवृत्तिप्रतिपादनपरे **आट्कोल्वानोत्तेन्नुयिरुण्डमायनाल्** इति शेषवृत्तिं स्वीकुर्वन्निव, स्वर्गगतभोगरूपातिशयाधानेच्छया उपादेयस्य यागस्य स्वर्गशेषत्ववत्, अस्मद्गतस्वकीयभोगरूपातिशयाधानेच्छया अस्मद्विषये प्रवर्तमानो भगवान् स्वस्य अस्मदपेक्षया शेषत्वमेव सम्पादितवानित्यनुगृहीतम्। तत्सूक्त्या भगवन्निकर्षावहजीवातिशयावहव्यापारस्य स्वतोभगवदिष्टत्वज्ञानस्वतो भगवत्प्रीतीच्छोभयाधीनव्यापारेच्छाजन्यप्रवृत्तेः भगवदभिमतत्वावगमात्।

अत एव च **एतत्सामगायन्नास्ते** इत्यादिना व्यक्तानुसन्धानप्रदर्शनावसरे [१]**अहमन्नमहमन्नम्** इत्यादावतिशयेन भगवद्भोग्यतां मुक्तस्वरूपे प्राधान्येन अभ्यासेन प्रदर्श्य अचिदपेक्षया जीवस्य भोग्यतातिशयलाभाय भगवत्स्वरूपगुणविभूत्यनुभवितृत्वलक्षणमधिकं भोग्यतातिशयोपपादकमादावतिशयेन अभ्यासेन प्रदर्शितम्। तस्मात् निरुक्तस्यैव वैवक्षिकस्वशेषत्वस्य नमश्शब्देन न प्रसज्यप्रतिषेधः सम्भवत्येवेति सिद्धम्।

---

१. तै.उ.भृ.व.

इदञ्चाधिकरणं पञ्चसूत्र्यात्मकम्। तत्र नमश्शब्दस्य अप्रसक्तप्रतिषेधत्वं वारयितुं तन्निषेधस्य स्वार्थत्वस्य प्रसक्तिं प्रदर्शयति प्रथमसूत्रेण –

**मू।। (११७) सू।। ईश्वरन् तनक्केयायिरुक्कुम्, अचित्तुपिरट्क्केयायिरुक्कुम्। आत्मा तनक्कुम् पिरर्क्कुम् पोतुवायिरुक्कुमेन्रु मुर्पट्टनिनैवु**

इति। (ईश्वरन् तनक्केयायिरुक्कुम्) निरुपाधिकचिदचिन्नियन्ता भगवान् स्वार्थमेव तिष्ठतीत्यर्थः। स्वार्थत्वं नाम स्वप्रीतीच्छाजन्यप्रवृत्तिविषयत्वम्। अवधारणेन स्वप्रीतीच्छानधीनस्वातिरिक्तातिशयेच्छाधीनप्रवृत्त्यर्हत्वं व्यावर्त्यन्ते। (आयिरुक्कुम्) इत्यनेन स्वातिरिक्ततत्प्रीतिविषयकस्वकीयेच्छाधीनस्वगतप्रीतिविषयकस्वकीये-च्छाधीनप्रवृत्त्यर्हत्वस्य सर्वकालावच्छेदेन तादृशप्रवृत्तिफलोपहिततयातदर्हत्वलक्षण-स्वभावस्य अप्रच्युतिः लभ्यते।

तत्र हेतुः (ईश्वरन्निति) स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिक इत्यर्थः। इदञ्च केवलस्वार्थत्वं कारणत्वरक्षकत्ववाचिना लुप्तचतुर्थ्यन्तेन अकारेणलभ्यत इति भावः। इदञ्च जीवस्य परार्थत्वे भगवतोऽपि परार्थत्वं स्यादिति शङ्कापरिहारार्थमुक्तम्।

(अचित्तुपिरर्क्केया यिरुक्कुम्) (पिरर्क्कु) इत्यनेन स्वातिशयेच्छाधीन-परगतातिशयविषयकपरकीयेच्छाजन्यप्रवत्त्यर्हत्वं विवक्षितम्। अवधारणेन स्वपर-गतातिशयविषयकस्वकीयेच्छाधीनप्रवृत्तिविषयत्वार्हत्वं व्यावर्त्यते। (आयिरुक्कुमिति) पूर्ववत्। अत्र हेतुः (अचित्तु) इति चैतन्याश्रयत्वाभावात् अचिद्वस्तुजीवेश्वर-स्वपरगतातिशयविषयकेच्छावत्त्वस्य स्वपरविषयकप्रयत्नाख्यप्रवृत्तिमत्त्वस्य चानर्हम्। इदञ्च अकारसमभिव्याहृतमकारेण व्याप्यव्याप्य न्यायेन अर्थसिद्धमिति भावः। इदञ्च जीवस्यस्वार्थत्वे अचितोऽपि स्वार्थत्वंस्यादिति शङ्कापरिहारार्थमुक्तम्।

(आत्मा तनक्कुम् पिरर्क्कुम् पोतुवायिरुक्कुम्) आत्मशब्दः [1]**परमात्मनो-र्योगः** इत्यादौ परमात्मशब्दसमभिव्याहृतात्मशब्दार्थजीवपरः। (तनक्कुम्) इत्यनेन परमात्मवत् स्वगतप्रीतिविषयकस्वकीयेच्छाजन्यस्वकीयप्रवृत्तिविषयत्वं विवक्षितम्। (पिरर्क्कुम्) इत्यनेन अचिद्वस्तुवत् स्वगतातिशयविषयकपरकीयेच्छानधीन-

१. विष्णु.पु.२-१४-२७

परगतातिशयविषयकपरकीयेच्छाजन्यपरकीयप्रवृत्तिविषयत्वं विवक्षितम्। (पोतु) इत्यनेन निरुक्तप्रवृत्तिद्वयविषयत्वरूपसम्बन्धद्वयसाधारण्यं विवक्षितम्। (आयिरुक्कुम्) इति पूर्ववत्। तत्र हेतुः (आत्मेति)। आत्मशब्देन समभिव्याहृतपरमात्मनः स्फुरणात् अचिच्छेषित्वं परमात्मशेषत्वञ्च गम्यते।

(एन्रुमुर्पट्टनिनैवु) इति पूर्ववाक्यरूपप्रणवजन्यप्रतीतिरित्यर्थः। इति शब्दः - केवलस्वार्थकत्वकेवलपरार्थकत्वस्वपरोभयार्थत्वपरः। अकारसमभिव्याहृतलुप्तचतुर्थ्या कारणत्वरक्षकत्वरूपभगवद्गुणज्ञानजनितभगवदतिशयविषयकस्वकीयेच्छाजन्यभगवद्विषयकप्रवृत्त्यर्हत्वमुखेन तादृशप्रवृत्तिमत्त्वव्यञ्जनात्, मकारेण ज्ञातृत्वभोक्तृत्वयोः कण्ठतः प्रतिपादनात्, नारायणशब्दसमभिव्याहृतव्यक्तचतुर्थ्या सर्वकल्याणगुणविशिष्टभगवद्विषयकप्रीतिप्रेरितस्वगतातिशयविषयकस्वकीयेच्छाजन्यप्रवृत्तिप्रार्थनाप्रतिपादनात्, तादृशप्रवृत्तिफलोपधानव्यञ्जनाच्च, जीवात्मनः उकारेण स्वार्थत्वनिषेधस्य विभक्तिद्वयमकारपञ्चकविरोधेन असम्भवात्। प्रणवेनजीवस्य स्वपरोभयार्थत्वं प्रतीतमिति भावः।

इत्थं जीवस्य स्वशेषत्वाप्रसक्तिः परिहृता। अथ प्रसक्तस्यापि तस्य प्रतिषेधासम्भवं परिहरति द्वितीयसूत्रेण -

**मू।।(११८) सू।। अङ्ङनन्रिक्के अचित्तैप्पोले तनक्केयाकवेनैक्कोल्लवेणुमेन्गिरतु नमस्साल्**

(अङ्ङनन्रिक्के) तत्प्रकारमात्रं विनेत्यर्थः। पूर्वोक्तोभयाकारमात्रं विनेति यावत्। मात्रशब्देन स्वार्थत्वपरार्थत्वोभयातिरिक्ताकारोप्यस्तीति सूच्यते। तृतीयाकारोऽपि पूर्वोक्तपरार्थत्ववदीश्वरव्यावृत्त इति दर्शयति (अचित्तै प्पोले) इति। प्रमाणस्मारणाय श्रीशठकोपमुनिदिव्यसूरिसूक्तिं स्वोक्तिरूपत्वेन दर्शयन् तृतीयाकारमाह (तनक्केयाक वेनैक्कोल्लवेणुमिति) स्वार्थमेवमामङ्गीकुरु इत्यर्थः।

स्वशब्देन (एनक्केयाकवेनैक्कोलत्तुम्) इति श्रीसूक्तौ शेषवृत्ति प्रतिसम्बन्धित्वेन अस्मच्छब्देन निर्दिष्टः, चित्तप्रवेशनिरन्तरावस्थानकर्तृत्वेनोपस्थितः (एनक्केकण्णनै) इति वक्ष्यमाणो भगवान् परामृश्यते।

(तनक्कु) इति षष्ठ्याभगवद्गतप्रीतिविषयकभगवदीयेच्छासाध्यत्वं विवक्षितम्। अवधारणेन जीवगतातिशयविषयकभगवदीयप्रीतीच्छानधीनत्वं भगवदीयेच्छानां लभ्यते। (आक) भवितुमित्यर्थः। **स्वसत्तायां स्पृहा यदि** इत्याद्युक्तः यावदात्मभाविभगवत्प्रियतमत्वलक्षण आत्मलाभ एव। (कोल्लवेण्णुम्) इति वक्ष्यमाणाङ्गीकारफलमित्यर्थः। (एन्नैक्कोल्लवेणुम्) अङ्गीकरिक्कवेणुम्। मदङ्गीकारश्च अस्माकं शेषवृत्त्युत्पादकः। (वेणुम्) **स्याम्** इत्यध्याहृत पदार्थः।

तनक्केयाकवेनैक्कोल्ल वेणुम् इत्यनेन **मः न स्याम् नारायणाय स्याम्** इति तुरीयवाक्यसहित तृतीयवाक्यार्थोऽनूदितः। ततश्च भगवद्गतप्रीतिविषयकभगवदीयेच्छानधीनस्वगतातिशयेच्छाधीनप्रवृत्त्यर्हत्वतत्फलोपधानयोः अभावरूपस्वार्थत्वाभावः, द्वितीयतुरीयवाक्यार्थः। स्वातिशयेच्छाधीनभगवत्प्रीतीच्छाधीनप्रवृत्तिफलोपधानरूपाचिद्वत्पारतन्त्र्यप्रार्थनं तदुभयवाक्यसहिततृतीयवाक्यार्थ इति निष्कर्षः। इयांस्तुविशेषः - निरुक्ते अचिद्वत्पारतन्त्र्येघटकीभूतास्वातिशयेच्छाभगवत्प्रीतीच्छा च अचिदंशे भगवन्मात्रगता। चिदं शेजीवेश्वरोभयगतेति। (एन्गिरतुं नमस्साल्) तथा च जीवेश्वरसाधारणस्वार्थत्वप्रसङ्गस्य उक्तिरूपेण प्रतिषेध उपपद्यत इति भावः।

न कैवलं स्वातिशयेच्छाधीनपरगतातिशयेच्छया उपादेयत्वमचिद्वत् पारतन्त्र्यम्। अपि तु परातिशयेच्छां विनापि परप्रीतीच्छया उपादेयत्वं तत्। अन्यथा परनिकर्षावहस्य स्वातिशयावहस्य परकीयव्यापारविषयत्वस्य प्रमाणसिद्धस्य भङ्गप्रसङ्गादित्याशयेन परानिष्टः परनिकर्षावहव्यापारनिषेधोऽपि अत्र विवक्षित इत्याह तृतीयसूत्रेण।

**मू।। (११९) सू।। अतावतु - भोगदशैयिल् ईश्वरनलिक्कुम्बोतुनोक्कवेणु-मेन्नलियातोलिकै**

इति। (अतावतु) तनक्केयाक वेनैक्कोल्लवेणुमेन्नैयाल् अतु (भोगदशैयिल्) स्वेष्टानुसारेण स्वप्रीतिसम्पादनलक्षणयथेष्टविनियोगदशायामित्यर्थः। (ईश्वरन्) स्वतन्त्र इत्यर्थः। अत्र परिकराङ्कुरोऽभिप्रेतः। (अलिक्कुम्बोतु) अत्र सामर्थ्यात् (शेषत्वत्तै) इत्यादिना पूरणीयम्। परातिशयावह स्वनिकर्षावहव्यापारनाशनवेलाया-

मिति यावत्। (नोक्कवेणुम्) शेषत्वत्तै सम्पादिक्कवेणुमित्यर्थः। (अलियातोलिकै) इति, इच्छायाम् ईश्वरभोगप्रतिषेधाभाव इत्यर्थः।

ईश्वरभोगप्रतिषेधाभावः - **नमस्साल्। तनक्केयाकवेनैक्कोल्लवेणुमेन्नैयावतु** इत्यन्वयः। भावान्तराभावन्यायेन तादृशप्रतिषेधाभावः। नमश्शब्दकरणकाचिद्वत् पारतन्त्र्यप्रार्थनाप्रतिपादनरूपोभवितुमर्हतीत्यर्थः। भगवदिष्टत्वेनज्ञातभगवन्निकर्षावह स्वातिशयावहप्रवृत्तिमत्वाभावरूपस्य भगवदनिष्टत्वेन ज्ञातभगवदतिशयावह स्वानिकर्षावहप्रवृत्तिमत्त्वस्य विरोधितया भगवत्प्रीतिमात्रोद्देश्यकभगवदुत्कर्षापकर्षावह साधारणस्वकीयप्रवृत्तिप्रार्थनायाः तन्मूलकाभिलाषस्य च तदलाभत्वोपपत्तेरिति भावः। इत्थं नमश्शब्दस्य भगवन्निकर्षावहव्यापारे भगवदिष्टत्वग्राहिप्रमाणविरोधः परिहृतः।

अथ भगवदिष्टत्वेन ज्ञातस्यापि भगवन्निकर्षावहव्यापारस्य प्रतिषेधे को हेतुः ? येन प्रसक्तस्य प्रतिषेधस्योपपादको नमश्शब्दः स्यादिति शङ्कायां तादृशप्रतिषेधप्रसंजकं दर्शयति चतुर्थसूत्रेण –

**मू।। (१२०) सू।। अलिक्कैक्कुहेतुकीले शोल्लिट्रु**

इति। पूर्वोक्त भगवद्भोगप्रतिषेध हेतुर्भगवदतिशयेच्छया उपादेयत्वरूपो लुप्तचतुर्थ्याप्रदर्शित इति भावः।

अथ व्यक्तचतुर्थ्यपि तत्प्रसञ्जकेत्याह पञ्चमसूत्रेण –

**मू।। (१२१) सू।। मेलुम् शोल्लुम्**

इति। तादृशभगवद्भोगप्रतिषेधहेतुः भगवदतिशयाधानेच्छया प्रवृत्तिफलोपधानप्रार्थना प्रतिपादिकया व्यक्तचतुर्थ्यापि प्रदर्शित इति भावः।

**।। इति शुद्धसत्त्वरामानुजाचार्यकृते रहस्यत्रयमीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयपादे अचित्पारतन्त्र्यसमर्थनं नाम पञ्चमाधिकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# प्रथमाध्याये तृतीयपादे
# षोढावैलक्षण्यं नाम
## षष्ठाधिकरणम्

### मू।। (१२२) सू ।। इन्निनैवु पिरन्दपोते कृतकृत्यन्

इत्थमधिकरणद्वयेन भगवतशेषत्वपर्यन्तं भगवच्छेषत्वमचिद्वत्पारतन्त्र्य-प्रतिपादकनमश्शब्दस्य व्यङ्ग्यार्थ इति स्थितम्। अथ भगवत्पर्यन्ताचिद्वत्पारतन्त्र्य-रूपमध्यमपदार्थनिष्ठायाः प्रथमतृतीयपदार्थ निष्ठायेक्षया षोढा वैलक्षण्यं समर्थ्यते।

तत्र संशयः, चितः, श्रुतनमश्शब्दार्थनिष्ठायाः पूर्वोत्तरपदार्थनिष्ठापेक्षया स्वीकरणं कृतकृत्यत्वसम्पादकत्वलक्षणं वैलक्षण्यं सम्भवति न वेति। तथा स्वाभावे सर्वदुष्कृतकारित्वसम्पादकत्वलक्षणवैलक्षण्यंसम्भवति न वेति तथा स्वसत्तायां सर्वसुकृतकारित्वरूपस्वसत्तालक्षण वैलक्षण्यं सम्भवति न वेति। तथा स्वसत्ताभावे यज्ञदानहोमप्रायश्चित्तनित्यनैमित्तिकनैष्फल्यापादकत्वलक्षणवैलक्षण्यं सम्भवति न वेति। तथा सर्वफलोत्पादकत्वलक्षणवैलक्षण्यं सम्भवति न वेति च।

### तत्र पूर्वपक्षः

न तावत् स्वसत्ताकाले कृतकृत्यत्वसम्पादकत्वलक्षणवैलक्षण्यसम्भवः। कृत्यशब्देन व्यापारसामान्यविवक्षायाम्, कृतकृत्यतासम्पादकत्वमित्यनेन तदयोगव्य-वच्छेदविवक्षायाञ्च प्रथमतृतीयपदार्थनिष्ठयोरपि तत्सत्वेन वैलक्षण्यासम्भवात्। अन्ययोगव्यवच्छेदविवक्षायां पूर्वोत्तरपदार्थनिष्ठारूपव्यापारान्तरसत्वेन तद्व्यवच्छेदा-सम्भवात्।

कृत्यपदेन - दृष्टद्वारकफलसाधनविवक्षायां तदयोगव्यवच्छेदविवक्षायां पूर्वोत्तर-पदार्थनिष्ठारूपव्यापारन्तरसत्वेन तद्व्यवच्छेदासम्भवात्। तदन्ययोग-व्यवच्छेदविवक्षायाम्, अदृष्टद्वारकफलसाधनत्वानुष्ठानानर्हत्वलक्षणनमश्शब्दार्थैक-

देशनिष्ठायाः तादृशसाधनान्तरयोगव्यवच्छेदकत्वेऽपि कात्स्न्र्येन तदसम्भवात्। अन्यथा प्रथमतृतीयपदार्थनिष्ठयोरपि साधनान्तरयोगव्यवच्छेदकत्वापत्तेः।

कृतपदेन व्याजत्वविवक्षायां मोक्षोद्देशेन अनुष्ठीयमानत्वे सति मोक्षं प्रति नियतपूर्ववर्तित्वस्यैव व्याजशब्दार्थत्वेन, तादृशयोः प्रथमतृतीयपदार्थनिष्ठयोः अतिप्रसङ्गात्। अत एव व्याजान्ययोगव्यवच्छेदविवक्षायाः असम्भवाच्च। अव्यथा कर्मज्ञानभक्तिप्रपत्तीनां चतसृणामपि व्याजत्वसिद्धान्त विरोधात्।

अत एव स्वकाल एव कृतकृत्यतापादकत्वमपि अयुक्तम्। कालान्तरीय-कर्मयोगज्ञानयोगानामपि कर्तव्यत्वेन मध्यमपदार्थनिष्ठायाः स्वकाल एव कृतकृत्यता सम्पादकत्वासम्भवात्। मध्यमपदार्थनिष्ठामात्रस्य स्वकाल एव कृतकृत्यता सम्पादकत्वसम्भवेन भागवतपर्यन्तत्वविवक्षायाः वैफल्याच्च।

स्वाभावे सर्वदुष्कृतकारित्वसम्पादकत्वात्मकद्वितीयवैलक्षण्यमपि अयुक्तम्। नमश्शब्दार्थ निष्ठारहितस्य सर्वदुष्कृतकारित्वे त्रिवर्गार्थिनां तत्तत्साधनानुष्ठानेन त्रिवर्गलाभप्रतिपादकशास्त्रवैयर्थ्यापत्तेः। उत्तमसुकृताभावमात्रे एकस्यापि दुष्कृतस्य सामग्र्यभावेन उक्त्यसम्भवः।

**उत्तरग्रन्थालाभाद्विरतम्।**

❀ ❀ ❀ ❀

श्रीमते रामानुजाय नमः

श्रीलोकगुरवे नमः

# प्रमेयशेखरः

निर्हेतुकभगवत्कटाक्षेणाज्ञातसुकृतं भवति। नन्दवद्वेषो भवति। तदुत्पत्त्यनन्तरं भगवद्भागवतविषयेष्वाभिमुख्यं जायते। तदनु त्याज्योपादेय विभागज्ञाने कौतुकं भवति। तेन सात्विकसम्भाषणं भवति। तेन सदचार्यासमाश्रयणं भवति। तदनु त्याज्योपादेयविनिश्चयो भवति। तदनु प्राप्यान्तरे वैराग्यं परमप्राप्येऽभिनिवेशश्च भवति। तदनुप्राप्यान्तरनिवृत्तेः परमप्राप्यसिद्धेश्च मूलभूतसिद्धोपायस्वीकारो भवति। तदनु भगवत्प्राप्तौ त्वराजायते। तदनु **अहं स्मरामी**त्युक्तप्रकारेणेश्वरस्मृतिविषयो भवति। तदनु भूतसूक्ष्मशरीरपरिष्वङ्गो भवति। तदनु परमात्मसंसर्गो भवति। तदनु हार्दानुग्रहेण मार्गविशेषप्रकाशो भवति। तदनु हृदयगुहानिर्गमनं भवति। तदनु मूर्धन्यनाडीनिष्क्रमणं भवति। तदन्वर्चिरादिमार्गगमनं भवति। तदन्वातिवाहिकसत्कारो भवति। तदन्वावरणातिक्रमणं भवति। तदनु प्रकृत्यतिलङ्घनं भवति। तदनु विरजास्नानं भवति। तदनु सूक्ष्मशरीरविश्लेषो भवति। तदन्वपहतपाप्मत्वादिगुणगणप्रादुर्भावो भवति। तदन्वमानवकरस्पर्शो भवति। तदनुभगवत्सङ्कल्पकल्पितदिव्यदेहप्राप्तिर्भवति। तदन्वकालकाल्यदिव्यदेशप्राप्तिर्भवति। तदन्वैरम्मदीयसरस्स्नानं भवति। तदनु दिव्यालङ्कारो भवति। तदनु दिव्यविमानारोहणं भवति। तदनुतिल्याकां तारप्रवेशो भवति। तदनु दिव्याप्सरस्सत्कारो भवति। तदनु तिल्यगन्धप्रवेशो भवति। तदनु ब्रह्मगन्धप्रवेशो भवति। तदन्वप्राकृतगोपुरप्राप्तिर्भवति। तदनु दिव्यनगरप्राप्तिर्भवति। तदनु सूरिपरिषत्प्रत्युद्गमनं भवति। तदनु राजमार्गगमनं भवति। तदनु ब्रह्मतेजः प्रवेशो भवति। तदनु दिव्यगोपुरप्राप्तिर्भवति। तदनु ब्रह्मवेश्मप्रवेशो भवति। तदनु दिव्यमण्डपप्राप्तिर्भवति। तदनु दिव्यपरिषत्प्राप्तिर्भवति। तदनु तपत्नीकसर्वेश्वरदर्शनं भवति। तदनु स्तुतिप्रणामाञ्जलिप्रमुखससम्भ्रमानुवर्तनम्भवति। तदनु परमात्मसमीपप्राप्तिर्भवति। तदनु पादपीठपर्यङ्कारोहणं भवति। तदनु

भगवदुत्सङ्गसङ्गो भवति। तदन्वालोकनालापाद्यनुभवो भवति। तदन्वालिङ्गनाद्यनुभवो भवति।

तदनु स्वरूपरूपगुणविग्रहाद्यनुभवो भवति। तदन्वनुभवजनितप्रीतिप्रकर्षो भवति। तदनु नानाविधविग्रहपरिग्रहो भवति। तदनु सर्वदेशसर्वकालसर्वावस्थोचितसर्वप्रकारकैङ्कर्यप्राप्तिर्भवति।

**।। इति प्रमेयशेखरः समाप्तः ।।**

**।। श्रीलोकगुरुचरणौ शरणम् ।।**

श्रीमते रामानुजाय नमः

श्रीलोकगुरवे नमः

# प्रपन्नपरित्राणम्

मुमुक्षोर्मोक्षार्थं सर्वेश्वरमाश्रितस्यानन्यगतित्वाकिञ्चन्येऽपेक्षिते। अनन्यगतित्वं नाम निवर्तयदुःखं मा वानिवर्तकान्तरशून्योऽहम् इति प्रकारेण सर्वेश्वरं विनाऽन्यः कश्चन रक्षको नास्तीति स्थितिः।

भ्रातृ, पुत्र माता, पितृ, ब्रह्म, रुद्रादयो रक्षका न भवन्ति। किमितिचेदुच्यते। भ्रातरो रक्षका न भवन्तीति वालिविषये रावणविषये च द्रष्टव्यम्। पुत्राः, रक्षकाः न भवन्तीति रुद्रविषये, कंसविषये,च द्रष्टव्यम्। मातापितरौ रक्षकौ न भवतः इति कैकेयिविषये, हिरण्यविषये च द्रष्टव्यम्।

मातापितृभ्यां यौवनविरोधीत्युपेक्षणं, क्षामकाले मनुष्यं दृष्ट्वा गुल्मे स्थापनं, मूल्यमुक्त्वा विक्रयणं, विपदागमेऽनादर्तुं चिन्तनं, अर्थक्षेत्राद्यर्थं हिंसनं, मरणावस्थायाम् **अज्ञानेन द्रव्यं निक्षिप्तं चेत् वद वदेति परितः स्थित्वा** इत्युक्त प्रकारेणेश्वरं स्मृत्वा तीरं यथा न प्राप्नुयात् तथा व्याकुलीकरणं मारणामित्यादीनि क्रियन्ते। स्त्रीणां भर्तारो रक्षका न भवतीति धर्मपुत्रादिविषये नलविषये च द्रष्टव्यम्।

एतेषां रक्षकत्वाभावेपि लोकानां दृष्टिप्रदौ चन्द्रादित्यौ किमिति रक्षकौ न भवत इति चेदुच्यते। तौ चेश्वराज्ञाभीत्या स्वेच्छासञ्चारमप्राप्य धटिकाभागङ्कृत्वा नियमेनोदयास्तमयौ प्राप्य हिरण्यरावणादिहस्तगतौ तेषां नीचवृत्तीः कुर्वन्तौ सञ्चरन्तौ कौ चिदाविति रक्षकौ न भवतः।

लोकत्रयपालकश्चेन्द्रः कदाचिदस्मत्पदच्युतिर्भवतीति भीतः शापोपाहतो ब्रह्महत्ययाभिभूत इन्द्रजिद्धस्तगतो महाबलिप्रभृतिभिः अपहतैश्वर्यः स्रवदश्रुनेत्रो नम्रशिराः सञ्चरतीति रक्षको न भवति।

ब्रह्मा च मधुकैटभाभ्यां क्लेशं प्रापितोऽपहतवेदो नेत्रभ्रष्टो धनभ्रष्ट इति भूमिमुल्लिखन् रुद्रहस्तेन छिन्नशिरा इति न रक्षकः।

रुद्रश्च सकलप्राणि संहारैकवृत्तिकः पिपासया परिश्रान्तानां मुखेषु हुताशनक्षेपक इवाति क्रूररूपः स्वाश्रितान् छित्वा देहि दग्ध्वा देहीति क्रूरदास्यं कारयिता स्वाश्रितं बाणासुरं मस्तककुसुमम्लानियैथा न स्यात् तथा रक्षेयमिति प्रतिज्ञां कृत्वा स्वस्मा अञ्जलिं कृतवतां कराणामर्कवनछेदनमिवच्छेदनं दृष्ट्वा प्राणस्थितौ लवणवाणिज्येन जीवाम इति मुखनयनमाच्छाद्य गतवान् लोकगुरोः स्स्वपितुः ब्रह्मणो मस्तकं छित्वा पातकी सन् स्वाधिकृते ग्रामे स्वयमुपद्रवं कृत्वा प्राप्तशृङ्खलास्सञ्चरन्त इव सकपालहस्तः प्रत्यनावृतद्वारं प्रविश्य स्वम्प्रकाशयन् सञ्चरितवांश्चेति न रक्षको भवति।

अथार्थो रक्षको भवेत्किमिति निरूपणे, तस्करापहार्यत्वात् कामापहार्यत्वात् व्याध्यपहार्यत्वात् ज्ञात्यपहार्यत्वात् परैर्विरुध्य विषभक्षणं कृत्वा स्वेनैव मरणेहेतुत्वाच्च रक्षको न भवति।

ईश्वरस्तु मातापितृभ्यां त्यक्तदशायामपि **पश्चात्स्थित्वा दासस्यबन्धुस्सन् वर्धयित्वा** इत्युक्तप्रकारेण स्वस्वरूपं विहाय रूपान्तरमङ्गीकृत्य मातृमुखं दर्शयित्वा मृदुवचनानि वदन् भ्रातृणां भर्तॄणां चोदासीनदशायां स्ययमेवाभिमत्य कण्ठेपत्रिकां बद्धा दौत्यङ्कृत्वा भ्रूविक्षेपस्थले रथं सञ्चार्य वक्षसि बाणमारोप्य मृतान् जीवयित्वा नारायणत्वप्रयुक्तसम्बन्धेनोदरचापल्येनान्तः स्थित्वा सत्तां रक्षन् स्थित इत्ययमेवसर्वेषां रक्षको भवति।

अथाकिञ्चन्यं नाम, कर्मज्ञानभक्तिषु तद्धेतुभूतात्मगुणेषुचान्वयं विना तद्विपरीतैः परिपूर्णतयावस्थितिं स्वस्वरूपस्य सर्वप्रकारेण नारायणस्यात्यन्तपरतन्त्रतया स्थितिञ्चानुसन्धायास्मत्कार्यस्य वयं प्राप्ता न भवाम इति स्थितिः।

एतदुभयवतो नारायणमेवोपायोपेयत्वेनश्रयणान्निर्भवतयास्थितस्य शरीरावसानकाले प्राप्तिसमये नयामीत्युक्तप्रकारेण सर्वेश्वरस्स्वयमेव स्वामीसन्नागत्यार्चिरादिमार्गेण परमपदं नीत्वा नित्यमुक्तैरेकपङ्क्तौ स्थापयित्वा नित्यकैङ्कर्यं दत्वा दयां कुर्यात्।

**।। इति प्रपन्नपरित्राणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

श्रीलोकगुरवे नमः

# नवरत्नमाला

शरणागतः स्वात्मानं स्वविरोधिनं देहं देहप्रयुक्तबन्धून् संसारिणो देवतान्तराणि श्रीवैष्णवानाचार्यं श्रीमहालक्ष्मीं सर्वेश्वरं च कथं चिन्तयेदिति चेदुच्यते। देहाद्व्यावृत्तो नित्य एकस्वरूपोणुर्ज्ञानानन्दस्वरूपो ज्ञानानन्दाश्रयस्सर्वेश्वरं विनाऽन्यत्किञ्चित्स्मर्तुं वक्तुमशक्तस्तस्यैवोपयुक्तस्स्वकार्येऽनधिकृतस्तत्फलश्चेति स्वात्मानं चिन्तयेत्। स्वयाथात्म्यज्ञानप्रतिबन्धको विपरीतज्ञानजनकश्चतुर्विंशतितत्व-समुदायात्मकोऽनित्यस्सदापरिणामशीलः कदाचिदपि ज्ञानानाश्रयोऽनन्तदुःखजनक-श्शब्दादिविषयेषु प्रवेश्य नाशकश्चेति स्वदेहं चिन्तयेत्। आत्मपरमात्मनोर्ज्ञानं भगवद्विषये रुचिं त्वरां च नाशयित्वा देहात्माभिमानमहङ्कारममकारौ कामक्रोधादींश्च जनयित्वा पापमूलतयाऽऽगत्यानर्थं कुर्युरिति देहप्रयुक्तबन्धूंश्चिन्तयेत्। भगवदनुभव-कैङ्कर्यविरोधिनस्संसारवर्धका इति संसारिणश्चिन्तयेत्।

अज्ञा अशक्तास्सर्वेश्वरादुत्पन्नास्तद्दत्तपदा अपि तेन सह विरुध्य दुर्मानिनः सर्वाधिकम्मन्या लौकिकान्भ्रामयित्वाऽनर्थकराश्च केचिदिति देवतान्तराणि चिन्तयेत्। भगवज्ज्ञानस्येतरविषयवैराग्यस्य भगवद्भक्तेश्च वर्धकाश्शेषिणस्सहाय-भूता प्राप्यस्य सीमाभूमयश्चेति श्रीवैष्णवाश्चिन्तयेत्। स्वकटाक्षेण मां परिशोध्य सर्वेश्वरस्वीकारार्हं कृत्वा तच्चरणयोस्सङ्गमय्याज्ञातज्ञापकः स्वामी तदेव दास्यं स्वीकर्ता महोपकारकश्चेति स्वाचार्यं चिन्तयेत्। अस्मदपराधानीश्वरस्वातन्त्र्यं च नाशयित्वा तत्कारुण्यवात्सल्यादिगुणानुद्बोध्यास्मत्पुरुषकारभूता माता स्वामिनी प्राप्या चेति महालक्ष्मीं चिन्तयेत्।

सृष्टिकाले शरीरमिन्द्रियाणि च दत्वाऽन्तर्यामिरूपेण सत्तां रक्षित्वाऽद्वेषाभि-मुख्यसत्सङ्गतिप्रभृत्यात्मगुणानुत्पादयित्वा सदाचार्येण सङ्गमय्यास्मत्सर्वापराधान्म-र्षयित्वा संसारसम्बन्धंनिवर्त्यार्चिरादिमार्गं परमपदं गुणानुभवं च दत्वा यावदात्मभावि नित्यकैङ्कर्यस्वीकर्ता स्वमी चेति सर्वेश्वरं चिन्तयेत्।

**।। इति नवरत्नमाला समाप्ता ।।**

श्रीमते रामानुजाय नमः

श्रीलोकगुरवे नमः

# अष्टश्लोकी

**- पराशरभट्टार्यः**

**श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।**
**श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेस्तुश्रूयसे ।।**

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृत्
मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम्।
उकारोऽनन्यार्हं नियमयति सम्बन्धमनयोस्त्रयी
सारस्त्र्यात्मा प्रणव इममर्थं समदिशत्।। १ ।।

मन्त्रब्रह्मणि मध्यमेन नमसा पुंसस्वरूपं गतिः
गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः।
स्वातन्त्र्यं निजरक्षणं समुचितावृत्तिश्च नान्योचिता
तस्यैवेति हरेर्विविच्यकथितं स्वस्यापि नार्हततः।। २।।

अकारार्थायैव स्वमहमथ मह्यं न निवहा
नाराणां नित्यानामयनमिति नारायणपदम्।
यमाहास्मै कालं सकलमपि सर्वत्र सकलासु
अवस्था स्वाविस्युर्मम सहजकैङ्कर्यविधयः।। ३।।

देहासक्तात्मबुद्धिर्यदि भवति पदं साधुविद्यात्तृत्तीयं
स्वातन्त्र्यान्धो यदि स्यात्प्रथममितरशेषत्वधीश्चेद्द्वितीयम्।
आत्मत्राणोन्मुखश्चेन्नम इति च पदं बान्धवाभासलोलः
श्शब्दं नारायणाख्यं विषयचपलधीश्चेच्चतुर्थीं प्रपन्नः।। ४।।

नेतृत्वं नित्ययोगं समुचितगुणजातं तनुख्यापनं
चोपायङ्कर्तव्यभागं त्वथ मिथुनपरं प्राप्यमेवं प्रसिद्धम्।
स्वामित्वम्प्रार्थनां च प्रबलतर विरोधि प्रहाणां दशैतान्
मन्तारन्त्रायतेचेदधिगतनिगमष्षट्पदोयं द्विखण्डः।। ५।।

ईशानां जगतामधीशदयितां नित्यानपायांश्रियं
संश्रित्याश्रयणोचिताखिलगुणस्यांघ्री हरेराश्रये।
इष्टोपायतया श्रिया च सहितायात्मेश्वरायार्थये, कर्तुं
दास्यमशेषमप्रतिहतं नित्यन्त्वहं निर्ममः।। ६।।

मत्प्राप्त्यर्थतया मयोक्तमखिलं संत्यज्यधर्मं पुनः
मामेकं मदवाप्तये शरणमित्यार्तोऽवसायंकुरु।
त्वामेवं व्यवसाययुक्तमखिलज्ञानादिपूर्णोह्यहं
मत्प्राप्तिप्रतिम्बधकैर्विरहितं कुर्यां शुचं मा कृथाः।। ७।।

निश्चित्य त्वदधीनताम्मयि सदा कर्माद्युपायान् हरे
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः।
एतज्ज्ञानमुपेयुषो ममपुनस्सर्वापराधक्षयं
कर्तासीति दृढोस्मि ते तु चरमं वार्यं स्मरन् सारथे।। ८।।

**।। इति अष्टश्लोकी समाप्ता।।**

**।। श्रीपराशरभट्टार्यां चरणौ शरणम्।।**

❁ ❁ ❁ ❁

श्रीमते रामानुजाय नमः

श्रीलोकगुरवे नमः

# अर्थपञ्चकम्

**लोकाचार्याय गुरवे कृष्णपादस्य सूनवे।**
**संसारभोगिसंदष्टजीवजीवातवे नमः।।**

**लोकगुरुं गुरुभिस्सहपूर्वैः कूरकुलोत्तमदासमुदारम् ।**
**श्रीनगपत्यभिरामवरेशौ दीप्रशयानगुरुं च भजेऽहम्।।**

१. संसारिणश्चेतनस्य तत्वज्ञानमुत्पद्योज्जीवनसमयेऽर्थपञ्चकज्ञानोत्पत्तिरावश्यकी। अर्थपञ्चकज्ञानं नाम, स्वस्वरूपपरस्वरूपपुरुषार्थस्वरूपोपायस्वरूपविरोधिस्वरूपाणां याथात्म्यज्ञानम्।

२. एतेष्वेकैको विषयः पञ्चधा भवति।

३. स्वस्वरूपमित्यात्मस्वरूपमुच्यते।

४. तच्चात्मस्वरूपं, नित्य मुक्त बद्ध केवल मुमुक्षु भेदात्पञ्चविधम्।

५. परस्वरूपं, परव्यूहविभवान्तर्याम्यर्चावतारभेदात्पञ्चविधम्।

६. पुरुषेणार्थनीयः पुरुषार्थः।

७. स च धर्मार्थकामात्मानुभवभगवदनुभवभेदात्पञ्चविधः।

८. उपायश्च कर्मज्ञानभक्तिप्रपत्याचार्याभिमानभेदात्पञ्चविधः।

९. विरोधी च स्वरूपविरोधी परत्वविरोधी पुरुषार्थविरोध्युपायविरोधी प्राप्तिविरोधी चेति पञ्चविधः।

१०. तत्र नित्याः, सदा संसारसम्बन्धरूपावद्यरहिता भगवदानुकूल्यैकभोगाः श्रीवैकुण्ठनाथस्य पट्टबन्धनस्योचिता मन्त्रिण ईश्वरनियोगात्सृष्टिस्थितिसंहारान्कर्तुं शक्ताः परव्यूहादिसर्वावस्थास्वप्यनुसृत्यकैङ्कर्यकरणशीलाः विष्वक्सेनप्रभृतयोऽमराः।

११. मुक्ता नाम, भगवत्प्रसादेन निवृत्तप्रकृतिसम्बन्धप्रयुक्तक्लेशमला भगवत्स्वरूपरूपगुणविभवाननुभूयानुभवजनितप्रीतेरुत्कूलत्वाद्वाचा यथापर्याप्ति स्तुत्वा तृप्तिं विना वैकुण्ठमहानगरे वर्तमानाः सन्तोषानन्दयुक्ता मुनयः।

१२. बद्धा नाम, पाञ्चभौतिको नित्यसुखदुःखानुभवपरिकर आत्मविश्लेषे दर्शनस्पर्शनायोग्योऽशुध्यास्पदोऽज्ञानान्यथाज्ञानविपरीतज्ञानजनको देह एवात्मेति शब्दादिविषयानुभवजनितस्वदेहपोषणमेव पुरुषार्थ इति शब्दादिविषयलाभौपयिकतया वर्णाश्रमधर्मान् विनाऽसेव्यसेवां कृत्वा भूतहिंसां कृत्वा परदारपरद्रव्यापहारं कृत्वा संसारवर्धका भगवद्विमुखाश्चेतनाः।

१३. केवलो नाम, यथा, एकाकि अत्यन्तक्षुत्पिपासाभ्यां पीडितो भक्ष्याभक्ष्यविवेकं कर्तुमशक्तः स्वदेहं स्वयमेव भक्षित्वा प्रसन्नो भवति तथा संसारदावाग्निना तप्तस्सन् संसारदुःखनिवृत्यर्थं शास्त्रजन्यज्ञानेन प्रकृत्यात्मविवेकं कृत्वा प्रकृतेर्दुखाश्रयत्वहेयपदार्थसमूहत्वरूपाकारानात्मनः प्रकृतेः परत्वपञ्चविंशकत्वस्वयंप्रकाशत्त्वस्वतस्सुखित्वनित्यत्वाप्राकृतत्वरूपाकारांश्चानुसन्धाय पूर्वं स्वेनानुभूतदुःखाधिक्येनैतदल्परसप्रसक्तो ज्ञानानन्दमयपरमात्मविवेकं कर्तुमशक्तोऽमृतसागरान्तर्मग्नतानामोत्कर्षं त्यक्त्वा एतदात्मप्राप्तिसाधनभूतज्ञानयोगनिष्ठो योगफलमात्मानुभवमात्रमेव पुरुषार्थत्वेनानुभूय पश्चात्संसारसम्बन्धभगवत्प्राप्तिरहितो यावदात्मभाव्यशरीरी सञ्चरन् कश्चित्।

१४. मोक्षेच्छूनां मुमुक्षव इति नाम, एते च मुमुक्षव उपासका मुमुक्षवः प्रपन्नाश्चेति द्विविधाः। ईश्वरविषये परत्वं नाम, परमपदे **अवाक्यनादर** इति वर्तमान आदिज्योतिरूपः परवासुदेवः. व्यूहो नाम, सृष्टिस्थिति संहारकर्तारः सङ्कर्षणप्रद्युम्नानिरुद्धाः।

१५. विभवो नाम, रामकृष्णाद्यवताराः।

१६. अन्तर्यामित्वमुभयविधम्।

१७. **दासस्यान्तर्वर्तमान** इति **ममात्मा** इति **मम प्राणा** इति चोक्तप्रकारेणात्मनोऽन्तः, **विकसत्कमलमदहृदये प्रविश्य** इति **कमलवासिनी स्वयं चागत्य प्रविश्य** इति **अन्तः प्रविश्य स्वस्मिन्ना दरवर्धकः सुन्दर** इति **विचारवतां**

**विचारंसर्वं सहस्थित्वा जानासीति** चोक्तप्रकारेण लक्ष्मीसहितो विलक्षण विग्रहयुक्तो हृदयकमले सकलप्रवृत्तिनिवृत्तीः सदाऽवलोकयन् वर्तमानः।

१८. अर्चावतारो नाम, **दासानां यदभिमतं तद्रूपवान् दासाभिमतं यन्नाम तन्नामवान्** इत्युक्तप्रकारेण स्वार्थरूपनामरहित आश्रिताभिमतरूपस्तत्कृतनामा सर्वज्ञोऽप्यज्ञ इव सर्वशक्तिरप्यशक्तइवावाप्तसर्वकामोऽपि सापेक्ष इव रक्षकोऽपि रक्ष्य इव स्वस्वामिभावं विपरीतं कृत्वा नेत्रविषयतया सर्वसुलभ आलयेषु गृहेषु च वर्तमानः।

१९. पुरुषार्थेषु धर्मो नाम, प्राणिरक्षणौपयिकतया क्रियमाणवृत्तिविशेषः। अर्थो नाम, वर्णाश्रमानुरूपं धनधान्ये सङ्गृह्य देवताविषयेषु पित्र्येषु कर्मसु प्राणिविषयेषु चोत्कृष्टदेशकालपात्राणि ज्ञात्वा धर्मबुद्ध्या व्ययीकरणम्। कामो नाम, ऐहलौकिकः पारलौकिकश्चेति द्विविधः।

२०. तत्रैहलौकिकः, पितृमातृरत्नधनधान्यान्नपानीयदारपुत्रमित्रपशुगृहक्षेत्र चन्दनकुसुम-ताम्बूलवस्त्रादिपदार्थेषु शब्दादिविषयानुभवप्रयुक्तसुखविशेषः।

२१. पारलौकिको नाम, तद्विलक्षणेषु तेजोरूपेषु स्वर्गादिलोकेषु गत्वाक्षुत्पिपासा शोकमोहजरामरणादिकं विना आर्जितपुण्यानुरूपममृतपानं कृत्वाऽप्सरोभिः सह शब्दादिविषयानुभवकरणम्।

२२. आत्मानुभवो नाम, दुःखनिवृत्तिरूपं केवलात्मानुभवमात्रं च मोक्ष इति वदन्ति।

२३. अथ भगवदनुभवरूपपरमपुरुषार्थलक्षणमोक्षो नाम, प्रारब्धकर्मविशेषाणा-मवश्यानुभाव्यानां पुण्यपापानां नाशे, **अस्ति जायते परिणमते विवर्धतेऽपक्षीयते विनश्यती**त्युक्तप्रकारेण षड्भावविकारास्पदं तापत्रयाश्रयं भगवत्स्वरूपमावृत्य विपरीतज्ञानोत्पादकं संसारवर्धकं स्थूलशरीरमुपेक्षया त्यक्त्वा सुषुम्नानाड्या शिरः कपालं भित्वा निर्गत्य सूक्ष्मशरीरेण वैकुण्ठं गन्तुम्मार्गं प्राप्योष्णकिरणमण्डलान्तर्गत्वा सूक्ष्मशरीरं वासनारेणुं च विरजास्नानेन दूरीकृत्य सकलतापनिवर्तकामानवकरस्पर्शं च प्राप्य, शुद्धसत्वात्मकं पञ्चोपनिषणमयं ज्ञानानन्द जनकं भगवदनुभवैकपरिकरं तेजोमयमप्राकृतविग्रहं लब्ध्वा **किरीटयुक्तेष्वमरेषु प्रत्युद्गच्छत्सु, श्रीमहामणि-मण्डपं प्राप्य लक्ष्मीसहितं भूमिनीलानायकं, देवसमूहेषु सेवत्सु ज्योतिप्रवाह**

**आविर्भवद्रूपं** श्रीवैकुण्ठनाथं नित्यमनुभूय नित्यकैङ्कर्यस्वभावविशिष्टतया स्थितिः।

२४. उपायेषु कर्मयोगो नाम, यज्ञ दान तपो ध्यान सन्ध्यावन्दन पञ्चमहायज्ञाद्यग्निहोत्र तीर्थयात्रा पुण्यक्षेत्रवास कृच्छ्र चान्द्रायण पुण्यनदीस्नान व्रत चातुर्मास्य फलमूलाशन शास्त्राभ्यास भगवत्समाराधन जपतर्पणादि कर्मानुष्टान प्रयुक्त कायशोषणेन पापनाशोत्पत्तौ, तत इन्द्रियद्वारा प्रसरतो धर्मभूतज्ञानस्य शब्दादीनामविषयत्वेन विषयापेक्षायां यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिरूपाष्टाङ्गयोगक्रमेण योगाभ्यासकालपर्यन्तं ज्ञानस्यात्मानं विषयताकरणम्।

२५. अयं च ज्ञानयोगस्य सहकारि ऐश्वर्यस्य प्रधानसाधनं च भवति। ज्ञानयोगो नाम, एवं योगजन्यज्ञानस्य हृदयमण्डलादित्यमण्डलप्रभृति स्थूलविशेषेषु वर्तमानं सर्वेश्वरं विषयं कृत्वा तं विषयं शङ्खचक्रगदाधरं पीताम्बरकिरीटनूपुरादिदिव्यभूषणालङ्कृतं लक्ष्मीसहितं चानुभूययोगाभ्यासक्रमेणानुभवकालं वर्धयित्वाऽनवरतभावनारूपत्वापादनम्। अयं च भक्तियोगस्य सहकारी कैवल्यस्य प्रधानसाधनं च भवति।

२६. भक्तियोगो नाम, तैलधारावदविच्छिन्नस्मृतिसंन्तानरूपानुभवस्य प्रीतिरूपापन्नत्वापादनम्।

२७. तत्स्वरूपे विचारिते प्रारब्धकर्मनिवृत्त्यौपायिकतया साधनसाध्येऽनुष्ठाय तत्सङ्कोचविकासोपयोगपरिणामकरणम्।

२८. अथ प्रपत्त्युपायो नाम, एवं कर्मज्ञानसहकृतभक्तियोगेऽशक्तानामप्राप्तानां सुकरः शीघ्रफलदः, उपायस्य सकृत्कर्तव्यत्वादुपायानुष्ठानसमनन्तरं जायमानभगवद्विषयानुभवानां प्राप्यकोटिघटितत्वाच्च स्वरूपानुरूपश्च भवति।

२९. इयं चार्त्तरूपप्रपत्तिर्दृप्तरूपप्रपत्तिश्चेति द्विधा।

३०. तत्रार्त्तरूपप्रपतिर्नाम, निर्हेतुकभगवत्प्रसादेन हेतुना शास्त्राभ्यासेन सदाचार्योपदेशक्रमेण च यथाज्ञानोत्पत्यनन्तरं भगवदनुभवाय विपरीतदेहसम्बन्धस्य देशसम्बन्धस्य देशिकसहवासस्य च दुःसहत्वात्, भगवदनुभवस्यैकान्तं विलक्षणं देहं देशं देशिकांश्च प्राप्तुमाशाधिक्येन **श्रीवेङ्कटनायकस्य गर्भजन्मजराऽधिव्याधि-**

**मरणादि निवर्तकत्वात्, श्रीवेङ्कटनायक गत्यन्तरशून्यो दासोऽहं, वेङ्कटाचलवासिने नमः** इति पूर्णप्रपत्तिं कृत्वा **बहुदर्शयित्वा किं नाशयसि, एतत्तीरमारुह्य श्रान्तोऽस्मि प्राप्तुं कृपां कुरु, लक्ष्म्या शापित्तोऽसि त्वया शापितोऽसि, अथाहं गन्तुं नानुजानामी**तिप्रतिरुध्य प्राप्तिः।

३१. दृप्तप्रपत्तिर्नाम, शरीरान्तरप्राप्तौ स्वर्गनरकानुभवेषु च विरक्तिर्भीतिश्चोत्पाद्य तन्निवृत्यर्थं भगवत्प्राप्त्यर्थं च सदाचार्य्योपदेशक्रमेणोपायस्वीकारं कृत्वा विपरीत-प्रवृत्तिनिवृत्ता वेदविहितवर्णाश्रमानुष्टानं भगवद्भागवतकैङ्कर्यं च मानस वाचिककायिकैर्यथाबलमनुष्टाय, ईश्वरस्य शेषित्व, नियन्तृत्व, स्वामित्व, शरीरित्व, व्यापकत्व, धारकत्व, रक्षकत्व, भोक्तृत्व, सर्वज्ञत्व, सर्वशक्तित्व, सर्वसम्पूर्ण-त्वावाप्तसमस्तकामत्वरूपाकारान्, स्वस्य तच्छेषत्व, नियाम्यत्व, स्वत्व, शरीरत्व, धार्यत्व, रक्ष्यत्व, भोग्यत्वाज्ञत्वाशक्तत्वापूर्णत्वरूपाकारांश्चानुसन्धाय **निवर्तय दुःखम्मावा निवर्तकान्तरशून्योऽह**मितिप्रकारेणोपायविषयसर्वभारांश्च तद्विषये न्यस्य निर्भरतयावर्तेत।

३२. आचार्याभिमानो नाम, एतेष्वेकस्मिन्नपि शक्तिरहितङ्कञ्चनोद्दिश्य तस्य च्युतिञ्चैतस्य प्राप्तावीश्वरस्य जायमानां प्रीतिं चानुसन्धाय स्तनन्धयप्रजाया व्याधौ सत्यां तत्स्वदोषत्वेनानुसन्धाय स्वयमौषधसेवां कर्त्री मातेवैतन्निमित्तं स्वयमेवोपायानुष्टानं कृत्वा रक्षितुं शक्तस्य परमदयालोर्महाभागवतस्याभिमानेऽन्तर्भूय [१]**उचितोपायं ज्ञापयन्ति चेत्तं पश्या**मीत्युक्तप्रकारेण सकलप्रवृत्तिनिवृत्तीनां तदाधीन्यापादनम्।

३३. भगवतः स्वयं प्राप्यत्वेऽपि सकलदेवतान्तर्यामित्वेन प्राप्यत्ववदस्याचार्याभि-मानस्य स्वातन्त्र्येणोपायत्वेपि सर्वेषामुपायानां सहकारी स्वतन्त्रश्च भवति।

३४. विरोधिवर्गे स्वरूपविरोधी नाम, देहात्माभिमानमन्यशेषत्वं स्वस्वातन्त्र्यं च।

३५. परत्व विरोधी नाम, देवतान्तरेषु परत्वप्रतिपत्तिः समत्वप्रतिपत्तिः क्षुद्रदेवता-विषयेषु शक्तियोगप्रतिपत्तिरर्चावतारेष्वशक्तियोगप्रतिपत्तिश्च।

३६. पुरुषार्थविरोधी नाम, पुरुषार्थान्तरेष्विच्छा स्वाभिमतभगवत्कैङ्कर्येष्विच्छा च।

---

१. तिरुवायिमोलि ५-८

३७. उपाय विरोधीनाम, उपायान्तरवैलक्षण्यप्रतिपत्तिरुपायलाघवमुपेयगौरवं विरोधिबाहुल्यं च। प्राप्तिविरोधी नाम, प्रारब्धशरीरसम्बन्धोऽनुतापशून्यगुरुस्थिर-भगवदपचारभागवतापचारासह्यापचारप्रभृतयस्सर्वे विरोधिन इत्युच्यन्ते।

३८. अन्नदोषो क्षानविरोधी सहवासदोषो भोगविरोध्यभिमानः स्वरुपविरोधी।

३९. एवमर्थपञ्चकज्ञानोत्पत्या मुमुक्षोः संसारे वर्तमानस्य चेतनस्य मोक्षसिद्धि-पर्यन्तं संसारसम्बन्धार्थं कालक्षेपप्रकारः।

४०. वर्णाश्रमानुरूपमशनाच्छादने सम्पाद्य **यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः** ।

४१. इत्युक्तप्रकारेण सकलपदार्थानपि भगवद्विषये निवेद्य यथाबलं भागवत-किञ्चित्कारं कृत्वा देहधारणमात्रं प्रसादप्रतिपत्त्या जीवेत।

४२. कथञ्चित्तत्वज्ञनोत्पादकस्याचार्यस्य सन्निधौ किञ्चित्कारेण तदभिमतो वर्तेत।

४३. ईश्वरसन्निधौ स्वस्य नीचत्वमनुसन्दधीत।

४४. आचार्यसन्निधौ स्वस्याज्ञानमनुसन्दधीत।

४५. भागवतसन्निधौ स्वस्य पारतन्त्र्यमनुसन्दधीत।

४६. संसारिणामग्रे स्वव्यावृत्तिमनुसन्दधीत।

४७. प्राप्ये त्वरा प्रापकेऽध्यवसायो विरोधिनि भय मितरविषयेष्वरुचिः स्वदेह-ऽरुचिःस्वरूपज्ञानं स्वरक्षणेऽशक्तिरार्तिश्चोद्दिश्य विषये गौरवमुपकारिविषये कृतज्ञतोत्तारकप्रतिपत्तिश्चैतेऽनुवर्तेरन्।

४८. एवं ज्ञानानुष्ठानाभ्यां युक्तो वर्तमान ईस्वरस्य दिव्यमहिषीभ्यो नित्यमुक्तेभ्य-श्चात्यन्ताभिमतो भवेत्।

**।। इति अर्थपञ्चकं समाप्तम्।।**

**।।श्रीलोकगुरुचरणौ शरणम्।।**

नमः परमर्षिभ्यः श्रीलोकगुरवे नमः

श्रीमते रामानुजाय नमः

**श्रीभगवल्लोकाचार्यप्रणीतः**

# तत्त्वशेखरः

## प्रथमप्रकरणम्

**कारप्पङ्काडु - कन्दाडै - वाधूल - श्रीनिवासाख्य अयोध्यारामानुजदासेन काञ्चीपुरनिवासिना संशोधितः।**

(१) पुंस्पर्शक्लेशसम्भावनागन्धविधुरस्य, प्रत्यक्षादिप्रमाणविलक्षणस्य, [१]**निखिल वेदजातस्य,** [२]**वेदो** पबृंहणस्मृतीतिहासपुराणानां [३]**च** कृत्यम् [४]**सकलचेतनानामपि** तत्त्वज्ञानजननम्।

(२) तत्त्वज्ञानं च सर्वस्मात्परस्य, नारायणस्य, सर्वप्रकारपरतन्त्राणां सर्वात्मनामपि [५]**स्वरूपाऽनुरूपपुरुषार्थभूत** [६]**कैङ्कर्यप्रतिबन्धकर्मसम्बन्धनिवर्तकोपायः,** [७]**तच्चरणारविन्दशरणागतिः** इति [८]**ज्ञानविशेषः**।

(३) नारायणः सर्वस्मात्परः कथम् इति चेत् परत्वचिह्नानि, जगत्कारणत्व [९]**मुमुक्षू** पास्यत्वमोक्षप्रदत्वानि अस्यैवेति। अतोऽयमेव सर्वस्मात्परः।

(४) [१०]**महोपनिषत्, सुबालोपनिषत्, नारायणोपनिषत्** च, स्मृतीतिहास, पुराणानि च, **एको ह वै नारायण आसीत्** (म० १/१) **दिव्यो देव एको**

---

१. **अखिले** ति पाठान्तरम्। २. **तदुपबृंहणे ति** पा० उपबृंहणं नाम अनधीतशाखान्तरार्थैः सह अधीतशाखार्थे निष्कर्षः। ३. **पुराणादीनामि** ति पा० तदा पाञ्चरात्रतन्त्रमपि विवक्षितम्, वक्ष्यमाणे तन्त्रस्थश्लोकस्य उदाहृतत्वात्। ४. **सकलसंसारिचेतनानामि** ति क, ख, ग, घ, पुस्तकेषु पाठः। ५. पुरुषैः अर्थितः पुरुषार्थः। ६. किञ्चित् करोतीति किङ्करः, किङ्करस्य भावः कैङ्कर्यम्। ७. उप ईयते अनेनेति उपायः। ८. **निरूपणज्ञानविशेषः** इति क, ख, ग, पा०। ९. मुमुक्षुः मोक्षेच्छुः, संसारमोचने इच्छावानिति यावत्। १०. अद्वारकभगवत्प्रतिपादकत्वम् उपनिषण्णत्वम्।

**नारायणः** (सु० ६खं०) **अथ पुरुषो ह वै नारायणोऽकामयत** (ना) **अप एव ससर्जाऽऽदौ** (मनु १/८) **नारायणो जगन्मूर्तिः** (भार० मो० १८२/१२) **विष्णोः सकाशात् उद्भूतम्** (विष्णुपु० १/१/३५) इति नारायणादि (दिव्य) शब्दैर्जगत्कारणत्वं वदन्ती ति अयमेव जगत्कारणभूतः।

(५) छान्दोग्य, वाजसनेय, कौषीतक्याऽऽदिषु, **सत्** (छा० ६/२/१) **ब्रह्म** (बृ० ३/४/१०) **आत्मा** (ऐतरे० १/१/१) आदिशब्दैः कतिचिद्वस्तूनि कारणमभिदधतीति चेत् [1]**पश्वधिकरणन्यायेन** सामान्यशब्दस्य विशेषपर्यवसायितया, **सत्** आदिशब्दा अपि तमेवात्र [2]**प्रतिपादयन्ति**।

(६) ननु [3]**हिरण्यगर्भः समवर्तताऽग्रे** (यजु० ४ का० २ प्रश्न० ३४ वा०) **धाता यथापूर्वमकल्पयत्** (तैत्ति० १/३९) **प्रजापतिः प्रजा असृजत** (यजु० २/१/१) **अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वा भुवनानि तस्थुः** (यजु० ४/६/२) इति हिरण्यगर्भादिविशेषशब्दैर्निर्देशेन ब्रह्मणो जगत्कारणत्वे का न्यूनता इति चेत् (ब्रह्मसूत्रम् १/३/१२) तन्न वक्तुं शक्यते, **यो ब्रह्माणं विदधाति पूर्वम्** (श्वेता० ६/१८) **तत्र ब्रह्मा चतुर्मुखोऽजायत** (महो० १/२) **नारायणात् ब्रह्मा जायते** (नारा०) **स प्रजापतिरेकः पुष्करपर्णे समभवत्** (नृसिं० ताप० पूर्व० १/१) **विराजोऽधिपूरुषः** (पुरुषसू०) **यन्नाभिपद्मात् अभवन् महात्मा प्रजापतिः** विश्वसृड् विश्वारूपः (महो०) बृंह वै ब्रह्माणं पुष्करे ससर्ज (अथर्०) **हिरण्यगर्भं पश्यति जायमानम्** (श्वेता० ४/१२) इति **सृज्यः** इति, **न ब्रह्मा** (महो० १/१) **ब्रह्मादिषु प्रलीनेषु** (विष्णुधर्मे ७०/२०) इति, **संहार्यः** इति, **युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः। पुनस्त्रैलोक्यधातृत्वं प्राप्तवान् इति शुश्रुमः** (इति हाससमु० १४/८) **प्रजापत्यं त्वया कर्म पूर्वं मयि निवेशितम्** (उत्तररामा० १०४/७) **मम वेदा हताः सर्वे**

---

१. **पशुना यजेते** ति अत्र सामान्यपशुशब्दः **छागो वा मन्त्रवर्णात्** इति (पू० मी० ६/८/३१.) इति सूत्रन्यायेन छागविषये यथा पर्यवस्यति, तथा **सत्** शब्दः बृहदबृहत्साधारणत्वात् ब्रह्म शब्दोक्तविशेषे पर्यवस्यति, चेतनाऽचेतनसाधारणो **ब्रह्म** शब्दः चेतनैकान्ताऽऽ**त्म** शब्दोक्तविशेषे पर्यवस्यति; तथाऽऽत्म शब्दस्य सर्वचेतनसाधारणः **नारायणः** एव विशेषे पर्यवस्यतीति वेदार्थसङ्ग्रहे भाष्यकारैः स्पष्टमुक्तम्। २. कारणप्रतिपादकस्याऽध्यायस्याऽर्थः सङ्गृहीत. (१०)।
३. अथ द्वितीयस्याऽध्यायस्यार्थं विस्तरेण वक्तुमारभते।

**दानवाभ्यां बलादितः** (भार०शां०मो० ३४७/३३) [1]**यस्मा**दनपराधस्य शिरश्छिन्नं त्वया मम (मात्स्ये १८२/८५) इति, **सर्वेश्वरसमाराधनेन स्वपदं प्राप्तवान्** इति, असुरापहृतवेद इति, रुद्रपरिभूत इति चेमं ( ममुद्दिश्य) कर्मवश्यतया (तायाः) [2]**कथनात्**।

(७) [3]**हिरण्यगर्भधातृप्रजापतिशब्दाः**, अपर्यवसानवृत्त्या वा, अवयवशक्त्या वा, (नारायणप्रवृत्त्या वा,) नारायणवाचकाः।

(८) **अजस्य नाभावध्येकमर्पितम्** (य०४/६/२) इत्यत्र **अर्पितम्** इति **आविर्भूतमित्यर्थः एकशब्दश्च पुष्करवाची** अजस्य नाभावध्येकं यस्मिन् विश्वं प्रतिष्ठितम्। पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः (भा० शां० राजध० ४७/५८) इति महाभारते व्याख्याततत्वात्।

(९) ननु **यदा तमस्तन्न दिवा न रात्रिः न सत् न चाऽसत् शिव एव केवलः** (श्वेता० ४/१८) **कारणं तु ध्येयः, सर्वैश्वर्यसम्पन्नः शम्भुराकाशमध्ये ध्येयः** (अथर्वशिखो०) इति श्वेताश्वतर अथर्वशिखादिषु, रुद्र एव कारणभूत इति उक्तमिति चेत्, तत् अपि अनुपपन्नम्, **बुद्बुदात् त्र्यक्षःशूलपाणिः पुरुषोऽजायत** (महो० १/३) **नारायणात् रुद्रो जायते** (नार०) **इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमः** (बृहद्द ६/४/२१) **त्र्यक्षः खण्डपरशुमजीजनत् (अथर्वणो०) ब्रह्मणः पुत्राय** (साम्नि) इत्येवमादिवाक्यैः महोपनिषत्, नारायणोपनिषत्, सुबालोपनिषत्, बृहदारण्यकम्, अथर्वब्राह्मणम्, सामवेदश्च, सृज्यत्वेन, **नेशानः** (महो० १/१) इति संहार्यत्वेन चावदत्।

(१०) [4]**शातपथब्राह्मणे, संवत्सरे कुमारोजायत, सोरोदीत् तं प्रजापतिरब्रवीत्, कुमार किं रोदिषि, यच्छ्रमात्तपसोऽधिजातोऽसीति, सोऽब्रवीत्, अनपहत पाप्माऽहमस्मीति** इत्यादिषु रुद्रोत्पत्ति दशायां रोदिति, तमीक्ष्य प्रजापतिस्त्वद्रोदनङ्किनिमित्तमिति पृच्छति, अहमनपहतपाप्मा, अस्मत्पापानि यथा विनश्येयुः, तथा मम नामकरणङ्कर्तव्यमिति प्रतिवदति, अस्य रोदनत्वात् तव रुद्र इति

---

१. **तदे** तिमुद्रितपुराणकोशपा० २. **तन्न** वक्तुं शक्यत इति पूर्वेणान्वयः। ३. सहस्रानामाध्याये (४४/५/८/ श्लो०) पाद्मोत्तरे च (२२४/अ०) भगवति एते शब्दाः द्रष्टव्याः। ४. **शातपथे चाष्ठामूर्तिब्राह्मणां प्रथमांशे** इति स्तोत्रभाष्ये (२४ श्लो०)।

नामाऽस्त्विति तस्मिन् उक्तवति, मम इतोऽपि अन्यानि च कतिचिन्नामानि स्युरिति पुनरपि अस्मिन्नुक्तवति, भवशर्वेशानपशुपतिभीमोग्रमहादेवरूपनामसप्तकं, अष्ठमूर्तित्वं च स तस्य दत्तवान् [१]**इत्युक्तम्**।

(११) इदं च, स्कन्दपुराणे –

**उन्मत्तवत् अनुन्मत्तः प्रभुः प्रभवतां [२]वरः।**
**रात्रौ श्मशाने पर्यटसि तत् किमेतत् तवेश्वर।।**

[३]इत्यादिना, [४]**श्मशानपर्यटनप्रभृतिहीनवृत्त्यनुभवहेतुः कः** इति पृष्ठवत्याम् -

**अहं शोणितपङ्कालकरालवदनोऽम्बिके।**
**रौद्रे मुहूर्ते सम्भूतो हरे रोदिमि विस्वरम्।।**

इत्यादिना, स्वोत्पत्तिरोदननामसप्तकमूर्त्यष्टकप्राप्तिप्रकारमुक्त्वा –

**रौद्रे मुहूर्ते जातोऽहं रौद्रकर्मा ततो ह्यहम्।**
**यद्भवत्युचितं कर्म पुरुषस्य गिरेः सुते।।**

**तत्तेनाऽवश्यकर्तव्यं मृदु वा यदि वेतरत्।**
**प्रजापतेश्च कः शक्त आदेशङ्कर्तुमन्यथा।।**

इत्यादिना, ( रुद्रः, ङपा०) स्वहीनाऽचरणहेतुः कर्म इत्युक्तवान्, इति व्याख्यातम्।

(१२) अत्र, **हरे रोदिमि विस्वरः**, **ततो मां पाणिना स्पृष्ट्वा लोकेशः प्राह केशवः** इति **हरिकेशव शब्दाभ्यामुपक्रम्य प्रजापति** शब्देनोपसंहारात्, अस्यां [५]**श्रुतौ** प्रजापतिशब्दो नारायणपर्यवसायी भवति।

(१३) मार्कण्डेय, (५२ अ) [६]**श्रीवैष्णवपुराणादिषु च**, (वि० १/८) **रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः श्रृणु**।। १।। इत्ययमर्थ उक्तः।

---

१. एवं शतरुद्रीयब्राह्मणे, शैलालिब्रा०, बह्वृचे, घृतसूक्ते च द्रष्टव्यम्। २. **अपी** ति क० घ० पा०। ३. **विना** देव्याम् क० ङ० पा०। ४. **प्रभृतिकहोनवृत्ति स्वमनुभवहेतुः** इति, क०, घ० पा०। ५. **स्मृता** विति ङ० पा०। शतपथब्राह्मण इत्यर्थः, स्मृताविति पाठे तु स्कन्दपुराण इत्यर्थः। ६. **आदि** शब्देन, ब्रह्म (१) पाद्म (२२९) वाराह (२/४) नृसिंह (३) कौर्म (३/७/१०) वायु (२७) भागवत (३/१२) हरिवंश (१/१) भारत (मो० ३५१) लैङ्ग (पू०/३६) मान (१) वादिकञ्च विवक्षितम्।

(१४) **अस्य देवस्य** [1]**मीढुषः**, (बह्वृचे) **महादेवः सर्वमेधे महात्मा हुत्वात्मानं देवदेवो बभूव** (भाट्ट शा० राज० २०/१२) इति अस्यपदं कर्माधीनमित्युक्तम्।

(१५) श्रीवराहपुराणे, (१३६) –

**तत्र विष्णोः प्रसादेन मया तत् त्रिपुरं हतम् ।।३४।।**
**तस्य पापस्य** [2]**दोषेण न शक्नोमि विचेष्टितुम्।। ३५।।**

इति त्रिपुरदहनजन्यपापेन [3]**योगमाया**, ऐश्वर्यनाश, हृदयसन्ताप, निश्चेष्टितत्वानि (अस्य) जातानीति चोक्तम्।

(१६) **ततो वाक्यान्मुनीन्द्रस्य देवो बालेन्दुशेखरः। शङ्करश्छिन्नलिङ्गस्तु कानने विचचार ह। एवं शापो यदाऽस्माकं ताभ्यां सक्तःसुदारुणः। अवश्य (म्) करणीयं मे तदा काष्ठमयं वपुः** इति भृगुतत्पत्न्योः शापाभ्यां, छिन्नलिङ्गत्वं, काष्ठरूपत्वञ्च जातमिति ब्राह्मपुराणे उक्तम्।

(१७) वायव्ये, [4]**(पूर्वखण्डे ३०अ०)** –

**ततोऽभिव्याहृतो दक्षो रुद्रं सोऽभ्यशपत् पुनः।**
**यस्मात् त्वं मत्कृते क्रूरमृषीन्व्याहृतवानसि।**
**तस्मात्सार्धं सुरैर्यज्ञे नत्वा यक्ष्यन्ति वै द्विजाः।। ६३।।**

**हुत्वाऽऽहुतिन्तवक्रूर अपः स्पृश्यन्तु** [5]**कर्मसु** इति अप उपस्पृशति मेध्यत्वाय, इत्युक्तरीत्या, पश्चात् विमुक्तमोहः, भगवन्तं स्तुतवान्, इति चाऽस्याऽज्ञानाऽशक्ती चोक्ते।

---

१. **अस्य देवस्य मीढुषो वयो विष्णोरेषस्य अवभृथे हविर्भिः विदेहि रुद्रो रुद्रियम्महित्वम्** (अस्य) सर्वविलक्षणत्वेन श्रुत्यादिप्रसिद्धस्य, (देवस्य) क्रीडादिमङ्गलगुणमहोदधेः, (मीढुषः) **मिह सेचने**, सेक्तुः दातुः, उदारस्येत्यर्थः; (वयः) अवयवतया शाखाभूतः, शरीरतयाऽङ्गभूत इत्यर्थः, (अस्य विष्णोः) सर्वव्यापनशीलतया सर्वान्तर्यामिभूतस्य, नारायणस्य; (एषस्य) प्रार्थनीयस्य, अभिमतफलार्थं याचनीयस्येत्यर्थः; (अवभृथे हविर्भिः) सर्वमेधाख्ये यागे, विष्णवे समर्पितैर्हविर्भिः, (रुद्रियम्) रुद्रसम्बन्धि, (महित्वम्) महिमानम्, (विदे) लेभे हीति प्रसिद्धौ।

२. **पापेन दोषस्ये ति मुद्रितवराहपुराणपा०**

३. **प्रणष्टयोगमायश्च नष्टैश्वर्यश्च माधव**।। ३६।।

४. ब्रह्मपुराणेऽपि इमे श्लोकाः वर्तन्ते (३२ अ० ३५/३६)।

५. **क्रूर न त्वां यक्ष्यन्ति कर्मसु** इति ब्र० पु० पाठः।

(२०) [१]**वृकासुरेऽमुमाराध्य, अहं यस्य शिरः स्पृशामि तस्य शिरः शतधा भवेत्** इति (वरं) अभिलषितवति, तस्मिन्नपि तथैवास्त्विति तस्मै वरन्दत्तवति, पश्चात् (वृकासुरे च तत्परीक्षार्थम्) **स तद्वरपरीक्षार्थं शम्भोर्मूर्ध्निकलाऽसुरः (वृकासुरः)। स्वहस्तं धातु मारेभे सोबिभ्यत्स्वकृताच्छिवः।। २३।। तेनो पसृष्टस्सन्त्रस्य उपधावत्सवेपथुः। यावदन्तीन्दिवो भूमेः काष्ठाना मधराभुवः।। २४।।** इत्युक्तप्रकारेण तस्मिन् तत्परिक्षितुं रुद्रशिर एव स्प्रष्टुमुपक्रममाणे सभये तस्मिन्नपि पलायमाने सर्वत्र तन्मुद्रतवति तस्मिन्नागतौ तस्मिन् [२]**श्रीवैकुण्ठ** मारुढुं गतवति सर्वेश्वरोऽपि अस्यक्लेशमवलोक्य मध्येऽऽगत्या-ऽऽविभूय वृकासुरमवलोक्य, असौ भ्रान्तः मिथ्या भाषणं विहाय न वदति अतः स्वशिरः स्पृशन् पश्येति वदति, अनन्तरम्, सोऽपि स्वशिरः स्पृष्ट्वा पपातेति श्रीभागवते, (१०/८८) **वृकाऽसुराय गिरिशो वरन्दत्वाऽऽपसङ्कटम्।। १३।।** इत्यारभ्याऽस्य (रुद्रस्य), आपत्प्राप्तिप्रकारः अज्ञानाऽशक्ती चोक्ते।

(२१) अन्धकासुरं निरसितुं मातृगणान् सृष्ट्वा –

**त्रैलोक्येभक्ष्यमाणे तु तदा मातृगणेन वै।**
**नसिंह मूर्ति देवेशं प्रदध्यौ भगवान् शिवः।। ४३।।**

इति तेन (त्रैलोक्य) पीडां प्राप्तवति, स्वतस्तच्छिमनाऽशक्तत्वात् सर्वेश्वरन्ध्यायति, स ते शमितवान् इति मात्स्यपुराणे (१७८) अस्य (रुद्रस्य) अज्ञानाऽशक्ती उक्ते।

(२२) तथाचैवम्, सृज्यत्व, संहार्यत्व, कर्मवश्यत्वाना मुक्तत्वात् अस्य कारणत्वं न घटते।

(२३) तस्मात्, हिरण्यगर्भादिशब्दा इव शिवशम्भादिशब्दाश्च नारायणपराः।

---

१. वृकासुरोऽमुमाराध्य, अहं यस्य शिरः स्पृशामि तस्य शिरः शतधा भवेत्, इति अपेक्षितवान् सोऽपि तथावरन्दत्तवान्, अनन्तरं **स तत् कला सुरः। स्वहस्तं शिवः। तेन वेपथुः। यावत् भुवः** इत्युक्तप्रकारेण स तत्परिक्षार्थं रुद्रशिर एव स्पष्टुमुपक्रममाणे शोकाभिभूतस्सन् पलायमानः, सोऽपि सर्वत्र तमनुद्रुतवान्; (सः) मार्गमप्राप्य श्रीवैकुण्ठमारुढवान् सर्वेश्वरोऽपी' ति (का) दिषु पाठः।

२. श्रीवैकुण्ठ शब्दः क्षीराब्धिपरः, न तु परमाकाशः तत्राऽस्य गमनाऽशक्तेः एवं श्रीधरस्वामिभिश्च।

(२४) **शिव** इति सर्वप्रकारशुद्ध इत्यर्थः।

(२५) **शिव** शब्दः **शिवमस्तु सर्वजगताम्, शिवास्ते सन्तु पन्थानः, शिवङ्कर्माऽस्तु** इति शुद्धमाङ्गल्यगुणविशिष्टवस्तुषु प्रयुक्तः।

(२६) **शम्भुः** इति **शं सुखं भावयतीति, शम्भुः** इति व्युत्पत्त्या सर्वसुखप्रद इत्यर्थः।

(२७) **शम्भुः** इति [1]**द्रु** हिणविषयेऽपि [2]**प्रयुक्तः**।

(२८) **सर्वः शर्वः शिवः** स्थाणुः (सह० ४) **स्वयंम्भुः शम्भु रादित्यः (स०५)** इति [3]**गुणविवक्षया** एते शब्दाः नारायणे प्रयुक्ताः।

(२९) **यानि नामानि गौणानि** (स०१३) इत्युक्तेः, एते शब्दाः योगिकाः।

(३०) नारायण शब्दस्तु नैवं रुद्रं वक्तुं शक्नोति।

(३१) अयं शब्दः बहुषूपनिषत्सु बहुवारं प्रयुक्तः।

(३२) शिवशब्दस्य तु तन्न।

(३३) ननु, **ब्रह्म विष्णुरुद्रेन्द्र आस्ते सर्वे सप्रसूयन्ते** (अथर्वशि०) इति ब्रह्मरुद्रेन्द्रैः सह (साकं) नारायणोऽपि प्रसूत इति, श्रीरामायण, (उत्तररा० ५१) [4]**लैङ्गादि** (पूर्व० १९ अ० २६ श्लो०) पुराणेषु च भृगुशापात् अस्य दुःखानुभवो जातः इति चोक्तत्वात् अस्याऽपि कर्मवश्यत्वमस्तीति चेत्, तन्न वक्तुं शक्यते **ब्रह्म विष्णु रुद्रेन्द्र आस्ते** (अथ०) इत्यत्राऽयन्ताविव जात इति नोच्यते, किन्तु **रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान्** (भा० उद्यो० १२/११ रामा० उका० ८५/१८) इत्युक्तरीत्या, राघव यादव साजात्य मिव ब्रह्म रुद्रसाजात्यः सन् विष्णुरूपेणाऽवतीर्णप्रकार उच्यते।

(३४) **अजायमानो बहुधा विजायते** (यजु० आरण्य० ३/१२) इति श्रुतिरेवाऽस्य कर्ममूलकज्जन्म निषिध्यैच्छिकजन्म विधीयते।

---

१. **शम्भुः स्वयम्भुर्द्रुहिणः** इति नामपाठः नारदीयपुराणे रुक्माङ्गदचरितेयमवचनेचद्रष्ट० ।

२. **शम्भुरपि हिरण्यगर्भशिवशब्दसदृशः** इति (ङ) पु० पा० ।

३. **विवक्षायामि** ति (ङ०) पा० ।

४. **आदि** पदेन, मात्स्य, (४७/१०२) वायु (उत्त २०/३५/६४) प्रभृतिकं विवक्षितम्।

(३५) **एष सर्वभूतान्तरात्मा अपहतपाप्मा** (सुबा० ७ खं०) **स एष सर्वेभ्यः पाप्मभ्य उदितः** (छा०? १/६/६) –

**पश्य देवस्य माहात्म्यं महिमानञ्च नारद।**
**शुभाऽशुभैः कर्मभिर्योनलिप्येत् कदाचन।।**

(भा० शां० मो० ३३९/२६) **स सर्वभूतप्रकृतिं** (विकारान्) (वि० पु० ६/५/८२, ब्रह्मपु० च० १२४/ ६३) **शुभाशुभैर्विनिर्मुक्तः** [1]**ऊर्मिषट्कात् पर ङ्गःट प्रभुः। तं वैद्य ममलं विष्णुं सदा ध्यायन् विमुच्यते।। (नारसिंहपु० १७/२३)** इति, अयमकर्मवश्य उक्तः। (३६) –

[2]**सर्वावस्थेषु वै विष्णोः जननं स्वेच्छयैव तु ।। ४०।।**
**जरकास्त्रच्छलेनैव स्वेच्छया गमनं हरेः।। ४८।।**

(द्विजशापात् च्छलेनैव मवतीर्णोऽपि लीलया) इत्यादिना [3]**लैङ्गादिषु**, भगवदवतार ऐच्छिक उक्तः।

(३७) श्रीविष्णुपुराणे –

[4]**देवतिर्यङ्मनुष्यादि शरीर ग्रहणात्मिका।**
**लीलेयं सर्वभूतस्य तव चेष्टोपलक्षणा।।**

(वि० पु० ५/३३/४२) –

**नाकारणात्कारणाद्वा कारणा कारणं न च।**
**शरीरग्रहणव्यापिन् धर्मत्राणाय केवलम्।।**

(५/२/५०) [5]**इच्छा गृहीताऽभिमतोरुदेहः** (६/५/८४) –

**समस्तशक्तिरूपाणि तत् करोति जनेश्वर।**
**देवतिर्यङ्मनुष्याख्याचेष्टावन्तः स्वलीलया।। ७०।।**

---

१. **अशनायापिपासाशोक मोह जरामरणानि इति षड्र्मयः** इति मुद्गलोपनिषत् श्रुतिः।
२. **सर्वावस्थासु, सर्वावर्तेषु** इति च पा० (मार्कण्डेय) (४) ब्रह्म (७२) गारुड (२०) भारतादिकं विवक्षितम्।
३. **आदि** पदेन, मात्स्य, (४७ अ०) वायु (उत्त० ३४/३६/४२ अ०) पाद्मोत्तर (२४२) भागवत (१०/१) विष्णुधर्म (६७)।
४. ब्रह्म० च० (९७/४१)। ५. ब्रह्म० च० (१२४/६४)।

**जगतामुपकाराय न सा कर्म निमित्तजा** (६/७) इति, जगद्रक्षणार्थम् इच्छयाऽवतरति, ऋषिशापं सर्वमर्यादास्थापनाय स्वयमनुवर्तत, इत्युक्तः।

(३८) **अजोऽपि सन् अव्ययात्मा भूतानामीश्वरोऽपि सन्।**
**प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया।। ६।।**
**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम्।। ७।।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। ८।।**

**जन्मकर्म च मे दिव्यम्** (गी० ४ अ०) इति [१]**स्वयमेवोक्तवान्**।

(३९) तस्मात् नाऽयं [२]**स्वयमेवोक्तवान्**।

(४०) ननु, पुत्रार्थतया कैलासे गत्वा रुद्रं याचयित्वा तस्मै पुत्र मपेक्षितवान्, सोऽपिदत्तः (वान्) इति [३]**महाभारतेऽभिधानात् नारायणोऽपि कर्मवश्यः रुद्रस्य शरणभूत** इति चेत्, तत्रोक्ताऽर्चनादिकं , न कर्मवश्यत्वादिसूचकम् (अपि तु) वरप्रदानकृतम् –

**अन्यन्देव वरन्देहि प्रसिद्धं सर्वजन्तुषु।। ४१।।**
**मर्त्यो भूत्वा भवान् देव माम् आराधयकेशव।।**
**मां भजस्व च देवेश वरम्मत्तो ग्रहाण च।। ४२।।**
**येनाऽहं सर्वभूतानां पूज्यात् पूज्यतरोऽभवम्।।**

इति रुद्रोऽपेक्षितवान् –

**देवकार्यावतारेषु मनुष्यत्वमुपेयिवान्।**
**त्वामेत्राऽराधयिष्यामि हर त्वं वरदो भव।। ४३।।**

इति, सर्वेश्वरोऽपि (तस्मै) वरन्दत्तः (वान्), इति श्रीवराहपुराणे (७३ अद्द०) ह्युक्तम्।

---

१. गीतायामिति वक्तव्ये तथाऽनुक्तिः, श्रीविष्णुधर्मेऽपि (६८) (इमानि वचनानि) ब्रह्माणम्प्रति स्वयमेवोक्तत्वात्।

२. (३९) इत्यारभ्य, (४१) इत्यन्तम् (घ.ङ) पुस्तकयोर्नास्ति।

३. हरिवं० भवि० ८८ अ०।

(४१) पुत्रप्रदानानन्तरं रुद्रेण, देवान् ऋषींश्च दृष्ट्वा, [१]**कृष्णः** जगन्मोहनार्थम्पुत्रार्थितयाऽऽगतः (इति) अयमेव सर्वकारणभूतः, सर्वस्मात्परः, मोक्षप्रदश्च, इम मेवोपास्य यथा मुक्ता भवेत तथाकुरुध्वम्, इति उपदिष्टत्वात्, अस्य परत्वस्य बहुमुखैः स्तुतत्वात्, पुत्रार्थमितरपादौ (दयोः) पतितकृष्णस्यैव मार्गे घण्ठाकर्णस्य मोक्षप्रदत्वाच्चाऽस्य कर्मवश्यत्वं नास्ति।

(४२) [२]**लैङ्गादि पुराणेषु,** क्षेत्र प्रकृति योनि शक्ति माया, शब्दैः रुद्रं प्रत्युक्तो नारायणभावः, रुद्रात् उत्पत्तिः, मूर्तित्रयाऽतीतसदाशिवपारम्यप्रभृतिकम्, [३]**प्रत्यक्ष-श्रुतिविरोधात्,** [४]**स्वग्रन्थपरस्पर विरोधात्** - अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते। (मात्स्य० ५/३/६८) इत्युक्तप्रकारेणै तत्तामसपुराण सिद्धत्वाच्च [५]**भ्रान्तिपरिकल्पितम्**।

(४३) ब्रह्म रुद्रयोरपि जन्मनी स्वेच्छयैव स्यातामितिचेत्, तन्न वक्तुं शक्यते–

**आ ब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः।**
**प्राणिनः कर्मजनिताः संसारवशवर्तिनः।।**

(वि० ध० १०४/२३) —[६]**विष्णोर्माया महावर्ते मोहान्धतमसावृताः।** (वि० पु० ५/३०/१७) इतीमौ कर्मपरतन्त्राविति उक्तत्वात्।

(४४) एवं, नारायण एव कारणभूत इत्यस्याऽर्थस्य, न्यायाऽनपेक्षं अनन्तशाखा निखिलवेद निगमनभूतः, [७]**उपासनविधिविधुरः**, समस्तपरविद्योपास्य विशेष-निर्णायक (:) निखिलवेदान्त निर्वाहकः, नारायणाऽनुवाकः, सर्वेषु अपि वेदान्तेषु **परब्रह्म, परन्तत्व, परमात्म, परञ्ज्योति परायण, पुरुष, अक्षर, अच्युत, विश्वाऽऽत्म, शिव, शम्भु,** शब्दैः, निर्दिष्टं वस्तु तत्तत् शब्दै रनूद्य **नारायण**

---

१. हइ० भ० ८८, ८९ अ०।

२. **आदि** वायुकौर्मादिकञ्चविवक्षितम्, तत्रापि तथोक्तेः।

३. महोपनिषत् सुबा०, नारायणो०, बृददारण्य, शतपथ०, शैलालि० शतरुद्री० इत्यादि।

४. तत्रैव क्वचित् (३६/७) नारायणात् रुद्रोत्पतिः, नारायण एवकारणभूतः (पू० २४) इति क्वचित्तस्मात् लैङ्गादिषु परस्परव्याघातः सर्वत्र दृश्यते । भूषणटीकायां मया विस्तरेण प्रदर्शितः।

५. तामस पुराणसिद्धत्वात् हेतोः **तामसं निरयप्रदम्** इति पाद्मोक्तेः, तमस्त्वज्ञानजं विद्धीति गीता।

६. ब्रह्मपुराणेचवर्तते (९४/१४) **ब्रह्माद्याः सकलादेवाः मनुष्याः पशवस्तथा** इदं पूर्वार्द्धम्।

७. लिङ्गभूयस्त्वाधिकरणे (३/३/४३) द्रष्टव्यम्।

इति विशेषितवान् **सब्रह्मा सशिवः सेन्द्रः** (तै०ना०११/२६) इति कार्यत्वेन सम्प्रतिपन्नेनेन्द्रेण सह ब्रह्मरुद्रैः (द्रौ) पठित्वा अस्य कार्यभूताविति चोक्तौ।

(४५) तथा चैवं, न्यायस्वभावात्, न्यायनिरपेक्षं श्रुतिष्वेव विशेषतत्वात्, **सनोहरिः** इति हरिशब्देनोपसंहारात् ब्रह्मरुद्रयोः सृज्यत्व, संहार्यत्व, कर्मवश्यत्वोक्तेश्च, नारायण एव कारणभूतः।

(४६) **येन जातानि जीवन्ति** (तै० भृ० १/१) **एष भूतपालः** (बृह० ६/४/२२) **परित्राणाय साधूनाम् (विष्णुधर्मे ६८/३४), न हि पालनसामर्थ्य मृते** [1]**सर्वेश्वरम् हरिम्** (वि० पु० १/२२/१९) **स एव पाति** (वि० पु० १/२/६७) इत्युक्तप्रकारेण, स्थापकोऽप्ययमेव।

(४७) **यत् प्रयन्ति अभिसविशन्ति** (तै० भृ० १/१) **येनेदंविश्वं परिभूतं यदस्ति, यस्य ब्रह्मक्षत्रं च उभे भवत ओदनं (:) मृत्युर्यस्योपसेचनम् (**कठो० १/२/२५) **ग्रसेत् संहारसमये जगदौदुम्बराण्डवत्। लीलया यस्तु भगवान् तं गच्छशरणं हरिम्, सम्भक्षयित्वा** (वि० पु १/२/६२) इत्युक्तरीत्या, संहारकोऽपि अयमेव।

(४८) ननु, रुद्र एव संहर्ता इति उभयवादिसम्प्रतिपत्तावपि अयमेव संहर्तेत्युक्तिः कथमितिचेत् –

> **कल्पान्ते रुद्ररूपी यो ग्रसते सकलञ्जगत्।**
> **तमन्तम्पुरुषं विष्णुं प्रणतोऽस्मि जनार्दनम्।।**

(विष्णुधर्मे ७२/५२) सृष्टि स्थित्यन्त करणीं ब्रह्म विष्णु [2]**शिवात्मिकाम्** (वि० पु० १/२/६६) – **स एव सृज्यः स चसर्गकर्ता स एव पात्त्यत्तिच पाल्यतेच।** (वि० पुं० १/२/६७) इत्युक्तरीत्या, रुद्रान्तर्यामी [3]**भूत्वा अयमेव संहरति।**

(४९) तस्मात् अयमेव जगज्जन्मादि कारणभूतः।

**।। प्रथमप्रकरणं समाप्तम्।।**

---

१. सर्वेषां ब्रह्मरुद्रादीनामीशः, तम्।

२. ननु अस्मिन् श्लोके त्रिमूर्तिसाम्यं हि प्रतीयते इति चेन्न, **एक एव जनार्दनः** इति जनार्दनस्यैव ब्रह्मशिवादि कृत्स्नप्रपञ्चतादात्म्य प्रतिपादनात् **जगच्चसः** इति पूर्वोक्तमेव विवृणोति।

३. **रुद्ररूपीभूत्वे** ति।

श्रीमते रामानुजाय नमः

# तत्त्वशेखरः

## द्वितीयप्रकरणम्

(१) **यतो वा इमानि भूतानि जायन्ते, तद्विजिज्ञासस्व** (तै० भृ० १/१) **असद्वा इदमग्र आसीत्** (तै० आन० ७/१) **रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति** (तै० आ ७१) **तमेवं विद्वान् अमृत इह भवति** (महानारा० ३ अ०) भिद्यते हृदयग्रन्थिः (मुण्ड० २/२/९) –

**त्वामाराध्य परंब्रह्म याता मुक्तिम्मुमुक्षवः।**
**वासुदेवमनाराध्य को मोक्षं समवाप्नुयात्।।**

(वि० पु० १/४/१८) –

**संसारार्णवमग्नानां विषयाक्रान्त चेतसाम्।**
**विष्णुपोतं विना नान्यत् किञ्चिदस्ति परायणम्।।**

(वि० ध० १/५१) [1]**संसारसागरं घोरम्** (जितन्ता० १/४) –

**समस्तजगतो मूले यस्य भक्तिः स्थिरा त्वयि।**
**धर्माऽर्थकामैः किन्तस्य मुक्तिस्तस्यकरे स्थिता।।**

(वि० पु० १/२०/२६) इत्यादिना, कारणवस्त्वैवो पास्यं, मोक्षप्रदं, मुक्तप्राप्यं, इत्युक्त्या, [2]**मुमुक्षूपास्यः** मोक्षप्रदः मुक्तप्राप्यश्चाऽयमेव।

(२) [3]**ननु,** छान्दोग्यदहरविद्यायाम्, तैत्तरीय दहरविद्यायाम्, बृहदारण्ये, अथर्वशिखायाञ्च, **दहरोऽस्मिन् अन्तर आकाश स्तस्मिन्यदन्तस्तत् अन्वेष्टव्यम्** (अ० ८/१/१) इति, **गगनं विशोकस्तस्मिन् यदन्तः तदुपासितव्यम्** (तै० १०/२३) इति, **य एषोऽन्तर्हृदय आकाशः, तस्मिन् शेते सर्वस्य वशी**

---

१. अनन्तक्लेशभाजनम्। त्वामेव शरणम्प्राप्य निस्तरन्ति मनीषिणः इत्यन्तम् (ङ) पुस्तके।

२. भाग० १/२/२६ मुमुक्षवो घोररूपान् इत्यादि।

३. अथ व्योमातीतमतं समूलमुन्मूलयितुन्तत्परिपाटीमुपन्यस्यति, (बृ० सू० ३/२/३०)।

**सर्वस्येशानः** (बृ० ६/४/२२) इति, **शम्भुरा काशमध्ये ध्येयः** (अथ०) इति च, आकाशशब्देन नारायणमुक्त्वा, तदुपरि शम्भुशिवज्ञानशब्दैः रुद्र उपास्य उक्तः **सर्वाणि रूपाणि विचिन्त्य** धीरः (पुरुषसू०) इति, नारायणाऽसाधारण नाम रुपकर्तृत्वस्य, **आकाशो हवै नामरूपयोर्निर्वहिता** (छा० ८/१४/१) इत्युक्तरीत्या, छान्दोग्य दहरविद्याया, आकशशब्दो नारायणपरः तदैकार्थ्यात् अन्यत्रापि, आकाशगगनशब्दौ नारायणपरौ अथर्वशिरसि, खण्डचतुष्टयेन, रुद्रस्य सर्वैश्वर्य-मुक्त्वा, पञ्चमखण्डेन **तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः** शाश्वती इति हृदयान्तर्वर्तिनो रुद्रस्य उपासनस्य (तस्य) फलं, मोक्ष इति, अस्याऽर्थस्य, **भस्मम् गृहीत्वा विमृज्याऽङ्गानि संस्पृशेत् तस्मात् व्रतमेतत् पाशुपतम् पशुपाशविमोक्षाये** ति पाशुपतव्रतस्य चोक्तेः उपास्यत्वं मोक्षप्रदत्वञ्च कण्ठोक्तम् श्वेताश्वतरोपनिषदि च, **ततो यदुत्तरतरम्** (३०/१०) इति नारायणात् परत्वं **य एनं विदुरमृतास्ते भवन्ति** (३/१०) इति, मोक्षप्रदत्वञ्चोक्तम्, **तस्मात् सर्वगतः शिवः** (३/११) इत्युक्तो एतत् (प्रकरणम्) **रुद्रपरमिति सिद्धम् रुद्रस्तारकं ब्रह्म व्याचष्टे तेनाऽसौ अमृती भूत्वा मोक्षी भवति** (१ खं १ वा०) इति, जाबालि श्रुत्यापि मोक्षप्रदत्वं कण्ठोक्तम् श्रीरुद्र, त्वरितरुद्र, पञ्चब्रह्म (म) तन्त्रैरपि रुद्रवैभवमुक्तम् तस्मात् रुद्रएवोपास्यः, मोक्षप्रदश्चेति वक्तव्य मितिचेत्, इदमनुप-पन्नम्, छान्दोग्यदहरविद्यायां, **किन्तत्र विद्यते यदन्वेष्टव्यम्** (८/१/२) इति श्रुतिरेव चोद्यङ्कृत्वा **तस्मिन् कामाः समाहिताः एष आत्मा अपहतपाप्मा** (८/१/५) इत्यादिना दहराकाशे उपास्यतयोक्तम् अपहतपाप्मत्वादिगुणमिति समाधत्ते तैत्तरीयदहरविद्या वाक्यमपि एतत् ऐकार्थ्यम्, **यः** (तै १०/२४) इति, अकारवाच्य बोधकत्वात्, शब्दोऽवयवशक्त्या सर्वनियन्तारं नारायणं वक्ति अकारो विष्णुवाचकः इत्युक्तेः, अकारवाच्यो [1]**नारायण एव**, बृहदारण्ये, अथर्वशिखायाञ्च, प्रयुक्त आकाशशब्दः, न परमपुरुषपरः, किन्तु सर्वप्रसिद्ध आकाशपरः (एव) दहराकाशादिष्विव पुरुषोत्तमाऽसाधरण धर्माऽश्रवणात्, अत्रेशानशम्भुशिवशब्दाः, वशित्व जगत्कारणत्वादि परमात्माऽसाधारण सम्बन्धात् **ईशानः प्राणदः प्राणः**

---

१. **योहवै श्रीपरमात्मा नारायणः स भगवान् अकारवाच्यः** इति तारसारोपनिषदि असकृदाम्नातम्। **अ इति भगवतो नारायणस्य प्रथमाऽभिधानम्** इति महाभाष्यकृत्।

(सह० ८) **स्वयम्भूः शम्भुः** (स० ५) **सर्वः शर्वः शिवः** (स०४) इत्येतैः शब्दैः, पर्यायाः, **कारणन्तु ध्येयः** (अथ० शिखा०) इति वाक्यम् कारणत्वं, ध्येयत्वमित्येतत् द्वयं न विधत्ते, किन्तु ध्यानम् (विधीयते) उभयविधाने वाक्यभेदप्रसङ्गः अनुवाददशायाम् अन्यतः प्रसिद्धस्यैव अनुवाद्यत्वात्, कारणवाक्येषु कारणतयोक्तं नारायणमनूद्य तत् ध्यानं विधत्ते, अथर्वशिरसि, प्रथमखण्डे, **अहमेकः प्रथम मासं वर्तामिच भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः** इत्यादिभिः रुद्रस्य विश्वैश्वर्योक्तिः, **मत्तः सर्वं अहं सर्वम्** (वि० पु० १/१९/८५) अहम्मनुः अभवं सूर्यश्च (बृ० उप० ३/४/१०) **प्राणोऽस्मि प्रज्ञात्मा तम्मा मायु रमृत मित्युपास्व** (कौषी० ३/१) इति प्रह्लाद वामदेवेन्द्रादीनामिव परमात्मभावना-प्रकर्षबलादिति। इममर्थं **सोऽन्तरात् अन्तरं प्राविशत्** (अथद्द १) इति श्रुतिरेवाऽवदत् । द्वितीयखण्डोक्त देववाक्यम्, रुद्रवाक्याऽनुवादकत्वात् तद्वाक्य-तुल्यम्, तृतीय चतुर्थखण्डयोः, ओङ्कारादि प्रणवनामानि, तन्निर्वचनानि चोच्यन्ते तस्मात् न रुद्रपरास्तेशब्दाः, किन्तु प्रणववाच्यनारायणपराः, पञ्चमखण्डोक्त [1]**रुद्रोपासनं** मधुविद्योक्ताऽऽदित्योपासनवत् परमात्मोपासनम्, अत्रोक्तभस्मस्पर्शनस्य सौत्रामण्युक्त सुराग्रहस्य सर्वक्रतुसाधा-रण्याऽभाववत् न सर्वोपासनसाधारण्यम्।

(३) छान्दोग्यादिषु, **असदेवेदमग्र आसीत्** (छा० ६/२/१) इत्यादिभिः, परमतोप-न्यासकरणवत् अत्राऽपि परमतोपन्यासः क्रियते।

(४) लैङ्गे, नग्नत्वादि धर्माङ्गतयोक्तेः, अथर्वशिर उक्तमन्त्राणां भस्मोद्धूलने विनियोगात् (विनियुज्यमानत्वात्) अथर्वशिरोलैङ्गयोरुक्तस्य पाशुपतव्रतस्यैक्यात् -

**अर्द्धे दशार्द्धसंयुक्तं गूढं प्राज्ञविनिन्दितम्।**
**वर्णाश्रमकृतैर्धर्मैः विपरीतं क्वचित्समम्।।**

इति लैङ्ग एव अवैदिकतयोक्तेः, अथर्वशिरसि अधिकारि (र) श्रवणेनाऽविशेषेण [2]**सर्वाधिकारत्वप्राप्तौ** श्रीवराहपुराण आदित्यपुराणयोः वेदबाह्याऽधिकारत्वेन सङ्कोचा(चना) त्, **भस्मच्छन्नो भस्मशय्या शयानः** (शाता० प्रायश्चि०

---

१. छान्दोग्योप० ३/१/१, ब्र० सू० १/३/३० **मध्वधिकरणे**।
२. वा० पु० ७१ अ०, पाद्मो० च, २५५ अ०, नारदस्मृ० ७ अ० वसिष्टस्मृ० १ हारीत० ८ अ०।

अ०) इति, शातातपे धर्मशास्त्रे (च) महापातकनिवर्तकतयोक्तभस्मोद्धूलनं प्रायश्चित्त-विषयत्वात्, लोकप्रसिद्धेश्च, अवैदिकमिति [1]**केचित्** ऊचुः।

(५) श्वेताश्वतरे, नारायणात् परत्वं, मोक्षप्रदत्वञ्चोच्यत इत्येतत् अपि अनुपपन्नम्, **वेदाहमेतम्,** (३/८) इत्यारभ्य, **नान्यः पन्था** इति महापुरुषवेदनमेव मोक्षसाधनं, तदतिरिक्त उपायो नास्ति इति कृत्वा, **यस्मात् परं नाऽपरमि** (३/९) त्यादिना, प्रस्तुत (महा) पुरुष एव परः, तत् व्यतिरिक्ताः सर्वेऽप्यपराः इत्युक्त्वाऽनन्तर मन्यत्, किञ्चित् वस्तु परं, मोक्षप्रदञ्चेत्युक्तेः प्रतिज्ञा हेतु विरोधेनाऽसङ्गतत्वात्, **महान् प्रभुवै सत्वस्यैव प्रवर्तकः** (श्वे ३/१२) इति, महापुरुषस्य सत्वप्रवर्तक-त्वेनोक्तेः, सत्वप्रवर्तको, विष्णुरेवेत्यस्याऽर्थस्य, **अथ यो हवै खलु सात्विकांशः सोऽसौ ब्रह्मचारिणो योऽयं विष्णुः** (४ प्रपा० ५सं०) इति मैत्रायण्युपनिष-त्सिद्धत्वात्, श्रीपुरुषसूक्तनारायणाऽनुवाकप्रभृत्युक्तसर्वाननत्वादीनाम्, **सर्वाननशिरो-ग्रीवः** (श्वे० ३/११) इत्यादिषूक्तेश्च तत्प्रकरणं नारायणपरम्, **ततो यदुत्तरतरम्** इत्यत्र [2]**तत्** शब्दः हेतुपरः, झ्यद्वाट **इदं पूर्णमि** ति पूर्वोक्त परामर्शि परं [3]**वा** (शिव शब्दः, अवयवशक्त्या नारायण परः)।

(६) **रुद्र स्तारकमि** त्यादिषूक्तं, न मोक्षप्रदत्वम्, किन्तु, ज्ञानोपदेष्टृत्वम्, **स नो देवः शुभया स्मृत्या संयुनक्तु** (श्वे० ४/१२) इत्यत्रोक्तमपि ज्ञानप्रदत्वमेव, **उपायोऽस्मि हरौ स्मृतः** (हरिवं० भ० ८९ /१४) **ईश्वरात् ज्ञानमन्विच्छेत्** (मात्स्ये ६७/४१) इत्यादिषु अस्य ज्ञानोपदेष्ठ्रत्वं नारायणस्य मोक्षप्रदत्वञ्च सिद्धम्, तस्यैवतु प्रसादेन विष्णुभक्ति (:) प्रजायते इत्युक्तरीत्या, रुद्रो भगवद्भक्ति-मुत्पादयति, अत एव, रुद्रभक्तो बाणः निर्वैरिता च (स्यात्) विबुधैः विष्णु भक्तिः अनू (नौ) पमा (उनुत्तमा)। वासुदेवात्तु मरणं कल्पान्ते कुपितात् पुन इति रुद्रविषये भगवद्भक्तिमपेक्षितवान्।

(७) श्रीरुद्रत्वरितप्रभृतयोऽपि परत्वचिन्हजगत्कारणत्वमुमुक्षूपास्यत्वमोक्षप्रदत्वाद्य-भावात्, प्रबलश्रुत्यन्तरविरोधात्, अग्निचयनादिषु विनियुक्तत्वाच्च, न रुद्रपरत्वपराः।

---

१. केचित् आचार्याः इत्यर्थः। २. **ततो हेतोः** इति दीपे (३/२/३०)।

३. **तत** इति, **तेनेदं पूर्णम्पुरुषेणसर्वम्** इति प्रथमा निर्दिष्टं जगत् गृह्यत इति जगत उत्तरः परः पुरुष एवाऽभिधीयत इति **केचित् आचार्याः** इति श्रुत त० वेदार्थ सं०।

(८) तस्मात् रुद्रस्योपास्यत्वं मोक्षप्रदत्वञ्च न घटते (घटेते)।

(९) किञ्च –

**ये स्वधर्मस्थिता वर्णा विप्राद्याः कुरुनन्दन।**
**विकर्मसु न वर्तन्ते प्रीतिमांस्तेषु केशवः।।**

(७५/३) **ब्रह्मचारी गृहस्थाद्याः** (७५/४) **तस्मात् प्रियत्वं कृष्णस्य** (७५/१३) **येषामतुष्टिः पारक्ये** (७५/१४) **वेदाः प्रमाणं स्मृतयः** (७५/१५)

**परद्रव्येषु जात्यन्धाः परदारेष्वपुंसकाः।**
**परवादेषु ये मूकाः ते सर्वे दयिता मम।।**

(७६/२२) **श्रुतिस्मृत्युदितन्धर्मम्** (७६/२९) **श्रुतिस्स्मृतिर्ममैवाऽऽज्ञा** (७६/३१) –

**द्विविधो भूतसर्गोऽयं दैव आसुर एव च।**
**विष्णुभक्तिपरोदेवो विपरीत स्तथाऽऽसुरः।।**

(१०९/७४) इति, श्रीविष्णुधर्मवचनैः –

**दैत्यानां बहुमानित्वं मात्सर्यं मम सत्क्रिया।**
**निन्दाऽनिन्दति शास्त्राणां हरिभक्तिरनूपमा।।**

इति वामनुपराणवचनेन, **सुरपति रसुरै स्सदाभियुक्तः पशुपतिरप्यवविनीतभृत्य-वर्गः - सुरगुरुदृढ प्रसादकर्तारौ हरिचरणौ स्मरणाऽ(ता)पवर्गहेतुः** (९/६) इति नृसिंहपुराण वचनेन –

**विष्णुभक्ति समायुक्तान् श्रौतस्मार्त प्रवर्तकान्।**
**प्रियो भवति यो दृष्ठ्वा वैष्णवोऽसौ प्रकीर्तितः।।**

(उत्त० ४/६) इति लैङ्गवचनेन, **येचवेदविदोविप्राः** (सभा० ३८/२३) **मदात्मा-नस्तु मां पार्थ** (गी० ९/१३) इति महाभारतवचनाभ्याम्, भगवद्भक्ताः, सत्वप्रकृतिकाः, वैदिकाः भरुद्रभवन्तीत्यर्थः सिद्धः,।

(१०) क्तास्तु, तमः प्रकृतिकाः, अवैदिकाः भवन्तीति च सिद्धम्।

(११) **वासुदेव परा यत्र वेदमार्गानुसारिणः।**
**रुद्रभक्ता स्त्रयी बाह्याः भस्मोद्धूलन विग्रहाः।।**

(उत्त० ६/१७) इति, लैङ्गवचनेन भस्मोद्धूलनं रुद्रभक्तानां लक्षणमिति सिद्धम्।

(१२) भस्मोद्धूलनञ्च -

**तस्मात् सर्वप्रयत्नेन भस्मोद्धूलन विग्रहाः।**
**जटिनो मुण्डिनश्चैव नग्ना नाना प्रका (हा) रिणः।।**

(लै० पू० ३४/३०) **जटिला मुण्डिता वाऽपि** इति, लैङ्गे महाभारते च, नग्नत्वादिधर्म सहचरितत्वेन कथनात्, **न भस्मकेश नखतुष कपालाऽमेध्या न्यधितिष्ठेत्** (गौतमस्मृ० ९ अ० ९ सू०) इति निषिद्धद्रव्यसाहित्येन ग्रहणात्, भस्मनः अशुद्धद्रव्यत्वात्–

**नग्नं वाऽनुपनीतं वा विप्रं स्पृष्ट्वा प्रमादतः।**
**मृद्भिर्द्वादशभिःस्नात्वा वासोभिस्सह शुध्यति।।**

**तस्मात् एतान्नरो नग्नान् त्रयी सन्त्यागदूषितान्।**
**सर्वदा वर्जयेत् प्राज्ञः आलापस्पर्शनादिषु।।**

(विष्णुपु० ३/१८/५०) इति नग्नत्वादीनां वेदबाह्यत्वात् च –

**त्रिपुण्डधारिणो नित्यं भस्मोद्धूलन तत्पराः।**
**भविष्यध्वं त्रयीबाह्याः मिथ्याज्ञान प्रलापिनः।। (आदि०)**

**ऋषीणाममायया सर्वमिति सञ्चिन्त्य तत्र वै।**
**शशाप तान् जटाभस्ममिथ्याव्रत (भूत) परां स्तथा।।**

(वा० ७१/३९) इत्यादित्यपुराण वराहपुराणवचनाभ्यामपि वेदवाह्य लक्षणमित्युच्यते।

(१३) एवं, वेदबाह्यलक्षणयुक्ततामसपुरुषसेव्यत्वात्, अज्ञानादिकार्ययुक्तत्वात्, देवत्वेन रुद्रस्य सकृत्सत्वगुणे सत्यपि, **न तदस्ति पृथिव्यां वा** (गीता० १८/४०) इति, गुणत्रयवश्यत्वेन तमोगुणस्याऽपि, सत्वात्, तस्य च ब्रह्मादीनां सत्वेऽपि तदपेक्षयाऽतिशयितत्वेनाऽपेक्षिततामसत्व व्यपदेशस्य युक्तत्वात्, स्वस्य

च तामसपुरुषत्वेन सापेक्षत्वसूचक जटा चर्म वसनादि साधकधर्मयुक्तत्वाच्च, रुद्रस्योपास्यत्वादिकं न घटते।

(१४) श्रीपुरुषसूक्त प्रक्रियया च नारायणस्य कारणत्वचिह्नानि, मुमुक्षूपास्यत्व मोक्षप्रदत्वानि (च) सिद्ध्यन्ति।

(१५) ननु चाऽस्याऽसाधारणवाहनाऽयुधनामस्मृतीषु अन्यतमसङ्कीर्तनाऽभावात्, **ईशान पदसत्वाच्च न नारायणपरमितिचेत्, (तदनुपपन्नम्) सहस्त्रशीर्षा पुरुषः** इत्याद्युक्तेः, तानि चैतदसाधारणनीति नारायणानुवाकसिद्धत्वात्, लक्ष्मीपतित्वलिङ्गात्, नारायणप्रतिपादक सुबालोपनिषदि, **पुरुष एवेदम्** (६खं) इति पुरुषसूक्तवाक्येन निगमात्, आथर्वणि (णे) **वैष्णव्यां पुरुषसूक्तम्** इति वैष्णवमहाशान्तिमन्त्रत्वेन विनियोगात्, छान्दोग्ये, **एषा वै वैष्णवीनाम संहिता** इत्युक्तेः, भगवत्समाराधनरूपकर्मादिषु बोधायनप्रभृतिपरमर्षिभः विनियुक्त(ज्य)त्वात्, पुरुषस्य हरेः सूक्तं सर्वग्र्यं धन्यं यशस्करम् (शौनककल्पे) इति शौनकवचनात्, बहुषु प्रदेशेषु पुरुषशब्दप्रयोगात्, पुरुषं नारायणमिति समाख्यया च नारायणपरमिति सिद्धम्।

(१६) अत्र **ज्ञान** शब्दो नारायणशब्दवत् न संज्ञाभूतः **अमृतत्वस्येशानः** इत्युक्तेः, पुरुषशब्दश्चै तद्विषये रूढः, न चेतनसामान्यवाचित्वेन प्रयुज्यते, सालपादपादिशब्दवत् सामान्यविशेषोभयवाची भवति, मुण्डकोपनिषत् प्रभृत्यनेकोपनिषद्भिः, पुरुषः पुण्डरीकाभः (क्षः) (लैङ्गे पू० ७० ९२) –

**द्विर्द्वादशेभ्य स्तत्वेभ्यः ख्यातोऽयं पञ्चविंशकः।**
**पुरुषो वासुदेवश्च परमात्मेति चोच्यते।।**

(फार० शां० मो० ३३९/२४) **विद्यात्तु पुरुषं परम्** ( मनु० १२/१२२) इत्याद्युपबृंहणैः, **अथाऽतो महापुरुषस्याऽहरहः परिचर्याविधिं व्याख्यास्यामः** (१/१) इति, बोधायनवचनेन, **परमःपुमानिव पतिः पत्युः** इत्यर्वाचीनप्रसिद्ध्या च पुरुषशब्दो नारायणपर इति सिद्धम्।

(१७) **तत्पुरुषाय विद्महे महादेवाय धीमहि** (तै० १/२२) **पुरुषो वै रुद्रः** (तै० १६१) इत्यादि प्रदेशेषु रुद्रोऽपि पुरुषशब्देनोच्यते इति चेत्, तत्र तत्र नामतया पुरुषशब्दो न प्रयुज्यते, किन्तु नमस्कार्यत्व हेतुभूत परमात्मप्रकारत्वहेतुकत्रिपुरदहनपराक्रमादिगुणयोगप्रभृतिभिः प्रयुज्यते।

(१८) तथा चैवं, परत्वचिह्न जगत्कारणत्व मुमुक्षूपास्यत्वमोक्षप्रदत्वानामत्रैवस्थितत्वात्, सर्वे वेदा यत्पदमामनन्ति (कठो० १/२/१५) **सर्वे वेदा यत्रैकम्भवन्ति** (यजु० आर० ३/११) **वचसां वाच्यमुत्तमम्** (जित० १/७) **यच्छन्दसा वृषभो विश्वरूपः** (तै० शिक्षा० ४/१) इति वेदेनैव स्वप्रतिपाद्यो, नारायणः इत्युक्तत्वात्, **वेदैश्च सर्वै रहमेव वेद्यः (**गी० १५/१५) इति **अहमेव वेदप्रतिपाद्यः** इति तेनैवोक्तत्वात्, **नारायणपरावेदाः** (भाग० २/५/२५) –

**वेदे रामायणे पुण्ये भारते भरतर्षभ।**
**आदौ मध्ये तथाऽन्ते च विष्णुः सर्वत्र गीयते।।**

(वि० ध० ७०/१५०) –

**एनमेकं वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम्।**
**इन्द्रमेकेऽपरेप्राणं अपरे ब्रह्म शाश्वतम्।।**

(मनु० १२/१२३) इत्येवमृषिभिरुक्तत्वात् –

**आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः।**
**इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा।।**

(इतिहाससमु० ३२/१०१, नारसि० च ६४/७७) –

**तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः।**
**तत्वमेको महायोगी हरिर्नारायणः प्रभुः।।**

(परः) (भार० शां० मो० ३४७/८९) –

**श्रूयतान्तु नरव्याघ्र वेदवेदान्त निश्चयम्।**
**यज्ञेशो यज्ञपुरुषः पुण्डरीकाक्ष संज्ञितः।**
**तद्विष्णुपरमं ब्रह्म यतो नाऽवर्तते पुनः।।**

(वि० ध० ९९/२६) –

**विष्णुरेव परम्ब्रह्म त्रिवेद मिह पठ्यते।**
**वेदसिद्धान्तमार्गेषु तन्न जानन्ति मोहिताः।।**

(वाराहे ७२/४) –

**यद्देतत् परं ब्रह्म वेदशास्त्रेषु पठ्यते।**
**भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः।।**

**सहि सत्य मृतञ्चैव पवित्रं पुण्यमेव च।**
**स देवः पुण्डरीकाक्षः स्वयं नारायणः परः।।**

(वारा० ३९/१५) इति प्रमाणतर्कपूर्वकविचारवद्भिः तैः **अयमेव परतत्वमिति निर्व्यूढत्वात्, तान्विनैव ब्रह्मविष्णु शिवेषु त्रिषु अधिकः कः** इति विचार्याऽगच्छेति भृगुम्प्रेषयित्वा परीक्ष्य –

**तत् निशम्याऽथ मुनयो विस्मिता मुक्त संशयाः।**
**भूयांसं श्रद्धधुर्विष्णुं यतः शान्तिर्यतोऽभयम्।।**

(भाग० १०/८९/१५) इति शान्त्यांदिगुणयोगेनाऽयमेवाऽधिकः इति निर्णीतत्वात्-

**जृम्भितन्तु धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः।**
**अधिकं मेनिरे विष्णुं देवाः सर्षिगणा स्तदा।।**

(रामा० बा० ७५/१९) इति देवैः परीक्षापूर्वकं निर्णीतप्रकारस्य परशुरामेणोक्तत्वात्, स रुद्रसमीपं (पार्श्वं) गत्वा (तस्मिन्) ध्यानपरे स्थिते, **त्वङ्कंध्यायसीति** पृष्टे -

**योगीश्वरं जगन्नाथं विष्णुं जिष्णुं जगत्पतीम्।**
**पद्मनाभं विशालाक्षं चिन्तयामि जगद्गुरुम्।।**

इति **जगत् पतिं** विष्णुं ध्यायामीति तेनोक्तत्वात्। **नहि एतस्मात्** इति नेत्यन्यत्परमस्ति (प्रश्नो० ४/३/६) **न तस्येशे कश्चन** (तै १/९) **सत्यं सत्यं पुनः सत्यम्** (नारसिं १८/३३) –

**नारायणात् परो देवो न भूतो न भविष्यति।**
**एतत् रहस्यं वेदानां पुराणानाञ्च (सम्मतम्) सत्तम।।**

(वारा० ७३/४९) –

**न प्रमातुं महायोगी (महाबाहो) शक्यो भारत केशवः।**
**परेभ्यः परमेतस्मात् विश्वरूपात् न विद्यते।।**

(भारते) इति एतस्मात् परभूता (:) **न सन्ती** त्युक्तत्वाच्चाऽयमेव सर्वस्मात् परः।।

**।। द्वितीयप्रकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# तत्त्वशेखरः

## तृतीयप्रकरणम्

(१) अस्य सर्वेऽप्यात्मानः, (सर्वात्मानः) सर्वप्रकार परतन्त्राः।

(२) ते च देहादिविलक्षणाः।

(३) ननु, **स्थूलोऽहम् कृशोऽहम्** इति देहेऽहम्बुद्धिव्यवहारदर्शनात्, अहमर्थभूत आत्मा देह एव, अनयोरहम्बुद्धि व्यवहारयोर्देहाऽतिरिक्तो विषय इति न वक्तुं शक्यते, तस्य स्थौल्यादीनामघटनात्, घटपटादीनामिव पार्थिवस्य शरीरस्य चैतन्यं न घटत इति चेत्, [१]**मदशक्तिवत्** परिणाम विशेषेण घटते । ननु, बाल युव वृद्ध शरीराणि अन्योऽन्यं भिन्नानीति वक्तव्यम्, एकोहि (एकत्वे) परिणामभेदो न घटते, भेदेतु बाल्येऽनुभूतस्य यौवने स्मरणं न स्यात्, यदि स्यात् एकेनाऽनुभूतमन्यः-स्मरेत्, तत् न पश्यामः, अत्र तु स्मृतिं जानीमः, तस्मात् आत्मा देहातिरिक्तः विलक्षणः स्यात् इति चेत् तदप्यनुपपन्नम्, शीरभेदाऽभावात्, एकस्यैव कालभेदेन परिणामभेदो (हि) घटते, **बाल्ये दुःखितोऽहं, यौवने सुखी भवामि, बालोऽहमेवयुवाभवामि** इति प्रत्यभिज्ञाभिः युवशरीरं पुरातनशरीरमिति सिद्धम्। नो चेत् बाल्येऽनुभूतस्य यौवनेस्मरणं न घटते, स्मृतिप्रत्यभिज्ञेयोऽहमर्थस्यैव अहि, नहि देहस्येति वक्तुं न शक्यते, देहव्यतिरिक्ताऽहमर्थस्य अदर्शनात्, किञ्च, देहेऽतिकालापगमेऽपि ठस एवाऽयम्, इति परस्य जायमाना प्रत्यभिज्ञा अपि न घटते, प्रत्यभिज्ञायाः (:) देहाऽतिरिक्तो विषय इति वक्तुं न शक्यते । तस्य अचाक्षुषविषयत्वात्। प्रत्यभिज्ञा भ्रान्तिरिति वक्तुं न शक्यते । बाधकाऽभावात्। विपक्षे, स्मरणाऽनुपपत्ति रूपबाधकसत्वाच्च । एवं देहेऽहम्बुद्धि (:) अनङ्गीकारे, विधिनिषेध (:), देहात्मभ्रमौ (मश्च), तन्निवृत्यर्थं शास्त्रश्रवणादिकञ्च न घटते, तस्मात् देह एव आत्मा भवितु मर्हति इति चेत्, तत् अनुपन्नम्, देहोऽनेकाऽवयव-

---

१. **पृथिव्यापस्तेजो वायुरिति तत्वानि तेभ्यश्चैतन्यं किण्वादिभ्यो तदशक्तिवत्** इति बार्हस्पत्याः (सू)।

सङ्घातात्मक इति अयमर्थः सिद्धः तत्र सर्वेषामवयवानां चैतन्ये सति अनेकचेतनोपलब्धिप्रसङ्गः, अवयवाना मन्योऽन्य अविवादनियमः, तत्र ममताबुद्धिर्ममताव्यवहारश्च न घटेत। एकस्यैव अवयवस्य चैतन्यस्वीकारे, तस्य विच्छेदेऽवयवान्तराऽनुभूतस्य (अवयवान्तरेण) स्मरणं न घटेत, पश्चादहम्बुद्धिव्यवहारौ, ममताबुद्धिव्यवहारौ च न स्याताम्। सर्वशरीरव्यापि सुखदुःखाऽनुभवश्च न घटेत। नाऽवयवसङ्घाततत्मकं शरीरम्, किन्तु अवयवि, तत्र चैतन्यमिति वक्तुं न शक्यते, उपलम्भाऽनुपपत्त्यभावेन अवयवि स्वीकारस्य अनुपपन्नत्वात् । किञ्च, **बालदेहोऽहम्** मन्दज्ञानः, यदुवदेहोऽहं बहुज्ञानः, मम शरीरम् इति शरीराऽहमर्थयोः जायमानाऽभेदप्रतिपत्तिर्भेदव्यवहारश्च न घटेताम्, **मम अयमात्मा** इत्यत्रेव अमुख्यत्वं वक्तुं न शक्यते, मुख्यत्वे बाधकाऽभावात्, अथवा अहम्बुद्धेः शरीरमेव विषयः इति स्वीकारेऽपि श्रुति श्रुत्यर्थापत्तिभ्यां देहाऽतिरिक्तो, देहान्तरपरिग्रहयोग्यश्च आत्मा सिद्धः।

(४) बाह्येन्द्रियाणि च नात्मा भवितुमर्हन्ति, एकमेव सर्वेन्द्रियविषयाणि जानातीति उक्तेः, (एकमेव सर्वञ्जानातीति वक्तव्यत्वात्) एवमनङ्गीकारे, **योऽहमिममर्थं पश्यामि, स एवाऽहं स्पृशामि** इति प्रतिसन्धानं न घटते।

(५) यदि, चक्षुरेवाऽत्मा, अन्धो रूपं न स्मरेत्।

(६) यदि, श्रोत्रमेव आत्मा, बधिरः शब्दं न स्मरेत्।

(७) एवमिन्द्रियान्तरेष्वपि द्रष्टव्यम्।

(८) अन्तःकरणमपि नात्मा भवितुमर्हति, स्मर्तुः (कर्तुः) स्मरणादिकार्याणां करणतया कल्पितत्वात्, इममेव स्मरतीति वक्तुं न शक्यते, स्मरण (स्य) करणाऽभावात्, करणमपि स्वयमेवेति न वक्तव्यम्, विरुद्धत्वात्, अन्यत् किञ्चित् करणमित्युक्तौ, तत् बाह्यकरणञ्चेत्, तत् शून्यस्य स्मृतिर्न घटेत अन्तःकरणञ्चेत् आत्मनो मनः इति नाम कृतं भवेत् अन्तः करणमनपेक्षितञ्चेत्, इन्द्रियार्थसम्बन्धवेलायामेव (सर्वं) ज्ञानमपि जायेत, तस्मात् मनोऽपि नात्मा भवितुमर्हति।

(९) प्राणा अपि नात्मा भवितुमर्हन्ति, सङ्घातरूपत्वात् । देहात्मपक्षोक्तदूषणानि अत्रापि तुल्यानि, (**निरस्तो देहचैतन्यप्रतिषेधप्रकारतः। प्राणात्मवादो न पृथक् प्रयोजयति दूषणम् आ०**)।

(१०) ज्ञानमपि नात्मा भवितु मर्हति, **मम ज्ञानं जातम्, नष्टमि** ति क्षणिकत्वेन आत्मधर्मत्वेन च भानात्, (ज्ञायमानत्वात् ङ०)।

(११) स्थिरभूतः कश्चन आत्मा अस्तीति, **परेद्युर्दृष्टवान् अहमेव अद्य पश्यामि** इति प्रत्यभिज्ञया सिद्धः।

(१२) [१]**निर्विषया,** निराश्रया च संवित् आत्मेति वक्तुं न शक्यते, तथाविध-संविदोसम्भवात्।

(१३) [२]**ननु** (च), (नहि ङ०) ज्ञानमात्मधर्मो भासते, किन्तु, अन्तः करण-भूताऽहङ्कारस्य धर्मो हि भासते, इति (न) वक्तुं शक्यते, दृश्यत्वात्, परागर्थत्वात्, (प्रकृति) परिणामत्वात्, जडत्वाच्च देहादीनामिव अहङ्कारस्य ज्ञातृत्वाऽसम्भवात्।

(१४) [३]**ननु,** चैतन्यसन्निधिमूलकछायापत्तिवशात् ज्ञातृत्वं सम्भवतीति चेत्, न सम्भवति, चैतन्यस्य ज्ञातृत्वाऽसम्भवात्।

(१५) [४]**ननु** च, दर्पणजलखण्डानां, मुखचन्द्रगोत्वाऽभिव्यञ्जकतया तानि तत्तन्निष्ठतया इव चैतन्याऽभिव्यञ्जकतया अन्तःकरणस्य तत्तन्निष्ठतया भासत इति चेत्, स्वयम्प्रकाशस्य आत्मनो जडभूताऽहङ्कारो व्यञ्जक इत्युक्तिः शान्ताङ्गारः आदित्यं प्रकाशयति इत्युक्तिरिव।

(१६) [५]**दर्पणजलम्** मुखचन्द्रयोर्न व्यञ्जकम्, किन्तु, चाक्षुषतेजः प्रतिफलनहेतुः।

(१७) [६]**अभिव्यञ्जकस्तु** आलोकादिरेव।

(१८) [७]**जातेर्व्यक्तिनिष्ठतया** भानं व्यक्त्या कारतया।

(१९) [८]**किञ्च,** चैतन्याऽभिव्यङ्ग्याऽहङ्कारस्तस्य (चैतन्यस्य) व्यञ्जको न भवति।

(२०) आदित्यकिरणाऽभिव्यङ्ग्य(म्) करतलम् तद्व्यञ्जकं पश्यामः इति चेत्, न करतलव्यञ्जकम्, किन्तु करणबाहुल्यहेतुः (१/१/१)।

---

१. ननु संविदेवेत्युक्तम्, इत्यादि (१/१/१) भाष्ये। २. **यदप्युक्तम् अविक्रियस्यात्मन** इत्यादि (१/१/१)। ३. **जडस्वरूपस्य** अहङ्कारस्ये **त्यादि**; (१/१/१)। ४. **अहङ्कारस्तु** अनुभूते **रित्यादि** १/१/१। ५ .**न च दर्पणादि मुंखादे रभिव्यञ्जक** इत्यादि, (१।।१।।१)।। ६. **अभिव्यञ्जकस्तु** इत्यादि, (१/१/१)। ७. **व्यक्तेस्तु जाति राकारः इति तदाश्रयतया प्रतीतिः** (१/१/१)। ८. **किञ्च अहङ्काराऽनुभवयोः** इत्यादि (१/१/१) अत्र भाष्यवाक्यान्येव (सर्वत्र)।

(२१) सुषुप्तौ, मुक्तिदशायाञ्च अहमर्थाऽभावात् सोऽपि नात्मा भवतीति चेत्, तत्राऽप्यस्ति, सुषुप्तौ नास्ति, चेत्, सुप्तोत्थिः, **पूर्वमहमिदमकरवम्, इदमशृणवम्, इदमन्वभवम्** इति न परामृशेत्, मुक्तिदशायामात्मा नास्तीति चेत्, आत्मनाश एव मोक्षः स्यात्, स्वनाशमपेक्ष्य मोक्षोपायेऽधिकारिविरहात्, मोक्षाशास्त्रम् प्रमाणं स्यात्।

(२२) **मत्तः सर्वमहं सर्वम्** (वि० पु० १/१९/८५) **अहमेकः प्रथममासम्** (अथ० खो) इति तत्वज्ञानवन्तो, मुमुक्षवः, **अहमन्नम्** (तै० भृ० १०/६) इति मुक्तः **यस्मात् क्षरमतीतोऽहम्** (गीता० १५/१८) अहमात्मा गुडाकेश (गी० १०/२०) **नत्वेवाऽहम्** (गी० २ /१२) अहं कृत्स्नस्य (गी० ७/६) इति परंब्रह्म च न व्यपदिशेयुः। (१/१/१)।

(२३) यदि, अहमर्थस्य आत्मत्वम्, तदा, **महाभूतान्य हङ्कारः** (गी० १३/१५) इति तस्य क्षेत्राऽन्तर्भावः कथं **सङ्घटत** इति चेत्, अहङ्कारस्यैव तत्रोक्तेः नाहमर्थस्य। (१/१/१)।

(२४) अहङ्कारस्य शास्त्रेषु हेयतयोक्ति रस्तिचेत्, तत्र गर्वरूपाऽङ्कारस्यैवोक्तिरिति, नाहमर्थः, अहङ्कारः, अपि तु आत्मैव, तस्मात् आत्मा देहादिविलक्षणः न तद्वत् अनित्यः। (१/१/१)।

(२४) **न जायते म्रियते वा विपश्चित्** (कठो० १/२/१८) **ज्ञाऽज्ञौ द्वौ अजावीशनौशौ** (श्वे० १/८) **अजो नित्यःशाश्वतोऽयं पुराणः** (कठो० १/२/१८, गीता० २/२०) **नित्यो नित्यनाम्** ( कठो० २/५/१३) इति उत्पत्तिविनाशशून्यत्वेनोक्तेः, [1]**नात्माश्रुतेः** (२/३/१८)।

(२६) ननु, **प्रजापतिः प्रजा असृजतः** (यजु० २/१) **सन्मूलाः** (छा० ६/८/४) **यतो वा इमानि भूतानि जायन्ते** (तै० भृ० १/१) **यतः प्रसूता जगतः प्रसूती तोयेनजीवान् व्यससर्जभूम्याम्** (तै० १/४) इति उत्पत्तिविनाशौ कथ्येत इति चेत्, तत्रोक्तौ देहसम्बन्धदेहवियोगौ।

(२७) यदि नित्यस्तदा सृष्टे प्राक् एकत्वाऽवधारणं न घटत इति चेत्, एकत्वस्य नामरूपविभागाभावतया घटते, (२/३/१८)।

---

१. आत्माधिकरणम् (श्रीभाष्ये) १-३-२७

(२८) संहारदशायाम् यदि आत्मा न स्यात्, तदा ईश्वरस्योपादानत्वं न घटते, अकृताभ्याम्, कृत [१]**विप्रणाशावपि** स्याताम्।

(२९) अतोऽऽत्मा नित्यः (अत आत्मनित्यत्वं स्वीकर्तव्यम् पा०)।

(३०) [२]**अमृताक्षरं हरः** (श्वे० १/१०) **आत्मा शुद्धोऽक्षरः** (वि पु० २ /१३/ ६७) **एकं सदैकम्** (वि पु० २ /१२/ ४४) इत्युक्तेः देहादिवत् उपचयाऽपच-ययोरनर्ह, एकरूपश्च भवति।

(३१) देहपरिमाण इति पक्षः, **आत्मानिर्विकारः**, इति श्रुत्या बाधितः (२/२/ ३२ **एवञ्चे** ति)।

(३२) **स्थूलोऽहम्, कृशोऽहम्, पादे मे वेदना, शिरसि मे सुखम्** इति प्रतिपत्तिश्च न सिद्ध्येत इति चेत्, देहाऽऽत्मभ्रमात् युज्यते, अनेकशरीरपरिग्रहकर्तॄणां योगिनां स्वरूपस्य च शैथिल्यं प्रसज्येत।

(३३) एतत् स्वरूपं तद्वत् न जडम्, किन्तु, **हृद्यन्तर्ज्योतिः पुरुषः** (बृ० ६/३/ ७) **अत्राऽयं पुरुषः स्वयञ्ज्योति र्भवति** (बृ० ६/३/१४) **विज्ञानघनः** (बृ० ४/४/१२) **तच्** ज्ञानमयं व्यापि स्वसंवेद्यमनूपमम्' (वि० पु० १/२२/४२) इत्युक्तप्रकारेण स्वयं प्रकाशम्भवति, (१/१/१) स्वयंप्रकाशत्वञ्च ज्ञानं विनाऽपि स्वयमेव ज्ञेयत्वम्।

(३४) ननु, स्वरूपस्य नित्यत्वे स्वयमेव प्रकाशमानत्वे च सुषुप्तावपि तत् ज्ञानं स्यात् इति चेत्, तदा न भाति चेत् उद्बोधशायाम्, एतावन्तङ्कालं सुखमस्वाप्सम् इति प्रत्यवमर्शो न स्यात्, (१/१/१ एवं हि सुप्तोत्थितस्येत्यादि)।

(३५) ननु, अहं किमंपि नाज्ञासिषम् इत्युक्तिप्रकारः कथमिति चेत्, नाज्ञासिषमित्यस्य मद्व्यतिरिक्तं नाज्ञासिषमित्यर्थः ममाऽप्यहं न ज्ञातवानिति वदतीति चेत्, ममापि न ज्ञातवानित्यस्य शरीरविशिष्टं मां न ज्ञातवानित्यर्थः स्वरूपप्रकाशाऽभावे तदा अहमिति वक्तुं न शक्यते, **अहं ब्रह्माऽस्मि** (अयमहमस्मि पा०) इति इममर्थं श्रुतिरप्यवदत्, तदा विशदप्रतिभासभावस्तमोगुणाऽभिभवात्।

---

१. अकृताभ्यागमः अहेतुफलप्राप्तिः, कृतविप्रणाशः कृतस्य कर्मणो निष्फलत्वम्।
२. हर इति भोक्ता निर्दिश्यते, प्रधानमात्मनो भोग्यत्वेन हरतीति, हरः।

(३६) प्रकाशश्च अनुकूलो भवति, **सुखमस्वाप्सम्** इति प्रत्यभिज्ञैव अस्मिन् अर्थे प्रमाणम्।

(३७) (ननु,) **इदानीं सुखं यथोत्पद्यते, तथाऽस्वाप्सम्** इति तद (अस्या) र्थः इति न वक्तुं शक्यते, प्रतिपत्तिशरीरस्य तदाऽऽकारं विना, [1]**मधुरमगायम्** इतिवत्, विद्यमानत्वात्।

(३८) स्वरूपस्य अननुकूलत्वे प्रेमास्पदत्वं न घटते, **आश्चर्यवत् पश्यति कश्चित् एनम्** (गी० २/२१) इत्यादिभिरयमर्थः सिद्धः।

(३९) **आर्द्रज्ज्वलतिज्योतिरहमस्मि** (तै० १/४१) इत्युक्तप्रकारेण आत्माज्ञानाऽऽनन्दस्वरूपो भवति।

(४०) तावत्पर्यन्तं विना ज्ञानाऽऽनन्दयो राश्रयश्च भवति।

(४१) **अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैतान् कामान् पश्यन् रमते०** (छा० ७/१२/५) **न पश्यः मृत्युम्पश्यति** (छा० ७/२६/२) **योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः** (बृ० ६/३/७) **विज्ञातारमरे केन विजानीयात्** (बृ० ६/५/१५) **जानात्येवाऽयम्पुरुषः, एषहि द्रंष्टा स्प्रष्टां श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः** (प्रश्नो० ४/९) **एवमेवाऽस्य परिद्रष्टुः** (प्र० ६/५) इत्यादिश्रुत्या, इममर्थं अहञ्जानामी'ति प्रत्यक्षेण च ज्ञाता इत्ययमंशः सिद्धः।

(४२) एनम्प्रत्यक्षम्, **जानात्येवाऽयम्पुरुषः** इति श्रुतिरप्यवदत् (२/३/२७, **व्यतिरेको गन्धवदिति,**)।

(४३) ज्ञानमात्रमात्मा तच्च क्षणिकम् इति पक्षे, **पूर्वेद्युर्दृष्टमर्थं ह्यद्य पश्यामि** इति प्रतिसन्धानं न घटते, पूर्वदिनस्थितज्ञानस्याऽभावात् अनित्य इति पक्षः, तथाविधस्य कस्यचित् ज्ञानस्याऽदर्शनात् निरस्तः, किञ्च, ज्ञानमात्रं यद्यात्मा, तदा देहात्मभ्रमो न घटते, देहस्य ज्ञातृत्वेन भ्रमात् **न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते** (बृ० ६/३/३०) –

१. यथा मन्दमगच्छम्मधुरमगायम् इति परामर्शवचनस्य। न हि तत्र यथेदानीं मान्द्यं माधुर्यञ्च भवति, तथागच्छमगायम् इत्यर्थ उपपद्यते अपि तु गतिगानसमकालत्वमेवमाद्यमाधुर्ययोरुपपन्नम्, तद्वत् प्रत्यक्त्वसुखित्वे अपि स्वापसमकालीने इत्यर्थः।

**ज्ञानं वैराग्यमैश्वर्यं धर्मश्च मनुजेश्वर।**
**आत्मनोभ्रमभूतस्य नित्यमेतत् चतुष्टयम्।।**

(विष्णुध० २०४/५८) इत्युक्तप्रकारेण ज्ञातृत्वं नित्यम् (२/३/१९) तथा चेत् उत्पत्तिविनांशौ इत्युक्तिः कथमिति चेत्, **सर्वं ह पश्यः पश्यति** (छा० ७ /२६/ २) **सचाऽनन्त्याय कल्पते** (श्वे० ६/५/९) इति मुक्तिदशायां सर्वविषयकत्वेन कथनात्, सर्व साक्षात्कारयोग्यतायां सत्यामपि, **यथा क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा** (वि० पु० ६/७/६२) इत्युक्तप्रकारेण, कर्मणा सङ्कुचितम्, **तारतम्येन वर्तते**। अप्राणिमत्सु स्वल्पा सा स्थावरेषु ततोऽधिका (वि० पु० ६/७/६४) इत्युक्तप्रकारेण, कर्मानुगुणतारतम्यविशिष्ट (:) – [1]**तेनाऽस्य क्षरति प्रज्ञादृतेः पादादिवोदकम्।** इत्युक्तप्रकारेणन्द्रियद्वारा निर्गत्य विषयग्रहणसमर्थम्भवति, तस्मात् प्रसरणादिकमादाय उत्पत्तिविनाशकथनम्, ऐक्येसति अनेकभानमपि तस्मात् एतच्च अजडं, सङ्कोचविकासयोः, संयोगवियोगादीनाञ्च आश्रयत्वात् द्रव्यम्।

(४४) ननु ज्ञानं नित्यद्रव्यं अजडञ्च यदि भवति, तदा सुषुप्तावपि किं न प्रकाशते, इति चेत्, तदानीमभानं तिरोहितानां मणिप्रकाशादीनामिव प्रसरणाऽभावात् सर्वस्य भगवदत्मकत्वात् अनुकूलतयैव भानेन एतत् आनन्दरूपं भवति।

(४५) ननु तर्हि इदानीं विषशस्त्रादीनि प्रतिकूलानि, चन्दनकुसुमादीनि अनुकूलानि, काष्ठलोष्टादीनि उपेक्षाविषयाणि चैतानि स्वतन्त्राणि सन्ति च किं भान्ति इति चेत्, कर्मदेहाऽऽत्माभिमानादिभिः तथा भासन्ते, न स्वभावतया, स्वभावश्चेत्, कदाचित् अनुकूलानि, चन्दनकुसुमादीनि कालान्तरे प्रतिकूलानि भान्ति –

**वस्त्वेकमेव दुःख्याय सुख्यायेर्ष्यागमाय च।**
**कोपाय च यतस्तस्मात् वस्तु वास्त्वात्मकं कुतः।।**

**तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते।**
**तदेव कोपाय ततः प्रसादाय च जायते।।**

तस्मात् दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकम्। (वि० पु० २/६/

---

१. मनु.स्मृ.२-९९

४७/४८) इति [1]**ऋषिर**प्यवदत् तस्मात् ज्ञानस्य आनन्दत्वमेव स्वभावम्।

(४६) एवम्भूत ज्ञानवत्त्वमात्मानोऽऽनन्दित्वम्।

(४७) एवमात्मा ज्ञाता चेत्, **यो विज्ञाने तिष्ठन्** (बृ० ५/७/२२) **विज्ञानं यज्ञं तनुते** (तै० आ० ५/१) इति ज्ञानशब्दाभ्यां कुतः कथनमितिचेत्, (२/३/१९) ज्ञानैकनिरूपणीयः स्वयं प्रकाशश्च भवतीति तथोच्यते, (तस्मात् ज्ञानानन्दी च भवति)।

(४८) **तेन प्रद्योतेनैष आत्मानिष्क्रामति** (बृ० ६/४/२) इति उत्क्रमणोक्तेः अणुपरिमाणः, (२/३/२०) उत्क्रान्तीत्युक्तिः शरीरवियोगपर्यवसायित्वेनैवेतिचेत्, सा तथा चेत्, **ये वै केचाऽस्मात् लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति** (कौषी० १/२) **तस्मात् लोकात् पुन रेत्यस्मै लोकाय कर्मणे** (बृ० ६/४/६) इत्युक्तप्रकारेण गत्यागती न घटेयाताम्, (२/३/२१) **एषोऽणुरात्मा** (मुण्ड० ३/१/९) **वालाग्रशतभागस्य** (श्वे० ५/९) इत्यादिभिः श्रुतिरेव अणुरिति मुक्तकण्ठमवदत्, (२/३/२३) **हृदि ह्यमात्मा** (प्रश्नो० ३/६) **हृद्यन्तर्ज्योतिः** (बृ० ३/६/७) इत्युक्त्या अस्यस्थितिहृदयप्रदेशे, (२/३/२५) आत्मा अणुर्हृदयप्रदेशे वर्तते चेत्, तदा पाणिपादादिषु सुखदुःखानुभवौ ज्ञानाव्याप्त्या घटेत, (२/३/२६)।

(४९) आत्मानश्च अनेके।

(५०) सुखदुःखेच्छाद्वेषादि नियतया देहभेदेन, (अन्तः करणभेदेन,) एतानि नियतानि भवन्तीति चेत्, (शङ्करपक्षः) तर्हि, सौभरि शरीरेऽपि एतानि नियतानि भवेयुः देहभेदः, (अन्तः करणभेदश्च,) सुखादिभेदस्य यदि न हेतुः, तदा जन्मान्तरानुभूतमस्मिन् जन्मनि न किं स्मरेत् इति चेत्, अस्मरणं संस्कारस्याऽनद्भवाद्वा, नाशाद्वा, (तर्हि शरीरान्तरे सुखदुःखस्मृत्यादि अभावाश्च द्वयोरन्यतरत्स्यात् इति चेत्, (तस्मिन्नपि) एकशरीरेऽपि स्मृतिर्न घटते, एकश्चेत्, (अन्धबधिरादि व्यवस्था, विषमसृष्टिश्च न घटेयाताम्, इति (ङ) पा०) बन्धमोक्षव्यवस्था, शिष्याऽऽचार्यव्यवस्था, विषमसृष्टिश्च न घटेत, [2]वैषम्य नैर्घृण्यौ च प्रसज्येताम्, (सू० २/१/३४) **नित्यो नित्यानाम्** (श्वे० ६/१३) इति श्रुतिरपि अवदत्, इयं

---

१. ऋषिः - पराशरमहर्षिः

२. प्रयोजनवत्त्वाधिकरणम् - २-१-३४

श्रुतिरौपाधिकभेदं वदति, अन्यथा जीवाऽद्वैत (प्रतिपादक) श्रुतिभिर्विरुन्ध्यात्, इति न वक्तुं शक्यते, (न वक्तव्यम् पा०) तत्रोक्तं, [1]**प्रकाराऽद्वातम्**, (इत्यर्थः ङ० पा) **सदा पश्यन्ति** (साम सं उत्त० १८/१/५) **मम**

**साधर्म्यमागताः** (गी० १४/२) इति मोक्षदशायामपि भेदोक्तेः न भेद औपाधिकः तस्मात् आत्मानः अनेक इति सिद्धम्।

(५१) **आत्मा शुद्धः** (वि० पु० २ /१३/ ६६) **ज्ञानमयोऽमलः** (वि० पु० ६/५/७) ज्योतिर्ज्वलति (तै० उप० १/४१) इत्युक्तप्रकारेण एते परिशुद्धाः।

(५२) **यस्याऽस्मि, योऽहमस्मि** (यजु० आर० ३/७/४७) **ब्रह्माऽहमस्मि** (तै० १/४१) [2]**दासभूताः** (पाञ्चरात्रे) कृष्णस्य हि कृते (भार० सभा० ३८/२३) इत्युक्त्या एते भगवच्छेषभूताः।

(४३) **यस्याऽऽत्मा शरीरम्** (माध्यन्दिनशा०) **पूः प्राणिनः** (आपस्तम्बध० १खं) **तत्सर्वं वै हरे स्तनुः** (वि० पु० १/२२/८६) **तानि सर्वाणि तद्वपुः** (वि० पु० १/२२/८५) **अपरेयमितस्त्वन्याम्** (गी० ७/५) इत्युक्त्या इदञ्च शेषत्वं शरीरतया भवति।

(५४) तथा चैवं आत्मानः (१), देहे (२) न्द्रिय (३) मनः (४) प्राण (५) धी (६) भ्योविलक्षणाः, स्वयंप्रकाशः (१), आनन्दरूपाः (२), ज्ञानाऽऽनन्दाऽश्रयभूताः (३), नित्याः (४), अणवः(५), परिशुद्धाः (६), भगवत् शेषभूताश्च(७) भवन्ति।

**।। तृतीयप्रकरणं समाप्तम्।।**

---

१. तत्त्वत्रयव्याख्याने (१.प्र.४९-वा०) **ब्रह्माद्वैतं, जीवाद्वैतञ्चेति शास्त्रप्रतिपाद्यमद्वैतन्द्विविध-मित्यादिनोक्तम्।**

२. कृष्णस्य हि कृत इति कृष्णस्य शेषभूतं मिदं कृत्स्नञ्जगत् इत्यर्थः **इति गीतायाम्भाष्यकृत (४४)।**

श्रीमते रामानुजाय नमः

# तत्त्वशेखरः

## चतुर्थप्रकरणम्

(१) तेषां पुरुषार्थः, **तं यथा** (मुद्गलोप० ३) इत्यादि, [१]**स्वेनरूपेणाऽभिनिष्पद्यते** (छा० ८/३/४) इत्युक्तप्रकारेण स्वरूपाऽविर्भावपूर्वकं, (४/४/१) नित्यनिर्दोष निस्सीमाऽऽन्दकं, सविभूतिक समस्तकल्याणगुणात्मकपरमात्मयाथात्म्याऽनुभवजनितप्रीतिकारितकैङ्कर्यम्।

(२) ननु, कैङ्कर्यं दुःखरूपं लोके पश्यामः, **सेवा श्ववृत्तिः व्याख्याता तस्मात्तां परिवर्जयेत्** (मनु० ४/६) इति निषिद्धञ्च भवति । कथन्तस्य पुरुषार्थत्वम् इति चेत्, लोके कैङ्कर्याणि सर्वाण्यपि ना पुरुषार्थानि, प्रियतमविषये, (कैङ्कर्यस्य) पुरुषार्थतया दृश्यमानत्वात्, **सेवा श्ववृत्ति** रिति निषिद्धा इति मत्वा, इयमपुरुषार्थमित्ययमंशो धर्मिग्राहकप्रमाणेन बाधितः, तत्पुरुषार्थत्वहेतुः, पापारब्धम्, **पुण्यपापे विधूये** (मुण्डो० ३/२/३) त्युक्तत्वात् नेयं पापकार्यम्, स्वस्वरूपं यादृशप्रकारमनुसन्धत्ते, तदनुरूपो भवति, (इमं) पुरुषार्थ (म्) इति सुरनरतिर्यगादिषु पश्यामः तस्मात् मुक्तोऽपि स्वशेषत्वेन अनुसन्धत्त इति कैङ्कर्यस्यैव पुरुषार्थः, तद्व्यतिरिक्तमपुरुषार्थ भवति।

(३) देहादि विलक्षणत्वेन शब्दाद्यनुभवो न पुरुषार्थः, (चार्वाकाः)।

(४) परतन्त्रंत्वेन स्वानुभवमात्रं न पुरुषार्थः (कैवल्यम्)।

(५) स्वरूपस्य नित्यत्वेन स्वरूपोच्छेदनं न पुरुषार्थः, (सौगतादयः)।

(६) नित्यज्ञानादिगुणकत्वेन वैशेषिकज्ञानादिगुणविनाशौ न पुरुषार्थः, (नैयायिकादयः)।

(७) ननु, सुखञ्चेत् दुःखमिश्रं विना न तिष्ठति, इति विषसम्पृक्ताऽन्नवत् त्याज्यमिति न वक्तुं शक्यते, मोक्षसुखस्य, **नरोगम् नोतदुःखम्** (छा० ७/२६/२) इति दुःखमिश्रत्वाऽभावात्, दुःखनिवृत्तिर्नपुरुषार्थो भवेत्, सुखरूपत्वाभावात्,

---

१. सम्पद्याविर्भावाधिकरणे ।

तर्हि, दुःखनिवृत्तौ यत्नो न भवेदिति चेत्, दुःखस्याऽपि प्रतिकूलत्वेन भवेत्, सुखादपि दुःखनिवृत्तिरेव पुरुषार्थ इति यदि उच्यते, तदा दुःखमिश्रसुखसाधने स्वाऽवरोहणं न घटेत।

(८) अविद्या निवृत्तिरेव मोक्षः, इति पक्षोऽप्यनुपपन्नः, (शङ्करः) तस्य सुखरूपत्वाऽभावात्, सुखसाधनमिति वक्तुं न शक्यते, ब्रह्मणः सुखाऽनङ्गीकारात्, सुखाऽङ्गीकारे ब्रह्म सविशेषं भवेत्।

(९) उपाधिवियोगो, मोक्ष इति पक्षोऽ (भास्करः) पि न क्षमते, सुखरूपत्वाऽभावात्, तिरोहितसुखस्य (स्वरूपस्य पा०) प्रकाश इति यदि उच्यते, तदा जीवसुखस्य प्रकाशः, उत परसुखस्य प्रकाशः, जीव सुखस्य प्रकाश इति न शक्यते वक्तुम्, जीवस्य नाशात्, परसुखस्य प्रकाश इत्यपि न वक्तुं शक्यते, तस्य तिरोधानाऽभावात्, उपाधिप्रदेशे सुखं तिरोहितमिति यद्युच्यते, तदा सर्वज्ञं न भवेत्।

(१०) न स्वाभाविकभेदाऽभेदपक्षेऽ (यादवप्रकाशः) पि मोक्षः पुरुषार्थः, मुक्तस्य बद्धेन भेदसद्भावात्, बद्धदुःखस्य मुक्तस्याऽप्राप्तेः, ईश्वरस्य जीवेनाऽभेदसद्भावात्, ईश्वरो जीवदुःखं स्वदुःखत्वेनाऽनुसन्धाय सत्सङ्कल्पत्वेन स्वयमेव निवारयेत्, तस्मात् आत्मनो मोक्षोपायवरोहणे मा भूत्, ससर्वमुक्तिप्रसङ्गश्च।

(११) तस्मात् निर्दोष निरतिशयाऽऽनन्दरूपपरमात्मकैङ्कर्यमेव मोक्षः (स्वमत०)।

(१२) **तं यथा यथोपासते तथैव भवति** (मुद्गलोप० ३) **पृथक् आत्मानं प्रेरितारञ्च मत्वा जुष्ठस्ततस्तेनाऽमृतत्वमेति** (श्वे० १/६) **एतत् साम गायन् आस्ते** (तै० भृ० १०/५) **किङ्करा मम ते नित्यं भवन्ति निरुपद्रवाः** (परमसं०) **आगच्छ वत्स भद्रन्ते पुण्डरीकमहामते (मद्रूपधारि नित्यात्मा मम पारिषदाश्रयः)**, (नारसिं० पु० ६४/११६) इत्यादीनि प्रमाणानि अनन्तानि।

(१३) ननु, **ब्रह्म वेद ब्रह्मैव भवति** (मुण्डो० ३/२/९) **यत्र त्वस्य सर्वमात्मैवा भूत्** (बृ० ६/५/१५) –

**विभेदजनके ज्ञाने नाशमात्यन्तिकङ्गते।**
**आत्मनो ब्रह्मणो भेदमसन्तङ्कः करिष्यति।।**

(दर्शनोप० ४, वि० पु० ६/७/९४) परमात्मना भवत्यभेदी (वि० पु० ६/७/९३) इत्यादिभिर्मोक्षदशायाम् ऐक्यकथने सति कैङ्कर्यघटनप्रकारः कथमिति चेत् -

**परमात्माऽऽत्मनोर्योगः परमार्थ इतीष्यते।**
**मिथ्यैतदन्यत् द्रव्यं हि नैति तद्द्रव्यतां गतः।।**

(वि०पु०२/१४/२७) इत्युक्तप्रकारेण हेयप्रतिभटवस्तुनो, हेययोग्यवस्तुनश्चैक्य-कथनम् व्याहतम् । ऐक्यस्वीकारे -

**आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने।**
**विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा।।**

(वि० पु० ६/७/३०) **निरञ्जनः** परमं साम्यमुपैति० (मुण्डो० ३/१/३) **ममसाधर्म्यमागताः** (गी० १४/२) **तत् भावभावमापन्नः** (वि०पु० ६/७/९३) इत्युक्तपरमात्मसाधर्म्यं न घटते, (सू० भा० १/१/१) **ब्रह्म वेद ब्रह्मैव भवति** (मुण्डो० ३/२/९) इत्यत्रोक्तं साधर्म्यम्, (१/१/१) **विष्णुरेव भूत्वे** त्यत्रे (यजुषि०) व **एवे** ति एतदेवेति भूत्वा (कृत्वा) ब्रह्म इव भवतीत्यर्थः अवधारणार्थकत्वेऽपि अयमेवाऽर्थः, **यत्र त्वस्ये** ति अत्र सर्वं परमात्मप्रकार-भूतमिति, साक्षात्कारप्रकारं वदति, **विभेदजनक** परमात्मना। भवत्यभेदीत्यत्र देवादिरूपभेदो नास्तीत्यर्थः। **देवादिभेदे विध्वस्ते** (वि० पु० २/१४/३३) इतीदं कण्ठोक्तम्, (१/१/१)।

(१४) ननु, किङ्करश्चेत् **स स्वराड्भवति** (छा० ७/२५/२) इत्युक्तस्वातन्त्र्य-घटनप्रकारः कथमिति चेत्, स्वराडि त्यस्य कर्मवश्यो न भवति इत्यर्थः, एवञ्चेत्, साम्यघटनप्रकारः, कथमिति चेत्, **साम्यम्भोगमात्रे**, (४/४/२१) सायुज्यमुक्त्युक्तिश्च अस्यैवम्, न सर्वदासाधर्म्यम्, जगद्व्यापारऽभावात्, (४/४/१७) जगन्नियमनादीनि न सन्तिचेत्, भोगसाम्यघटनप्रकारः कथमिति चेत्, तेषामुभयोरपि साम्येन अनुकूलतया प्रकाशनात् घटते, **अशरीरं वा वसन्तं न प्रियाऽप्रिये स्पृशतः** (छा० ८/१२/१) इत्युक्तप्रकारेण शरीरशून्यस्य कैङ्कर्यं न घटत इति चेत्, (४/४/१०) **स एकधा भवति, द्विधा भवति** (छा० ७/२६/२) इति सहारीर इति कथनात् घटते, (४/४/११/१३) (अनेन सशरीरत्वं सिद्धम् पा०) **अशरीरम्** इति कर्मकृतशरीरमस्य नेत्यर्थः, **न ह वै शरीरस्य सतः प्रियाऽप्रिययोरपहतिरस्ति** (छा० ८/१२/१) इति, शरीरविशिष्टश्चेत्, सुखदुःखे किं न भवत इति चेत्, तत्रोक्तं कर्मकृतशरीरम्। शरीरञ्चेत् कर्मकृतमेव

भवतीति वक्तुं न शक्यते, भगवत् विग्रहस्य कर्मकृतत्वाऽभावात्, तस्य सर्वशक्तित्वेन, सत्यसङ्कल्पत्वेन तादृशशरीरसम्भवेऽपि अस्य तन्न घटत इति वक्तव्यम्, तत् सङ्कल्पेन अस्याऽपि तद्घटनात्, **सङ्कल्पादेवाऽस्य पितरः समुत्तिष्ठन्ति** (छा० ८/२/१) इति, सत्यसङ्कल्पत्वेन कथनात् अस्य सङ्कल्पादपि शरीरं घटते (सू० ४/४/८/९) अनेन स शरीरत्वमपि सिद्धम् । ईश्वरस्य सत्यसङ्कल्पत्वेन पुनरावृत्तिरपि घटेतेति चेत्, (तन्न घटते० पा०) **प्रियो हि ज्ञानिनोऽत्यर्थम्** (गी० ७/१७) **स महात्मा सुदुर्लभः** (गी० ७ /१९) इति वक्तुरीश्वरस्यैतत्संसारणाऽघटनात्, संसारहेतुभूतकर्मणां निरवशेषनिवृत्ते (श्च):, **न च (स) पुनरावर्तत्ते** (छा० ८/१५/ १) **इमं मानवमावर्तं नावर्तन्ते** (छा ४/१५/६) –

**मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।**
**नाप्नुवन्ति महात्मानः संसिद्धिं परमाङ्गताः।।**

(गी० ८ /१५) **मा मुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते** (गी० ८ /१६) इत्युक्तेश्च, पुनरावृत्तिप्रसङ्ग एव नास्ति (४/४/२२ [१]सूत्रार्थः)।

(१५) तस्मात् सविभूतिकसमस्तकल्याणगुणत्वपरमात्मयाथात्म्याऽनुभवजनितप्रीतिकारितकैङ्कर्यमेव (परमः) पुरुषार्थः।

(१६) एतत्पुरुषार्थस्य प्रतिबन्धकः सन्, एवं परमात्मयाथात्म्याऽनुभवेन, निरतिशयाऽऽनन्दयोग्य आत्मा, ईश्वरीयस्वरूपरूपगुण विभूतिचेष्टितानि, स्वस्वरूपयाथात्म्यञ्च अज्ञात्वा, स्वस्वरूपविपरीतेषु क्षणक्षरणस्वभावत्वादि (हेय) धर्मविशिष्टेषु, नानाविधदेहेषु आत्मबुद्धिं कृत्वा, देहानुबन्धिनो भगवदीयाश्च सन्तो गृहक्षेत्रारामादीन् आत्मीयान्, तान् भगवदीयत्वाऽऽकारेण विना, स्वातन्त्र्येण भोग्यांश्च ज्ञात्वा तल्लाभाऽनुकूलेषु रागं (:) तत्प्रतिकूलेषु द्वेषञ्च कृत्वा, (विधाय ङ० पा०) तल्लाभसाधनेषु परस्तोत्रपरहिंसादेवतान्तरभजनेषु अन्वीय, तेन नानाविधशरीराणि परिगृह्य बाल्ययौवनवार्धक्यादि अवस्थासु, आध्यात्मिकादितापत्रयतप्तः, मरणदशायां याम्यकिङ्करपीडितः, दुःखेन शरीराणि विहाय, यातनाशरीरेषु प्रविश्य, रौरवादि नरकान् गत्वा, नानाविधदुःखान् अनुभूय, धूमरात्र्यपरपक्षदक्षिणाऽयन पितृलोका-

१. जगद्व्यापारवर्जाधिकरणे - अतावृत्तिश्शब्दादनावृत्तिश्शब्दात् इति सूत्रार्थः ।

काशचन्द्रक्रमेण उपरितनलोकेषु गत्वा, नारकिदर्शननैरन्तर्येणाऽधिकदुःखाऽनुभवेन, असुरराक्षसपीडया, पतनभयेन च दुःखबहुलानि सुखानि अनुभूय, द्युपर्जन्यपृथिवी-पुरुषयोषित्स्थानेषु नानाविधदुःखानि चक्रनेमिक्रमेण यथाऽनुभवति तथा करोति कर्मसम्बन्धः।

(१७) **अनृतेन हि प्रत्यूढा** (छा० ८/३/२) **तस्मिन् च अन्ये (न्यो) मायया सन्निरुद्धः** (श्वे०४/९)। **मम माया दुरत्यया** (गी० ७/१४) **वस्त्वस्ति किम्** (वि०पु०२/१२/४१) **महीघटत्वम्** (वि०२/१२/४२) **तस्मात् न विज्ञान मृतेऽस्ति किञ्चत्** (वि०२/१२/४३) **ज्ञानं विशुद्धम्** (वि०२/१२/४४) **सद्भाव एवम्** (वि० २/१२/४५) इति श्रुतीतिहासपुराणेषु अनृत-माया-(अन्यथात्वम्)नास्ति-असत्यमित्यादिभिः शब्दैः कथनात् मिथ्याभूतम् अज्ञानं बन्धहेतुः बन्धश्च मिथ्याभूत इति केचन अभिदधुः, (शङ्कराचार्याः) तदनुपपन्नम्, तत्र प्रमाणाऽभावात्, अनेकप्रमाणबाधितत्वाच्च।

**अनृत शब्देन कथ्यमानं सांसारिकफलहेतुभूतं कर्म।**
**ऋतेतर मनृतम् ऋतम् कर्मफलम् ऋतं पिबन्तौ।।**

(कठो० १/२/१) इत्युक्तेः **एतं ब्रह्म लोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः** (छा० ८/३ /२) इत्यत्र **अनृत** मित्युच्यमानं भगवत्प्राप्तिविरोधि कर्म, **माया** इत्युच्यमाना प्रकृति **मायान्तु प्रकृतिं विद्यात्** (श्वे० ४/१०) इत्युक्तेः प्रकृतिर्माये-त्युच्यते, विचित्रकार्यकरणात्। **वस्त्वस्ति किं** मित्यादिश्लोकैः, विनाशः कथ्यते, न मिथ्यात्वम् मिथ्याभूतञ्चेत् शुक्तिकरजतमिव, रज्जुसर्प इव बाधितं भवेत् **मृत्तिकेत्येव सत्यम्** (छा० ६/१/४) **सर्वमेतत् ऋतं मन्ये यन्मां वदसि केशव** (गी० १०/१४) –

**कालस्य हि च मृत्योश्च जङ्गमस्थावरस्य च।**
**ईशते भगवानेकः सत्यमेतत् ब्रवीमि ते।।**

(भा० उद्यो० ६७/१२) –

**सत्यं सत्यं पुनः सत्यमृद्धृत्य भुजमुच्यते।**
**वेदात् शास्त्रं परं नास्ति न दैवं केशवात्परम्।।**

( नृसिंह प० १८/३३) इत्यादि प्रमाणैश्च विरुध्येत। तस्मात् बन्धो बन्धहेतुश्च परमार्थः।

(१८) **तत्त्वमसि** (छा० ६/८७) **अयमात्मा ब्र० ह्म** (बृ० ६/४५) इति ब्रह्मणो जीवस्य च तदात्म्यकथनात् ब्रह्मैव संसरति इति उक्तिरपि असङ्गता ब्रह्म नित्यनिर्दोषं, समस्तकल्याणगुणात्मकं, जीवात् विलक्षणमिति कथयद्भिः, **अपहतपाप्मा** (छा० ८/१/५) **यः सर्वज्ञः** (मुण्डो० १/१/१०) **पृथक् आत्मानम्** (श्वेता० १/६) इत्यादिशास्त्रे विरोधात्, **तत् त्वमसि** इत्यादि वाक्येषु शरीरशरीरिभावं वदति तस्मात्, **तस्मिन् चान्यः**, **तयोरन्यः पिप्पलं स्वाद्वत्ति** (मुण्डो ३/१/१) **ईश्वर (:) प्रेरितः** इत्युक्तप्रकारेण जीवः संसरति।

(१९) इतः परं बन्धनिवृत्त्युपायः न्यास-त्याग-निक्षेपशरणागत्यादिशब्दवाच्यं सत्यवचनादिधर्मवत् सर्वाऽधिकारं परमात्मप्रपदनम्। (३/३/५६)। तच्च भगवदाज्ञातिवर्तननिवृत्ति (:), भगवदानुकूल्यसर्वशक्तित्वाऽनुसन्धानप्रभृतिसहितः, याञ्चागर्भो, विजृम्भरूपज्ञानविशेषः। तत्र ज्ञेयाकार ईश्वरस्य निरपेक्षसाधनत्वम् ज्ञानाकारो व्यवसायात्मकत्वम्। एतच्च शास्त्रार्थत्वात् सकृत्कर्तव्यम् **मुमुक्षर्वै शरणमहं प्रपद्ये** (श्वे०६/१८) **तस्मात् न्यासमेषां तपसामतिरिक्तमाहुः** (तै०५०) **त्वामेव शरणं प्राप्य** (जित-१/४) **अहमस्मि अपराधानाम्** (अहिर्बुध्न सं० ३६/३४) **अनन्यसाध्ये स्वाभीष्ट** (विष्वक्सेनसं०) **यत् येन कामकामेन** (अहि० सं० ३६/२९) –

**यानि निश्श्रेयसार्थानि चोदितानि तपांसि वै।**
**तेषांन्तु तपसां न्यासं अतिरिक्तं तपः श्रुतम्।।**

(अहि०सं०३६/४०) **भव शरणम्** (वि०पु०३/७/३२) **सकृत् एव प्रपन्नाय** (रामाय०युद्ध० १८/२४) **मामेकं शरणं व्रज** (गी०१८/६०) इत्यादीन्यत्र प्रमाणानि एतदधिकारिणः परमप्राप्यतृष्णा, प्राप्यान्तरवैतृष्ण्य, भगवदौदार्यगुणाऽध्यवसाय-विशिष्टाः, अस्य चाङ्गमाकिञ्चन्यम्, अस्य चाऽधकारी प्रपत्त्यनुष्ठानाऽनन्तरमेव मोक्षो मे भूयात् इति स्थितश्चेत्, तदैव फलं भवति, उपायस्य तदैवनिष्पत्तेः, **साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्याऽपि भूयसी** (पाञ्चरात्रे) इति प्रारब्धस्यापि नाशाच्च। तदभावदशायाम्, **मा शुचः** इत्युक्ति न घटते, एवमार्तौसत्यामपि

केषाञ्चित् स्थितिः ईश्वरेच्छया, तस्य प्रयोजनम् संसारिसंरक्षणविग्रहाऽनुभव-प्रभृतिकानि, प्रपत्त्युत्तरकालेऽपि संसारे सङ्गाऽनुवृत्तिश्चेत् सङ्गनिवृत्तिपर्यन्तं स्थापयति, तर्हि दुःखांशापनोदनाभावः किं निबन्धन इति चेत्, ईश्वरस्य हितपरत्वेन वैराग्यजननार्थं स्थापयति।

(२०) इदञ्च न स्वातन्त्र्येणैव कार्यकारणमिति, किन्तु भक्तियोगमुत्पाद्य कार्यं करोति, भक्तिश्च, **भक्त्या त्वनन्यया** (गी०११/५४) **य एव एष वृणुते** (मुण्ड० ३/२/३) **भजतां प्रीतिपूर्वकम्** (गी०१०/१०) **प्रियो हि ज्ञानिनः** (गी०७/१७) इत्युक्तप्रकारेण, स्मर्तव्यविषयस्य प्रियतमत्वेन स्वयमपि अत्यर्थप्रियो, भावनाप्रकर्षेण, **तस्मिन् दृष्टे** (मुण्ड०२/२/९) **आत्मा वा अरे द्रष्टव्यः** (बृ०६/५/६) इत्युक्त प्रकारेण प्रत्यक्षसमानाकारः, **ध्रुवा स्मृतिः** (छा०८/२६/२) इत्युक्तप्रकारेणा-ऽविच्छिन्नस्मृतिरूपश्च ध्यानविशेषः। (ब्र०सू० ४/१/१) इदञ्च प्रतिदिनमभ्यासाऽ-तिशयेन। **स खलु एवं वर्तयन् यावदायुषम् ब्रह्मलोकमभिसम्पद्यते** (छा० ८/१५/१) इत्युक्तप्रकारेण आप्रयाणमननुवृत्ता चेत्, कार्यकारिणी न भवति। (४/१/१२) एवं भूतध्याननिष्पत्तिः, **यज्ञेन दानेन तपसानाशकेन ब्राह्मणा-विविदिषन्ति** (बृ०६/४/२२) **यज्ञदानतपः कर्म न त्याज्यम्** (गी० १८/५) **स्वकर्मणा तमभ्यर्च्य** (गी० १८/४६) इत्युक्तप्रकारेण भगवत्समाराधनरूपेण, फलाऽभिसन्धिविधुरेण, नित्यनैमित्तिककर्माऽनुष्ठानेन, **शान्तो दान्त उपरतस्ति-तिक्षुः समाहितो भूत्वा आत्मन्येव आत्मानं पश्येत्** (बृ० ६/४/२३) इत्युक्त-शमदमादिभिश्च। ( ३/४/२६/२७) अनेनच उक्तकर्माऽनुष्ठानेन, **धर्मेण पापमपनुदति** (तै० ५० अनु०) इत्युक्तरीत्या पुण्यपापे नश्यतः, तेन रजस्तमसोर्मस्त (नत) शिरसोः सत्वमुद्भूतं भवति, तेन ध्यानं निष्पन्नं भवति, (३/४/३५)।

(२१) एवमव्यवहितं व्यवहितञ्च परमात्मप्रपदनमेव प्रतिबन्धकनिवर्तकम्।

(२२) केचन, **तत्त्वमस्या** दिवाक्यजन्यवाक्यार्थज्ञानमेव उपायमाहुः, (शङ्करा-चार्याः) तत् अनुपपन्नम्, ध्यानादिविधीनां वैय्यर्थ्यप्रसङ्गात्, अनन्तरं मुक्तत्वप्रसङ्गाच्च, मुक्तश्चेत् अस्य सुखदुःखाऽनुभवो न भवेत्, ज्ञान (मात्र) मविधेयमपि भवेत्।

(२३) (केकय) जनकादीनाम् कर्मनिष्ठत्वात्, **कुर्वन्ते नेह कर्माणि जिजीविषेत् शतं समाः** (ईशावा० २) इति यावज्जीवं कर्माऽनुष्ठानकथनाच्च कर्मैव

पुरुषार्थसाधकम्, तस्य च कर्मणोऽनुष्ठानदशायाम्, देहातिरिक्तस्य आत्मनो ज्ञेयत्वात्, ज्ञानं तदङ्गमिति केचन अभिदधुः, (भाट्टप्रभाकरादयः) (३/४/७) तदप्यनुपपन्नम्, (३/४/८) **किमर्थं वयं यक्ष्यामहे** इति ज्ञानवतः कर्मत्यागदर्शनात्, (३/४/९) अग्निहोत्रदर्शपौर्णमासादिशून्यानाम्, ऊर्ध्वरेतसां, ब्रह्मनिष्ठोत्पत्तेः, (३/४/१७) **किं प्रजया करिष्याम** (बृ०) इति विरक्तस्य गार्हस्थ्यत्यागसद्भावात्, (३/४/१५) **क्षीयन्ते चाऽस्य कर्माणि** (मुण्ड० २/२/५) इति विद्यया पुण्य-पापयोर्नाशोत्पत्तेश्च, (३/४/६) विद्यायाः कमाङ्गत्वाऽभावात्। विद्यानिष्ठः कर्माऽनुतिष्ठति इत्येतत् किमिति चेत्, झविद्याम्प्रति कर्मणोऽङ्गत्वात् अनुतिष्ठति, यावज्जीवकर्माऽनुष्ठानकथनञ्च अविरक्तानाम्, (३/४/१७) भा०ट।

(२४) ज्ञानकर्मसमुच्चय उपाय इति पक्षोऽप्यनुपपन्नः, (यादवप्रकाशः) **अविद्यया मृत्युं तीर्त्वा** (ईशा० ११) **यज्ञेन दानेने** ति कर्मणो ज्ञान (विद्या) विशेषत्वेन विनियोगात्।

(२५) ननु प्रपत्तिः स्वतन्त्रोपायश्चेत्, **नान्यः पन्था** (श्वे० ३/८) इति भक्तिं विना उपायो नास्तीत्यनेन किं न विरुध्येतेति चेत्, प्रपत्तेरपि ज्ञानविशेषत्वेन न विरुध्येत, गुरु लध्वोर्विकल्पघटनप्रकारः कथमिति चेत्, **उपायः सुकरः सोऽयं दुष्करश्च मतो ममे** (विष्वक्० सं०) ति अध्यवसायगौरवेण प्रपत्तेरपि गुरुत्वात् घटते, लघुत्वेऽपि भक्त्यङ्गेषु कर्मसु (कर्तव्येषु कर्मसु) शाखाभेदेन, वर्णाश्रमभेदेन च गुरुलघूपाय (घुभाव) सद्भावेऽपि विकल्पघटनमिवाऽत्राऽपि विकल्पो घटते, उपायान्तरनिषेधः गुरुलघुविकल्पौट, अङ्गाऽङ्गिभावः, विषयभेदश्च, अधिकारिभेदप्रभृतितो घटेत।

(२६) (१)' अखिलभुवनजन्मस्थेमभङ्गादिलीलस्य, विधिशिवशतमखप्रमुख-निखिलदेवतानिर्वाहकस्य, (प्रथमप्रकरणस्यार्थः संक्षिप्तः)। (२) मुमुक्षूपास्यस्य, मोक्षप्रदस्य, श्रीमन्नारायणस्य (२ प्रकरण०)। (३) देहेन्द्रियादिविलक्षणाः, सर्वेऽप्या-त्मानः, सर्वप्रकारपरतन्त्राः। (३ प्रकर०)। (४) तेषां स्वरूपाऽनुगुण पुरुषार्थः, सकलबाह्यकुदृष्टिदृष्टमोक्षविलक्षणपरमात्मकैङ्कर्यम्, तत् प्रतिबन्ध - की भूतानाल्पाचितानन्ताज्ञातिलङ्घनजनितभगवन्निग्रह निवर्हणोपायः, निखिलजन्तुजात-

शरण्य, श्रीमन्नारायणचरणारविन्दशरणागतिः, इति ज्ञानम् (विशेषः) तत्त्वज्ञानं भवति, (४ प्रक०)।

**इति श्रीरामानुजसिद्धान्तसारार्थनिर्णयसमर्थ-**
**श्रीभगवल्लेकाचार्यकृतिषु [१]अष्ठादशरहस्येषु,**
**तत्वशेखरनामाऽयं ग्रन्थः सम्पूर्णः।**

प्राप्यभूतपरब्रह्माद्यर्थपञ्चकनिर्णयः।
तत्वशेखरनामाऽयं लोकाचार्येण दर्शितः (ख)।।

सर्वजनरक्षणेच्छुः समकृत यस्तत्वशेखरग्रन्थम्।
तद्भुवनदेशिकश्रीचरणद्वन्द्वं सदैव शरणम्मे (ङ)।।

भवार्णवनिमग्नाय प्लवरूपमिदं कृतम्।
लोकार्येण महार्यन्तं भजामि वरदांशजम्।।

**।। चतुर्थप्रकरणं समाप्तम्।।**

१. मुमुक्षुप्पडि।। (१) प्रमेयशेखरम्।। ६।। नवरत्नमाला।। ११।। तनिप्रणवः ।। १६।। तत्वत्रयम्।। (२) प्रपन्नपरित्राणम्।। ७।। यादृच्छिकप्पडि।। १२।। द्वयम्।। १७।। अर्थञ्चकम्। (३) सारसङ्ग्रहः।। ८।। परन्दपडि।। १३।। श्रीवचनभूषणम्।। ४।। संसारसाम्राज्यम्।। ९।। श्रियःपतिप्पडि।। १४।। चरमम्।। १८।। अर्चिरादि।। ५।। नवविधसम्बन्धः।। १०।। तत्वशेखरम्।। १५।।

श्रीरस्तु

श्रीमते रामानुजाय नमः श्रीमल्लोकगुरवे नमः

श्रीमद्वरवरमुनये नमः

# रहस्यत्रयार्थरत्नमाला

## श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीता।

## श्रीमन्त्रप्रकरणम्

**जगद्देशिकैस्सर्वशास्त्राब्धिमग्नैः**
**मुमुक्षूपकृत्यै कृतं द्राविडोक्त्या।**
**मुमुक्षुप्पडीति प्रसिद्धं रहस्यं**
**सुराणां गिरा पद्यबद्धं करोमि।।**

१. रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा।
२. त्राद्यं तु रहस्यं स्यादष्टाक्षरमहांमनुः।।
३. तन्महामन्त्रमाहात्म्यस्यानुगुण्येन सात्विकैः।
कार्यं तदनुसन्धाने प्रेम्णा गोप्यं यथा तथा।।
४. मन्त्रे मन्त्रार्थदैवे च गुरौ मन्त्रोपदेष्टरि।
प्रेमभूमविशिष्टानां कार्यसिद्धिरनर्गला।।
५. विस्मृत्य स्वस्वरूपं च तथा सर्वेश्वरं हरिम्।
प्रभ्रष्टास्तस्य कैङ्कर्यात् भ्रंशदुःखेन चोज्झिताः।
संसारसागरे घोरे ये निपत्यात्र विह्वलाः।।
तेऽपि विज्ञानसम्पत्त्या समुत्तीर्णा भवन्त्विति।
कृपया परयाविष्टो विष्णुर्बदारिकाश्रमे।
प्राचीकशन्महामन्त्रं स्वयं शिष्यो गुरुश्च सन्।।
६. लौकिका न विजानन्ति शिष्यलक्षणमित्यतः।
शिष्यश्चाभूद्धरिः स्वस्यानुष्ठानात्तद्विबोधयन्।।
७. शास्त्रजन्यं तु यज्ज्ञानं तत्स्वार्जितधनोपमम्।
अष्टाक्षरोदितं ज्ञानं पैतृकद्रविणोपमम्।।

८. भगवद्विषया मन्त्रा असङ्ख्येयाः प्रकीर्तिताः।।
९. अव्यापका व्यापकाश्चेत्येवं ते द्विविधा मताः।।
१०. अव्यापकेभ्यो मन्त्रेभ्यो व्यापका गुरवस्त्रयः।।
११. श्रीमानष्टाक्षरो मन्त्रस्तेषु प्राधान्यमश्नुते।।
१२. अशिष्टसङ्ग्रहोऽपूर्तिश्चासाते मन्त्रयोर्द्वयोः।।
१३. वेदान्ता मुनिवर्याश्च दिव्यसूरिवरास्तथा।
पूर्वाचार्याश्च मन्त्रेऽस्मिन्नतीवादरशालिनः।।
१४. वाच्यप्रभावादधिकं वाचकस्य तु वैभवम्।।
१५. वाच्ये सत्यपि दूरस्थे नेदीयानेष रक्षति।।
१६. द्रौपद्यास्तु विपत्काले वस्त्रमेष ह्यवर्धयत्।।
१७. अक्रमेणानुसन्धानेऽप्येष रक्षां न मुञ्चति।।
१८ **कुलम्तरुमिति** श्रीमत्परकालोक्तिरीतितः।
सर्वापेक्षितसन्दानसमर्थोऽयं महामनुः।।
१९. ऐश्वर्यमात्मभोगं वा भगवल्लाभमेव वा।
नृभ्यः कामयमानेभ्यः तत्सर्वं प्रददात्यसौ।।
२०. कर्मधीभक्तियोगेषु प्रवृत्तानां विरोधिनः।
विनिवर्त्याऽथ तान्योगान्निर्वर्तयति मन्त्रराट्।।
२१. अथ प्रपत्तिनिष्ठानां स्वरूपज्ञानदायकः।
कालक्षेपस्य हेतुस्स्याद्भोगस्याप्येष मन्त्रराट्।।
२२. **मत्तेलाम् पेशिलु**मिति श्रीसूक्त्युक्तप्रकारतः।
ज्ञातव्यास्सकला अर्था अष्टाक्षर्यां चकासति।।
२३. ते चार्थाः प्रथिताः पञ्चेत्यर्थपञ्चकनामतः।।
२४. एतदर्थावबोधात्प्राक् पूर्वाचार्या न मेनिरे।
आत्मसत्ताम्, अथार्थज्ञाः कालं नान्येन चिक्षिपुः।।
**पिरन्दपिन् मरन्दिल्लेनिति** सूक्तिरिहेक्ष्यताम्।।
२५. वाचकापेक्षया वाच्ये प्रावण्यातिशयं प्रति।।
हेतुस्तु - प्रापकप्राप्ये हरिरेवेति धारणा।।
२६. स्वरूपं च स्वरूपानुरूपं प्राप्यमिहोच्यते।।

२७. प्रमेयशेखरग्रन्थेऽप्यार्चिरादिगतौ तथा।
फलवेषः पुराऽस्माभिः प्रत्यपादि विशेषतः।।
२८. अष्टाक्षरो मनुस्सोऽयं पदत्रितयमण्डितः।।
२९. शेषत्वं पारतन्त्र्यं च कैङ्कर्यमिति तु क्रमात्।
३०. त्रयोऽर्थाः परिकीर्त्यन्ते त्रिभिरेतैः पदैरिह।।
३१. अकारश्चाप्युकारश्च मकार इति चाक्षरैः।
३२. त्रिभिर्घटित ओङ्कारः प्रणवः प्रथमं पदम्।
३३. दध्ना सम्पूरिते कुम्भत्रये मथित उद्गतम्।
नवनीतमिवोङ्कारः त्रिवेद्युद्यत्रिवर्णकः।।
३४. तस्मादसावशेषाणां वेदानां सार इष्यते।।
३५. सर्वेषां जगतामादिं सर्वरक्षणदक्षिणम्।
भगवन्तमकारोऽत्र प्रतिपादयति स्फुटम्।
सर्वेषामपि शब्दानां यतोऽसावादिकारणम्।
नारायणपदस्यापि सङ्ग्रहात्मा यतोऽपि वा।।
३६. अनिष्टध्वंसनं चेष्टप्रापणं रक्षणं मतम्।।
३७. तत्तज्जीवानुगुण्येन तदेतद्द्वितयं भवेत्।।
३८. संसारिणां विरोधी स्याच्छत्रुपीडादिसम्भवः।
अन्नपानीयताम्बूलाद्येतेषां स्यादपेक्षितम्।।
मुमुक्षूणां विरोधी स्यात्सम्बन्धस्संसृताविह।
अपेक्षितममीषां स्याद्वैकुण्ठस्थानसेवनम्।।
मुक्तानामपि नित्यानां शत्रुः कैङ्कर्यविप्लवः।
अपेक्षितममीषां स्यात्कैङ्कर्यस्याभिवर्धनम्।।
३९. ईश्वरव्यतिरिक्तानां रक्षकत्वमसम्भवि।
प्राक्प्रपन्नपरित्राणे तदिदं विशदीकृतम्।।
४०. रक्षणावसरे लक्ष्मीसम्बन्धावश्यकत्वतः।
श्रीसम्बन्धानुसन्धानमकारेऽस्मिन्नपेक्षितम्।।
४१. श्रीसेनापतिमिश्राणां सूक्तिरत्र प्रदर्श्यते।

यदि श्रीर्भगवद्वक्षो विजहाति कदाचन।
तर्ह्यकारं च सा लक्ष्मीर्विहातुं प्रभवेदिति।।

४२. भर्तुश्शय्यां शिशोर्डोलां न जहाति यथा प्रसूः।
तथा प्रथममन्त्यं च पदं लक्ष्मीर्न मुञ्चति।।

४३. नन्दगोपं च कृष्णं च यशोदा न जहौ किल।।

४४. भृत्यस्वीकारकालेषु व्यवस्थापत्रलेखने।
गृहीणीनामनिर्देशो न स्याद्यद्यप्यथापि तु।
दासवृत्तिविधानानि गृहिण्याश्च भवन्ति हि।
तथाऽस्माकं रमादास्यं लोकन्यायेन चाक्षतम्।।

४५. इत्थञ्च दिव्यदम्पत्योर्नैव पार्थक्यसम्भवः।।

४६. प्रभाप्रभावतोर्यद्वत्पुष्पसौरभयोर्यथा।।

४७. एवं चोद्देश्य आसीन्नः संश्लेषः श्रीतदीशयोः।।

४८. लुप्यतेश्म चतुर्थ्यत्र विभक्तिः प्रथमाक्षरे।।

४९. व्यक्ततुर्यविभक्त्याढ्यनारायणपदस्य यत्।

५०. अकारस्सङ्ग्रहात्मा, तच्चतुर्थीलोपनिश्चयः।।

५१. भगवच्छेषता प्रोक्ता विभक्त्या तुर्यया तया।।

५२. दुःखरूपं हि शेषत्वं दृश्यते जगतीति चेत्।

५३. न तथा नियमः कश्चित्सुवचो भवति ध्रुवम्।
विषयेऽभिमते दास्यं सुखरूपं हि दृश्यते।।

५४. स एष शेषभावस्तु गुणमूलक इष्यते।
यतस्त्वकारे कल्याणगुणानामस्ति कीर्तनम्।।

५५. शेषत्वमेव नियतं स्वरूपं प्रत्यगात्मनः।।

५६. शेषत्वविरहे नूनं स्वरूपं प्रच्युतं भवेत्।।

५७. स्वतन्त्रोऽहमिति ध्यानमात्मापहरणं खलु।
स्वतन्त्रतायां सिद्धायाम् आत्मनाशो विनिश्चितः।।

५८. अवधारणमाचष्ट उकारस्स्थानमानतः।।

५९. आत्मनो नान्यशेषत्वमित्युकारेण बोध्यते।।

६०. लक्ष्मीशेषत्वमप्याहुः केचितत्सिद्धमुकारतः।

६१. ततोऽपि ह्यन्यशेषत्वव्यवच्छेदो विशिष्यते।
६२. देवशेषे पुरोडाशे श्वभोग्यत्वप्रक्लृप्तिवत्।
चेतने भगवच्छेषे क्षुद्रशेषत्वकल्पनम्।।
६३. ईशशेषत्वतोऽप्यन्यदास्यत्यागो विशिष्यते।
६४. **मरन्दुम्पुरमित्यादिः** भक्तिसारोक्तिरस्ति हि।।
६५. एतेन स्वस्य चान्येषां शेषभावो व्युदस्यते।।
६६. पञ्चविंशाक्षरत्वेन ज्ञानवाचित्वतोऽपि च।
मकारः प्रत्यगात्मानं प्रतिपादयति स्फुटम्।।
६७. सोऽयं समष्टिवाची स्याज्जात्येकवचनं यतः।।
६८. सोऽयं समष्टिवाची स्याज्जात्येकवचनं यतः।।
६९. एतेनात्मां प्राज्ञ इति देहाद्व्यावृत्तिरीरिता।।
७०. सा तु प्रपञ्चिता पूर्वं प्रबन्धे तत्वशेखरे।।
७१. सौरभेण यथा पुष्पं तेजसा च यथा मणिः।
काम्यते, शेषभावेन तथैवात्मापि काम्यते।।
यदि शेषत्वदारिद्र्यं स्यात्तर्ह्यु**यिरिना लिति**।
श्रीशठारिमुनीन्द्रोक्तरीत्या त्यागार्ह एव सः।।
एवमात्मकशेषत्वप्रभावस्फूर्तये परम्।
पुरस्ताच्छेषतां प्रोच्य पश्चादात्माऽभिधीयते।।
७२. इत्थञ्च प्रणवेनोक्तः सम्बन्धश्शेषशेषिणोः।
अनुसन्धीयतां - **कण्णपुरमोन्रुडयार्क्किति**।
७३. अथ तामरयाशळ्केळवनिति कासारयोगिगीः।
अपि प्रणवसारार्थत्वेन चिन्तनमर्हति।।
७४. अत्राकारमकाराभ्यां रक्षिरक्ष्यावुदीरितौ।
उक्ते चतुर्थ्युकाराभ्यां रक्षाहेतुप्रयोजने।।
७५. इतः परं मन्त्रशेषात्प्रणवार्थः प्रपञ्च्यते।
७६. उकारं विवृणोत्यत्र द्वैतियीकं नमः पदम्।।
नारायणपदं तावदकारं विवृणोत्यथ।
मकारं तु चतुर्थी सा, यद्वा नारपदं तथा।।

७७. नन्वेषा विवृतिः कस्मात् व्युत्क्रमेण कृतेति चेत्।
विरोधिक्षयतः पश्चादेवानुभवसङ्गतेः।।
७८. नमो नेति म इत्येवं पदद्वयशरीरकम्।।
७९. न इत्यनेन स्वार्थत्वमुच्यते, नेति तत्क्षयः।।
८०. तथा च नमसा स्वार्थभावव्युदसनं कृतम्।।
८१. यः कश्चिदन्यशेषत्वमुररीकुरुते यदि।
तर्हि स्वातिशयैरीशः तं स्वाधीनयितुं क्षमः।
स्वशेषत्वरते मर्त्ये तत्प्रसक्तिकथैव न।।
८२. नमसा शत्रुसंहारः शत्रवो हि त्रयो मताः।
८३. स्वरूपे प्रापके प्राप्ये त्रयः खलु विरोधिनः।।
८४. **याने नीयेन्** इति प्रोक्ता स्थितिराद्यरिपुक्षये।
**कळैवाय् तुम्ब**मित्युक्ता स्थितिर्मध्यरिपुक्षये।।
**मत्तैनम्काम**मित्युक्ता स्थितिरन्त्यरिपुक्षये।।
८५. ममता स्वात्मनाशाय, स्वरूपोज्जीवनं नमः।।
८६. स्वरूपं चाप्युपायं च फलं चैतत्प्रदर्शयेत्।।
८७. **मङ्गलम्तोळु**मित्युक्त्या स्वरूपमुपदर्शितम्।
**वेङ्कडत्तुरैवार्क्कि**त्याद्युक्त्योपायः प्रदर्शितः।
फलम् **अन्दितोळुम्शोल्लि**त्युक्त्या सन्दर्शितः।
८८. अत्र तद्भक्तशेषत्वानुसन्धानं विधीयते।
यत **उट्रदु**मित्यादिः प्रथते परकालगीः।।
८९. अकारे तदिदं केचिदुकारे केचिदूचिरे।।
९०. ईशस्य स्वार्थतैव स्यात्पारार्थ्यमचितो भवेत्।
आत्मनस्तूभयार्थत्वम्, इति धीर्नमसः पुरा।
अचित्समतया स्वार्थमात्मा स्वीक्रियतामिति।
प्रार्थना नमसा तावत्प्रकाशनमवापिता।।
९१. स्वरूपमात्मनां भोगदशायामीश्वरो यदि।
विनाशयेत्, तदा तत्राभ्यनुज्ञा नमसः फलम्।।
९२. रुणद्धि तादृशानुज्ञानं यत्, तदुक्तमधः पदे।
वक्ष्यते चोपरिष्टात्तच्चतुर्थ्यामपि पश्यत।।

९३. पारतन्त्र्यानुसन्धाने पुष्कला कृतकृत्यता।
तदभावे समस्तानां दुष्कृतानां कृतिर्ध्रुवा।।
प्राक्तेऽस्मिन्ननुसन्धाने सर्वाणि सुकृतान्यहो।
एतद्विरहितैर्मर्त्यैः क्रियमाणं मखादिकम्।
प्रायश्चित्तादिकं चापि निष्प्रयोजनमेव हि।
पारार्थ्यप्रतिपत्त्या तु प्रणाशस्सर्वपाप्मनाम्।
अशेषाणां फलानां च निष्पत्तिरनपायिनी।।
९४. नाराणामयनं यस्मात्तस्मान्नारायणो मतः।।
९५. नित्यवस्तुसमूहस्तु नारशब्देन कथ्यते।।
९६. ज्ञानानन्दामलत्वाद्याः ज्ञानशक्त्यादिका गुणाः।
वत्सलत्वसुशीलत्वप्रमुखाश्च वपुश्शुभम्।
सौन्दर्यसौकुमार्याद्या दिव्यभूषणसञ्चयः।
दिव्यायुधानि, लक्ष्म्यादिमहिषीवर्ग एव च।
छत्रचामरमुख्यानि, नित्यसूरिगणास्तथा।
दौवारिकाश्चण्डमुख्याः कुमुदाद्या गणाधिपाः।
मुक्ताश्च परमाकाशः प्रकृतिर्बद्धचेतनाः।
महदादिविकाराश्च कालश्चाण्डगणस्तथा।
अण्डान्तर्गतदेवादिपदार्थाश्च विवक्षिताः।।
९७. एतेषामाश्रयो यस्मात्तस्मान्नारायणो मतः।।
९८. यस्यैतान्याश्रयीभूतान्यसौ नारायणोऽथ वा।।
९९. व्युत्पत्तिद्वयतस्सिद्धिः परत्वसुलभत्वयोः।।
१००. यद्वाऽन्तर्यामितोपायत्वोपेयत्वोपलम्भनम्।।
१०१. **एम्बिरानेन्दै** इत्युक्त्या सर्वो बन्धुर्हरिर्मतः।।
१०२. तत्स्वप्यन्यपरेष्वस्मास्वसावस्मत्परो हरिः।।
१०३. नक्तं मठाशनं पुत्रे प्रापयन्ती प्रसूरिव।
अन्तर्यामी भवन्विष्णुस्सत्ताप्रभृति रक्षति।।
१०४. चतुर्थ्या सर्वकैङ्कर्यकारणेच्छा प्रकाश्यते।
**शेन्राल्कुडै** इति श्रीमत्सरोमुन्युक्तरीतितः।।

१०५. नन्वात्यन्तिकपारार्थ्यं नमस्सिद्धं समुद्वहन्।
आत्मा कथं नु कैङ्कर्यं प्रार्थयेदिति चेत्, शृणु।।

१०६. **पडियाय्** इति सूक्त्युक्तरीत्या कैङ्कर्यकामना।
स्वस्वरूपप्रयुक्तैव न त्वागन्तुकभावभाक्।।

१०७. अतो **वळुविला** इत्याद्युक्तयाञ्चा प्रदर्श्यते।

१०८. **कण्णारक्कण्डिति** श्रीसूक्त्युक्तप्रक्रियया चिताम्।
द्रष्टव्यदर्शनात्पूर्वं धीसङ्कोचोऽप्रसक्तिकः।
सदा पश्यन्ति यत्तस्मात्पश्चादपि स नोदियात्।।

१०९. **पळुदे पगल्** इत्यादि सूक्तिरीत्याऽनुतापिनाम्।
आयुश्शेषे तु निद्राया अवकाशस्सुदुर्लभः।।

११०. **अन्नु नान्** इति सूक्त्यर्थोऽत्रानुसन्धानमर्हति।।

१११. सर्वदेशदशाकालेष्वनुवर्तेत कैङ्करी।
इत्येवं **ओऴिविल्काल**मिति सूक्त्यावगम्यते।।

११२. सप्ततन्तुत्रिवद्भद्रसूत्रतुल्यो महामनुः।

११३. भगवानात्मनां भर्ता भवन्रक्षणकारकः।
इत्येष विषयस्सिद्धः श्रीमतोऽष्टाक्षरान्मनोः।।

११४. अहं भगवदेकार्हः स्वार्हो नैव भवान्यहो।
सर्वशेषिण ईशाय क्रियासं सर्वकैङ्करीः।।
इत्येवं मन्त्रराजार्थसारसङ्ग्रहचिन्तना।
श्रीमल्लोकगुरूत्तंसप्रख्यापितपथानुगा।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यविरचितायां रहस्यत्रयार्थरत्नमालायां मूलमन्त्रप्रकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# रहस्यत्रयार्थरत्नमाला

## श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीता

## द्वयप्रकरणम्

११५. प्राकृतेष्वभिमानस्य सवासनविसर्जनम्।
सर्वेश्वरस्य चैकस्य शरणत्वेन सेवनम्।
फलाप्तौ दृढविश्वासः तल्लाभे त्वरितात्मता।
यावज्जीवमिहार्चासु प्रवणेनान्तरात्मना।
गुणानुभवकैङ्कर्यैः कालयापननिष्ठता।
ईदृग्गुणमहाभक्तेष्वान्तरप्रेमपूर्णता।
श्रीमत्यष्टाक्षरे मन्त्रे द्वये च नियतात्मता।
आचार्ये प्रेमपूर्तिश्च कार्तज्ञ्यं च गुरौ हरौ।
ज्ञानवैराग्यशान्त्याढ्यसात्विकैस्सहवासिता।
आवश्यकमिदं सर्वं वैष्णवेष्वधिकारिषु।।

११६. एतेषामनुसन्धेयं रहस्यत्रितयं सदा।।

११७. सर्वेष्वपि प्रमाणेषु देहेन श्रेय उच्यते।
श्रीमत्यष्टाक्षरे मन्त्रे त्वात्मना श्रेय उच्यते।
उच्यते चरमश्लोके श्रेयस्सर्वेश्वरेण तु।
द्वयाख्ये मन्त्ररत्नेऽस्मिन् श्रिया श्रेय इतीर्यते।।

११८. अस्याः पुरुषकारत्वविरहे भगवान्हरिः।
न रक्षतीत्यसावर्थः श्रिया श्रेय इतीरितः।।

११९. आकिञ्चन्यानन्यभाक्त्वभागी योग्यो द्वयान्वये।।

१२०. प्राक्प्रपन्नपरित्राणे तयोर्वेषः प्रदर्शितः।।

१२१. द्वयेऽस्मिन्पूर्वखण्डेन - लक्ष्मीवरणपूर्वकम्।
भगवत्पादयुगलमुपायत्वेन गृह्यते।
अथ पाश्चात्यखण्डेन कैङ्कर्यं मिथुनेऽर्थ्यते।।

१२२. श्रीरिति श्रीमहालक्ष्म्या नामधेयं प्रसिद्ध्यति।

१२२. श्रीरिति श्रीमहालक्ष्म्या नामधेयं प्रसिद्ध्यति।
१२३. श्रीयते, श्रयते चेति व्युत्पत्तिद्वयमिष्यते।।
१२४. अस्याः श्रयणतस्सर्वे समुज्जीवन्ति मानवाः।
इयं च भगवत्पादावाश्रित्योज्जीवति स्वयम्।
इत्येतदर्थद्वितयं व्युत्पत्तिद्वयदर्शितम्।।
१२५. अस्याः पुरुषकारत्वेनेदानीमिह कीर्तनम्।।
१२६. सलिले वह्निजन्मेव शिशिरे हरिचेतसि।
मन्तुभिर्यदि कालुष्यं स्यात्, तर्ह्यस्याः कृते क्षमा।।
१२७. सेयं हि जगतां माता विष्णोश्च प्रियवल्लभा।
अस्मत्क्लेशासहिष्णुश्चेत्यतस्सुदृढकार्यकृत्।।
१२८. प्लवङ्गाधिपतौ या श्रीः क्षान्तिमावाहयत्पुरा।
तस्याः स्वप्राणदयितक्षामणं कः परिश्रमः।।
१२९. मतुपा - दिव्यदम्पत्योर्नित्ययोगः प्रकीर्त्यते।
१३०. इयमेव रमा विष्णोः स्वरूपस्य निरूपिका।
१३१. ईश्वरस्य स्वतन्त्रत्वं जीवानामपराधिताम्।
अप्यवेक्ष्य न विश्लेषं विन्दत्येषा क्षणेऽपि वा।।
१३२. निर्दिष्टमुभयं वीक्ष्य चेतनैर्भीः न धार्यताम्।।
१३३. हरिमाश्रयितुं मुख्या रुचिरेव परं चिताम्।
कालप्रतीक्षणं माभूदित्यनेनाभ्यधीयत।।
१३४. अस्यास्तु सन्निधानेन वायसो लब्धजीवितः।
तदभाववशादेव म्रियतेस्म दशाननः।।
१३५. बलात्पुरुषकारस्य स्वातन्त्र्ये हसिते ततः।
उन्मस्तकान्गुणान्वक्ति नारायणपदं शुभान्।।
१३६. वात्सल्यस्वाम्यसौशील्यसौलभ्यज्ञानशक्तयः।
ते गुणा इति विज्ञेयम् अथ तान्विवृणीमहे।।
१३७. वात्सल्यं, स्वापराधेभ्यो भयाभावाय कल्पते।
स्वामित्वं, घटयेत्कार्यमिति विश्वाससिद्धये।
सौशील्यं, स्वामितां दृष्ट्वा दूरतो यानहानये।

सौलभ्यं, चक्षुषा दृष्ट्वा समाश्रयणसिद्धये।
ज्ञानशक्ती, रिपुं हत्वा स्वानुभूत्युपक्लृप्तये।।

१३८. अत्रोक्तसुलभत्वस्यार्चावतारः परोऽवधिः।।

१३९. परव्यूहादिवन्नासौ, साक्षात्कारक्षणः खलु।।

१४०. सर्वे चैते गुणा अस्मत्स्वामिनि प्रेक्षणोचिताः।।

१४१. दिव्यायुधैरभयमुद्रिकया किरीटे-
नाऽऽविस्स्मितेन वदनेन च सुन्दरेणः।
पादेन पीठकमले विनिवेशितेन
रम्या स्थितिर्भगवतः परमा गतिर्नः।

१४२. रक्षकत्वं च भोग्यत्वं व्यज्येते शुभविग्रहे।।

१४३. चरणाविति शब्दार्थो युगलं पदयोरिति।।

१४४. द्वित्वेनोपायपूर्तिश्च रम्यता च प्रकाश्यते।।

१४५. यद्यप्युपेक्षकौ स्यातां लक्ष्मीश्च भगवानपि।
चरणौ न तथा स्याताम् एनयोर्दार्ढ्यमद्भुतम्।।

१४६. अवगाहनदेशोऽङ्घ्री शेषभूतस्य शेषिणि।
स्तनन्धयप्रजानां तु यथा मातुः पयोधरौ।।

१४७. चरणाविति निर्देशाल्लक्ष्यते दिव्यविग्रहः।
यस्त्विन्दिरायास्सदनं गुणानां च प्रकाशकः।
शिशुपालमपि स्वात्मसात्करोतिस्म शिक्षणात्।।

१४८. शरणं पदमेतत्तूपायत्वेनेति वाचकम्।
इष्टप्राप्तावनिष्टानां वारणे च तथेष्यते।।

१४९. प्राप्यस्यैव प्रापकत्वमेतेन प्रतिपाद्यते।।

१५०. पूर्वोक्तं त्रितयं तावत्प्राप्यत्वेन हि गण्यते।।
(लक्ष्मीशत्वगुणाढ्यत्वदिव्यदेहाढ्यतात्मकम्)

१५१. अनन्यगतिकत्वेन साधनीकुरुते ह्ययम्।।

१५२. उपायोऽयमुपायेभ्यो व्यावृत्तोऽन्येभ्य इत्यसौ।
अर्थः प्रकाश्यते वाक्या **च्चरणौ शरणं** त्विति।

१५३. वृणोमीत्यर्थमाचष्टे प्रपद्य इति यत्पदम्।।

१५४. वाचिकं कायिकं वा स्याद्वरणं न ततः क्षतिः।
**ज्ञानान्मोक्ष** इति श्रुत्या मानसं तन्नियम्यते।।

१५५. ईशस्यैवोपायभावाद्वरणस्यातथात्वतः।
त्रिभिश्च करणैस्तत्स्यादिति निर्बन्धनं न हि।।

१५६. यदा यदा प्रजायेत सत्वोन्मेषेण साध्वसम्।
तदा तदाऽनुसन्धातुं निर्देशो वार्तमानिकः।।

१५७. उपायान्तरवर्गेभ्यो मनसो निग्रहाय च।
कालक्षेपाय रस्यात्वाद्दुस्त्यजत्वेन च ध्रुवम्।
अनुसन्धानमेतत्तु नित्यमेवानुवर्तते।।

१५८. अथ काङ्क्षितसिद्ध्यर्थम् आवृत्तिरसकृद्भवेत्।
इति चेदिष्यते, नूनमुपायः प्रच्युतो भवेत्।।

१५९. अत्र चोत्तरवाक्येन प्राप्यं कैङ्कर्यमुच्यते।।

१६०. पूर्ववाक्योक्तवरणं न प्राप्यान्तरलब्धये।
इति बोधयितुं तावदिदानीं प्राप्यमुच्यते।।

१६१. त्यक्त्वोपायान्तराण्यन्त्योपायस्वीकरणं यथा।
तथोपेयान्तरं त्यक्त्वा चरमं प्राप्यमर्थ्यते।।

१६२. सर्वज्ञः किं न जानीयात्किमर्थं प्रार्थनेति चेत्।

१६३. प्रार्थनोक्तिश्रुतेस्तस्य त्वन्तरङ्गं प्रहृष्यति।।

१६४. लक्ष्मीसनाथायेत्यर्थमाचष्टे श्रीमते पदम्।।

१६५. तस्मिन्नुपाये सत्येषा विन्देत्पुरुषकारताम्।
तस्मिन्नुपेये सत्येषा प्राप्या कैङ्कर्यवर्धनी।।

१६६. मूलमन्त्रोदितं प्राप्यमत्र व्याख्यायते स्फुटम्।।

१६७. लक्ष्मणस्येव मिथुनकैङ्कर्यं नः परं धनम्।।

१६८. कैङ्कर्यसिद्धिस्वादुत्वे तत्रैव मिथुने परम्।।

१६९. नारायणायेत्यस्यार्थः सर्वेशेषिण इत्यसौ।।

१७०. दिव्यमङ्गलदेहश्च गुणाश्चात्र विवक्षिताः।।

१७१. शेषित्वस्य विवक्षाऽत्र प्राधान्यं प्रतिपद्यते।।

१७२. प्राप्ते हि विषये स्वाद्वी कैङ्कर्यस्य त्वनुष्ठितिः।।

१७३. एषा चतुर्थी कैङ्कर्यप्रार्थनायाः प्रकाशनी।।
१७४. कैङ्कर्यं नित्यमेतस्याल्लभ्यं प्रार्थ्यैव नित्यशः।।
१७५. शेषिणोऽतिशयाधानं शेषभूतस्य देहिनः।
स्वरूपलाभरूपं च प्राप्यं चेति प्रसिद्ध्यति।।
१७६. कैङ्कर्ये तु विरोध्यंशविनिवर्ति - नमः पदम्।।
१७७. स्वार्थत्वेन कृतिस्तस्य विरोधित्वेन कथ्यते।।
१७८. अविद्यादिकमप्यत्र प्रणाशं प्रतिपाद्यते।।
१७९. **उनक्के नाम्** इति प्रोक्तरीत्या भवितुमर्हति।।
१८०. सौन्दर्यमन्तरायोऽत्र तथा प्रागुक्तकैङ्करी।।
१८१. कैङ्कर्यप्रार्थनेवैतत्पदतः प्रतिपादिता।।
विरोधिक्षययाञ्चा च शाश्वती भवितुं क्षमा।।
१८२. **मरुन्दे नङ्गळित्येवं** खलु दिव्योक्तिवैखरी।।

**।। इति श्रीप्रतिवादिभयङ्कराण्णङ्गराचार्यविरचितायां रहस्यत्रयार्थरत्नमालायां द्वयप्रकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# रहस्यत्रयार्थरत्नमाला

## श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीता

# चरमश्लोकप्रकरणम्

१८३. अधस्तात्कांश्चनोपायानुपदिष्टान्निशम्य तु।
तेषु स्वरूपवैरित्वदुश्शकत्वावधारणात्।
शोकतप्ताय पार्थाय तच्छोकविनिवृत्तये।
नेतोऽस्त्यभ्यर्हतोपाय इति वक्तव्यताजुषः।
चरमस्य ह्युपायस्य सन्दर्शनवशादसौ।
चरमश्लोक इत्याख्यां लेभे सुप्रथितां भुवि।।

१८४. अत्र पूर्वार्धतः कृष्णः कृत्यं वक्त्यधिकारिणः।
उपायकृत्यमाचष्टे परस्तादुत्तरार्धतः।।

१८५. उपायस्वीकृतिस्तावत्कृत्यं स्यादधिकारिणः।।

१८६. तच्चोपायस्य वरणं विधत्ते साङ्गमच्युतः।।

१८७. उपायो रागतः प्राप्तो यदि वैधो भवत्यथ।
अवलम्बितमेवैष परिग्राह्यो भवेत्किल।।

१८८. अस्मिंस्तु चरमश्लोके पूर्वार्धं षट्पदाञ्चितम्।।

१८९. **सर्वधर्मा**निति पदं त्वादौ व्याख्यायतेऽधुना।।

१९०. फलसाधनभूतं यत्तद्धर्मपदशब्दितम्।।

१९१. अत्रत्यो धर्मशब्दस्तु न दृष्टफलसाधनम्।
ब्रूते. परं तु मोक्षाख्यफलसाधनवाचकः।।

१९२. श्रुतिभिः स्मृतिभिस्तानि विहितान्यमितानि यत्।
ततो **धर्मा**निति पदं प्रायुज्यत बहुत्वतः।।

१९३. कर्मधीभक्तियोगाश्चाप्यवताररहस्यधीः।
पुरुषोत्तमविद्या च दिव्यदेशेषु च स्थितिः।

नामसङ्कीर्तनं दीपारोपणं कुसुमार्पणम्।
इत्याद्यास्साधनधिया क्रियमाणाः क्रियास्तु, ते।।

१९४. तत्तत्साधनभेदानामनुष्ठाने ह्युपस्थिते।
तद्योग्यताप्रदं नित्यकर्म **सर्व**पदोदितम्।।

१९५. तथा च वेदस्मृत्युक्तान् नित्यनैमित्तिकात्मकान्।
कर्मयोगाद्यपाथानित्यर्थो निष्पत्तिमश्नुते।।

१९६. एतेषु धर्मशब्दोक्तिः भ्रान्तपार्थधियाऽभवत्।।

१९७. अथ व्याख्यायते तावत्परित्यज्येत्यदः पदम्।।

१९८. उक्तोपायप्रकाराणामनुसन्धानपूर्वकम्।
शुक्त्यां रजतधीकर्तॄन् विपरीतदिशां गतान्।
अनुसृत्यानुपायेषूपायबुद्धिं व्यधामिति।
सह बुद्धिविशेषेण प्रहाणं त्याग इष्यते।।

१९९. उपसर्गेण **परि**णापातकाधिप्रहाणवत्।
सवासनारुचि त्यागः लज्जया सहितेन च।
आत्यन्तिकस्तु कर्तव्य इत्येवमभिधीयते।।

२००. उपायान्तरसन्त्यागं कृत्वैव शरणागतिः।
कर्तव्येति ल्यपा प्रोक्तं **स्नात्वा भुञ्जीत** वाक्यवत्।।

२०१. अनुपायाः परं नैते शत्रवोऽपीति गण्यताम्।
**चचाल चापं** चेत्यादिः प्रमाणमिह भासते।।

२०२. किञ्च पङ्क्तिरथस्येव प्रच्युतिं जनयन्ति च।।

२०३. सर्वधर्मप्रहाणोक्तेरधर्माणामनुष्ठितिः।
अभ्यनुज्ञायतेऽत्रेति कैश्चिदुक्तं न युज्यते।।

२०४. अधर्माननुष्ठेति यतो नात्राभ्यधीयत।।

२०५. तथाऽभिधानमप्यर्थात्किं न सिद्ध्येदिहेति चेत्।

२०६. मैवं भो धर्मशब्दोऽयं विहितानुष्ठितं परम्।
दर्शयेत्, नत्वधर्माणां निवृत्तिमपि दर्शयेत्।।

२०७. अवश्यं दर्शयेदेवेत्याग्रहो यदि तर्हि भोः।
अत्र तद्व्यतिरिक्तानां विवक्षेत्येव गृह्यताम्।।

२०८. स्वस्य, सर्वेश्वरस्यापि, फलस्यापि च वीक्षणे।
विरुद्धानुष्ठितिप्राप्तेर्न प्रसक्तिकथाप्यहो।।

२०९. अथ व्याख्यायते तावत्तार्तियीकं तु **मां** पदम्।।

२१०. सर्वरक्षणदीक्षाढ्यं भवतश्चापि किङ्करम्।
तवाभिमुख्यमालोक्य त्वयि वात्सल्यनिर्भरम्।
पयस्यौष्ण्यवदुद्भूते लक्ष्म्यां सत्यपि निग्रहे।
रक्षणे सुस्थिरं मामित्येवमर्थोऽत्र भाव्यताम्।।

२११. परव्यूहसुरान्तर्याम्यतिरिक्तमितीर्यते।।

२१२. धर्मसंस्थापनायैवावतीर्णेन महात्मना।
सर्वधर्मपरित्यागपूर्वकं मां व्रजेति यत्।
अभ्यधायि ततस्साक्षाद्धर्मः स्वात्मेति सिद्ध्यति।।

२१३. त्यक्तोपायेभ्य एतस्योत्कर्षश्चैतेन सिद्ध्यति।।

२१४. सिद्धत्वं पूर्णचैतन्यं शक्तत्वमनपायता।
प्राप्तता नैरपेक्ष्यं चोत्कर्षशब्दविवक्षितम्।।

२१५. साध्यत्वादितरोपायाः स्वसिद्धौ कर्त्रपेक्षिणः।
अचैतन्यादिशक्तेश्च फलांशे दात्रपेक्षिणः।
सिद्धत्वचित्त्वशक्तत्वैस्तत्प्रतिद्वन्द्विभावतः।
उपायस्सोऽयमितरनिरपेक्षो विराजते।।

२१६. वात्सल्यस्वाम्यसौशील्यसौलभ्याख्याश्शुभा गुणाः।
स्फुटमत्र प्रकाशन्त इत्येतच्चावगम्यताम्।।

२१७. तोत्रसूत्रलसत्पाणिं सेनाधूल्याढ्यकुन्तलम्।
रथेऽवलम्बिताङ्घ्रिं स्वं प्रदर्श्यति मामिति।।

२१८. एकशब्दः स्थानमानादवधारणवाच्यसौ।।

२१९. **मामेव ये प्रपद्यन्ते, त्वमेव च, तमेव च।।**
**निन्पादमे शरण्** इत्याद्यनुसन्धीयतामिह।।

२२०. व्रजेत्युक्तस्वीकरणे साधनत्वमितो हतम्।।

२२१. स्वीकारश्च समायातस्तेनैव परमात्मना।।

२२२. सर्गावतारप्रमुखैः प्रणीतायाः कृषेः फलम्।।

२२३. **उणर्विलित्ति गाथायां, अदुवुम्** इति हीरितम्।।

२२४. स्वीकृत्यामप्यसत्यां च भगवान्स्वयमेव नः।
निर्वहेद्रक्षणं कृत्यम् इत्येवं मतिरुत्तमा।।

२२५. नैरपेक्ष्यं न जीविष्यत्यन्यथा सिद्धसाधने।।

२२६. सर्वमुक्तिप्रसङ्गस्य परिहारकृते त्विदम्।
अथ बुद्धिसमाधानकृते, चैतन्यकारितम्।
रागप्राप्तं स्वरूपस्थमनिषेधनिवेदकम्।।

२२७. उपायान्तरसंसर्गासह्यता प्राक्प्रदर्शिता।
अत्र प्रपदनोपायबुद्धिदुस्सहतोच्यते।।

२२८. भगवत्कर्मकं जीवकर्तुकं वरणं तु यत्।
तदहङ्कारगर्भं स्यादवद्यस्य च कारणम्।।

२२९. भगवत्कर्तृकस्त्वेव स्वीकारो रक्षणक्षमः।।

२३०. इतरेषामुपायानां निवृत्तिर्दोष इष्यते।
एतस्य सिद्धोपायस्य प्रवृत्तिर्दूषणं मतम्।।

२३१. **शित्तवेण्डे**ति वकुलाभरणोक्तिरिहेक्ष्यताम्।।

२३२. निवृत्त्यावश्यकत्वं तु **परित्यज्य**पदोदितम्।।

२३३. उपकारस्मृतिश्चापि चैतन्यजनिता यतः।
ततस्साधनकक्ष्यायां न तस्याः पतनं भवेत्।।

२३४. उपायभावेनेत्यर्थमाचष्टे शरणं पदम्।।

२३५. रक्षकावसथोपायान् शब्दश्शरणमित्ययम्।
वक्त्यथाऽपि तु घट्टेऽस्मिन्नुपायार्थैकवाचकः।
एवं प्रकरणौचित्यान्निर्धारणमनर्गलम्।।

२३६. बुद्धिं कुर्वित्यसावर्थो व्रजेतिपदबोधितः।।

२३७. गत्यर्था ननु बुद्ध्यर्थास्ततोऽध्यवसितिर्मता।।

२३८. वाचिकं कायिकं चात्र यद्यपि स्यादपेक्षितम्।
अथापि कथ्यते तावन्मनोनिष्ठा त्वनुष्ठितिः।
**ज्ञानान्मोक्ष** इति प्रोक्तं प्रमाणमिह चिन्त्यताम्।।

२३९. त्याज्यं त्यागप्रकारं च प्रपत्तव्यं च साधनम्।
उपायनैरपेक्ष्यं चोपायत्वमभिधाय च।
उपायस्वीकृतिः प्रोक्ता पूर्वार्धेनेति चिन्त्यताम्।।

२४०. अथाहमित्युपक्रम्य स्वकृत्यमभिधीयते।।
२४१. सर्वज्ञस्सर्वशक्त्याढ्यः प्राप्तश्चाहमितीर्यते।।
२४२. प्रपन्नस्य स्थितिं पूर्वां भवितव्यं च वेदितुम्।
यथावेदनमाचर्य निर्वर्तयितुमप्यथ।
ज्ञानशक्त्याख्यगुणयोरवश्यमभिकाङ्क्षणात्।
स्वप्रयोजनताबुद्ध्या रक्षितुं प्राप्तिकाङ्क्षणात्।
ज्ञानं शक्तिश्च शेषित्वमिति त्रयमिहोदितम्।।
२४३. स्वार्थे गृहीतं सारथ्यवेषमालोच्य चान्यथा।
यद्भयं फल्गुनो भेजे तस्य प्रध्वंसनेच्छया।
यथावस्थितमात्मानं दर्शयत्यहमित्यजः।।
२४४. सारथ्यरूपपारार्थ्यमपि स्वातन्त्र्यभूमजम्।।
२४५. अज्ञं चाशक्तमप्राप्तं मदेकोपायसेविनम्।
भवन्तमिति खल्वर्थः त्वापदस्यावधीयताम्।।
२४६. अज्ञं चाशक्तमप्राप्तं मदेकोपायसेविनम्।
भवन्तमिति खल्वर्थः त्वापदस्यावधीयताम्।।
२४७. **सर्वपापेभ्य** इत्यस्य पदस्यार्थोऽथ कथ्यते।।
२४८. मत्प्राप्तिप्रतिबन्धित्वहेतोर्यत्पापराशितः।
बिभेषि, तेभ्यस्सर्वेभ्यः पाप्मभ्य इति भाव्यताम्।।
२४९. **पोय्निन्नञान**मित्यादिदिव्यसूक्त्युक्तरीतितः।
अविद्यावासनाकर्मरुचिप्रकृतिसङ्गतीः।
वक्ति **पापेभ्य** इत्येवं बहूक्तिरिह जाग्रती।।
२५०. तृणच्छेदनकण्डूतिशमनाद्यविशेषतः।
मायावासनया यानि त्वनुवृत्तिं भजन्त्यथ।
लोकापवादभीत्या च कारुण्येनाविलत्वतः।
क्रियमाणानि कर्माणि यानि तान्यखिलान्यपि
अत्रत्य**सर्व**शब्देन बोधितानीति गृह्यताम्।।
२५१. उन्मत्तस्य प्रवृत्तेस्तु यत्किञ्चिद्ग्रामसङ्गवत्।
त्यक्तोपायेष्वमीषां स्यात्कथमन्वय इत्यसौ।
शङ्का नैवोचिता हन्त, ध्रुव एव तदन्वयः।।

२५२. न्यासस्वरूपमज्ञात्वा कालुष्येण पुनः पुनः।
उपायबुद्धिमूलं च न्यसनं पातकोपमम्।।
२५३. अथाऽत्र **मोक्षयिष्यामीत्यस्यार्थः** प्रतिपाद्यते।।
२५४. मुक्तो यथा भवेस्त्वं तु तथाऽहं करवा इति।।
२५५. नास्त्यपेक्षाऽत्र तव वा मम वा, किन्तु तान्यहो।
स्वयमेवापसर्पेयुरित्यर्थो णिचि गर्भितः।।
२५६. मन्निग्रहफलं पापं किं तिष्ठेन्मदनुग्रहे।
इत्येवं विधतात्पर्यमत्र चिन्तनमर्हति।।
२५७. अहो बहुतिथात्कालात्पापेभ्यो यद्भयं त्वया।
अन्वभाव्यधुना त्वत्तः तैः प्राप्यं करवाणि तत्।।
२५८. अतः परमहं त्वां तु स्वातन्त्र्ये स्थापयामि न।
मद्देहस्थितमालिन्यं नापोहेयमहं किमु।।
२५९. अथ **माशुच** इत्यस्य तात्पर्यमुपवर्ण्यते।।
२६०. यतस्त्वं निजकर्तव्ये नैवाधिकृतवानभूः।
यतश्चाहं भवत्कार्ये व्यापृतोऽस्मि निरन्तरम्।
ततस्ते शोकहेतुर्नेत्यस्य शोको व्युदस्यते।।
२६१. निवर्तकस्वरूपं च निवर्त्यानां च भग्नताम्।
अभिधाय, न ते शोकनिमित्तमिति कीर्तितम्।।
२६२. **एत्तिनालिडरि**त्यादिसूक्त्यर्थोऽवानुचिन्त्यताम्।।
२६३. भवत्कृतानि पापानि नीत्वाऽहं क्षान्तिगोचरम्।
पुण्यत्वेन प्रपश्यामि किमिति त्वं विषीदसि।।
२६४. **उय्यक्कोण्डार्** समाख्याय यतीन्द्रोक्तं विचिन्त्यातम्
२६५. सर्वेश्वरस्य स्वातन्त्र्ये श्लोकोऽयं दत्तदृष्टिकः।।
२६६. श्लोकोऽयमनुवादार्थ इति वङ्गीशभाषितम्।।
२६७. कृष्णस्यामानुषैः कृत्यैर्महर्षीणां च भाषितैः।
स्वकार्येऽधिकृतत्वाच्च तस्य कृष्णस्य नित्यशः।
अयमेव गतिर्नः स्यादिति पार्थेन निश्चिते।
अतः परं स्वपादाब्जश्रयणस्य विधानतः।।
२६८. अधस्तात्कथितं सर्वं पार्थहृच्छोधनार्थकम्।।

२६९. श्रुतिः कस्मान्नु विदधे कर्मादीनीतिचेदहो।
स्वच्छन्दं चरतो दृप्तवृषभस्य गले यथा।
लगुडं बध्यते तद्वदहन्ताममताकृतम्।
अवलेपं निनिर्मूल्य स्वरूपज्ञानसम्पदम्।
उत्पादयितुमित्येवमाचार्या अनुसन्दधुः।।

२७०. यथा संन्यासिभिः प्राच्यं कर्म सन्त्यज्यते तथा।
परिपक्वधियाऽनेन त्याग एषां न दोषकृत्।।

२७१. सिद्धसाधननिष्ठोऽयं कर्मज्ञानादिकानिमान्।
उपायांस्तु स्वरूपेण विजहाति न जातुचित्।।

२७२. कर्म कैङ्कर्यकोटौ स्याद्धीः स्वरूपप्रकाशने।
भक्तिः प्राप्यरुचौ, न्यासः स्वयाथात्म्यावबोधने।।

२७३. भगवत्प्राप्तिरूपं यत्फलं तत्प्रति साधनम्।
दुष्करं सुकरं चेति ह्युभयं बोधितं यतः।
ततस्तदुभयं मुक्त्वा प्रसादः परमात्मनः।
परमोपाय इत्येवमवधार्यं मनीषिभिः।।

२७४. फलसिद्धावपेक्ष्येते अनिषेधोऽर्थनाऽपि च।।

२७५. पापिष्ठोऽपि समायात्वित्याह दाशरथिर्हरिः।
कृष्णोऽसौ प्राह पुण्यानि विहायागम्यतामिति।।

२७६. आस्तिको रुचिविश्वासशाली सन् जीवितुं क्षमः।
नास्तिकस्सन्प्रणश्येद्वा नान्तरालस्थितिर्भवेत्।
इति श्रीभट्टपादेभ्यो गोविन्दगुरुरभ्यधात्।।

२७७. व्यंवसायविहीनस्य त्यागस्वीकारयोरिह।
अन्वयस्त्वामकालीनमशनं तुलयत्यहो।।

२७८. अत्राधिकारिनैयत्यं वेदितव्यं विवेकिभिः।
**विट्टुशित्तर् केट्टिरुप्प**रिति गोदोक्तिरीतितः।।

२७९. **वार्त्तै, अत्तन्** इति प्रोक्तं युगलं दिव्यगाथयोः।
एतच्छ्लोकार्थ इत्येवमनुसन्धानमस्तु वः।।

**।। चरमश्लोकप्रकरणं समाप्तम्।।**

मुमुक्षुप्पडीति प्रसिद्धं प्रबन्धं
जगद्देशिकोक्तं पवित्रं विचित्रम्।
जनैर्द्राविडीज्ञानरिक्तैर्नियुक्तो-
ऽन्ववादीदसावित्थमण्णङ्गरार्यः।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - विद्वद्वर -**
**अण्णङ्गराचार्यवर्यप्रणीता**
**रहस्यत्रयार्थरत्नमाला समाप्ता ।।**

श्रीरस्तु

श्रीमते रामानुजाय नमः श्रीमद्वरवरमुनये नमः

# तत्त्वत्रयार्थरत्नमाला
# पूर्वपीठिका - श्लोकरूपिणी

१. विज्ञापयति काञ्चीस्थो वादिभीकरवंशजः।
अण्णङ्गरार्यस्साधूनां सविधे भूमिकामिमाम्।।

२. भगवज्जगदाचार्यैः कृपया परया पुरा।
अष्टादश रहस्यानि ग्रथितानि चकासति।।

३. वेदवेदान्तवेदाङ्गसारसर्वस्वबोधिषु।
तेषु त्रयाणां गन्थानां प्राधान्यं पप्रथे भृशम्।।

४. मुमुक्षुप्पडिनाम्ना च तत्त्वत्रयसमाख्यया।
श्रीवाग्भूषणनाम्ना च त्रयस्ते प्रथिता भुवि।।

५. एषामेव प्रबन्धानां श्रीमान्वरवरो मुनिः।
अतिगम्भीरसन्दर्भां व्याख्यामन्वग्रहीद्गुरुः।।

६. एभिरेव त्रिभिर्ग्रन्थैस्सर्वशास्त्रार्थबोधकैः।
मुमुक्षवो महाभागाः कालं सर्वं क्षिपन्त्यहो।।

७. ये नाम द्राविडीं भाषां न जानन्त्यथ तानपि।
उज्जीवयितुमर्वाञ्चो महान्तः प्राज्ञपुङ्गवाः।।

८. श्रीगोवर्धनरङ्गार्यास्तथैवास्मद्गुरूत्तमाः।
गद्यरूपेण गैर्वाण्या वाण्या तान्पर्यणामयन्।।

९. तथापि पद्यरूपेण ग्रथनं न कृतं यतः।
कण्ठधारणसौकर्यं ततो दुर्लभतामगात्।।

१०. तादृशन्यूनतायाश्च परिहाराय सात्त्विकैः।
नियुक्तो दासदासोऽयं तामाज्ञां पर्यपूरयत्।।

११. श्रीमल्लोकार्यपादानां श्रीसूक्तीरक्षरक्रमात्।
अनुसृत्यैव पद्यानि प्रणीतानि दिनैस्त्रिभिः।।

१२. प्रमाथिवत्सरे कन्यामासे भगवदाज्ञया।
प्राप्त्यां द्वारकाक्षेत्रयात्रायां निरवर्त्यत।।

१३. श्रीमल्लोकगुरोर्वाचस्सूत्ररूपतया स्थिताः।
तथैताः पद्यमालाश्च भाव्यास्सूत्रवदेव नः।।

१४. महामेधाविनां चापि मूलार्थो व्याख्यया विना।
अवबोद्धुमशक्यस्यादित्युक्तिर्नैव दुष्यति।।

१५. अतश्चावश्यकं प्रायो व्याख्याया अप्यपेक्षणम्।
इत्येतां महतां वाचमप्युत्तंसपदे दधत्।।

१६. दासदासोऽयमाचार्यकृपया निवृतिं च ताम्।
लघ्वीं लेखितुमारेभे श्लोकतात्पर्यबोधिनीम्।।

१७. श्रीमद्वरोपयन्त्रार्यव्याख्यासारांशबोधिनी।
सा च टीका प्रतीक्षार्हा जिज्ञासूनां विवेकिनाम्।।

१८. अचिरेण यथा साऽपि प्रकाश्येत तथा ह्यसौ।
दासः प्रयतते नित्यं प्रकाशेताचिरेण सा।।

१९. मधुरद्राविडोक्त्यैव भोग्यान्दिव्यार्थसञ्चयान्।
कटुसंस्कृतवाण्याऽसौ किमर्थं लिखती त्यपि।।

२०. केचिन्महान्तः कुप्येयुः तथाऽपि द्राविडीं गिरम्।
अजानतां प्रपन्नानामुपकाराय केवलम्।।

२१. इयान्प्रयासो दासेन सर्वथाऽङ्गीकृतोऽभवत्।
साहसं क्षम्यतामेतन्महाभागैः कृपालुभिः।।

२२. श्लोकबद्धमिदं गन्थत्रितयं वीक्ष्य भावुकाः।
बहवस्स्माभिनन्दन्ति पौरोभाग्यविदूरगाः।।

२३. द्राविड्यामपि भारत्यां प्राज्ञा ये तादृशामपि।
सति संस्कृतविज्ञाने बहूपकृतिकारकम्।।

२४. भवेदवश्यमेतत्तु ग्रन्थत्रितयमित्यपि।
अन्वग्राहि महाभागैरनसूयुभिरादरात्।।

२५. शास्त्रार्थबहुलास्सूक्तीरेवं नाम विवर्तयन्।
मितज्ञोऽयं जनस्सत्यं वाग्दोषान्भूयसो दधत्।।

२६. प्रौढानां विदुषां कामं कोपपात्रं भवेदपि।
तथाऽपि दोषानुद्बोध्य तेऽनुगृह्णन्तु सादरम्।।२६।।

२७. इत्थं वादिभयङ्करवंशीयाण्णङ्गरार्यदासोऽयम्।
प्रणतिभारितेन मूर्ध्ना प्रार्थ्य समाप्तां व्यधत्त विज्ञप्तिम्।।

**।। इति पूर्वपीठिका समाप्ता।।**

**विशेषतो निवेद्यते।**
**तत्त्वत्रयादिग्रन्थेषु मूलपाठे निवेशिताः।**
**सूत्राङ्का एव पद्याङ्कभावेनात्र समाहृताः।**

श्रीरस्तु

# मङ्गलाचरणादिकम्

लोकाचार्यैस्तथा श्रीमद्रम्यजामातृयोगिभिः।
श्रीवैष्णवास्सनाथा ये तद्दास्यां नित्यमस्तु नः।।

सर्वज्ञलोकगुरुदिव्यकृपासमुत्थं
तत्त्वत्रयाह्वयमनर्घरहस्यरत्नम्।
अज्ञातसद्द्रविडवाग्जनतोपकृत्यै
दैव्या गिरा विरचये मृदुपद्यबद्धम्।।

श्रीलोकार्यगभीरसूक्तिनिवहोदञ्चन्महार्थावलीः
व्याख्या यस्य यथायथं स्फुटतया प्रख्यापयत्यञ्जसा।
सोऽयं रम्यवरोपयन्तृमुनिराट् सर्वज्ञचूडामणिः
चित्तं मामकमाश्रितः करुणया सूतेऽद्यरत्नावलीम्।।

श्रितो रम्यजामातृसंज्ञान् यतीन्द्रान्
तथा श्रीजगट्गुर्वनन्तार्यसेवी।
मितज्ञोऽयमण्णङ्गरार्यो न तावत्
प्रबध्नाति, किन्तु स्वयं देशिकेन्द्राः।।

सूत्रात्मना व्यरचयज्जगदार्यवर्यो
यत्, तत्तथैव रचितं मृदुपद्यरूपम्।
व्याख्यां विना बहुविदामपि दुर्गमांस्त-
दर्थान् विदन्तु सुधियो मम टीकयैव।।

श्रीरस्तु

श्रीमते रामानुजाय नमः श्रीमद्वरवरमुनये नमः

श्रीमल्लोकगुरवे नमः

**भगवल्लोकाचार्यप्रणीततत्त्वत्रयप्रबन्धानुवादरूपा,**

**श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यविरचिता**

# तत्वत्रयार्थरत्नमाला

## प्रथमं रत्नम् - चित्प्रकरणम्

१. चेतनानां मुमुक्षूणां मोक्षाख्यफलसिद्धये।
तत्त्वत्रितयविज्ञानमावश्यकतमं मतम्।।

२. प्रोक्ताश्चिदचिदीशानास्तत्त्वत्रितयसंज्ञया।।

३.४. आत्मा चिच्छब्दतः प्रोक्तस्तत्स्वरूपमथोच्यते।
**(१) शेन्नुशेन्निति** योगीन्द्रदिव्यसूक्त्यनुसारतः।
देहेन्द्रियमनः प्राणधीभ्योऽन्यदजडं तथा।
आनन्दरूपं नित्यं चाण्वव्यक्तं चिन्तनातिगम्।
निष्प्रतीकं निर्विकारं ज्ञानास्पदमथेशितुः।
नियाम्यं धारणीयं च शेषभूतं च तद्विदुः।।

५. अथ चात्मनि देहादिवैलक्षण्यं निरूप्यते।।

६. देहादेर्ममदेहादीत्याभानादिदमित्यपि।
भानात्कालविशेषेषु भानाभानवशादपि।
बहुत्वादपि वैजात्यं देहादिभ्योऽस्य सिद्ध्यति।
आत्मनोऽहमिति स्फूर्तिः स्फूर्तिश्चाशेषकालिकी।
एकता चापि वैजात्यमुपपादयति स्फुटम्।।

७. एतादृशीनां युक्तीनां बाधे सत्यपि जातुचित्।
सिध्येच्छास्त्रबलेनात्मा देहादिभ्यो विलक्षणः।।

८. अजडत्वं तु विज्ञाननिरपेक्षप्रकाशता।।

९. आनन्दरूपता नाम स्वत एवेष्टता मता।।

१०. अस्वाप्सं सुखमित्येवं सुप्तोत्थितजनोक्तितः।
आत्मनस्सुखरूपत्वं स्वाभाविकमुपेयते।।

११. प्रध्वंसाप्रतियोगित्वं नित्यत्वमिति कथ्यते।।

१२. ननु तर्हि कथं जन्ममरणे ? इति चेच्छृणु।
देहसंश्लेषविश्लेषमात्रं जन्ममृती इति।।

१३,१४ हृदयादस्य चोत्क्रान्तिगमनागमनक्रियाः।
शास्त्रतः प्रतिपन्ना इत्यणुत्वमवसीयते।।

१५. अणुस्सन् हृदयस्थश्चेत्कथं वपुषि सर्वतः।
सुखदुःखोपभोगस्योपलभ्य इति चेच्छृणु।।

१६. मणिद्युमणिदीपादौ सत्यप्येकत्र तत्प्रभा।
यथा व्याप्नोति सर्वत्र तथा ज्ञानविभुत्वतः।
कृत्स्नेऽपि घटते देहे भुक्तिस्तु सुखदुःखयोः।।

१७. युगपद्बहुदेहानां ग्रहोऽपि ज्ञानवैभवात्।।

१८. अव्यक्तत्वं - घटाद्यर्थग्राहीन्द्रियदुरीक्षता।।

१९. अचित्साजात्यतो ध्यातुमशक्यत्वमचिन्त्यता।।

२०. प्रतीकसमुदायात्मत्वाभावो निष्प्रतीकता।।

२१. सततं चैकरूपत्वं निर्विकारत्वमिष्यते।।

२२. अत एव च शस्त्राग्निजलवातातपादिभिः।
छेदनं दहनं क्लेदं शोषणं चैष नार्हति।।

२३. आर्हताः प्राहुरात्मानं तत्तद्देहप्रमाणकम्।

२४. तदात्मनिर्विकारत्वबोधकश्रुतिबाधितम्।।

२५. युगपद्भूयसो देहान् योगिनां परिगह्णताम्।
स्वरूपस्य च शैथिल्यमापद्येतेति बुद्ध्यताम्।।

२६. ज्ञानस्यास्पदता नाम तदाधारत्वमेव हि।

२७. ज्ञानाधिकरणं नात्मा परं तु ज्ञानमात्रकः।
इति बौद्धमतं तावत्प्रत्यक्षेणोपमर्दितम्।।

२८. अहं ज्ञानमितीदृक्षा प्रतीतिर्नैव दृश्यते।
इदं जानाम्यहमिति प्रतीतिस्सर्वसाक्षिका।।

२९. ज्ञातेति कथनेनैव कर्ता भोक्तेति चाकथि।
३०. ज्ञानावस्थाविशेषत्वं कर्तृभोक्तृत्वयोर्यतः।।
३१. कैश्चिद्गुणानां कर्तृत्वं नत्वात्मन इतीर्यते।
३२. तन्न सत्, शास्त्रवश्यत्वं भोक्तृत्वं चास्य हन्यते।।
३३,३४ स्त्र्यन्नपानादिभोगार्थस्वव्यापारेषु कर्तृता।
न स्वरूपप्रयुक्ता स्यात् गुणसंसर्गजा परम्।।
३५. तदिदं जीवकर्तृत्वमीश्वराधीनमुच्यते।।
३६,३७ ज्ञातुर्जीवस्य शास्त्रेषु ज्ञानशब्देन कीर्तिनम्।
ज्ञानानपेक्षस्वोद्बोधात्, तस्य सारगुणत्वतः।
निरूपकीभूतधर्मभावाच्चेत्यवगम्यताम्।।
३८. भगवद्धिषणायत्तसर्वव्यापारशालिता।
नियाम्यता प्रकथिता, धार्यताऽथ निरुच्यते।।
३९. ईशस्वरूपसङ्कल्पायत्तसत्ताकथैव सा।।
४०. पाटीरपुष्पताम्बूलाद्यविशेषं परात्मनः।
यथेष्टविनियोगार्हभावश्शेषत्वमिष्यते।।
४१. आत्माऽसौ सदनक्षेत्रपुत्रदारधनादिवत्।
पृथक्सिद्ध्याद्ययोग्यस्सन् देहवत्सहयोगभाक्।।
(अथ वा) पृथक्स्थित्याद्यर्हसद्मक्षेत्रदारसुतादिवत्।
न ह्यात्माऽसौ हरेः किन्तु देहवत्त्वपृथक्स्थितः।।
४२. आत्मस्वरूपं स्याद्बद्धमुक्तनित्यात्मना त्रिधा।।
४३. संसारिणां जनानां तु बद्धशब्देन कीर्तनम्।।
४४. ध्वस्तसंसारसम्बन्धाः कथ्यन्ते मुक्तशब्दतः।
४५. अनाघ्रातभवा नित्याश्शेषशेषाशनादयः।।
४६. जलस्य वह्निसंसृष्टस्थालीसंसर्गतो यथा ।
औष्ण्यशब्दादिसम्भूतिस्तथा प्रकृतिसङ्गतः।
अविद्यावासनाकर्मरुचीनां जनिरात्मनः।।
४७. अचित्सङ्गव्यपाये स्यादविद्यादिलयोऽपि च।
इत्येवमनुगृह्णन्ति ज्ञानिनस्तत्त्वदर्शिनः।।

४८. त्रिविधं चात्मबृन्दं तदनन्तं हि पृथक्पृथक्।।
४९. ऊचुः केचिन्नात्मभेदोऽस्त्यपि त्वात्मैक्यमित्यहो।।
५०. तथा चेद्व्यक्तिभेदेन सुखदुःखान्वयः कथम्।।
५१,५२ स देहभेदादितिचेत्सौभयङ्ग तथा भवेत्।।
बद्धमुक्तभिदा न स्याच्छिष्याचार्यभिदा तथा।
५३,५४ सृष्टौ वैषम्यदृष्टिश्च तदा नैव घटेत हि।।
५५. आत्मभेदाभिधायिन्याः श्रुतेश्च क्रोधसम्भवः।।
५६. श्रुतिरौपाधिकं भेदं वक्तीत्यपि च दुर्वचम्।
५७. अपि मुक्तिदशायां च जीवभेदोपलम्भनात्।।
५८. तथा देवादिकामादिभेदानां विलयाद्भृशम्।
स्वरूपमात्मनां यस्माच्चकास्त्यत्यन्तसाम्यभाक्।
तस्माद्भेदकथागन्धप्रसक्तिर्न किलेति चेत्।।
५९. आकारपरिमाणादिवैषम्यविरहेऽपि च।
सौवर्णकुम्भसद्रत्नव्रीह्यादिषु यथा भिदा।
तथा मुक्तिदशायां च स्वरूपे भेदसम्भवः।।
६०. इत्येतैर्हेतुभिस्सिद्ध्यत्यात्मभेदोररीकृतिः।।
६१. इदानीमात्मनां लक्ष्म ज्ञातृता शेषतान्विता।।
६२. एतेषां खलु विज्ञानं स्वरूपमिव शाश्वतम्।
द्रव्यं चाजडमानन्दरूपं चेति विदुर्बुधाः।।
६३. तर्हि ज्ञानात्स्वरूपस्य को विशेष इहेति चेत्।
६४. स्वरूपं धर्मिभूतं सत्सङ्कोचादेरनास्पदम्।
स्वभिन्नवस्तुवृन्दानि प्रकाशयितुमक्षमम्।
स्वस्मै स्वयम्प्रकाशाढ्यमणुत्वस्य च भाजनम्।
ज्ञानं तु धर्मभूतं सत्सङ्कोचाद्यर्हतास्पदम्।
स्वभिन्नवस्तुबृन्दानां प्रकाशनकृतौ पटु।
स्वस्मै स्वयम्प्रकाशं न, स्वाश्रयस्य चितः स्फुरत्।
विभु चेति विशेषोऽयमित्थं बोध्यो मनीषिभिः।।
६५. तत्र केषाञ्चन ज्ञानं नित्यं विभु विभासते।

केषाञ्चन तु तन्नित्यमविभुत्वास्पदं मतम्।
केषाञ्चिज्जातुचिच्चाणु जातुचिद्विभु चोच्यते।।
६६. अजायत मम ज्ञानमनश्यदिति वाक्कथम्?।
६७. प्रसृत्येन्द्रियपद्धत्या विषयग्रहणं जनिः।
तस्योपरमणं - नाश इति नानुपपन्नता।।
६८. एकं सदप्यदो ज्ञानं दर्शनश्रवणादितः।
संज्ञाभेदास्पदं भूत्वा नानारूपेण भाति यत्।
तदप्यनेकमुखतः प्रसृतेरिति बुद्ध्यताम्।।
६९. अथ द्रव्यत्वकथनं ज्ञाने कथमिहेति चेत्।
७०. क्रियागुणाश्रयीभावादजडत्वाच्च तत्तथा।।
७१,७२ अजडं चेत्सुषुप्त्यादिकालेष्वप्यवभासताम्।
इति चेन्न, तदा यस्मान्नास्ति प्रसरणं धियः।।
७३. आनन्दरूपता नाम - ज्ञानभानेऽनुकूलता।।
७४. विषशस्त्रादिवस्तूनामवगाहनकालिकम्।
प्रातिकूल्यं तु देहात्मभ्रमादिकनिबन्धनम्।।
७५. सर्वेषामपि वस्तूनामीश्वरात्मकभावतः।
आनुकूल्यं स्वभावस्स्यादागन्तुकमथेतरत्।।
७६. स्रक्चन्दनादौ प्रेयस्त्वं वस्तुस्वाभाव्यजं यदि।
सर्वेषामपि मर्त्यानां सर्वदेशेषु सर्वदा।
तत्रानुकूल्यं भासेत, न तथा ह्यनुभूयते।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीतायां तत्वत्रयार्थरत्नमालायां प्रथमं रत्नं चित्प्रकरणं समाप्तम्।।**

श्रीरस्तु

# द्वितीयं रत्नम्

# अचित्प्रकरणम्

७७. अचितो ज्ञानशून्यत्वं विकारित्वं च लक्षणम्।।

७८. शुद्धसत्त्वं मिश्रसत्त्वं सत्त्वशून्यमिति त्रिधा।
अचित्तत्त्वविभागोऽथ शुद्धसत्त्वं निरूप्यते।।

७९. रजस्तमोगन्धदविष्ठसत्त्वं नित्यं चिदानन्दविवृद्धिकारि।
विमानवप्रादिमयान्विकारानीशेच्छया केवलमश्नुवानम्।।
अनन्ततेजस्समुदायरूपं मुक्तैश्च नित्यैश्च परात्मना च।
नित्यं परिच्छेत्तुमयोग्यभूतं क्षणेक्षणेऽपूर्ववद्भुतं तत्।।

८०. इदं केचिज्जडं प्राहुरजडं केचिदूचिरे।।

८१. अजडत्वे तु नित्यानां मुक्तानामीश्वरस्य च।
विनाऽपि ज्ञानसाहाय्यमवभासेत तत्पदम्।।

८२. संसारिणां तु नो भायात् ज्ञानं वद्यं तु केवलम्।।

८३. आत्मतो ज्ञानतश्चापि कथमस्य भिदेति चेत्।

८४. अहमित्येवमस्फूर्तेर्देहत्वेन विपाकतः।
विनाऽपि विषयापेक्षां स्वातन्त्र्येण विभानतः।
शब्दस्पर्शादिमत्त्वाच्च जाघटीति विभिन्नता।।

८५. मिश्रसत्वं तु - सत्त्वेन रजसा तमसा युतः।
बद्धानां चेतनानां तु ज्ञानानन्दौ तिरोदधत्।
अन्यथाज्ञानजनको जन्मनाशविवर्जितः।
ईशस्य विश्वसृष्ट्यादिलीलोपकरणायितः।
देशभेदात्कालभेदात्सदृशांश्चातथाविधान्।
विकारान्विविधान् स्रष्टुं प्रावीण्यमधिजग्मिवान्।
प्रकृत्यविद्यामायाख्यासमेतोऽचिद्विशेषकः।।

८६. विकाराणां प्रजननात्प्रकृतिस्त्विति पप्रथे।
ज्ञानं प्रति विरोधित्वादविद्येत्यभिधाऽभवत्।
विचित्रसृष्टिकरणान्मायेत्याख्या प्रसिद्ध्यति।।

८७. [1]**पोङ्गैम्पुलनुम्** इत्यादि श्रीसूक्त्युक्तप्रकारतः।
चतुर्विंशतितत्त्वात्म तदचित्तत्त्वमुच्यते।।

८८. अत्र प्राथमिकं तत्त्वं प्रकृतिः परिकीर्त्यते।।

८९. अविभक्ततमश्चेति विभक्ततम इत्यपि।
अक्षरं चेत्यवस्थाभिरन्विता प्रकृतिस्तु सा।।

९०,९१ गुणवैषम्यतो हेतोर्विकारा महदादयः।
प्रधानतः प्रजायन्ते, गुणास्सत्त्वं रजस्तमः।।

९२. अमी गुणाः प्रधानस्य स्वभावा नित्यसिद्धिकाः।
प्रकृतित्वे ह्यनुद्भूताः विकृतित्वे त्वतादृशाः।।

९३. सत्त्वं ज्ञानसुखे सूते सङ्गं चापि तयोर्द्वयोः।।

९४. कर्मसङ्गं रागतृष्णासङ्गांश्च जनयेद्रजः।।

९५. तमस्सूतेऽन्यथाज्ञाननिद्रालस्यप्रमत्तताः।।

९६. समेषु विषमेष्वेषु विकारास्स्युर्यथाक्रमम्।
समा अविशदाश्चाथ विषमा विशदा अपि।।

९७. विषमेषु विकारेषु महान्विकृतिरादिमा।

९८. महत्तत्त्वमिदं त्रेधा सात्त्विकं राजसं तथा।
तामसं चेति विज्ञेयमथ चाध्यवसायकृत्।।

९९. वैकारिकस्तैजसश्च भूतादिरिति वर्णितः।
त्रिविधोऽयमहङ्कारो महत्तत्त्वात्प्रजायते।।

१००. अभिमाननिदानत्वमहङ्कारे निगद्यते।।

१०१. अत्र वैकारिकात् ज्ञानकर्मेन्द्रियहृदां जनिः।।

१०२. भूतादेश्शब्दतन्मात्रा प्रजायेत, ततः खलु।
आकाशस्पर्शतन्मात्रे प्रजायेते ततः खलु।
वायुश्च रूपतन्मात्रा प्रजायेते ततः खलु।

---

१. तिरुवायिमोलि - १०-७-१०

तेजश्च रसतन्मात्रा प्रजायेते ततः खलु।
आपश्च गन्धतन्मात्रा प्रजायन्ते ततः क्षितिः।।

१०३. चतस्रस्स्पर्शतन्मात्राप्रमुखा वियदादितः।
चतुष्टयात्कार्यभूता वायुतेजः पयोभुवाम्।
हेतुभूता भवन्तीत्यप्यार्या अभिदधत्यहो।।

१०४. सूक्ष्मावस्थास्तु भूतानां तन्मात्राणीते चक्षते।।

१०५. उभयस्मिन्नहङ्कारे स्वकार्यजनके सति।
राजसाहङ्क्रिया तत्र संमता सहकारिणी।।

१०६. सात्विकाहङ्क्रिया शब्दतन्मात्रादिसहायिनी।
श्रोत्रादिपञ्चकं सूते ततस्तत्सहयोगतः।
कर्मेन्द्रियाणि वागादीन्युत्पादयति सैव हि।
असहाया मनस्सूत इति तत्वविदो विदुः।।

१०७,१०८,१०९. इन्द्रियेषु हि केषाञ्चिद्भूतकार्यत्वकीर्तनम्।
यत्तच्छास्त्रविरुद्धं स्याद्भूतान्याप्यायकान्युत।।

११०. महदादिपदार्थानां मिथस्संहतिमन्तरा।
कार्योत्पादनशक्तत्वविरहात्परमः पुमान्।
मृत्तिकास्सिकताश्चापस्संमेल्य द्रव्यमेककम्।
कृत्वा भित्तिविधातेव तान्येतान्यखिलान्यपि।
मिश्रयित्वा विधायाण्डं तस्मिन् सूते चतुर्मुखम्।।

१११. अण्डानि तत्कारणानि स्वयमेव सृजत्यसौ।
अण्डान्तर्गतवस्तूनि चेतनानुप्रवेशतः।।

११२. अण्डानि तानि सचतुर्दशविष्टपानि
व्याप्तान्यथो दशगुणोत्तरसप्तवप्रैः।
क्रीडार्थकन्दुकसमानि परस्य पुंसः
सृष्टानि बुद्बुधसमं युगपद्बहूनि।।

११३. भूतेषु तावदाकाशोऽवकाशस्य प्रदायकः।
वायुर्वाहादिहेतुस्स्यात्तेजः पाकादिकारणम्।
जलं क्लेदादिहेतुस्स्यात् क्ष्मा हेतुर्धारणादिषु।।

११४. श्रोत्रादीनां तु पञ्चानां शब्दादिग्रहणं क्रिया।
विसर्गशिल्पे गत्युक्ती वागादीनां क्रिया मता।
सर्वेषामिन्द्रियाणां तु मनस्साधारणं मतम्।।

११५. आकाशादिमभूतानां क्रमाच्छब्दादयो गुणाः।।

११६. भूतेषु गुणसाङ्कर्यं पञ्चीकरणमूलकम्।।

११७. व्योम्नो नीलतया भानमपि तेनैव हेतुना।।

११८. उत्तरोत्तरतन्मात्राः पूर्वपूर्वाभिरन्विताः।
स्वविशेषान्सृजन्तीति कारणेन यथोत्तरम्।
गुणाधिक्यं बभूवेति कथयन्त्यपि केचन।।

११९. सत्त्वशून्यं तु कालोऽथ तत्प्रकारः प्रकथ्यते।।

१२०. प्रकृतिप्राकृतानां स परिणामेषु कारणम्।
कलाकाष्ठादिरूपेण परिणामी न शाश्वतः।
सहायो देवलीलाया देहभूतस्तथेशितुः।।

१२१. अचिद्द्वितयमन्यत्तु चेतनानां हरेरपि।
भोग्यभोगोपकरणभोगस्थानतया स्थितम्।।

१२२. भोग्यास्तु विषयाः प्रोक्ता भोगोपकरणानि तु।
चक्षुरादीन्द्रियग्रामः, भोगस्थानान्यथो पुनः।
समस्तदेहाश्च तथा भुवनानि चतुर्दश।।

१२३. अत्राद्यस्याचितोऽधस्तात्सीमाभूमिस्तु विद्यते।
परितश्चोपरिष्टाच्च सा नास्तीति प्रकथ्यते।।
मध्यमस्याचितस्तावदधस्तात्परितश्च सा।
नास्ति किन्तूर्ध्वसीमैका वरीवर्तीति बुध्यताम्।
कालस्तु निरवच्छेदस्सार्वत्रिक इतीर्यते।।

१२४. कालो नित्यविभूत्यां तु नित्यो, नात्रेति चोचिरे।।

१२५. केचित्कालो न हीत्याहुः, तत्प्रत्यक्षागमार्दितम्।।

१२६, १२७. दिगित्येकं पृथग्द्रव्यमस्तीत्याहुः परे, न सत्।

१२८. बहुहेतुभिरस्याश्चान्तर्भावाद्गगनादिषु।।

१२९. केचिदावरणाभावमाकाशं प्रत्यपीपदन्।

१३०. भावरूपेण भानात्तु तथोक्तिर्नोपपद्यते।।

१३१. अन्ये प्राहुरिमं नित्यं निष्प्रतीकं विभुं तथा।
अप्रत्यक्षम्, अमी वादाश्चत्वारोप्युचिता न हि।
भूतादितोऽस्य जननात्स्वहेतौ व्याप्त्यभावतः।
चक्षुर्गोचरभावाच्चेत्यमी तत्र तु हेतवः।।

१३२. अन्ये प्राहुरिमं नित्यं निष्प्रतीकं विभुं तथा।
अप्रत्यक्षम्, अमी वादाश्चत्वारोप्युचिता न हि।
भूतादितोऽस्य जननात्स्वहेतौ व्याप्त्यभावतः।
चक्षुर्गोचरभावाच्चेत्यमी तत्र तु हेतवः।।

१३३. वायौ त्वगिन्द्रियग्राह्ये नाप्रत्यक्षत्वमिष्यते।।

१३४. भौमदिव्यादिभेदेन तेजो बहुविधं मतम्।।

१३५. अर्कादीनां स्थिरं तेजः दीपादीनां तदस्थिरम्।।

१३६. रक्तस्स्यात्तेजसो वर्णः स्पर्श औष्ण्यमितीर्यते।।

१३७. अपां वर्णस्सितः, स्पर्शश्शैत्यं, मधुरता रसः।।

१३८. उच्चावचाः पृथिव्यास्तु रसा वर्णाश्च कीर्तिताः।।

१३९. अनुष्णाशीतता स्पर्शो वायोश्चास्या भुवस्तथा।।

१४०. इत्थं तावदचित्तत्त्वे त्रैविध्यमवसीयताम्।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीतायां**
**तत्त्वत्रयार्थरत्नमालायां द्वितीयं रत्नम्**
**अचित्प्रकरणं समाप्तम्।।**

श्रीरस्तु

# तृतीयं रत्नम्

# ईश्वरप्रकरणम्

१४१. सर्वहेयातिगानन्तज्ञानानन्दस्वरूपकः।
ज्ञानशक्त्यादिकल्याणगुणवर्गविभूषितः।
अशेषजगतां सर्गस्थितिसंहारकारकः।
**आर्तो जिज्ञासुरर्थार्थी** ज्ञानीत्युक्तैश्चतुर्विधैः।
पुरुषैर्भजनीयश्च चतुर्विधपुमर्थदः।
सुदिव्यविग्रहोपेतो लक्ष्मीभूम्यादिनायकः।
यस्स एवेश्वरः प्रोक्तः विव्रियन्तेऽथ तद्गुणाः।।

१४२. यथा हि तमसस्तेजः यथा सर्पस्य पक्षिराट्।
विकारादिकदोषाणां तथा प्रतिभटो हरिः।
अशेषहेयप्रत्यर्थिभाव एवं विचिन्त्यताम्।।

१४३. त्रिपरिच्छेदराहित्यमनन्तत्वं प्रचक्षते।
नित्यश्च चिदचिद्व्याप्तोऽन्तर्यामी चेति गण्यताम्।।

१४४. अन्तर्याम्यपि सन्विष्णुस्तत्तद्दोषैर्न लिप्यते।

१४५. यथा शरीरगैर्बाल्यप्रमुखैश्चिन्न लिप्यते।।

१४६. आनन्दरूपज्ञानित्वं ज्ञानानन्दैकरूपता।।

१४७. कार्त्स्न्येनाप्यनुकूलत्वं प्रकाशत्वं च तन्मतम्।।

१४८. ईशस्य ज्ञानशक्त्यादिगुणा नित्या विसीमकाः।
निस्सङ्ख्याश्च तथोपाधिवर्जिता दोषदूरगाः।
समाधिकदरिद्राश्च विभान्तीति विचिन्त्यताम्।।

१४९. अत्र वात्सल्यमुख्यानामनुकूलास्तु गोचरः।
शौर्यादीनां तु विषयः तदन्ये भक्तवैरिणः।।

१५०. तत्र च ज्ञानमज्ञानां शक्तिश्चाशक्तियोगिनाम्।
क्षमा तु सापराधानां कृपा दुःखाकुलत्मनाम्।

वात्सल्यं दोषयुक्तानां सौशील्यं मन्ददेहिनाम्।
आर्जवं कुटिलानां तु सौहार्दं दुष्टचेतसाम्।
मार्दवं विरहार्तानां सौलभ्यं दर्शनैषिणाम्।
एवं गुणान्तराणां च विषयस्त्ववधीयताम्।।

१५१. इत्थं सर्वेश्वरो दिव्यैर्गुणैर्विभ्राजते यतः।
ततः परेषां दुःखेषु हन्त हन्तेति विह्वलः।
तेषां च सततं सर्वश्रेयोऽन्वेषणतत्परः।
न च स्वार्थो न च स्वात्मपरार्थश्च भवन्नुत।
चन्द्रिकावातपाटीरसलिलाद्यविशेषतः।
पारार्थ्यैकनिधिर्भक्तेष्वपकर्षाननामृशन्।
सर्वथा रक्षिदारिद्र्ये तेषां रक्षणदीक्षितः।
सान्दीपिनिसुतं चैव वैदिकस्यात्मजानपि।
यथा प्रत्यार्पिपच्चैवं कुर्वाणो दुष्कराः कृतीः।
तेषामपेक्षितं सर्वं कृपया परिपूरयन्।
तेषां ध्रुवादिपदवदपूर्वातिशयान्दिशन्।
आत्मात्मीयमशेषं च वितरन् स्वैरभुक्तये।
तेषां कार्येषु सिद्धेषु कृतकृत्यस्स्वयं भवन्।
श्रेयस्सु स्वेन रचितेष्वेकमप्यविचिन्तयन्।
भक्ताकलितसत्कृत्यलेशमेवानुचिन्तयन्।
चिरात्परिचितानां तु रसानां विस्मृतेः कृते।
माधुर्यं परमं बिभ्रदशेषासु दशास्वपि।
भार्यापुत्रेषु दोषाणाम् अद्रष्टेव प्रियः पुमान्।
आगांस्याश्रितवर्गाणां मनसाऽप्यविचिन्तयन्।
जातुचिद्भक्तदोषांस्तान्दर्शयन्त्याऽपि कान्तया।
सह संस्पर्धमानस्सन् सुदृढं रक्षणे रतः।
कामिनीदेहमालिन्यकामिकामुकतौल्यतः।
भक्तदोषेषु भोग्यत्वप्रतिपत्तिपरिष्कृतः।
करणत्रयतश्चापि भक्तेष्वार्जवभासुरः।

विश्लेषकाले तद्दुःखं स्वया गोष्पदयन् शुचा।
क्षोदीयस्स्वपि सौशील्यं स्वीयं सम्यक्प्रदर्शयन्।
तेषां बन्धुं प्रहर्तुं च शक्यस्सन् सुलभो भवन्।
सद्यः प्रसूते वत्से स्वे वात्सल्यस्यातिशायनात्।
प्राक्प्रसूतं च वत्सं स्वं तथा घासप्रदित्सया।
उपागतांश्च श्रृङ्गाभ्यां खुरैश्च क्लेशभाजनम्।
कुर्वती गौरिव प्रेष्ठां लक्ष्मीं सूरींश्च संत्यजन्।
परमं स्नेहमात्मीयं प्रदर्शयति नित्यशः।।

१५२. कारणं सर्वजगताम् असावेव परः पुमान्।।

१५३. बौद्धादयः कारणत्वं परमाणोरवादिषुः।।

१५४. तादृशे परमाणौ तु प्रमाणविरहादपि।
अथ श्रुतिविरोधञ्च स वादो नोपपद्यते।।

१५५. कापिलास्तु प्रधानस्य कारणत्वमचक्षत।।

१५६. तस्य चैतन्यविरहादीश्वरेऽनधितस्थुषि।
परिणन्तुमयोग्यत्वात् सृष्टिसंहारशब्दतः।
व्यवस्थाया अयोगाच्च न तदप्युपपद्यते।।

१५७. कर्मवश्यत्वदुःखित्वहेतोर्जीवोऽप्यकारणम्।

१५८. अतस्सर्वेश्वरस्त्वेको जगतां कारणं मतः।।

१५९. कारणं स्वेच्छयैवासौ नाविद्याकर्मशासनैः।।

१६०. न तस्यायासलेशोऽपि निजसङ्कल्पतः कृतेः।।

१६१. लीलैव केवलं प्रोक्तं जगत्सृष्टेः प्रयोजनम्।।

१६२. तर्हि संहरणे लीला व्युच्छिद्येत किलेतिचेत्।

१६३. संहृतेरपि लीलात्वान्न तद्विच्छेदसम्भवः।।
एतत्कारणभूतास्तु ज्ञानशक्त्यादयो गुणाः।
प्राणिवर्गानशेषांश्च विषयीकृत्य जाग्रति।।

१६४. यतः परिणमत्येष स्वयमेव जगत्तया।
उपादानाख्यहेतुत्वमप्यस्मिन्सुवचं विदुः।।

१६५. तर्हि निर्विकृतित्वोक्तिः कथमस्योचितेति चेत्।

१६६. स्वरूपे विक्रियाऽभावादौचित्यं सा समश्नुते।।
१६७. परिणामः कथं तर्हि भवत्यस्येति चेच्छृणु।
१६८. अपृथक्सिद्धचिदचिद्द्वारा परिणतिर्मता।।
१६९. ऊर्णनाभ्यभिधे क्षुद्रे यस्स्वभावोऽवलोक्यते।
सर्वशक्ते परे पुंसि स तु सङ्घटते न किम्।।
१७०. ईश्वरे स्रष्टृता नाम तमसः परिणामनम्।
शरीरेन्द्रियदानेन चेतने ज्ञानपोषणम्।।
१७१, तस्य स्थितिक्रिया नाम - सृष्टेष्वखिलवस्तुषु।
सस्ये जलवदाविश्य सर्वथा रक्षणक्रिया।।
१७२. अविनीतस्य पुत्रस्य पित्रा निगलबन्धनम्।
क्रियते हि यथा तद्वद्विषयान्तरसङ्गिनाम्।
करणानां तु भग्नत्वकरणं संहृतिर्मता।।
१७३. सृष्ट्यादित्रयमेतत्तु प्रत्येकं च चतुर्विधम्।।
१७४. दशप्रजापतीन्कालं ब्रह्माणं प्राणिनोऽखिलान्।
आविश्य सृजति श्रीमान् रजोगुणसमन्वितः।।
१७५. विष्ण्वादिरूपेणोद्भूय मन्वादिमुनिवक्त्रतः।
प्रवर्त्य शास्त्रवृन्दानि सदध्वानं प्रदर्श्य च।
कालस्य सर्वभूतानामन्तर्यामी भवन्हरिः।
सत्त्वाख्यगुणसम्पन्नः स्थितं सम्पादयत्यहो।।
१७६. रुद्रमग्न्यन्तकादींश्च कालं भूतान्यशेषतः।
आविश्य संसृतेः कर्ता स तमोगुणसंयुतः।।
१७७. कांश्चित्सुखजुषः कांश्चिद्दुःखितांश्च सृजन्हरिः।
न किं वैषम्यनैर्घृण्यभाजनं भवतीति चेत्।।
१७८. तत्तत्कर्माण्यवेक्ष्यैव सृष्टिं कलयते यतः।
मृद्भक्षिणीं प्रजां जिह्वातले लाञ्छनकर्मणा।
भीषयन्तीव जननी हिततात्पर्यतोऽपि च।
कुरुते हि यतस्तस्मात्तस्य नावद्यसम्भवः।।

१७९. **मुन्नीर्ज्ञालमिति** श्रीमद्दिव्यसूक्त्यनुसारतः।
सविग्रहस्सन्सृष्ट्यादीन्भगवान्निर्वहत्यसौ।।

१८०. [१]विग्रहस्तु स्वरूपाच्च गुणेभ्यश्च भृशं प्रियः।
स्वानुरूपश्च नित्यश्चाप्येकरूपस्सुसात्त्विकः।
चिद्देहवज्ज्ञानमयस्वरूपाच्छादको न सन्।
स्वान्तर्विन्यस्तकनकमणिसम्पुटतौल्यतः।
स्पृहणीयसुदिव्यात्मस्वरूपस्य प्रकाशकः।
निस्सीमतेजोरूपश्च (सौन्दर्यादि) मार्दवादिगुणोज्ज्वलः।
योगिध्येयोऽखिलप्राणिसंमोहनविचक्षणः।
समस्तभोगवैराग्यजनकस्सर्वतापहृत्।
नित्यमुक्तानुभाव्यश्चानन्ताविर्भावकन्दभूः।
दक्षिणस्सर्वरक्षायां विभूतिद्वितयाश्रयः।
सर्वास्त्रभूषणैर्जुष्टो विभातीति विभाव्यताम्।।

१८१. परत्वव्यूहविभवान्तर्याम्यर्चावतारतः।
प्रकारैः पञ्चभिर्युक्तं स्वरूपं परमात्मनः।।

१८२. अकालकाल्ये वैकुण्ठे नित्यमुक्तोपभोग्यताम्।
स्वीकृत्य विलसन्विष्णुः पर इत्यभिधीयते।।

१८३. सृष्टिस्थित्यन्तकृत्यर्थं भविनां रक्षणाय च।
उपासकानुग्रहार्थं मूर्तीस्सङ्कर्षणादिकाः।
स्वीकृत्य लसतो विष्णोः स्थितिर्व्यूह इतीर्यते।।

१८४. ज्ञानादयो गुणाष्वट्च परिपूर्णाः परे हरौ।
व्यूहे द्वौ द्वौ गुणौ स्यातां प्रकटौ मूर्तिभेदतः।।

१८५. तत्र सङ्कर्षणो ज्ञानं बलं चापि समुद्वहन्।
जीवतत्त्वमधिष्ठाय प्रकृतेस्तु विविच्य तत्।
प्राप्तप्रद्युम्नतावस्थः शास्त्राणां सम्प्रवर्तनम्।
जगतस्संसृतिं चापि करोतीति विदुर्बुधाः।।

१८६. प्रद्युम्नस्त्वीशनं वीर्यमिति द्वौ तु गुणौ वहन्।

---

१. तिरुवायिमोलि ३-२-१

अधिष्ठितमनस्तत्त्वो दत्ते धर्मोपदेशनम्।
तथा मनुचतुष्कादिशुद्धवर्गस्य सर्गकृत्।।

१८७. शक्तिं तेजश्चानिरुद्धो बिभ्राणो रक्षणे रतः।
तत्त्वज्ञानप्रदः कालमिश्रवर्गौ सृजत्यपि।।

१८८. विभवोऽथ विसीमा सन् गौणमुख्यभिदाश्रयः।।

१८९. मनुष्यत्वं च तिर्यक्त्वं स्थावरत्वं यथा पुनः।
गौणताऽपि तथेच्छातः प्रयुक्ता न स्वरूपतः।।

१९०. तत्राजहत्स्वभावाद्यः दिव्याप्राकृतविग्रहाः।
दीपात्प्रदीपवज्जाता मुख्यत्वेन प्रकीर्तिताः।
प्रादुर्भावा अशेषाश्च मुमुक्षूपासनोचिताः।।

१९१. विधीशपावकव्यासजामदग्न्यार्जुनादिकाः।
गौणप्रादुर्भाववर्गा अनुपास्या मुमुक्षुभिः।।
यतो ह्यहङ्क्रियायुक्तजीवाधिष्ठानशालिनः।।

१९२. नित्योदितादिभेदांश्च जाग्रत्संज्ञादिरूपकम्।
चातुरात्म्यं केशवादि, मूर्त्यन्तरसमाह्वयम्।
विभवान्पद्मनाभादीन् षट्त्रिंशद्भेदभासुरान्।
उपेन्द्रो दधिभक्तश्च हयग्रीवस्त्रिविक्रमः।
नरो नारायणश्चापि हरिः कृष्णो झषः किटिः।
कूर्म इत्येवमाख्यातानवतारविशेषकान्।
तद्भुजायुधवर्णादिभेदांश्च ब्रूमहेऽत्र न।।
यतो दुरवगाहाश्च प्रोक्ता गुह्यतमाश्च ते।।

१९३. सर्वेश्वरावताराणां हेतुरिच्छैव केवलम्।।

१९४. फलं साधुपरित्राणप्रभृति त्रितयं मतम्।।

१९५. भृगुशापादिना जज्ञे हरिरीत्युक्तिदर्शनात्।
अवतारनिदानत्वं कर्मणामिति नोचितम्।।

१९६. शापादौ व्याजमात्रत्वमवतारेषु चेच्छता।
प्रत्यपादि हि तत्रैव यत्र शापकथोदिता।।

१९७. अन्तः प्रविश्य शास्तृत्वमन्तर्यामित्वमुच्यते।।

१९८. स्वर्गदुर्गतिगत्यादिष्वशेषासु दशासु च।
चेतनानामशेषाणां साहाय्याधानसिद्धये।
अथो शुभाश्रयीभूतदिव्यविग्रहयोगतः।
तेषां ध्येयत्वसिद्ध्यै च तेषां रक्षार्थमेव च।
बन्धुभावेन हृत्पद्मेऽवस्थानं हि तद्विष्यते।।

१९९. अर्चावतरणं नाम (४) **तम**रित्यादिरीरितः।
चेतनाभिमते द्रव्ये देशकालाधिकारिभिः।
प्रयुक्तान्नियमान्हित्वा सन्निधाय विशेषतः।
अपराधेष्वदृष्ट्या चाऽर्चकाधीनात्मसत्तया।
आलयेषु च गेहेष्वप्यवस्थितिरितीर्यते।।

२००. [१]अर्चावतारे परिपूर्णमास्ते रुचिप्रदत्वं च शुभाश्रयत्वम्।
अशेषलोकैकशरण्यता चाऽनुभाव्यता चेति समस्तमेतत्।।

२०१. स्वस्वामिभावव्यत्यासादज्ञाशक्तास्वतन्त्रवत्।
स्थितोऽप्यपारकारुण्यवैवश्यमधिजग्मिवान्।
सर्वापेक्षितसन्दानदीक्षितो भगवानिह।।
इत्थं लोकार्यवर्याणां सूक्तिरत्नार्थसङ्ग्रहः।
अण्णङ्गरार्यरचितो जेजेतु शरदश्शतम्।।

**।। ईश्वरप्रकरणं समाप्तम्।।**

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीता तत्त्वत्रयार्थरत्नमाला समाप्ता।।**

---

१. तिरुवायिमोलि २-७-१

श्रीरस्तु

श्रीमते रामानुजाय नमः

श्रीमद्वरवरमुनये नमः

श्रीमल्लोकगुरवे नमः

# श्रीवचनभूषणरत्नमाला

## श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीता

**सर्ववित्तमजगद्गुरुदितं दिव्यशास्त्रमिति विश्रुतं भुवि।**
**श्रीयुतं वचनभूषणं शुभं पद्यरूपमधुना विरच्यते।।**

१. वेदार्थनिर्धारणमामनन्ति स्मृत्येतिहासेन पुराणतश्च।

२. स्यात्पूर्वभागार्थधृतिः स्मृतिभ्यः शिष्टद्वयीतश्शिरसोऽर्थक्लृप्तिः।।

३. इतिहासस्तु बलवानितिहासपुराणयोः।।

४. अत एव समासेऽभूत्तस्य पूर्वं प्रयुक्तता।।

५. अथेतिहासरत्नेन श्रीमद्रामायणेन तु।
कारागारनिवासिन्या वैभवं प्रतिपाद्यते।
दूतस्य विभवः प्रोक्तो महता भारतेन तु।।

६. प्रोक्तप्रबन्धयुग्मेन घटकोपायभूतयोः।
वैभवं प्रोच्यतेस्मेति वेदितव्यं विवेकिभिः।।

७. कृपा च पारतन्त्र्यं चानन्यार्हत्वमितीरितम्।
त्रयं पुरुषकारत्वसिद्धये समपेक्षितम्।।

८. सीताया आद्यविश्लेषः स्वकृपाख्यापनार्थकः।
अथ मध्यमविश्लेषः पारतन्त्र्यप्रकाशकः।
समनन्तरविश्लेषोऽनन्यार्हत्वप्रकाशकः।।

९. संश्लेषेऽपि च विश्लेषे घटकत्वं प्रकाशते।।

१०. संश्लेषकाले सर्वेशं विनेतुं यतते रमा।
विश्लेषसमये जीवं शिक्षितं कर्तुमिच्छति।।

११. उपदेशत एवैतच्छिक्षणं स्यात्तयोर्द्वयोः।।

१२. द्वयोश्च कर्मवैवश्यमुपदेशेन भज्यते।।
१३. उपदेशस्य वैफल्ये जीवं निजकृपाबलात्।
ईशं सौन्दर्यतश्चापि विनेतुं प्रयतेत सा।।
१४. अज्ञातानखिलानर्थान् ज्ञापयित्वा यतो हरिः।
आचार्यघटकोपायकृत्यान्यात्मन्यदीधरत्।
ततश्चोपायमाहात्म्यं महाभारतकीर्तितम्।।
१५. अनयोर्दिव्यदम्पत्योः को नाम महिमेतिचेत्।
दोषश्च गुणहानिश्च वर्तेते चेतनेष्विति।
अनेन हेतुना तेषामनुपेक्षणतोऽपि च।
तयोरेव च तत्स्वीकृत्युपायनतया ग्रहः।
इति यत्तदिदं तावत् वैभवं श्रीतदीशयोः।।
१६. अथ चेद्दिव्यदम्पत्योस्तद्वयक्षयकाङ्क्षणम्।
तयोर्द्वयोर्भवेदेव तद्द्वयापत्तिदूषणम्।।
१७. मनुते यदि भक्तोऽयं तद्द्वयक्षयमात्मनि।
अथ तस्मिन् प्रसज्येत तद्द्वयस्थितनिश्चयः।।
१८. राक्षसीदोषवृन्दानि प्रसिद्धान्येव सर्वतः।
१९. जितेन्द्रियाग्रगण्ये चाप्यास्तिकाग्रेसरे तथा।
**अर्जुनः** केशवस्यात्मेत्युक्त्या श्रीकृष्णधारके।
पार्थे को दोष इति चेत्, सन्ति दोषा निशम्यताम्।
बान्धवस्नेहकारुण्यवधभीतय इत्यमी।।
२०. द्रौपद्यास्तु परीभावं पश्यन्नपि दृशा स्वया।
असहिष्टेत्ययं दोषो मुख्यः श्रीकृष्णचेतसा।।
२१. पाण्डवानां निरासेऽपि कर्तव्ये सत्यतत्क्रिया।
द्रौपदीभद्रसूत्रस्य रक्षणे परमिच्छया।।
२२. पार्थस्य दूत्यं सारथ्यं प्रपत्तेश्चोपदेशनम्।
यच्छके भगवान् कृष्णः तदप्यस्याः कृते ध्रुवम्।।
२३.२४. देशकालप्रकाराधिकारिभिः फलतोऽपि च।
नैयत्यं न प्रपत्तेर्हि तदस्ति विषये परम्।।

२५. पुण्यक्षेत्रं वसन्तादिकालश्शास्त्रोक्तरीतयः।
त्रैवर्णिका इति प्रोक्ता व्यवस्थाः कर्मणां कृतौ।।
२६. **स एष देशः** कालश्चेत्येवं रामायणोक्तितः।
देशकालव्यवस्थाया विरहोऽस्यां विनिश्चितः।।
२७. मन्त्ररत्नेऽप्यसावर्थः सुस्पष्टः प्रथते पदे।।
२८. प्रकारनियमाभावः सर्वत्र प्रेक्षितुं क्षमः।।
२९. द्रौपदी न खलु स्नात्वा प्रायुक्त शरणागतिम्।
अर्जुनो नीचमध्ये हि श्रुतवानर्थमीदृशम्।।
३०. अतश्शुद्धेरशुद्धेर्वा माभूदन्वेषणश्रमः।।
३१. वेल्वेट्टिसूरये श्रीमत्कलिवैरिगुरूत्तमैः।
अन्वगृह्यत योह्यर्थस्सोऽत्र स्मरणमर्हति।।
३२. अथाधिकारिनैयत्यविरहश्चोपपाद्यते।
पाण्डवा द्रौपदी काकः कालियश्च गजेश्वरः।
विभीषणश्च रामश्च सौमित्रिश्चैतदादयः।
प्रापद्यन्त यतस्तस्मान्नाधिकारिव्यवस्थितिः।।
३३. फलनैयत्यविरहस्त्विदानीमुपपाद्यते।
पाण्डवानां फलं राज्यं द्रौपद्या वसनं फलम्।
काककालिययोः प्राणाः कैङ्कर्यं करिभूपतेः।
विभूषणस्य रामाप्तिः राघवस्याब्धिलङ्घनम्।
रामानुवृत्तिस्सौमित्रेरतो न नियमः फले।।
३४. गुणपूर्तियुते लक्ष्ये प्रयोज्या शरणागतिः।
इति व्यवस्था या सैव विषये नियमो मतः।।
अर्चावतार एवास्ति गुणपूर्तिश्च तादृशी।।
३५. तत्रौवानुष्ठिता शश्वत् प्रपत्तिर्दिव्यसूरिभिः।।
३६. **पूर्ण**मित्युक्तितोऽत्रैव पुष्कलास्सकला गुणाः।।
३७. सौलभ्याद्या गुणा ये ये प्रपत्त्यर्थमपेक्षिताः।
अत्रैव ते प्रदीप्यन्ते तमस्सद्मनि दीपवत्।।
३८. पूर्ति स्वतन्त्रतां चात्र नीत्वाऽसत्समतां हरिः।
स्वस्मिन्ननादरं कुर्वत्स्वपि चादरवान् स्थितः।।

३९. अन्तर्यामिस्थितिः प्रोक्ता पृथिवीगततोयवत्।
परस्थितिस्तु वैकुण्ठे स्यादावरणतोयवत्।
क्षीरसागरवद्व्यूहो विभवास्तु प्रवाहवत्।
अर्चावतारस्तुल्यस्स्यात् तत्प्रवाहस्थितैर्ह्रदैः।।

४०. सोऽयं शास्त्रैरशिक्ष्या मां विषयान्तरसङ्गिनाम्।
वैमुख्यभाजां मर्त्यानां विमुखत्वं निवर्तयन्।
रुचिप्रजनने शक्तः उपायो रुचितः परम्।
उपायस्वीकृतौ सत्यां नित्यं भोग्यतया स्थितः।।

४१. अत्र प्रपत्तिकर्तारः त्रयस्स्युरधिकारिणः।।

४२. अज्ञा ज्ञानाधिकाश्चापि भक्तेः परवशा इति।।

४३. अज्ञानतः प्रपन्नत्वमस्मदादिषु विद्यते।
ज्ञानाधिक्यात्प्रपन्नत्वं पूर्वाचार्येषु राजते।
भक्तिभूम्ना प्रपन्नत्वं प्रथते दिव्यसूरिषु।।

४४. प्राचुर्यमभिसन्धाय व्यवस्थैषा विरच्यते।।

४५. निरुक्तं त्रितयं तत्त्वत्रयमूलकमुच्यते।।

४६. [1]**एन्नान् शेयूहे**निति श्रीसूक्त्यर्थे त्रेधाऽनुसंहिते।
तदेतत्तत्र सुगमं भविष्यति विवेकिनाम्।।

४७. तत्र प्रपत्तिहेतुत्वं भक्तिभूमैकसंश्रयम्।।

४८. सैव मुख्या प्रपत्तिर्या भक्तिभूमनिबन्धना।।

४९. **अविद्यात** इति श्लोके त्रयमेतदकथ्यत।।

५०. **इदं शरणमज्ञाना** मित्याद्यपि विचिन्त्यताम्।।

५१. भक्त्यां जाते दशाभेदे न्यासनिष्ठा च्युता भवेत्।।

५२. स तु भक्तिदशाभेदः स्वयत्नेऽप्यवगाहयेत्।
धारणक्षमतानर्हदशायां धारणं दिशेत्।।

५३. ईदृक्स्वभावाः कल्याणगुणेषु च शरेषु च।
नामसु क्वणिते वेणोरपि योग्या निरीक्षितुम्।।

५४. अस्याः प्रपत्तेस्संमर्शे वक्तुमित्थं प्रभूयते।

---

१. तिरुवायिमोलि ५-८-३

रक्षाप्रतिज्ञापत्रस्य तातपादसकाशतः।
पुत्रेण स्वीकृतिर्या तु तामियं तुलयेदिति।।

५५. अस्यास्स्वरूपं स्वोपायभावासहनता मता।।

५६. सहायान्तरसंसर्गासहत्वं त्वङ्गमुच्यते।।

५७. सिद्धोपायाह्वयस्स्वामी सहेतोपायतां स्वयम्।।

५८. उपायतां सहायांश्च सहेत प्रापकान्तरम्।।

५९. तदेतदुभयं चापि न सोढुं प्रभवत्यसौ।।

६०. आत्मज्ञानानिषेधौ तु फलसिद्धावपेक्षितौ।

६१. अन्यथा तस्य शेषित्वपूर्त्योस्सावद्यता भवेत्।।

६२. विनाशयामो विपदमिति भ्रान्त्या प्रवृत्तितः।
तदावाहनमेव स्यात्तन्माभूदिति घुष्यते।।

६३. रक्ष्यत्वानुमतिस्त्वेका रक्षकं प्रत्यपेक्षिता।।

६४. सर्वोपायसमानत्वाच्चैतन्यकृतिताबलात्।
प्राप्तावप्यनुवर्तितत्वात् स्वरूपानतिरेकतः।
अचिद्व्यावृत्तवेषस्य न योग्या साधनीकृतिः।।

६५. सिद्धोपाये कृतज्ञत्वमुपेये प्रेमबन्धनम्।
इत्येतद्द्वितयं प्राहुरचिद्व्यावृत्ततफलम्।।

६६. [१]**उन्मनत्तालिति** श्रीमत्परकालोक्तिरीतितः।
प्राप्त्युपायस्तु भगवत्कर्तृका चिन्तना परम्।।

६७. सा तु सर्वेषु कालेषु वर्तते नाऽत्र संशयः।।

६८. तस्याः फलेग्रहित्वं तु विश्चिन्ते सति चेतने।।

६९. इदानीं का गतिर्हन्ते त्येतादृक्चिन्तनाक्षयः।
शरणं त्वन्तिमे काले इत्यस्मद्यतिभाषितम्।।

७०. प्राप्ता च प्रापकः प्राप्त्या हर्षभागी च सोऽच्युतः।।

७१. स्वप्रयत्ननिवृत्तिं तु पारतन्त्र्यफलं विदुः।
स्वप्रयोजनवैराग्यं शेषतायाः फलं जगुः।।

७२. परप्रयोजनोद्योगं प्रयत्नस्य फलं विदुः।
चैतन्यस्य फलं प्राहुः प्रीतिं तद्विषयोदिताम्।।

---

१. तिरुवायिमोलि २-७-१

७३. अहमर्थस्य दास्यं स्यादन्तरङ्गनिरूपकम्।
ज्ञानानन्दौ तु सुवचौ बहिरङ्गनिरूपकौ।।
७४. नैतदागन्तुकं दास्यं कदाचिदपि चेतने।
७५. स्वातन्त्र्यमन्यशेषत्वं चागन्तुकमिति ध्रुवम्।।
७६. स्वातन्त्र्यमिति यत्तत्तु शेषत्वेन विरुद्ध्यते।
शेषता तु तदन्यस्मिन् तच्छेषत्वविरोधिनी।।
७७. अहङ्काराभिधानस्याच्छादनस्यापनोदने।
अभिधा चेतनस्य स्याद्दास इत्येव शाश्वती।।
७८. ग्रामवंशादितो जातं नामधेयमनर्थकृत्।
७९. **एकान्तीव्यपदेष्टव्य** इत्युक्तिरिह चिन्त्यताम्।
८०. [१]उपायाध्यवसायांशे मैथिली द्रौपदी तथा।
श्रीकृष्णमङ्गलस्वामी चानुसर्तव्यतां दधुः।।
सौमित्रिश्च जटायुश्च सुगन्धक्षेत्रगायकः।
चिन्तयन्ती च साध्यांशे त्वनुसर्तव्यतां दधुः।।
८१. [२]विशेषश्शक्त्यशक्तिभ्यां भूमिद्रुपदकन्ययोः।।
८२. सीता स्वशक्तिमजहात् लज्जां तु द्रुपदात्मजा।
स्वव्यापारं जहौ श्रीमत्कृष्णमङ्गलदेशिकः।।
८३. पक्वस्य पच्यमानस्याप्योदनस्योपभोजने।
कुतुकी क्षुधितो यद्वत्तथा सौमित्रिरात्मवान्।
वनप्रस्थानसमये विश्लेषासहतां वदन्।
कैङ्कर्यं करवै सर्वाः कैङ्करीः करवाण्यहम्।
आज्ञाप्य दास्यमादेयमिति च प्रत्यपादयत्।
अयोध्यागमनात्पश्चात् छत्रमेकेन पाणिना।
अन्येन चामरं चैव गृह्णन् कैङ्कर्यमातनोत्।।
८४. उपैक्षिषातां स्वं देहं जटायुर्गायकश्च सः।
विग्रहश्चिन्तयन्त्यास्तु स्वत एव व्यलीयत।।

---

१. सुगन्धक्षेत्रं - तिरुक्कुरुङ्गुडि इति दिव्यदेशः ।
२. कृष्णमङ्गलदेशिकः - तिरुक्कण्णमङ्गैयाण्डान् इति प्रसिद्धः ।

८५. उपायांशे शक्तिलज्जायत्नानां स्यादपोहनम्।
काङ्क्षिताः प्रेमवैराग्यधारणाऽक्षमताः फले।।

८६. यदस्य विधितः प्राप्तं सुत्यजं स्यात्तदेव हि।
यदेव रागतः प्राप्तं नियतं दुस्त्यजं हि तत्।।

८७. उपायत्वानुसन्धानं प्रवृत्तिभ्यो निवर्तकम्।
उपेयत्वानुसन्धानं प्रवृत्तिषु नियोजकम्।।

८८. अप्राप्तविषयासक्ते तल्लिप्सौत्कण्ठ्यमीक्ष्यते।
स्वप्राप्तविषयासक्तमधिकृत्य किमुच्यताम्।।

८९. अनुष्ठानाननुष्ठाने न गाहेते उपायताम्।।

९०. अनन्योपायतानन्योपेयतानन्यदैवताः।
च्यावयन्तीः प्रवृत्तीर्हि पश्यामः प्रेमशालिषु।।

९१. विज्ञानपाकजाज्ञानमूलकं श्लाघयतेऽखिलम्।।

९२. सिद्धोपायकृषेस्सिद्धमुपेयान्तर्गतं च यत्।
उपायकार्यकर्तृत्वं प्रतिबन्धुमलं न तत्।।

९३. साध्यादनतिरेकीति विलम्बासहमित्यपि।
कारणद्वितयादेव ह्युत्कर्षस्सिद्धसाधने।।
साध्यप्रावण्यमूलं हि साधने चावगाहनम्।।

९४. ये ये चात्मगुणा अस्य प्रजायन्तेऽधिकारिणः।
तेषां प्रधानहेतुस्स्यात्प्रावण्यमिदमेव हि।।

९५. [1]**मार्प्पालूमनम्शुलिप्पेति** कण्डुकेट्टुत्तुमोन्दिति।
**परमात्मनि** यो रक्त इत्यादिकमिहेक्ष्यताम्।।

९६. शमो दमश्च मुख्यस्स्यात् सर्वेष्वात्मगुणेष्वपि।।

९७. उभयोरनयोस्सिद्धौ गुरुर्हस्तगतो भवेत्।
गुरौ हस्तगते मूलमन्त्रः करगतो भवेत्।।
मन्त्रे करगते श्रीमानीश्वरः प्राप्नुयात्करम्।
ईश्वरे हस्तमायाते प्राप्यभूमिः करस्थिता।
[2]**वैगुन्दमानगर्कैय**दिति ह्याह पराङ्कुशः।।

---

१. मार्पाल् - मून्रां तिरुवन्तादि - १४, कण्डुकेट्टु - तिरुवायिमोळि - ४.९.१०

२. वैगुन्द - तिरुवायिमोळि - ४.१०.११, नयवेन् - मुदल्तिरुवन्तादि-६४.

९८. प्रापकात्प्राप्यलाभस्स्यान्मन्त्रः प्रापकलाभकृत्।
मन्त्रलाभस्तु गुरुणा गुरुलाभः शुभैर्गुणैः।।

९९. ऐश्वर्यप्रार्थकानां चोपासनानिरतात्मनाम्।
प्रपत्त्यधिकृतानां च शमादिकमपेक्षितम्।।

१००. विशिष्य तु प्रपन्नानामेतदत्यर्थकाङ्क्षितम्।।

१०१. निषिद्धविषयत्यागमात्रं पर्याप्तमन्ययोः।
विहितांशेऽपि वैराग्यं प्रपन्नाधिक्यसिद्धये।।

१०२. तत्तु जायेत सौन्दर्याद्भक्तिभूम्ना प्रपेदुषाम्।
ज्ञानभूम्ना प्रपन्नानां भगवत्कृपयोदियात्।
अज्ञानतः प्रपन्नानां स्यादाचारानुसंहतेः।।

१०३. सौन्दर्यमज्ञतां सूते कारुण्यमरुचिं तथा।
आचारो जनयेद्भीतिमिति वैराग्यसम्भवः।।

१०४. प्राचुर्यदृष्टितस्तावदेवंनामाभिधीयते।।

१०५, १०६, १०७.अरुचेर्जननार्थं तु दोषदृष्टिरपेक्षिता।
सा न प्रधानहेतुस्स्यादपि त्वप्राप्तता परम्।।

१०८. भगवद्विषये चापि गुणदृष्ट्या न गाहनम्।

१०९. स्वरूपप्राप्तमित्येव वैपरीत्येऽवधीयताम्।
गुणहीन इति भ्रान्तिकाले तत्राऽवगाहनम्।
न घटेत तथा दोषध्यानकाले च संसृतौ।।

११०. **[१]आहिलुम् कोडियेत्येवम्, नान् पिन्नुम् नयवेनिति।**
आहतुर्हि शठारातिपरकालमुनीश्वरौ।।

१११. मुख्यं नैसर्गिकं दास्यं दास्याद्गुणकृतादपि।।

११२. यदुक्तमनसूयायै मैथिल्या स्मर्यतामिह।।

११३. स्वप्रवृत्तिः कथं तर्हि भगवद्विषयेऽन्वियात्।
इति चेदुच्यते, तत्र हेतुः प्रावण्यमेव हि।

---

१. आहिलुम् - तिरुवायिमोळि - ४.३.५
नान्पिन्नुम् - नाच्चियार् तिरुमोळि - ९-७

कारणं तत्र सम्बन्धः स तु नोपाधिसम्भवः।
किं त्वात्मसत्तामारभ्य सुदीर्घमनुवर्तते।।

११४. प्रावण्यकार्यानुभवो यदा न घटते तदा।
सा सत्ता हीयते कामम् अतथात्वाय याः क्रियाः।
सम्भवन्ति हि तास्सर्वा अवर्ज्या उचिता अपि।
अतस्सङ्घटते सेति सर्वमेतत्समञ्जसम्।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीतायां श्रीवचनभूषणरत्नमालायाम् प्रथमप्रकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# श्रीवचनभूषणरत्नमाला

## द्वितीयप्रकरणम्

११५. प्रापकान्तरसंत्यागो नाज्ञानाशक्तिहेतुकः।
स्वस्वरूपविरोधित्वप्रधानतमहेतुकः।।

११६,११७,११८. स्वरूपज्ञानरिक्तानामुपायः प्रापकान्तरम्।
अपाय एव तज्ज्ञानसम्पन्नानां महात्मनाम्।
स्वरूपनाशकत्वेन तस्यापायत्वनिर्णयः।।

११९. [1]**नेरि काट्टीति** दिव्योक्तिः श्रीशठारेरिहेक्ष्यताम्।।

१२०. **वर्तते मे** महाभीतिरित्युक्त्या भयकारकम्।
यन्माशुच इति प्रोक्तं तच्छोकस्य च कारणम्।।

१२१. नाङ्गीक्रियेत चेदेवं प्रापकान्तरसङ्गमे।
प्रायश्चित्तविधानं तु नोपपत्तिं समश्नुते।।

१२२. मदिराबिन्दुसंमिश्रहेमकुम्भस्थतीर्थवत्।
अहङ्कारेण संमिश्रमुपायान्तर मित्यसौ।
श्रीयुक्तकुरुकाधीशगुरुसूक्तिरिहेक्ष्यताम्।

१२३. वराटिकेव रत्नस्य राज्यस्य लिकुचं यथा।
तथा विसदृशं ह्येतत्फलमत्युत्तमं प्रति।।

१२४. दरिद्रत्वात्प्रदेयं तु स्वात्मनो नास्ति किञ्चन।।

१२५. अथ तद्दत्तदाने तु, क्रमेण यदि दीयते।
अनुपायोऽक्रमेणाथ यदि, चौर्यं स्फुटीभवेत्।।

१२६. भर्तृभोगस्य मूल्यं चेदर्थ्यते भार्यया ततः।
यथोभयोरवद्यं स्यात्तथाऽत्रापि न संशयः।।

१२७. उपायत्वेन वेदान्ताः कथं विदधतीति चेत्।

---

१. नेरिकाट्टि - पेरियतिरुवन्तादि - ६

१२८. औषधं सेवितुं ये न कामयन्तेऽथ तान्प्रति।
तद्गुडादिषु संमिश्र्य यथा वा सम्प्रदीयते।
तथौषधसमो विष्णुर्गुडतुल्यप्रवृत्तिषु।
संमिश्रितो व्यधायीति वेदितव्यं विवेकिभिः।।

१२९. परहिंसां व्युदसितुं प्रवर्तितमभूदिदम्।।

१३०. पूर्वचोदितहिंसावत्तदेतत्प्रापकान्तरम्।।
विधेस्तथानिषेधस्याप्यसाङ्गत्यं न विद्यते।।

१३१. व्यधायि शास्त्रविश्वासकृते तत्पूर्वहिंसनम्।
इदं स्वरूपविश्वासकृते तु विधिचोदितम्।।

१३२. तत् तु चर्मणि लीयेत मर्मस्पृगिदमुच्यते।।

१३३. एतत् तु दुष्करं च स्यात्कर्मसाध्यत्वहेतुना।।

१३४. प्रपत्तिसंज्ञोपाये तु नैतादृग्दोषसम्भवः।।

१३५. आत्मयाथात्म्यविज्ञानकार्यत्वात्प्राप्त आत्मनः।
[1]**शित्तवेण्डेति** शठजिद्दिव्यसूक्तिप्रकारतः।
क्रियानिवृत्तिसाध्यत्वात्सुकरश्च भवत्यसौ।।

१३६. प्रपूर्णविषयत्वेन वैभवानुगुणं यथा।
तथा न सुशकं तस्मिन्नुपायनसमर्पणम्।।

१३७. सन्तोषोऽभिमुखीभावसूचकक्रियया परम्।।

१३८. दुराराधत्वधीजन्यवैमुख्यं विनिवर्त्य च।
प्रावण्यातिशयं त्वेव प्रसूते पूर्णता हरेः।।

१३९. [2]**पत्रं पुष्पं फलं तोयम्। अन्यत्पूर्णादपामिति।**
**पुगै पूवे** इति श्रीसूक्त्यर्थचिन्ता भवत्विह।।

१४०. घासं प्रदर्श्य चाहूय घासस्यैव प्रदानवत्।

१४१. फलसाधनयोर्नैव भेदः, तस्मात्सुरवात्मकः ।।

१४२. अयं हि चेतनो यदा तमीश्वरं हि सिप्सते
तदा प्रपत्तिरप्यसौ न साधनीभवत्यहो।

१४३. यदा तु सर्वलोकनाथ एनमीप्सति स्वयं
तदा तु नैव पातकं निरोधनाय कल्पते।।

---

१. शित्तवेण्डेति - तिरुवायिमोळि - ९-१-७. २. पुगैप्वे - तिरुवायिमोळि - १-६-१.

१४४. एतदूद्वयं श्रीभरते गुहे च सुगमं किल।

१४५. भरतस्य तु सादुगुण्यं दोषभावमविन्दत।
निषादपतिदौर्गुण्यं गुणरूपमभासत।।

१४६. सर्वेषामपराधानां प्रायश्चित्तात्मिका त्वियम्।
प्रपत्तिरपि दोषस्सन् क्षामणं खल्वपेक्षते।।

१४७. चिरादन्यपरा भार्या लज्जाभयविवर्जिता।
आसाद्य भर्तृसान्निध्यं मां स्वीकुर्विति काङ्क्षति।
इति यत्तत्सधर्मा स्यान्न्यासश्चेतनकर्तृकः।।

१४८,१४९. पारन्त्र्यात्कृपाधीनात् स्वातन्त्र्यायत्तसम्भवम्।
पारतन्त्र्यं बलिष्ठं स्यात्, नायमात्मेति हि श्रुतिः।।

१५०. अपेक्षानिरपेक्षस्सन् स्वीकारोऽयं परात्मनः।
वातात्मजे निषादाधिपतौ च समपद्यत।।

१५१. यान्पुरस्कुरुते जीवस्तानेव भगवानपि।
विभीषणाभीतिदानघट्टे चैतन्निरीक्ष्यताम्।।

१५२. द्वयोरेष पुरस्कारः स्वस्वदोषापनुत्तये।।

१५३. स्वरूपसिद्धिश्चैतस्मादित्येतत्पारमार्थिकम्।।

१५४. औपाधिकं च नित्यं च पारतन्त्र्यं द्वयोश्च हि।।

१५५. अनित्यमुभयोः पारतन्त्र्यं नश्यत्यनेन हि।।

१५६. ससाक्षिकमिमं बन्धं निह्नोतुं नार्हतस्त्विमौ।।

१५७. **[1]एन्नै कोलमलर्प्पावैक्किति** सूक्ती प्रपश्यत।।

१५८. श्रीशब्दे कर्मणिव्युत्पत्त्युपादाने तु, सेवने।
कर्तुसङ्कोचराहित्यं स्वरूपगुणसङ्गतम्।
अत्र चिन्तयितुं योग्यमिति प्राहुर्मनीषिणः।।

१५९. घटकान्वयनैयत्यमधिकारित्रयस्य च।।

१६०. स्वस्मै स्वेनेप्सितं श्रेयः पापवत्प्रतिबन्धकम्।।

१६१. सौन्दर्याय धृतश्चोलः समाश्लेषं रुणद्धि हि।।

१६२. **हारोऽपिनार्पितः कण्ठ** इति श्लोकोऽत्र चिन्त्यताम्।।

---

१. एन्नै - तिरुवायिमोळि - १०-१०-७.

१६३. पुण्यवत्पारतन्त्र्यं च परानुभवरोधकम्।।

१६४. शेषत्वादिवदेव स्याद्देहोद्वासनमप्यरिः।।

१६५. भूषादिकमनुद्देश्यं मालिन्यं हि प्रियं भुवि।।

१६६. **स्नानं रोषस्य जनकम्** इति वागिह वीक्ष्यताम्।।

१६७. [1]**वञ्जक्कल्वन्, मङ्गवोट्टि** त्येतत्सूक्तिद्वयं तथा।।

१६८. उशीरधारणोत्कण्ठिजनमृत्कामनानयात्।
बुभुक्षते सदेहं तु ज्ञानिनिं भक्तवत्सलः।।

१६९. परमार्तस्य पुंसोऽस्य शरीरस्थितिकारणम्।
तच्छरीरमहाकामिभगवत्कामनापरम्।।

१७०. सर्वेषु दिव्यदेशेषु क्रियमामं महादरम्।।
**तिरुमालिरु**मित्यादिगाथाकीर्तितरीतितः।।
एतच्छरीरैकदेशे कुरुते भक्तवत्सलः।।

१७१. वासस्साधनमर्चासु साध्यं भक्तहृदि स्थितिः।।

१७२. [2]**कल्लुम् कडलुमित्यादिरीत्या** सिद्धे फले ततः।
आदरो दिव्यदेशेषु भवत्यल्पतरो हरेः।।

१७३. [3]**इळम् कोयिल् कैविडे** लित्यापद्येतार्थनीयता।।

१७४. स्वप्राप्यभूतसद्भक्तप्रीतिगोचरताबलात्।
कार्तज्ञ्याच्च ततस्तेषु भगवत्प्रीतिरक्षता।।

१७५. तस्माद्दोषापगमवद्विरोधी चान्तरो गुणः।।

१७६. बुभुक्षुभगवद्बुद्ध्या दोषो दोषनिवर्तनम्।।

१७७. **स्वयत्नसाध्यं श्रेयस्तु क्रयक्रीतपयस्समम्।**
**भगवत्कृषिजं श्रेयः स्तनस्रुतपयस्समम्**
इति श्रीकुरुकाधीशगुरुवर्यसुभाषितम्।।

१७८. स्तनन्धयशिशुं पित्रोर्हस्तादादाय सौनिके।
तदर्पणसमं स्वस्य स्वयं श्रेयश्चिकीर्षणम्।।

---

१. वञ्जकल्वन् - तिरुवायिमोळि - १०-७-१, मङ्गवोट्टि- तिरुवायिमोळि - १०-७-१०
तिरुमालिरुम् - तिरुवायिमोळि - १०-७-८

२. कल्लुम् - पेरिय तिरुवन्तादि - ६८ ३. इलम् कोयिल् - इरण्डां तिरुवन्तादि - ५४

१७९. सम्पादयत्यसौ हानिं स्वात्मनस्स्वयमेव हि।।

१८०. अहङ्कारोऽल्पविषयप्रावण्यं चात्मनः क्षतिः।।

१८१. अहङ्कारस्तु नियतमग्निस्पर्शसमो मतः।।

१८२. [1]**न कामकलुषं चित्तं न हि** मे जीवितेन च।
**न देहमितिपद्यानामत्र** स्यादनुसंहितिः।।
**एम्मावीट्टुत्तिरमिति** श्रीशठारिगिरोऽपि च।।

१८३. प्रतिकूलेषु विषयेष्वादरो विषभुक्तिवत्।
अताद्दग्विषयस्पर्शो विषमिश्रोपभुक्तिवत्।।

१८४. विषयग्रामसङ्गेन सुखावाप्त्यभिकाङ्क्षणम्।
अग्निज्वालोपभोगेन पिपासाशान्तिकामना।
नृत्यद्भुजङ्गमच्छायासेवाहेवाक एव वा।.

१८५. ईशभोगैकसक्तस्य मृदुप्रकृतिशालिनः।
विषयान्तरदृष्ट्यैव केवलं विलयोदयः।
केकयाख्यविहङ्गस्य विलयोदयसोदरः।।

१८६. [2]**पल काट्टिप्पडुप्पायो** इति ह्याह पराङ्कुशः।।

१८७. अज्ञानी विषयासक्तश्शुद्धनास्तिकसोदरः।
ज्ञानवान् विषयासक्तो यथा ह्यास्तिकनास्तिकः।।

१८८. कदाचिच्छिक्षणं नेतुमर्हः केवलनास्तिकः।
कदाचिदपि नैवार्हो भवत्यास्तिकनास्तिकः।।

१८९. न केवलमिदं द्वन्द्वं स्वरूपेण विनाशयेत्।
विरोधं भगवद्भक्तेष्वप्युत्पाद्य विनाशयेत्।।

१९०. नामरूपधरास्सन्तो भक्तद्रोहपरायणाः।
दग्धवस्त्रसधर्माणस्तदथो उपपाद्यते।।

१९१. संमर्द्याघट्टितं वस्त्रं दह्यते यदि वह्निना।
अनूचीनतिरश्चीनतन्तुसंस्था न भिद्यते।
अथापि मारुते वाति तूलवद्गगनं व्रजेत्।।

---

१. एम्मावीट्टु - तिरुवायिमोळि-२-९-१ २. पलकाट्टि - तिरुवायिमोळि - ६-९-९

१९२. [1]**अवतीर्येश्वरो यद्यदतिमानुषचेष्टितम्।**
**चक्रे तदखिलं चैव भक्तद्रोहासहत्वतः।**
इति वेदान्तवेद्याख्ययतीन्द्रोऽनुगृहीतवान्।।
१९३. **अवमानक्रिये**त्येष श्लोकोऽत्र ध्यानमर्हति।।
१९४. हरिभक्तापचारस्तु नानाविध इति श्रुतम्।।
१९५. विधासु तासु मुख्यं स्यात्तेषु जन्मनिरूपणम्।।
१९६. अर्चावतारोपादानचिन्तातः क्रूरमेव तत्।।
१९७. मातृयोनिपरीक्षायास्तुल्यं तद्धि निगद्यते।।
१९८. कर्मचण्डालतां प्राप्य त्रिशङ्कुसमतां गतः।
चर्मप्रायीभवद्यज्ञसूत्रस्स्यादुक्तदोषवान्।।
१९९. कदाचिज्जातिचण्डालो भक्तो भवितुमर्हति।
आर्हन्ती साऽपि नश्येत्तु तस्य, यः प्रोक्तदोषवान्।।
२००. आरूढपतितत्वं हि हेतुरत्रेति बुद्ध्यताम्।।
२०१. विषयेऽस्मिंस्तु नास्त्येवाधिकारिनियमो ध्रुवम्।।
२०२. [2]**तमर्हळिलिति** श्रीमद्दिव्यगाथाऽत्र चिन्त्यताम्।।
२०३. वैनतेयस्य वृत्तान्तः स्मरणीयोऽत्र साधुभिः।
पिल्लैप्पिल्लैसमाख्याय कूरनाथोक्तवाक्तथा।।
२०४. ज्ञानानुष्ठितिहानेऽपि यथा भागवतान्वयः।
कल्पते फलसंसिद्ध्ये तथा सत्यपि तद्द्वये।
अलं फलप्रच्युतयेऽपचारस्तेषु केवलम्।।
२०५, २०६. उक्तेऽस्मिन्विषये जन्मवृत्तादिनियमात्ययः।
ज्ञेयः कैशिकवृत्तान्तात्कथयोर्ध्ववसोरपि।।
२०७. वेदाध्यायादिसम्पत्त्या भगवल्लाससम्भवः।
इत्यतः खलु विप्रत्वे श्रूयते स्पृहणीयता।
यदि प्रच्युतिहेतुस्स्यात्तदेव, त्याज्यमेव हि।।
२०८. उत्कर्षो वाऽपकर्षो वा जन्मवृत्तानुबन्धिकः।
फलाय न हि कल्पेत न च प्रच्युतये तथा।।

---

१. वेदान्तवेद्यः - नञ्जीयर् इति सुप्रसिद्धः श्रीवैष्णवाचार्यः।
२. तमर्हलिल् - तिरुमालै - ४३.

२०९. कल्पेते भगवत्सङ्गतदभावौ तु केवलम्।।
२१०,२११. भगवत्सङ्गसद्भावे साम्यं खलु तयोर्द्वयोः।
इति चेदुच्यते, नैव साम्यमित्यवधीयताम्।।
२१२. उत्कर्षभ्रमभूर्जन्म भ्रंशसम्भावनाबलात्।
**शरीरे**चेतिवाग्रीत्या भयस्य जनकं भवेत्।।
२१३. तत्र नैसर्गिकं नैच्यमनुकर्तव्यमेव च।।
२१४,२१५. अपकर्षभ्रमाधारस्योत्कृष्टस्य तु जन्मनः।
नास्त्येव दोषद्वितयं, नैच्यमाजन्मसिद्धिमत्।।
२१६. तस्मादुत्कृष्टजन्मैव श्रेष्ठमित्यवधीयताम्।।
२१७. **श्वपचोऽपि महीपाले**त्येतद्वचनमीक्ष्यताम्।।
२१८. निकृष्टजन्मसम्भूत्या यो दोष उपजायते।
स विलक्षणसम्बन्धादेव प्रशममाप्नुयात्।।
२१९. सम्बन्धयोग्यतासिद्ध्यै भूयाज्जन्मक्षतेः क्षयः।।
२२०. जन्मक्षतिः परीहारस्तस्या इत्युभयं त्विदम्।
[१]**पळुदि**त्यादिगाथायां श्रीमालायां प्रकीर्तितम्।।
२२१. विलक्षणानां सम्बन्धः स्पर्शवदिहिरण्यवत्।।
२२२. साम्याभ्यधिकताबुद्ध्योरेतेष्वावश्यिकी स्थितिः।
२२३. गुरुतुल्या इति, स्वस्मात्संसारिभ्यो हरेरपि।
अधिका इति च ध्यानं साम्याभ्यधिकतामती।।
२२४. आचार्यसाम्यधीमूलमाचार्यस्योपदेशगीः।।
२२५. ईदृशध्यानविरहोऽप्यपचारो भवेन्महान्।।
२२६. [२]**पयिलुम् नेडु कण्शोर नण्णा तेट्टुरुमित्यमूः**।
दशकात्मकगाथाश्च श्रीमालान्तिमपञ्चकम्।
इतिहासपुराणानि चामुमर्थं विवृण्वते।।
२२७. क्षत्रियः कौशिकस्तावद्ब्रह्मार्षिस्समजायत।।
२२८. विभीषणं दशग्रीवः कुलपांसनमभ्यघात्।
इक्ष्वाकुवंशजं मत्वा तं बभाषे रघूद्वहः।।

---

१. पळुद - तिरुमालै - ४२

२. पयिलुम् - तिरुवायिमोळि-३-७-१, नेडु - तिरुवायिमोळि-८-१०-१ कण्टशोर - पेरियतिरुमोळि - ७.४.१, नण्णा - तिरुवायिमोळि - १०.७.५

२२९. जटायोः कृतवान् रामस्स एव ब्राह्ममेधिकम्।।

२३०. अशरीरिवचः श्रुत्वा ज्ञानाधिक्यं विचिन्त्य च।
ब्रह्ममेधेन संश्चक्रे विदुरं च युधिष्ठिरः।।

२३१. धर्मव्याधस्य भवने परिश्रम्य महर्षयः।
धर्मसन्देहवृन्दानामुपशान्तिमचीकरन्।।

२३२. भीष्मद्रोणादिभवनान्युपेक्ष्य यदुनन्दनः।
भवने बुभुजे श्रीमद्विदुरस्य महात्मनः।।

२३३. रामभद्रस्स भगवान् बुभुजे शबरीकरात्।।

२३४,२३५. महापूर्णेन गुरुणा श्रीरामानुजयोगिने।
मारनेरिगुरूत्तंसमधिकृत्योदितं वचः।
[1]**प्रादुर्भावै**रिति श्लोकश्चात्र स्मरणमर्हतः।।

२३६. वेदार्थादिविशेषज्ञोऽप्यभागवत एव यः।
तं कुङ्कुमभरोद्वाहिगर्दभोपममूचिरे।।

२३७. तिर्यक्स्थावरजन्मानि चकमे कुलशेखरः।।

२३८. द्विजाग्र्यो विष्णुचित्तार्यः गोदा तस्यात्मजाऽपि च।
स्वात्मन्यावाहयामास गोपजन्मेति विश्रुतम्।।

२३९. अविद्यादिष्ववद्येषु नष्टेषु सकलात्मनाम्।
नारीणामुत्तमायास्तु स्थितिरुन्मिषति स्वयम्।।

२४०. विशुद्धात्मस्वरूपस्य श्रीसाम्यं षट्प्रकारतः।।

२४१. दृष्टे पुमर्थे तूत्कर्षोऽहङ्कारैकनिबन्धनः।
अदृष्टपुरुषार्थे स तद्राहित्यनिबन्धनः।।

२४२. चतुर्मुखोऽपि सन् हन्त फलतः प्रच्युतोऽभवत्।
सती गोपालकन्याऽपि काचित्फलवती ह्यभूत्।।

२४३. एवं सर्वप्रकारेण नाशहेतोरहङ्कृतेः।
तत्कार्यभूतविषयप्रावण्यस्य च जन्मभूः।
स्वात्मैव हि यतस्तस्मात्स्वस्मिन् शत्रुदृशं दिशन्।
तद्वर्धकेषु क्षुद्रेषु दन्दशूकदृशं वहन्।

---

१. माट्नेरि गुरुः - मारनेट् नम्बि - अये यामुनाचार्यस्य (आळवन्दार्) शिष्यः ।

तन्निवर्तकसद्भक्तवर्गे बन्धुदृशं दधत्।
ईशं पितृसमं पश्यन् गुरुमन्नमिवातुरः।
**अहङ्कारार्थकामाः खल्वनुकूलेष्वनादरम्।**
**प्रावण्यं प्रतिकूलेषूपेक्षाकारिष्वपेक्षणम्।**
**उत्पादयेयु** रित्येवं निश्चित्य चिकितो भवन्।
**नास्माभिश्च परैश्चापि सुसंपादाश्शुभा गुणाः।**
**सदाचार्यप्रसादोत्थभगवत्कृपया परम्।**
**सम्पद्येरन्** इति ध्यायन् देहयात्राव्युपेक्षणम्।
आत्मयात्राभिलाषश्च प्राकृतार्थेष्वभोग्यता।
ईशाराधनसम्पूर्तिप्रसादप्रतिपत्तिता।
शरीरधारणे स्यादित्येवं बुद्धिविशेषकः।
स्वस्य सम्भवति क्लेशे **तदिदं कर्मणः फलम्।**
**यद्वा कृपाफलं स्यादि** त्युद्यन्ती प्रीतिसन्ततिः।
स्वानुष्ठान उपायत्वप्रतिपत्तेरपोहनम्।
वाञ्छा विलक्षणानां तु ज्ञानानुष्ठानसम्पदि।
आदरातिशयोऽर्चासु मङ्गलाशासने रुचिः।
अरुचिश्चान्यविषयेष्वार्तिश्च नियमोऽशने।
अनुवर्तननैयत्यमनुकूलैस्सह स्थितिः।
निवृत्तिः प्रतिकूलानां सहवासस्य चेत्यमी।
गुणा यथा विवर्धेरन् सदाचार्यप्रसादतः।
तथा वर्तेत नियतं यः प्रपन्नाधिकार्यसौ।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यविरचितायां श्रीवचभूषणरत्नमालायां द्वितीयप्रकरणं समाप्तम्।।**

श्रीमते रामानुजाय नमः

# श्रीवचनभूषणरत्नमाला

## तृतीयप्रकरणम्

२४४. मङ्गलाशासनं किं स्वरूपोचितं
बोभवीतीतिचेद्रक्ष्यरक्षित्वयोः।
ज्ञानकाले स्थितिस्स्याद्यथावत्तयोः
प्रेमकाले स्थितिस्स्याद्विपर्यासिता।।

२४५. स्यात्स्वरूपं हरेश्चिन्तितं चेत्ततः
स्वस्य रक्षामसौ चेतनो लिप्सते।
सौकुमार्यानुसन्धानकाले पुनः
स्वेन तं केशवं रक्ष्यमाधित्सति।।

२४६. एतत्पङ्क्तिरथे राज्ञि मैथिल्यां कुशिकात्मजे।
दण्डकारण्यवास्तव्यमहर्षिषु हनूमति।
सुग्रीवे नन्दगोपे च विदुरे चापकिङ्करे।
अन्यत्रापि च भूयस्सु भक्तेष्वीक्षणमर्हति।।

२४७. सौमित्रावतिशङ्काढ्ये श्रीगुहेऽप्यतिशङ्कया।
व्याधाः परिकरास्तस्य ररक्षुः किल राघवम्।।

२४८. कदाचित्स्वमुखाम्भोजे दत्तदृष्टीन्महात्मनः।
भगवद्देहसौन्दर्यमेवमाकुलयत्यहो।।

२४९. निर्दिष्टास्तु निषादाद्याः अस्मत्कक्ष्यास्थिता इति।
वाच्यतां सुवते दिव्यसूरयश्शठजिन्मुखाः।।

२५०. सर्वेभ्यो दिव्यसूरिभ्यो विष्णुचित्तो विशिष्यते।।

२५१. कादाचित्कमिदं तेषामेतस्य तु सदातनम्।।

२५२. यत्र ते विनिमज्जन्ति तत्रासौ प्रतितिष्ठति।।

२५३. तेषां विनाश्य भगवत्तद्भक्तोभयशेषताम्।

स्वरूपं स्वनिमग्नं सत्कुरुते या तु सौन्दरी।
साऽस्योभयविवृद्ध्यर्थां समुत्तारयतेऽथ तत्।।

२५४. भीनिवर्तकशौर्यादिगुणेभ्यो भीतिशालिता।
प्रतिकूलजनानामप्यनुकूलतया कृतिः।
भूतकालिकचर्यार्थमुत्तरत्रावसन्नता।
मङ्गलाशासनं त्वेव प्राप्तेः फलमितीरणम्।
निरीक्ष्यानिमिषानुक्तिः [1]उरगल्उरगल् इति।
इत्यमीषां स्वभावानां विष्णुचित्ते सदा स्थितिः।।

२५५. श्रोतॄणामपि वक्तॄणां विहन्तुमसहायताम्।
यथा ह्युपदिशन्त्यन्ये नैवं भाष्यकृदेष च।
किन्तु तस्य हरेरेव विहन्तुमसहायताम्।
[2]**आळुमाळा**रितीयं गीराचष्टे खलु तस्य ताम्।।

२५६. सत्तासमृद्ध्योऽन्येषां वीक्षानुभवदास्यतः।
मङ्गलाशासनेनैव विष्णुचित्तमुनेस्तु ताः।।

२५७. ध्यातेषु दिव्यदेशेषु विहाय शयनाशने।
अस्यैव यात्रा सर्वेषामस्माकं भवितुं क्षमा।।

२५८. मङ्गलाशासनं तस्मात्स्वरूपानुगुणं मतम्।।

२५९. येषां तु परमार्तानां ज्ञानभक्तिविरक्तयः।
विशिष्य भान्ति प्रत्यङ्गं तेऽनुकूलाः प्रकीर्तिताः।।

२६०. एकस्मिन्सति केदारे पूरिते पयसा ततः।
यथा तत्पार्श्वगं क्षेत्रमपि क्लिन्नं प्रतीयते।
तथा ज्ञानादिशून्यानामप्यमीभिस्सहान्वयात्।
तदभावप्रयुक्तस्य तापस्य विलयो भवेत्।।

२६१. सरित्प्रवाहसान्निध्ये तदौपयिकलक्ष्मणाम्।
यतोत्पत्तिस्तथैतेषां भगवत्प्राप्तिसन्निधौ।
सम्पद्येरन् स्वतः कामं ज्ञानभक्त्यादयो गुणाः।।

---

१. उरगल् उरगल् - पेरियाल्वार् तिरुमोळि - ५.२.१
२. आळुमारळार् - तिरुवायिमोळि - ८-३-३

२६२. एवं संवर्धमानाभिर्ज्ञानभक्तिविरक्तिभिः।
चरमं वपुरित्येवं स्वस्यैव स्याद्विनिर्णयः।।

२६३. ये देहात्माभिमानाढ्या अन्यशेषास्स्वतन्त्रकाः।
उपायान्तरनिष्णातास्स्वप्रयोजनतत्पराः।
प्रतिकूलास्तु ते प्रोक्तास्तानुद्दिश्याश्च कथ्यते।।

२६४. एतेषां भिन्नभिन्नं स्यादुद्देश्यप्रमुखं त्रयम्।।

२६५. देहात्ममानिनां तावदुद्देश्या देहवर्धकाः।
अर्थस्तु साधनं साध्यमैहिकार्थोपभोजनम्।।
स्वतन्त्राणामथोद्देश्याः स्वर्गप्रमुखभुक्तिदाः।
उपेयं स्वर्गभोगाधिरुपायः कर्मणां कृतिः।।
अथान्यशेषोद्देश्यास्तु ब्रह्मरुद्रादयस्सुराः।
उपायस्सेवनं तेषां तत्सायुज्यं फलं स्मृतम्।।
अन्योपायरतोद्देश्यः देवतान्तस्स्थितो हरिः।
उपायः कर्म धीर्भक्तिः फलं भुक्तिः परात्मनः।।
स्वप्रयोजनसक्तानामुद्देश्योऽर्चामयो हरिः।
साधनं स्वीकृतिस्स्वीया प्राप्यं तु स्वार्थकैङ्करी।।

२६६. निग्रहे लक्ष्यभूतास्ते प्रथमं कथितास्त्रयः।
अनुग्रहशरण्यत्वमन्ययोरुभयोरथ।।

२६७. त्रयाणामादिमानां तु कर्म नाश्यं हि भुक्तितः।
प्रायश्चित्तविनाश्यं तच्चतुर्थस्याधिकारिणः।
अथो पुरुषकारेण विनाश्यं पञ्चमस्य तु।।

२६८. स्वीकारकाले तूपायः पुमांसं घटकं तथा।
अपेक्षेत, क्रियाकाले तूभयापेक्षको न हि।।

२६९. स्वप्रयोजनसक्तेषु सर्वेषु प्रतिकूलता।
कथं भावयितुं योग्या बोभवीतीति चेत्, शृणु।।

२७०. आधारदोषजं त्वत्र स्वप्रयोजनशब्दितम्।

२७१, २७२. ततो न दोषो, विषयदोषजं दुस्त्यजं खलु।।

२७३. [1]**तवामृते**त्यादिपद्यं **शेविडर्वार्तै** इत्यपि।

२७४. सदाचार्यप्रसादेन सर्वैरेतैर्गुणैर्यदि।
अभिवृद्धिरवाप्तव्या तत्रैतदवधीयताम्।।
आचार्यभगवत्सद्म वस्तव्यं स्थलमुच्यते।
वक्तव्यं गुरुमाहात्म्यं निकर्षस्स्वात्मनस्तथा।
मन्तव्यं मन्त्ररत्नं च गुरूणां च परम्परा।
परिग्राह्यं तु पूर्वार्यसूक्तं च तदनुष्ठितिः।
वैष्णवेतरसङ्गोऽभिमानश्च त्याज्यमुच्यते।
कर्तव्यं ननु कैङ्कर्यमाचार्यस्येश्वरस्य च।।

२७५. भगवत्परिचर्याया विज्ञानं शास्त्रमूलकम्।
आर्यकैङ्कर्यविज्ञानं शास्त्रतस्तन्मुखादपि।।

२७६,२७७. इष्टानिष्टकृतित्यागाविति द्वेधा हि कैङ्करी।।

२७८. तत्तद्वर्णाश्रमानात्मस्वरूपं चावलम्ब्य हि।
इष्टानिष्ट विराजेते इति वेद्यं विवेकिभिः।।

२७९. सुकृताच्चकिलस्साधुर्दुष्कृतं न किलाचरेत्।।

२८०. जीवस्य पापधीः पुण्ये पापे पुण्यरतिर्हरेः।
तस्य तत्सुलभं न स्याद्यदेष न तदाचरेत्।।

२८१. कैङ्करी चेन्न भक्त्या स्यादथ भीत्याऽपि वा भवेत्।।

२८२. तथा भीतिप्रयुक्ताऽपि कैङ्करी चेन्न सिद्ध्यति।
अधिकारे तथोपायोपेययोश्चान्वयच्युतः।।

२८३. कैङ्कर्ये फलहेतुत्वधीस्त्याज्या, तत्स्वयं फलम्।।

२८४. स्वस्य याचकता मा भूत् ईश्वरे साऽधिरोप्यताम्।।

२८५. दत्त्वा प्रतिजिघृक्षा तु सर्वथाऽपि न युज्यते।
दत्तं यत्स्वीकृतं तेन तदर्थं भृतिरर्प्यताम्।।

२८६. विदुरो माल्यकृत्कुब्जेत्येतेषां वरिवस्यनम्।
अनुसृत्य कृतौ सत्यां स्वरूपं स्यात्समुज्ज्वलम्।।

---

१. तवामृतेत्यादि - स्तोत्ररत्ने परिदृश्यते ।
शेविडर्वार्तै - नाच्चियार् तिरुमोळि - १२-१

२८७. प्रयोजनान्तरापेक्षागन्धलेशविवर्जितम्।
खलु प्रदत्तवन्तोऽमी अन्नं पुष्पं च चन्दनम्।।

२८८,२८९. इव कैङ्कर्यदशायां तत्पूर्वदशासु च स्वरूपस्य।
औज्ज्वल्यमार्जनीयं दशाश्चतस्रो हि सन्ति पूर्वत्र।।

२९०. ज्ञानदशा वरणदशा प्राप्तिदशा प्राप्यभुक्त्यवस्थेति।।

२९१. तत्र ज्ञानदशायामज्ञानस्य तु पुरस्क्रिया भवति।
अथ वरणस्य दशायां भवत्यपूर्तेः पुरस्क्रिया तावत्।
अथ च प्राप्तिदशायामार्तिभरस्य तु पुरस्क्रिया भवति।।
प्राप्यानुभूतिकाले स्वाभिनिवेशः पुरस्कृतो भवति।।

२९२. अज्ञानस्य विलोपस्त्वाचार्यज्ञानभूमतो भवति।
सर्वेश्वरस्य पूर्त्या विलयं प्राप्नोत्यपूर्तिरेतस्य।
आर्तिक्षयस्तु कृपयाऽभिनिवेशलयस्तु नियतमनुभूत्या।।

२९३. अज्ञानमपराधात्स्यादपूर्तिर्ज्ञानपूर्तितः।
आर्तिस्त्वलाभात्सौन्दर्याज्जायतेऽभिनिवेशनम्।।

२९४. आर्तिश्चाभिनिवेशश्चेत्यनयोरुभयोस्स्थितिः।
अर्चिरादिगतिग्रन्थे प्रागेव प्रत्यपाद्यत।।

२९५. चत्वारोऽस्य गुणास्सन्ति चतस्रो हि दशा यथा।।

२९६. ते तावज्ज्ञानमज्ञानं शक्तिश्चाशक्तिरेव च।।

२९७. एते गुणास्तु चत्वारस्सन्ति सर्वेश्वरस्य च।।

२९८. तदीयज्ञानलक्ष्यं स्यादेतदीयो गुणः परम्।
अज्ञानस्य तु लक्ष्यं स्यादेतदीयापचारिता।
अस्य रक्षा च हानं च शक्त्यशक्त्योरिति क्रमः।।

२९९. अथास्य ज्ञानमज्ञानं शक्तिश्च ननु लक्षयेत्।
आचार्यगुणतद्दोषच्छुश्रूषाः यथाक्रमम्।
अशक्तेस्तु शरण्यं स्यान्निषिद्धानामनुष्ठितिः।।

३००. निषिद्धानि चतुर्धा स्युः चातुर्विध्यं च तच्छृणु।।

३०१. अकृत्यानां च करणं भगवत्यपचारिता।
तद्भक्तेष्वपचारश्च तथाऽसह्यापचारिता।।

३०२. परहिंसा परस्तोत्रं परदारपरिग्रहः।
परद्रव्यापहारश्चाप्यसत्यकथनं तथा।
अभक्ष्यभक्षणं चान्यदकृत्यकरणं मतम्।।

३०३. भगवत्यपचारो हि देवतान्तरसाम्यधीः।
श्रीरामाद्यवतारेषु मर्त्यसाजात्यधीस्तथा।
वर्णाश्रमविपर्यस्तोपचाराणामनुष्ठितिः।
अर्चावतारोपादानचिन्तनं स्तेयमात्मनः।
भगवद्द्रव्यचौर्यञ्चेत्यादिकं पर्यकीर्त्यत।।

३०४. भगवद्द्रव्यवर्गस्य स्वात्मना मोषणं तथा।
अत तस्यापहर्तॄणां सहकारितया स्थितिः।
तेषां सकाशाद्याञ्चातोऽप्ययाञ्चातोऽपि वा ग्रहः।
इत्येतानि त्वनिष्टानि भवन्ति भगवद्धृदि।।

३०५. हरिभक्तापचारस्स्यादहङ्कारार्थकामतः।
श्रीवैष्णवानां विषये विद्रोहकरणं हि यत्।।

३०६. स्यादसह्यापचारस्तु निर्निबन्धनभावतः।
भगवत्यथ तद्भक्तेष्वसहिष्णुतया स्थितिः।
आचार्येषु च तद्भक्तेष्वपि विद्रोहकारिता।।

३०७. उत्तरोत्तरमेते खल्वपचारास्सुदारुणाः।
विन्दन्त्युपायशत्रुत्वं तथोपेयविरोधिताम्।।

३०८. हितोपदेशसमये स्वस्मिन् शिष्ये फलेऽपि च।
प्रतिपत्तिर्विपर्यस्ता क्रूरपातकमुच्यते।।

३०९. स्वस्मिन्नाचार्यताबुद्धिः श्रोतरि स्वात्मशिष्यधीः।
दृष्टप्रयोजनापेक्षा शिष्योज्जीवनकामना।
भगवत्कैङ्करीकांक्षा सहवासाभिलाषिता।
चतुष्टयमिदं तावत्फलांशे धीविपर्ययः।।

३१०. फलान्यमूनि चत्वारि कथं सिद्ध्यन्त्यकामतः।
इति चेत्, शेषशिष्यस्य बुद्ध्या दृष्टफलोदयः।
ईश्वरस्य धिया शिष्योज्जीवनं सिद्धिमश्नुते।

आचार्यबुद्ध्या भगवत्कैङ्कर्यं ननु सिद्ध्यति।
उपकारस्मृतेर्भूम्ना सहवासोऽथ सिद्ध्यति।।

३११. साक्षात्फलस्य चाचार्यत्वस्य सिद्धिः कथं ननु।
इति चेदात्मनो बुद्ध्या बुद्ध्या सर्वेश्वरस्य च।।

३१२. पूर्वोक्तप्रतिपत्तीनां प्रहाणेनोपदेशने।
आचार्यशिष्ययोर्नैव स्वरूपं सिद्धिमश्नुते।।

३१३. शिष्ये कृपालुत्वमथो गुरौ स्वे
स्यात्पारतन्त्र्यं च गुरूत्तमस्य।

३१४. शिष्यस्वरूपं कृपया तु सिद्धं
स्यात्पारतन्त्र्येण निजस्वरूपम्।।

३१५. संसारक्षयकृन्मूलमन्त्रदेष्टा महान् गुरुः।।

३१६. संसारवर्धकान् क्षुद्रान्मन्त्रान्भगवतो हरेः।
ये खलूपदिशन्त्येतेष्वाचार्यत्वं न पूर्यते।।

**३१७,३१८. संसारवर्धकत्वेन क्षुद्रत्वेन च कीर्तनम्।**
भगवन्मन्त्रवर्गेषु फलद्वारोपपद्यते।।

३१९,३२०. एतदौपाधिकं ध्येयमुपाधिस्तु नृणां रुचिः।।

३१२. फलसाधनशुश्रूषां साध्यान्तरनिवृत्तताम्।
आर्त्यादरानसूयाश्च बिभ्राणश्शिष्य उच्यते।।

३२२. मन्त्रश्च देवता चैव फलं तदनुबन्धिनः।
फलसाधनमत्रत्या भोगास्तु निखिला अपि।
आचार्य एक एवेति स्यादेतस्यानुसंहितिः।।

३२३. [1]**माता पितेति** पद्येऽमुमर्थमाह महागुरुः।।

३२४. उपकारस्मृतिर्मूलमनुसन्धान ईदृशे।।

३२५. आचार्यः प्रथमं लक्ष्यमुपकारस्मृतेर्भवेत्।
सीमाभूमितया प्रोक्तस्तस्यास्सर्वेश्वरो हरिः।।

३२६. प्रवर्तयेतामन्योन्यं शिष्याचार्यौ प्रियं हितम्।।

---

१. महागुरुः - यामुनाचार्यः (आलवन्दार्) मातापितेति श्लोकः स्तोत्ररत्ने पञ्चमः श्लोकः ।

३२७. शिष्यः प्रियं स्वयं कुर्यादीशद्वारा हितं चरेत्।
गुरुर्हितं स्वयं कुर्यादीशद्वारा प्रियं चरेत्।।

३२८. शिष्यः प्रहर्षे निष्णायाद्गुरुरुज्जीवने तथा।।

३२९. ततश्शिष्यो गुरोर्हर्षलक्ष्यभावमियात्परम्।
तद्रोषलक्ष्यतां प्राप्तुमवकाशं न विन्दति।।

३३०. निग्रहेऽपि च सञ्जाते हितरूपो यतो हि सः।
उपादेयो भवेत्सोऽयमुभयोर्गुरुशिष्ययोः।।

३३१. निग्रहस्य निदानं यत्तच्छिष्यस्त्यक्तुमर्हति।।

३३२. प्राप्यान्तर्गत एवासौ भगवन्निग्रहो यथा।।

३३३. शिष्यस्वरूपमाचार्यो रक्षेच्छिष्यो गुरोर्वपुः।।

३३४. उभयं चोभयोः प्राप्तं भगवत्कैङ्करी च तत्।।

३३५. स्वरूपहानिराचार्यस्यात्मविग्रहरक्षणम्।
स्वरूपहानिश्शिष्यस्य स्वस्वरूपाभिरक्षणम्।।

३३६. अहङ्कारो विरोधी स्याद्गुरुकर्तृकरक्षणे।
ममकारो विरोधी स्याच्छिष्यकर्तृकरक्षणे।।

३३७. स्वदेहरक्षामाचार्यो न कुर्यात्स्वीयवस्तुभिः।
आचार्यवस्तुभिः कुर्याच्छिष्यस्स्वतनुरक्षणम्।।

३३८. शिष्यस्य वस्तून्यादद्यादाचार्यो न कदाचन।
स्वीयवस्तूनि नो दद्याच्छिष्यस्तु गुरवे तथा।।

३३९. आदाने तु दरिद्रस्स्याद्दाने भवति तस्करः।।

३४०. दानादानोदये तावत्सम्बन्धश्शिथिलीभवेत्।।

३४१. अकिञ्चनोऽयं नो दद्यान्नादद्यात्स च पूर्तिमान्।।

३४२. स्वरूपजीवनं तस्य पूर्त्या, दारिद्र्यतोऽस्य तु।।

३४३. तर्हि शिष्येण गुरवे न कार्यं किं मनागपि।

३४४. इति चेदस्ति भूयस्तत्, आचार्यस्य धियापरम् ।।

३४५. ज्ञानव्यवसितिप्रेमसमाचारा इति स्थितिः।।

३४६. आचार्यप्रीतये त्वस्य त्रितयं हेयमिष्यते।
भगवद्द्रव्यचोरत्वं तद्भोजननिषेधनम्।
आचार्यमन्त्रदैवेषु पराभूतिक्रिया तथा।।

३४७. स्वातन्त्र्यमन्यशेषत्वं भगवद्द्रव्यचोरता।
तद्भोजननिषेधस्तु तद्रक्षणनिषेधनम्।।

३४८. प्राक्प्रपन्नपरित्राणे प्रोक्तस्तद्रक्षिताक्रमः।
गुरोः परिभवो नाम यथाश्रुतमनुष्ठितेः।
अभावोऽनधिकारिभ्य उपदेश इति द्वयम्।
मन्त्रे परिभवो नाम तदर्थे विस्मृतिस्तथा।
अर्थानां विपरीतानां प्रतिपत्तिरिति द्वयम्।
अप्राप्तविषयग्रामे करणत्रयसञ्जनम्।
प्राप्ते तदप्रवृत्तिश्च देवतायां पराभवः।

३४९. आशरीरान्तमेतस्य स्वाचार्यविषये पुनः।
[1]**एन्नैत्तीमन** मित्येवं । **मरुवित्तोळु** मित्यपि।
उक्तरीत्योपकारस्य स्मृतिरावश्यिकी मता।।

३५०. **एन्नैत्तीमन**मित्युक्ता दुष्टता नाम चेतसः।
हरितद्भक्तदोषाणां स्वगुणानां च चिन्तनम्।।

३५१. गुणानामिव दोषाणां वस्तुगत्या यतः खलु।
नास्ति सत्ता ततस्तेषां चिन्तना न प्रसज्यते।।

३५२. हरितद्भक्तविषये यदि दोषो विचिन्त्यते।
वस्तुतस्तद्गतो नैष किं तु स्वात्मगतः परम्।।

३५३,३५४. तस्य स्वात्मगतत्वं तु स्वदोषाद्बन्धतोऽपि च।।

३५५. गुणधीर्हि प्रवर्तेत स्वदोषविरहे सति।।

३५६. यदि सा न प्रवर्तेत दोषधीरेव दुष्यति।।

३५७. दोषाणामनुसन्धाने नावकाशोऽस्य विद्यते।

३५८. स्वदोष, हरितद्भक्तगुणचिन्ताव्यवस्थितेः।।

३५९. असौ संसारिणां दोषं स्वदोषत्वेन चिन्तयेत्।।

३६०. चिन्तने तादृशे हेतुस्सम्बन्धज्ञानमुच्यते।।

३६१. [2]**इरैप्पोळुदुमेण्णोमित्युक्त्या दोषो न भास्यति।।** एकवर्णस्य न्यूनता परिदृश्यते।

---

१. एन्नैत्तीमनम् - तिरुवायिमोळि - २-७-८, मरुवित्तोळुम् - तिरुवायिमोळि -२-७-७.
२. इरैप्पोळुदुम् - पेरियतिरुमोळि. २.६.१

३६२. यदि भास्यति तद्भानं तन्निवर्त्त्यर्थमेव तु।।

३६३. यथा पुरा धरासुता निशाचरीगणैः कृतान्
महापराधसञ्चयान् रघूद्वहे च मारुतौ।
निवेदयाञ्चकार नो, तथा परैः कृतागसां
निवेदनं न युज्यते हरौ च तच्छ्रितेषु च।।

३६४. अत्र [1]**शूळ्न्दडियार्वेण्डिन्** इति गाथार्थ ईक्ष्यताम्।।

३६५. आगस्विषु जनेषु स्युः क्षान्तिश्च करुणा तथा।
हसनं च प्रहर्षश्चाप्युपकारस्मृतिस्तथा।।

३६६. स्वकीयानां तु दोषाणां चिन्तनं भयकारणम्।
भगवद्गुणनिध्यानं भवेदभयकारणम्।।

३६७. भयाभयविपर्यासे संसिद्धयेदज्ञता परम्।।

३६८. तर्ह्युत्थिता कथं सूक्तिः । [2]**नलिवानिन्नमित्यसौ।**
[3]**आत्तङ्करै** इतीयं च ?

३६९. तत् तु बन्धानुसंहितेः।।

३७०. शिशुर्वीथ्यां परिक्लिष्टो मातुः पृष्ठे विमर्दनम्।
करोतीति यदास्ते तदत्रोदाहरणं भवेत्।।
निरुपाधिकबन्धुश्च सर्वशक्तिश्च माधवः।
अनर्थं न रुणद्धीति हेतोस्तत्सुवचनं खलु।।

३७१. कूपकूलाच्छिशुं माता यदि नाकर्षति स्वयम्।
सैव तं पातयामासेत्येव हि प्रथितं भवेत्।।

३७२. रक्ष्यस्यानुमतिः प्राप्तेर्न हि हेतुर्यथा, तथा।
रक्षकस्यानुमतिरप्यनर्थस्य न कारणम्।।

३७३. उभयं चैतदुभयोस्स्वरूपान्नातिरिच्यते।।

३७४. अनर्थहेतुस्स्वं कर्म प्राप्तिहेतुः कृपा हरेः।।

३७५. वैपरीत्येन कथनं नित्यप्रच्युतिकारणम्।।

---

१. शूळ्न्दडियार् - पेरियतिरुवन्तादि - १७
२. नलिवान् - तिरुवायिमोळि - ७.१.१
३. आत्तङ्करै - पेरियतिरुमोळि - ११.८.१

३७६. उद्दिधीर्षापरं दृष्ट्वा **त्वमेवापातयोऽत्र माम्।**
इत्यारोपणवादस्स्यादुद्धाराद्विनिवृत्तये।।

३७७. एतत् [1]**शीत्तमुळे**त्यस्मिन्वाक्ये स्पष्टीकृतं च तैः।।

३७८. रोषस्स्यादिति विज्ञाय ततश्च कथनं कथम् ?
कारुण्यमार्तिश्चानन्यगतित्वं वाचयेत्तथा।।

३७९. रोषे सत्यपि पादाब्जग्रहणार्हतया स्थिते।
प्राप्ते हरौ यथेष्टं हि वक्तुं भक्तैः प्रभूयते।।

३८०. [2]**वधार्हमपि काकुत्स्थः शिनत्तालीन्नताय्** इति।
एवमादिप्रमाणानि स्मरणीयान्यहो इह।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यविरचितायां श्रीवचनभूषणरत्नमालायां तृतीयप्रकरणं समाप्तम्।।**

---

१. शीत्तमुल - पेरियतिरुमोळि - ११.८.२
२. शिनत्ताल् - पेरुमाल्तिरुमोळि - ५.१

श्रीमते रामानुजाय नमः

# श्रीवचनभूषणरत्नमाला

## चतुर्थप्रकरणम्

३८१. त्रिपाद्विभूतौ परिपूर्णभोगे सम्पद्यमानेऽपि ततो न तृप्तः।
दविष्ठपुत्रे विनिविष्टचेताः पितेव संसारिषु दत्तचित्तः।।
विश्लेषमेषामसहिष्णुरीशस्त्विमान्समाश्लिष्य बुभूषुरेभ्यः।
दत्त्वेन्द्रियग्रामकलेबरे, तद्व्यापारणार्थं च वितीर्य शक्तीः।।
प्रत्यक्षभावे शपथेन रोद्धुं शक्ता अमी इत्यथ सन्परोक्षः।
शिशुं स्वपन्तं परिरभ्य पृष्ठे यथा हि शेते जननी तथाऽसौ।।
स्वज्ञातसम्बन्धत एव चित्ते संश्लिष्य तान्बद्धजनानमुञ्चन्।
अर्थानुभूतेरपि चानुवृत्तिर्युक्तेति मत्वा धृतजीवसत्तः।।
एतेष्वसत्कर्मकृतिप्रवृत्तेष्विमानरुन्धन्ननुमन्यमानः।
तिष्ठन्नुदासीनवदेवधौर्त्यान्निवर्तनेच्छुस्समयप्रतीक्षी।।
सत्कर्मसंज्ञार्हमसच्चरित्रं यत्किञ्चिदप्येष नवीक्षमाणः।
व्यर्थे गते फालपरीक्षणेऽपि निराशदुःखीव सबाष्पनेत्रः।।
व्याजं मनाग्जातुचिदीक्षमाणः सन्तोषसीम्नि स्थितिमान्हरिस्सः।
**मदीयधामाभ्यदधाः किल त्वं मदीयनामाभ्यदधाः किल त्वम्।**
**मद्भक्तरक्षामकरोः किल त्वं तत्तापशान्तिं व्यदधाः किल त्वम्।।**
छायाममीषामददाः किल त्वम् इत्यादिरीत्या सुकृतावभासान्।
यथा मृषैवाम्रशलाटुचोरत्वारोपणं तद्वदिहाधिरोप्य ।।
सौवर्णिको हेम निघृष्य शाणे ततो मधूच्छिष्टत आदधानः।
एतावदासीन्ननुतावदासीदित्येवमुद्वेलयते यथैव।।
तथा ह्यसौ जन्मपरम्परासु यादृच्छिकादीन्सुकृतप्रभेदान्।
स्वेनैव सङ्कल्प्य ततश्च तेषां भूयस्तया वर्धनमादधाति।।

३८२. एषोऽर्थो विस्तृतः प्रेक्ष्यो ललिताचरितादिषु।।

३८३. अज्ञा नरा दानमात्रं ब्रूयुर्वाचा, विशिष्य न।।

३८४. [1]**इन्नेन्नैप्पोरुळेन्नन्नि नडुवे अरियादन।**
**पोरुळल्लाद मरुवि एन्नैत्तीमनमित्यहो।।**
इत्यादिसूक्तिभिः प्राज्ञा भृशं विद्धा भवन्ति हि।।

३८५. काले यतीन्द्रस्य कदाचन श्रीरङ्गेशयात्राप्रतिपालकानाम्।
श्रीमन्महामण्डपमूलभाजां गुरूत्तमानां महनीयगोष्ठ्याम्।।
प्रस्तावमाप्ते प्रकृतार्थरत्ने पश्चात्प्रजातास्सुगिरोऽत्र चिन्त्याः।।

३८६. इत्थञ्च सिद्धं भगवत्कटाक्षस्त्वज्ञातपुण्यैकवितीर्णजन्मा।।

३८७. एतान्यपि यथाऽस्य स्युस्तथेमं स पुराऽसृजत्।।

३८८. तद्विमर्शे कृते जीवस्तूष्णीको भवितुं क्षमः।।

३८९. चिरात्कर्षणमावापः फलनं चेत्यमूः क्रियाः।
क्रमाद्दधाने केदारे सिलधान्यं स्वतोऽङ्कुरत्।
यथा स्यात्फलपर्यन्तं तथैतानि श्रमं विना।
स्वत एव समुत्थानि कर्तुं शक्तां कृषिं खलु।
संसारसंज्ञामस्राक्षीदीशो भक्तिकृषीवलः।।

३९०. इमानीति गिरोद्दिष्टान्यथ कानीति चेच्छृणु।।

३९१. प्राग्जन्मकृतपुण्याधफलभूतसुखादिकम्।
स्वर्नारकादिस्थानेषु सुचिरं परिभुज्य च।
वासनामात्रशेषस्सन् अच्छकर्मा तु चेतनः।
**कोऽहं का मे स्थितिर्याता का गतिर्ननु भाविनी**
इत्यादिरीत्या बिभृयाद्विमर्शान् खलु कांश्चन।
ते वा भवेयुः, प्रागुक्तसुकृतान्यथवा पुनः।।

३९२. **यथाहि मोषकाः पान्थे** इत्युपक्रम्य विस्तरात्।
एतस्य परिपाठी तु भगवच्छास्त्र ईरिता।।

३९३. [2]**वेरिदे अरुळित्युक्त्या** सोऽयमर्थस्स्फुटीकृतः।।

---

१. इन्नैन्ते - तिरुवायिमोळि -१०-८-९, नडुवे - तिरुवायिमोळि १-७-५
मरुवि-तिरुवायिमोळि -२.७.७, एन्नैतीमनम् - तिरुवायिमोळि २.७.८

२. वेरिदे अरुल् - तिरुवायिमोळि -८.८.८

३९४. **शेय् वार्हट्कि**ति तत्रैव कृपाहेतुश्च कीर्तितः।
इति चेत्तर्हि **वेरिदे** इत्युक्तिर्न घटेत हि।।
३९५. भगवत्याभिमुख्यं तु सुकृतेन न जायते।
भगवत्कृपयेत्येव काममभ्युपगम्यते।
अद्वेषस्सुकृतेनेति ब्रूम इत्यपि नोचितम्।
महाफलस्य तस्यैतत्साधनीकर्तुमक्षमम्।।
३९६. शास्त्रेणाविदिते चास्मद्विज्ञास्याप्यगोचरे।
कृत्ये सुकृतमित्येतन्नाम कर्तुं कथं वयम्।
अधिकारिण इत्येवं चोदयन्त्यपि केचन।
कृतं तन्नाम नास्माभिः किन्त्वीशेनेति विश्रुतम्।।
३९७. सूक्तेषु दिव्यसूरीणामस्मिन्नर्थे परस्परम्।
विरोध इव भासेत तन्निरासस्य वैखरीः।।
अन्यदप्यसिधातव्यं न ब्रूमो विस्तराद्भिया।।
३९८. तस्माच्चेतनवैमुख्येऽप्युज्जीवनकृते कृषिम्।
चक्रुषस्तु हरेर्ध्याने सदा निर्भरता वरम्।।
३९९. **एदिर्शूळलिति** श्रीमच्छठार्युक्तिरिहेक्ष्यताम्।।
४००. एकस्य तु निलीनस्य ग्रहणाय यथा पुरी।
कृत्स्नाप्याक्रम्यते तद्वद्व्याप्तिर्भगवतोऽप्यभूत्।।
४०१. व्याप्तिं सृष्ट्यवतारादिवत्स्वार्थां मेनिरे बुधाः।।
४०२. कृपाफलमपि क्षेप्यं भुक्त्वा कर्मफलं यथा।।
४०३. सृत्युन्मुखे कृपापूरे स्वातन्त्र्यादुभयोरपि।
स निरोद्धुमशक्यस्सन्नुद्वेलं परिजृम्भते।।
४०४. भयहेतुस्तु कर्म स्यात्स्वातन्त्र्यमभयङ्करम्।।
४०५. स्यातामाभगवत्प्राप्ति पर्यायेण भयाभये।।
४०६. निवर्त्यभूताविद्यादिज्ञानं साध्वसकारणम्।
निवर्तककृपाज्ञानम् अभयोदयकारणम्।।
४०७. स्वतन्त्रस्योपायतया वरणे खल्वियं कथा।।
४०८. वर्तन्ते भगवद्भोगलाभालाभदशाद्वये।
मिथो विरुद्धवक्तारो दशसङ्ख्या महाशयाः।
तेषां सूक्तीरुपादाय नायमर्थोऽवधार्यते।।

४०९. अथ तानतिशेते यस्तत्सूक्तिमवलम्ब्य तु।।

४१०. स्वरूपस्य तु याथात्म्यं प्राप्यस्य च तथैव यत्।
तयोः स्वल्पनुरूपेण भाव्यं प्रापकवस्तुना।।

४११. श्रीवत्सचिह्नमिश्रार्यं तथा दाशरथिं गुरुम्।
कूलद्वयस्थितौ ब्रूयादान्ध्रपूर्णाभिधो गुरुः।।

४१२. प्राप्यांशे प्रथमं पर्व भवत्याचार्यकैङ्करी।
मध्यमं भगवद्दास्यम् अन्त्यं भागवतेषु तत्।।

४१३. पुरुषार्थतया शास्त्रं स्वरूपाप्तिं परं जगौ।
अथ प्राप्तिफलत्वेन यथा कैङ्कर्यसम्भवः।
तथा साध्यविवृद्धिस्सच्चरणं पर्व सिद्ध्यति।।

४१४. एतत् तु दुर्लभं हन्त दौर्लभ्यं तन्निरूप्यते।

४१५. विषयेष्वनुरक्तानां विषयांस्तान्विसृज्य तु।
भगद्विषयप्राप्तौ यावानायास ईक्ष्यते।
न तावान्केवलं तं च त्यक्त्वा चरमसङ्गतौ।।

४१६. दोषदर्शनतश्शक्यं विषयासङ्गधूननम्।
ईशे तस्याप्रसक्तत्वाद्दुश्शकं तदुपेक्षणम्।।

४१७. दोषाणां दर्शनेऽपि स्याद्गुणवत्तेषु भोग्यता।।

४१८. अहो लोकविपर्यस्ता प्रक्रिया खलु माधवे।।

४१९. गुणेषु भोग्यताहेतुर्यस्स दोषेष्वपीक्ष्यते।।

४२०. निर्घृणो हरिरित्युक्त्वा मुखमुद्रणतः पुरा।
घृणावानिति वादो हि विजजृम्भे मुनीश्वरे।।

४२१. घृणावानिति वादस्स कृपामूलक इत्यतः।
स्नोहोपकारस्मृत्योर्हि तत्र ख्यापनमीक्ष्यते।
स वादो हार्द एवेति निश्चेतव्यं भवत्यतः।।

४२२. निर्घृणत्वेन शङ्कित्वा यद्दशायां तदीरितम्।
तस्यामपि हि तद्धेतोस्स्वगतत्वमुदैर्यत।।

४२३. प्रच्यावयेतां गुणदोषभूतौ योगो वियोगश्च परस्य पुंसः।
क्षुद्रे पुमर्थे प्रवणात्मकत्वं तथैव सङ्गं पुरुषार्थसीम्नि।।

४२४. नित्यशत्रुर्हि भगवत्सौन्दर्यमुपपादितम्।।

४२५. एवं प्राप्यस्य निष्कर्षे प्रापकं स्याद्धि तत्समम्।।

४२६. प्राप्यप्रापकयोरैक्यमन्यथा दुर्घटं भवेत्।।

४२७. हस्तग्रहणतः कार्यसाधनं हरिसेवनम्।
चरणग्रहणात्कार्यसाधनं गुरुसेवनम्।।

४२८. उपकारक आचार्य उभयोश्च चिदीशयोः।।

४२९. शेषवस्तु ददावीशे चेतने शेषिणं तथा।।

४३०. आचार्यत्वे स्पृहां धत्ते स्वयं सर्वेश्वरोऽपि सः।।

४३१. अतो हि गुरुमालायामन्वितस्सोऽभवद्धरिः।
अत एव च गीतादेरुपदेशमपि व्यधात्।।

४३२. विभूतयश्चतस्रश्च द्वावीशौ यद्यदुर्लभाः।
तदैवाचार्यसदृशी कृता स्यात्प्रत्युपक्रिया।।

४३३. ईश्वराश्रयणं तावत्सामान्यं बन्धमोक्षयोः।
आचार्याश्रयणं तावन्मोक्षस्यैकस्य कारणम्।।

४३४,४३५. गुरुणा भगवल्लाभो लाभो भगवता गुरोः।।

४३६. आचार्यादपि चात्यर्थमुपकारक ईश्वरः।
कारणं त्वत्र विज्ञेयमुपकार्यार्थगौरवम्।।

४३७. रक्षिते गुरुसम्बन्धे ज्ञानभक्तिविरक्तयः।
सुसंपादास्स्युः, एतस्मिंश्च्युते ताभिः फलं न हि।।

४३८. स्थिते मङ्गलसूत्रेऽन्यभूषास्स्युर्धारणोचिताः।
तस्मिन्प्रनष्टे भूषाभिरवद्यं केवलं भवेत्।।

४३९. कमलस्य विकासकारको रविरेतत्सलिलात्परिच्युतम्।
ग्लपयेत यथा तथा हरिः गुरुसङ्गच्युतमात्मनः पदम्।।

४४०. दुर्लभो भगवत्सङ्गो गुरुसम्बन्धविप्लवे।।

४४१. भगवद्गुरुसम्बन्धौ पर्याप्तौ द्वाविमौ न किम्।
मध्ये भागवतानां च सम्बन्धः किमपेक्षितः।।

४४२. इति चेदुच्यते, वल्ल्या उपघ्ने योजनं प्रति।
क्षुद्रकाष्ठव्यपेक्षेव गुरुयोगे स काङ्क्ष्यते।।

४४३. स्वाभिमानत ईशस्याभिमानं चक्रुषो हतम्।
आचार्यस्याभिमानेन विना नान्या गतिर्मता।।
इति श्रीकलिजित्सूरेरश्रूयत मुहुर्मुहुः।।
४४४. स्वस्वातन्त्र्यभिया भक्तिः प्रच्युतिं प्रतिपद्यते।
४४५. हरिस्वातन्त्र्यभीत्या तु प्रपत्तिरपि तादृशी।।
४४६. गुरौ च स्वगतस्सङ्ग आहङ्कारिक इत्यतः।
मृत्युदानसुवर्णेनाङ्गुलिभूषणधारणम्।।
४४७. तस्मादाचार्यहृज्जन्माऽभिमानः केवलं गतिः।।
४४८. करस्थं वस्तु सन्त्यज्य निधेरन्वेषणं न सत्।।
४४९. पिपासावसरे हन्तोपेक्ष्य तोयं करस्थितम्।
जीमूताब्धिसरिद्वापीकूपतोयेक्षणं कथम्।।
४५०. सामगानश्रुतिस्थानमार्तनादश्रुतिस्थलम्।
नागपर्यङ्कमुत्सृज्यावतारस्थलमेव च।
अथ चाक्रमणस्थानं प्राशनस्थानमित्यमी।
पञ्चापि भगवद्देशा गुरुरेवेति धीर्वरम्।।
४५१. एतस्य प्रतिकूलास्स्युः स्वतन्त्राश्चान्यदेवताः।
अनुकूला गुरोर्वश्या उपेक्ष्या भगवद्वशाः।।
४५२. उपायाङ्गं परेषां स्यात् ज्ञानं चानुष्ठितिस्तथा।
अधिकारिण एतस्योपेयाङ्गमुभयं तु तत्।।
४५३. स्वात्मनश्च परेषां च प्रणाशं दिशतीत्यतः।
निषिद्धानुष्ठितिस्त्याज्या स्यादेतस्याधिकारिणः।।
४५४. त्रिविधेष्वपचारेष्वप्यन्वयान्नाश आत्मनः।
स्वानादराच्च स्वानुष्ठास्वीकाराच्च परात्मनाम्।।
४५५. निषिद्धभोगवल्लोकविरुद्धं न भवत्यथ।
न चापि नरकप्राप्तिहेतुर्विहितसेवनम्।
अथापि तु परित्याज्यमीदृशस्याधिकारिणः।
स्वस्वरूपविरुद्धत्वात्तथा वेदान्तरोधतः।
शिष्टगर्हास्पदत्वाच्च प्राप्यस्य प्रतिबन्धनात्।।

४५६. भोग्यताबुद्धिरेकेण धर्मबुद्ध्याऽपि सेवने।
अनन्योपायतारूपं स्वरूपं शिथिलीभवेत्।।

४५७. **क्षेत्राणि** मित्राणीत्यस्मिन् श्लोके धात्रा निवेदिते।
उक्तयाऽवस्थया भाव्यं स्वरूपाप्रच्युतिं प्रति।।

४५८. प्रावण्यं प्राप्यभूमौ च त्याज्यभूमौ जिहासनम्।
अनुभूतेरलाभे सत्यात्मधारणदौश्शकी।
आवश्यकानि निर्दिष्टचतुस्साधनसेविषु।।

४५९. आचार्ये स्वगतस्वीकृत्यात्मकोपायमानता।
[१]**पळुदाहादि**ति श्रीमद्दिव्यसूक्त्यां विचिन्त्यताम्।।

४६०. [२]**नल्लवेन्तोळि, माराय** इति गाथाद्वयं तथा।
**पशुर्मनुष्य** इत्यादिः स्तोत्रेऽन्त्यः श्लोक एव च।
आर्याभिमानरूपस्योपायस्य स्यात्प्रमापकम्।।

४६१. अन्योपायाङ्गभावश्च स्वतन्त्रोपायता तथा।
प्रपत्ताविव विद्येते तस्मिन्नपि च साधने।।

४६२. प्रपत्तिर्भक्त्यशक्तस्य तत्राशक्तस्य खल्वसौ।

४६३. आदावसौ पल्लवितं स्वरूपं कुर्यात्ततः पुष्पितमादधीत।
ततः परस्तात्फलितं च कुर्यादित्थं समाप्तं गुरुदिव्यशास्त्रम्।।

**।। इति श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्यप्रणीता**
**चतुर्थ प्रकरणं समाप्तम् ।।**
**।। श्रीवचनभूषणरत्नमाला समाप्ता।।**

१. पळुदाहादिति - नान्मुगन् तिरुवन्तदादि - ८९
२. नल्लवेन्तोळि - नाच्चियार् तिरुमोळि १०-१०, माराय - नान्मुगन् तिरुवन्तादि -१८

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## प्रथमोऽध्यायः

१. लक्ष्मीसनाथममलं जगदेकहेतुं सेतुं भवांबुनिलयस्य भयङ्करस्य।
ज्ञानादिषड्गुणगणं करुणामृताब्धिं वन्दे मुकुन्दमरविन्ददळायताक्षम्।।

२. हारीतान्वयसंजातं रामानुजविधुं भजे।
यत्पादस्पर्शमात्रेण पाषाणोप्यमृतं स्रवेत्।।

३. श्रीकृष्णपादतनयं श्रितपारिजातं जातं प्रपन्नजनता निजभाग्ययोगात्।
योऽगात्प्रसिद्धिमतिगूढमहार्थबोधात् बोधांबुधिं तमिह लोकगुरुं भजामि।।

४. ल़ोकार्यसूक्तिं हृदये निधाय सुधामयीं संस्कृतभाषयाऽद्य।
विदां मुदेतां तनुतेऽर्चिरादिं श्रीकृष्णमाचार्य शतावधानी।।

५. श्रीरङ्गे सुखमासीनं, लोकाचार्यं गुरूत्तमम्।
नत्वा श्रीशैलनाथार्यः, प्रपच्छ करुणानिधिम्।।

६. प्रपन्नानां तथान्येषां, परलोकगतिः कथम्।
ब्रूहि मे कृपया देव, वेदान्तार्थप्रकाशनात्।।

**लोकाचार्य उवाच**

७. साधुपृष्टं महाभाग ? प्रपन्नानुग्रहेच्छया।
सर्ववेदान्तसारार्थो, निर्णीतः कथ्यते मया।।

८. श्रीभाष्ये शठजित्सूक्तौ, गीतादिषु सुविस्तृतः।
मार्ग प्रपन्नलोकस्य, देहान्ते यो भविष्यति।

९. देहिनां मरणादूर्ध्वं, मार्गत्रय मुदाहृतम्।
पापिनां पापभोगार्थं, याम्यमार्गः प्रदर्शितः।।

१०. इष्टापूर्तादि सत्कर्म, निरतानां फलार्थिनाम्।
धूममार्गश्च संप्रोक्तस्स्वर्गलोकादि सिद्धये।।

११. पञ्चसंस्कार युक्तानां, प्रपन्नानां च योगिनाम्।
देवयानाभिधो मार्गो, भगवत्प्राप्तिसाधनम्।।

१२. समार्गश्चार्चिरादिस्यादिति वेदान्त बोधितः।
छान्दोग्येबृहदारण्ये, प्रथितो बहुधोदितः।।

१३. नैव भागवता यान्ति, यमलोकं कदाचन।
दृष्ट्वा चक्राङ्कितं दूरमपसर्पन्ति तद्भटाः।।

१४. गारुडे याम्यमार्गं तु, पुराणेऽति भयङ्करम्।
गरुडं प्रति वैकुण्ठे, वासुदेवोऽवदत्पुरा।।

१५. तन्मार्ग श्रवणादेव, पक्षिराण्णित्यवर्गगः।
भीतोस्म्यहमिति प्राह, तत्क्रौर्यं किमु वर्ण्यते।।

१६. प्रत्यासन्नंमृतिं लोके, प्रापिनं यमकिङ्कराः।
पाशैराकर्षयन्तीमं, सिंहव्याघ्रभयङ्कराः।।

१७. बान्धव प्रेमापाशैस्तु, समाकृष्टस्त्वितस्ततः।
सहस्त्रवृश्चिकैर्दष्टो, यथा बाधां लभेत सः।।

१८. जीवं तु यातनादेहे, निवेश्य च नयन्त्यमुम्।
यमसन्दर्शनायाशु, यमलोकं भयङ्करम्।।

१९. वैवस्वताज्ञया पश्चादानीय भुवमादितः।
क्रमेण च नयन्त्येनं, यातना देहसंयुतम्।।

२०. यातना तनुरत्यन्तवेदनायतनं भवेत्।
तादृशीं वेदनां कुर्याद्वज्रपातो यथा भवेत्।।

२१. खण्डशः खण्डिता सद्यः, पूर्वरूपं भजत्यहो?।
न विनश्यति पापानां, फलभोगाय निर्मिता।।

२२. याम्यमार्गे तमोयुक्ते तप्तसैकतसंयुते।
च्छायाजलविहीने तु, पाशबद्धः कशाहतः।।

२३. नीयते रशनाबद्ध, पशुवद्यमकिङ्करैः।
क्षुत्पिपासा वसो दूतान्, याचते जलमोदनम्।।

२४. ते वदन्तस्त्वया दत्तं, नाप्यन्नं जलमर्थिने।
भुंक्ष्वा पाप फलं चेति ताडयन्ति तथा मुखे।।

२५. रुदन् पतन् हतज्ञानः, ताडितो यमकिङ्करैः।
पूयशोणितवाहिन्यां, वैतरिण्यां प्रपातितः।।

२६. वज्रशूची मुखैः कीटैर्दंशितो जलजन्तुभिः।
भक्षितः खेचरैर्याम्यैर्बडिशासक्त मत्स्यवत्।।
२७. विकृष्टश्षोडशान्येवं, पुराणि समतीत्यतम्।
यमालयं समाप्नोति, वत्परान्ते यमाज्ञया।।
२८. रौरवादि महोघोरान्; नरकाननुभूयसः।
पापस्यान्ते क्रियाशेषादीनयोनिषु जायते।।
२९. क्रमशो मानुषं प्राप्य, जन्मसंस्कारतः पुनः।
पापकृन्नरकं याति, यमवश्यस्सदा भवेत्।।
३०. यदि पुत्रादयः प्रेतकार्याणि श्रद्धयान्विताः।
कुर्वंति तस्य दुःखानि, शाम्यन्ति यमतोषतः।।
३१. प्रेतकृत्यं ततः पुत्रश्शास्त्रोक्तविधिवच्छरेत्।
दशाह कर्म तत्प्रेतभावमुक्त्वा सपिण्डनम्।।
३२. वृषोत्सर्गादिकंप्येकोद्दिष्टं विधानतः।
षोडशत्रयमंत्येष्टि, शास्त्रोक्तसमये तदा।।
३३. गोभूधान्यहिरण्यानि, दानानि दशशक्तितः।
दद्याच्छय्यादिदानानि, पितृलोकाप्तयेपितुः।।
३४. गोभूतिलहिरण्याज्यवासोधान्यगुडानि च।
रौप्यं लवणमित्याहुर्दशदानानि सूरयः।।
३५. पुन्नामनरकत्राता, यो सुतो भक्तिसंयुतः।
स पुत्र इति शास्त्रेषु, कथ्यते नैवचान्यथा।।
३६. जीवतो वाक्यनिर्वाहात्प्रेतकृत्यविधानतः।
गयायां पिण्डदानाच्च, त्रिभिः पुत्रस्य पुत्रता।।
३७. मृतस्य यस्य कर्माणि, न कृतानि विधानतः।
प्रेतो भूत्वासु दुःखानि, भुंक्ते वायुशरीरभृत्।।
३८. द्वितीयो धूममार्गस्तु, यागपूर्ताधिकारिणाम्।
वेदान्तेषु च गीतायां, कथितस्स्वर्गसाधनम्।।
३९. धूमो रात्रिस्तथाकृष्णाषण्मासा दक्षिणायनम्।
तत्र चान्द्रमसंज्योतिः योगी प्राप्यनिवर्तते।।

४०. इत्युक्त विधिना देहं, त्यक्त्वा धूमेन सङ्गतः।
रात्रिलोकं समासाद्य, तदीशेन सुसत्कृतः।।
४१. कृष्णपक्षाधिनाथस्य, लोकं प्राप्य ततस्तथा।
दक्षिणायननाथस्य, लोकं प्राप्नोति सत्वरम्।।
४२. पितॄणां च ततो लोकं, गत्वाकाशं समाश्रितः।
ततश्चन्द्रमसं प्राप्य, देवत्वं प्राप्यवर्तते।।
४३. रंभा सम्भोग भाग्यानि, नन्दनोद्यान सेवनम्।
विमानयानमानन्दं, स्वर्गीयं प्राप्य तिष्ठति।।
४४. पुण्यान्ते देवदूतैस्तु, ध्वंसेति विनिपातितः।
देवरूपं परित्यज्य, पुण्यशेषेण संयुतः।।
४५. चन्द्रादाकाशमाविश्य, वायुना सङ्गतस्ततः।
धूमं गतस्त्वभ्रयतो, वर्षद्वारेण भूमिगः।।
४६. व्रीह्यादि संस्थितः कृच्छात्, पुरुषं प्राप्यरेतसा।
स्त्रीगर्भे संप्रविष्टोसौ, जायते पुरुषः पुनः।।
४७. यज्ञयागादिकर्माणि, कृत्वा स्वर्गगतस्ततः।
धूमांगतस्त्वभ्रयुतो, वर्षद्वारेण भूमिगः।।
४८. यज्ञयागादिकर्माणि, कृत्वा स्वर्गगतस्ततः।
गतागतः फलासक्तो, बंभ्रमीत जगत्रये।।
४९. अर्चिरादिगतो योगी, प्रपन्नः केवलोपि वा।
परमे व्योम्नि निर्दुःखः पुनर्नावर्तते क्वचित्।।
५०. उपासकश्च भक्तस्स्यात्, प्रपन्नश्शरणागतः।
देवयानेन तौगत्वा, दिव्यं तत्परमं पदम्।।
५१. परंज्योतिरनन्तं तद्ब्रह्म प्राप्य सुखात्मकम्।
कल्याणगुणसम्पूर्णं, नित्यमुक्तैनिषेवितम्।।
५२. अविर्भूतस्वरूपौ तौ, वरं साम्यमुपागतौ।
प्रीतिकारितकौङ्कर्यनिरतौ परमात्मना।।
५३. वर्तते सततं तत्र, नावर्तेते पुनर्भवम्।
हरिः प्रियतमो प्राप्य, न त्यजेत्करुणानिधिः।।

५४. केवलस्त्वात्मलाभाय, ब्रह्मात्मकमुपासते।
प्रकृतेर्मुक्तमात्मानं, हरिप्राप्तौ पराङ्मुखः।।
५५. सोप्यर्चिरादिना गत्वा, सूक्ष्मप्रकृतिवर्जितः।
स्वात्मानुभूतिमात्रेण, तृप्तस्तत्रैव वर्तते।।
५६. विरजा परमव्योम्नो, रन्तरा केवलास्मृता।
तत स्थितो न जन्मेति, नैव ब्रह्म समश्नुते।।
५७. तस्मादार्यस्तु कैवल्यं, न स्वरन्ति कदाचन।
यत स्तन्नित्यबन्धस्स्यात्, ब्रह्मानुभववर्जितम्।।

**।। इति श्रीकृष्णमाचार्यशतावधानि कृतिषु अर्चिरादिमार्गे मार्गत्रयकथनं नाम प्रथमोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## द्वितीयोऽध्यायः

१. लोकार्यं प्रणिपत्याह, पुनश्श्रीशैलनायकः।
अष्टादशरहस्यानां, विस्फुटार्थप्रकाशकम्।।

२. भगवत्प्राप्तिकामस्य, केवलस्य जगद्गुरोः।
प्रकृतेर्मोचनेतुल्ये, फलभेदः कथं भवेत्।।

३. ब्रह्मात्मकं स्वरूपं तु, तच्छेषत्वं स्वतस्थितम्।
तत्कैङ्कर्यरतिश्शेषभावस्थितिरुदाहृता।।

४. फलप्रदो हरिर्देवो, वैषम्येण ददाति किम्।
तथा वैषम्यनैर्घण्ये, प्रसज्येतां हरेरपि।।

**लोकाचार्य उवाच**

५. सत्यमुक्तं महाभाग, शास्त्रार्थोह्यवलोक्यताम्।
सर्वं समाहितं तत्र, यत्सन्देहस्य कारणम्।।

६. यथा क्रतुर्भवत्यस्मिन्, लोके प्रेत्य तथा भवेत्।
इत्युक्तविधिना प्राप्यं, यतोपासनमश्नुते।।

७. फलप्रदोऽपि लक्ष्मीशस्सम्प्रेक्ष्य तदुपासनम्।
फलं ददाति वैषम्यनैर्घण्ये तस्य न क्वचित्।।

८. उपासनरतेर्हेतुः पूर्वजा कर्मवासना।
तन्निरोधनशक्तिस्तु, प्रत्यगात्मनि वर्तते।।

९. बुभुक्षितोऽपि भोज्यान्नं, विषमिश्रत्ववेदानात्।
न त्यज्येत्किं मृतेर्भीत्या, तद्वदेवात्र पश्यताम्।।

१०. ऐहिकामुष्मिकान्भोगानिच्छन् हरिनिषेवणे।
प्रवृत्तस्तत्प्रभावज्ञस्स्वल्पं फलमपेक्षते।।

११. तत्कैंकर्य रतिर्नैव, जायते भुवि कस्यचित्।
तन्निदानं क्रियाजन्यवासनैव हि नान्यथा।।

१२. उत्तानपादपुत्रस्तु, ध्रुवः पितृसमीपगः।
सपत्नीमातृवाग्बाणै, र्विद्धोबालोवसङ्गतः।।
१३. नारदानुग्रहेणैव, तपस्तप्त्वा श्रियः पतिम्।
साक्षात्कृत्यापितं वव्रे, पदमस्थिरमुन्नतम्।।
१४. पश्चात्तापयुतो गेहं, जगाम किमिदं कृतम्।
पदं भगवतश्चैव, न वृतं मानिना मया।।
१५. अहो मोहस्य महात्म्यमिति चिन्ता परायणः।
ततो ध्रुवपदं प्राप, न वैकुण्ठं तु शाश्वतम्।।
१६. ब्रह्मानुभवजानन्दमपारं प्रत्यगात्मनः।
स्वल्पानंदमिति ज्ञात्वा, तद्रुचिं न रुणद्धि यः।।
१७. स तस्योपासनं कृत्वा, कैवल्यं लभते ततः।
ब्रह्मानन्दे न वा दृष्टिर्जायते फलदेच्छया।।
१८. जन्मान्तरसहस्रेषु, तपोज्ञान समाधिभिः।
नराणां क्षीणपापानां, कृष्णे भक्तिः प्रजायते।।
१९. कृष्णभक्त्या तथोपास्य, प्रपद्यापि हरीच्छया।
अर्चिरादिकमार्गेण, लभते परमं पदम्।।
२०. वैकुण्ठे तु परेलोके, श्रियासार्धं जगत्पतिः।
आस्ते विष्णुरचिन्त्यात्मा, भक्तैर्भागवतैस्सह।।
२१. अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मनः।
स्वयैव प्रभया नित्यं, दुष्प्रेक्ष्यं देवदानवैः।।
२२. शेषभूतं श्रियः पत्युर्विभूतिद्वयमप्यतः।
दासभूतास्स्वतस्सर्वे, ह्यात्मानः परमात्मनः।।
२३. प्रकृतेर्मण्डलं लीलाविभूतिरिति कथ्यते।
लीलोपकरणत्वेन, हरेस्तत्त्रिगुणात्मकम्।।
२४. सत्वं रजस्तमो नाम, गुणाः प्रकृतिसम्भवाः।
गुणवैषम्यतस्सृष्टिः, क्रियते हरिणा निशम्।।
२५. प्रकृत्यामेव जायन्ते, ब्रह्माण्डा निसहस्रशः।
भगवद्वीक्षणात्सद्यस्समुद्रे बुद्भुदौघवत्।।

२६. अधस्तत्पार्श्वभागेषु, नान्योऽस्ति प्रकृतेः क्वचित्।
ऊर्ध्वं तु विरजानद्या पर्यन्तं व्याप्य तिष्ठति।।
२७. मध्येऽस्ति हरिसङ्कल्पाद्विरजाऽमृतवाहिनी।
तदूर्ध्वं परमव्योमनित्यमण्डल संज्ञिकम्।।
२८. स्वप्रकाशं विशुद्धं च, तद्विष्णोः परमं पदम्।
त्रिपाद्विभूतिरित्यस्य, नामान्तरमषीप्यते।।
२९. ऊर्ध्वे च पार्श्वभागेषु, नान्तोऽस्ति विरजावधिः।
तत्रैव वर्तते दिव्यं, वैकुण्ठनगरं हरेः।।
३०. नित्यमुक्तगणैर्युक्तमानन्दमयमण्टपम्।
तत्रत्यानित्यमुक्ताश्च; नित्यकैङ्कर्यतत्पराः।।
३१. श्रियःपतिं नमन्तश्च; छायावदनुवर्तिनः।
लीलाविभूतितिष्ठास्तु, न तथा वशवर्तिनः।।
३२. कर्मानुगफलाविष्णो, सङ्कल्पानुविधायिनः।
वैकुण्ठे नित्यमुक्तास्तु, सामगानपरायणाः।।
३३. बद्धांजलिपुटानित्यं, नम इत्येववादिनः।
लीलाविभूतिगास्सर्वे, न न मेयं कदाचन।।
३४. ईश्वरस्त्वहमेवान्यो, नास्ति नास्तीति वादिनः।
दम्भाहङ्कारसंयुक्तास्स्वरूपज्ञानवर्जिताः।।
३५. श्रीशकैङ्कर्यमुत्सृज्य, देवतान्तरसेवकाः।
भगवत्सत्रमुत्सृज्य, न न स्तुति परायणाः।।
३६. परमव्योमसद्मानो, दिव्यमङ्गल विग्रहाः।
प्राकृता मलिनैर्देहैरावृतज्ञानसम्पदः।।
३७. त्यक्त्वा श्रियःपतिं मार्गं, सेवमानस्सदा जडाः।
कामसन्तप्तचित्ताश्च, कामिनी लालसाः परम्।।
अतृप्तामृतरूपं तद्भगवद्दर्शनं महत्।
सन्त्यज्यपातुमिच्छंति, हेयं कान्ताधरामृतम्।।
३९. अभयं सर्वभूतेभ्यो, ददामीति हरेर्व्रतम्।।
विरुद्धं प्राकृतानं तू, व्रतं दूरापसर्पणम्।।

४०. एवं नीचत्वमापन्नान्, प्रकृतिस्थान् जनान् हरिः।
पश्चन् चिन्तातुरो नित्यं, सेव्यमानोऽसि सूरिभिः।।
४१. एकस्सम्राट् सुतास्तस्य, तत्तुल्यज्ञानशक्तयः।
तत्र केचित्पितुस्थाने, सन्त्यानन्देन भूयसा।।
४२. त्यक्त्वान्ये अपितरं बाल्ये, प्रविष्टा गहने वने।
किरातैः पोषिता मूढा, दुष्कर्म नीरतास्तथा।।
४३. चोराराजभटैर्नीताः कारागारे निवेशिताः।
महादुःखं समापन्नान्, तान्पुत्रान्वीक्ष्य तत्पिता।।
४४. यथा स्वयं समुद्धर्तुं, यतते च तथा हरिः।
विषयक्षुद्रगुल्माढ्ये, तृष्णा पादपशालिनि।।
४५. संसारमरुकान्तारे, भ्रष्टान्नष्टान्स्वचेतनान्।।
प्रोर्धर्तुमिह ते देवस्सम्बन्धादेव केवलम्।।
४६. पितृपुत्रत्वसम्बन्धमात्रेण तनयं पिता।
न त्यजेन्नवभिर्बन्धैः, कथं त्यजति मापतिः।।
४७. पिता च रक्षकश्शेषी, भर्ता ज्ञेयो रमापतिः।
स्वाम्याधारश्च सर्वात्मा, भोक्ता नवविधः स्मृतः।।
४८. उद्धरिष्यन्ततो बद्धान्वैकुण्ठे निवसन्हरिः।
व्यूहं समागतस्सृष्टिस्थित्यन्त करुणाय सः।।
४९. वासुदेवोऽनिरुद्धश्च, प्रद्युम्न इति संज्ञितः।
मधूच्छिष्टगतान् हेमकणानिव निजात्मनः।।
५०. प्रकृत्या मिश्रितान् भोगमोक्षशून्यान्विलोक्य च।
कृपया प्राप्तये स्वस्य, करणैस्समयोजयत्।।
५१. अन्धकारे स्थितं स्यार्थदर्शनाय कृपापरः।
प्रदीपमिव सन्मानं, वेदात्मकमदाद्धरिः।।
५२. तदनादृत्य तिष्ठन्तमात्मानं रक्षणेप्सया।
संयुक्तोऽन्तस्स्थितो माता, निद्रासक्तं शिशुं यथा।।
५३. यथा राजभटश्चोरं, गृहीतुं तत्र तत्र च।
भ्रमत्यनेकसद्वेषैस्तथा विभवरूपवान्।।

५४. अवतीर्णो यदा विष्णुस्तदा तं वञ्चयन्नरः।
लोकान्तरगतः पश्चादायातत्संसरन् स्थितः।।

५५. अर्च्यावतारमाश्रित्य, स्थितः पश्चेदिति स्वयम्।
श्रीरङ्गादिषु सर्वत्र, तं न पश्यति मूढधीः।।

५६. एवं संसृतिचक्रस्थे, भ्राम्यमाणे स्वकर्मभिः।
जीवे दुःखाकुले विष्णोः, कृपा काप्युपजायते।।

५७. स तया कृपयाविष्टः परया निर्निमित्तया।
जायमानं जनं प्रीत्या, संपश्यति रमापतिः।।

५८. जायमानं हि पुरुषं, यं पश्येन्मधुसूदनः।
सात्विकस्स तु विज्ञेयस्सवै मोक्षार्थचिन्तकः।।

५९. यस्मिन् कटाक्षसाफल्यं, प्रथमं तस्य जायते।
अद्वेषश्श्रीहरावन्ते, यथारोगनिवर्तनात्।।

६०. ततस्वादाभिमुख्यं च, तत्कथाश्रवणादिषु।
तदीयसङ्गसम्प्रीतस्सदाचार्यं समाश्रितः।।

६१. पञ्चसंस्कारसम्पन्नः पञ्चकालपरायणः।
अर्थपञ्चकविज्ञाता, प्रपन्नो भवती स्वयम्।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे भगवत्प्रयत्नविशेषकथनं नाम द्वितीयोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

# तृतीयोऽध्यायः

**श्रीशैलनाथ उवाच**

१. श्रीमन् लोकगुरो ? ब्रूहि ! प्रपन्नस्य च लक्षणम्।
योऽर्चिरादिकमार्गेण याति विष्णोः परं पदम्।।

**लोकाचार्य उवाच**

२. आनुकूल्यस्य सङ्कल्पः, प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो, गोप्तृत्व वरणं तथा।।

३. स्वात्मनिक्षेपकार्पण्ये, षड्विधा शरणागतिः।
एवं षडङ्गसंयुक्तां, विधाय शरणागतिम्।।

४. श्रीपतौ न्यस्तभारस्सन्, तत्सेवा तत्परोऽमलः।
तदनन्यार्हशेषत्वं, तदनन्यशरण्यता।।

५. तदेकभोग्यता नाम, स्वाकारत्रयसंयुतः।
कैङ्कर्यमिति कर्माणि, कुर्वन् प्राप्य त्वरान्वितः।।

६. परभक्तिं परज्ञानं, परमां भक्तिमास्थितः।
दर्शनं परभक्तिस्स्यात्, परज्ञानं तु सङ्गमः।।

७. पुनर्विश्लेषभीरुत्वं, परमा भक्तिरिष्यते।
अन्त्ये तु परमाभक्तिर्जायते पुरतो न हि।।

८. एतल्लक्षणसम्पन्नः, प्रपन्न इति कथ्यते।
आर्तो दृप्तः प्रपन्नस्तु, द्विविधः परकीर्तितः।।

९. प्राप्ये त्वरान्वितो नित्यं, विश्लेषासहनो हरेः।
कदा कदेति पूर्णार्तिं, दर्शयन्नार्त उच्यते।।

१०. रक्षिष्यतीति विश्वासात्, निर्भरः प्राप्यलब्धिये।
धैर्येण वर्तते यस्तु, स दृप्त इति कथ्यते।।

११. दृप्तास्यापि शरीरान्ते, तादृशार्तिं प्रदाय च।
धै र्येणवर्ततेयस्तु, सद्दृप्त इति कथ्यते।।

११. दृप्तस्यापि शरीरान्ते, तादृशार्तिं प्रदाय च।
श्रियःपतिस्स्वकं धाम, नयत्यत्र न संशयः।।

१२. प्रपन्नः प्राप्तवैराग्यो, जगतो दोषदर्शनात्।
त्याज्योपादेयविज्ञानो, तत्वदर्शी हरे प्रियः।।

१३. संसारक्रूरतां पश्यन्, तत्र तत्सोढुमक्षमः।
सर्पास्यगतमण्डूकबाधां प्राप्नोति नित्यशः।।

१४. तापत्रयेण संतप्तः परितो व्यथते भृशः।
यथा दावानलाक्रान्तश्चञ्चलो मृगशाबकः।।

१५. सन्तप्तो वर्तते नित्यं, मध्ये मरणजन्मनोः।
पार्श्वद्वयेऽग्निसन्दीप्ते, यथ काष्टे पिपीलिकाः।।

१६. सागरे तीव्रवातेन, प्लवः प्रत्याहतो यथा।
संसारसागरांतस्थो, विषयैश्चालितोऽनिशम्।।

१७. कस्सहायो भवेदद्य, ममेति भृशमार्तितः।
क्वचित् क्रोशति सर्वेश, पाहि पाहीति च ब्रुवन्।।

१८. विषयान् सर्वतो रम्यान्, हृदयाकर्षकानिमान्।
प्रदर्श्य किं पुनर्भ्रष्टं, करोषि करुणानिधेः।।

१९. अनादि मायाया सुप्तं, मां प्रबोद्य रमापते।
नष्टमद्यापि मायायां, किं पातयति निर्भयः।।

२०. इन्द्रियाण्यपि बाध्यन्ते, पञ्चसर्वदिशासु माम्।
विकृष्य च बलादन्तर्गजेन्द्रं मकरो यथा।।

२१. एवं क्रोशन् जगद्रीतिं, पश्यन् विस्मयमागतः।
ब्रूते मोहस्य माहात्म्यं, किं मया वर्ण्यतेऽधुना।।

२२. सर्पे चन्दनबुध्येव करं निक्षिप्य शेरते।
सर्वे वैषयिकानन्दे, स्वात्मनाशकरे सदा।।

२३. यथा हि ग्रस्तमाण्डूको, दंशान्भक्षितुमिच्छति।
तथा काला हि नग्रस्तो, विषयान् भोक्तुमिच्छति।।

२४. ग्रीष्मातपेन सन्तप्तो, छायामात्रमपेक्ष्य सः।
फणिराजफणाधस्थश्शेते विषयलालसः।।

२५. दुःखसागरमग्नोपि, याचते दुःखसाधनम्।
सुखभ्रान्त्या स्वहानिं तु, न विजानाति दुर्मतिः।।

२६. यथाग्निज्वलिते गेहे, सुप्तो वेत्ति न चापदम्।
तथा तापत्रयाक्रान्तो, जानीतेनात्मनोभयम्।।

२७. संसारिविषयत्वेवं, चिन्तां प्राप्य दयान्वितः।
मूर्खैस्सह निवासोऽपि, दुस्सहो भविता ध्रुवम्।।

२८. शौरिचिन्ताविहीनैस्स्यात्सहवासोऽस्य दुष्करः।
राक्षसीभिर्यथा राम, पत्न्या लङ्कापुरीवने।।

२९. वरं हुतवहज्वाला, पञ्जरान्तर्व्यवस्थितिः।
न शौरिचिन्तविमुख, जनसंवासतस्थितिः।।

३०. वयं तु भगवद्दासाः यामिन्द्रिया किङ्कराः।
सम्बन्धो मास्तु युष्माभिर्यूयं यूयं वयं वयम्।।

३१. एवं संसारिभिर्बन्धं, मनसा दूरतस्त्यजन्।
क्रमप्रवृद्धसद्भक्तिब्रूते प्राप्यत्वरान्विताः।।

३२. श्रीनिवास ! दयासिन्धो ! मामुद्धर जगत्पते।
संसार सागरे घोरे, निमग्नं दुःखभाजने।।

३३. शरीरं मलिनं कर्म, व्यर्थं ज्ञानं मृषात्मकम्।
स्वभावं न सहे तस्य, भवद्दर्शनलालसः।।

३४. कदा वैकुण्ठमासाद्य, नित्यमुक्त समावृतः।
भवत्पादाम्बुजे नित्यं, किङ्करो भवितास्म्यहम्।।

३५. कदा ह्वयसि तत्कालः, कदा यात श्रियःपतेः।
तादृग्दिनं मम ब्रूही, गणयन् गमयाम्यहम्।।

३६. स दैवं चिन्तयन्नार्तो, दर्शना भावतो हरेः।
द्रवीभवति वन्ह्याग्रे, मधूच्छिष्ट वदातुरः।।

३७. सन्दर्शय भवद्रूपं, नीलजीमूतसन्निभम्।
भवसन्तापहृद्दिव्यं लक्ष्मीविद्युद्विकासितम्।।

३८. स्वामिन् ! गरुडमारूह्या, मद्वीद्यामपि लीलया।
विहरन् रमया सार्धं, गच्छ प्रेक्ष्य गृहस्थितः।।

३९. मत्प्रेक्षणं भवेदद्य, सावद्यं चेज्जनान्तिके।
जालमार्गेण संपश्यन्, तृप्तिं यामि कृपानिधे।।

४०. जगत्सर्वं भवद्रूपं, कथं विस्मरणं भवेत्।
कथं द्रक्ष्यामि ते देव, दिव्यमङ्गळ विग्रहम्।।

४१. शंखचक्रगदापद्मवनमालाविराजितम्।
श्रीवत्सविलसद्वत्सं, श्रितभाग्यप्रदं शुभम्।।

४२. मनसा गृह्यते सर्वं, भोक्तुं शक्तिर्न विद्यते।
अन्नमग्रे विनिक्षिप्य, मुखमाच्छाद्यते त्वया।।

४३. इत्येवं प्रार्थमानोऽपि, हरिर्नोपैति दर्शनम्।
तदा दिवसमेकं तु, कल्पकोटि शतायते।।

४४. भगवद्विरहं सोढुमशक्तश्च दिनेदिने।
शरीरमोक्षणोद्युक्तो, मृत्युमाह्वयति प्रियम्।।

४५. प्रायशः पापकारित्वान्मृत्योरुद्विजतेजसः।
कृतकृत्याः प्रतीक्षन्ते, मृत्युं प्रियमिवातिथिम्।।

४६. जिहासितेऽस्य देहेऽपि, प्रीतिं कुर्याद्धरिस्तथा।
प्रियया त्यक्तमाल्यादौ, राजपुत्र इव प्रियः।।

४७. आह्लादशीतनेत्राम्बुः, पुलकीकृतगात्रवान्।
सदा परगुणाविष्टो, द्रष्टव्यस्सर्वदेहिभिः।।

४८. इत्युक्तविधिना देहे, चरमे लोकपावने।
भक्तस्य भक्तिविज्ञानं, वैराग्यगुणवासिते।।

४९. हरिः प्रीतस्सदा पश्यन्, विलम्बं कुरुते तदा।
ज्ञानिनानेन सर्वेशो, लोकमुद्धर्तुमिच्छति।।

५०. अयं तु त्यक्तुमेवेच्छन्, हरिं निर्बन्धयत्स्यपि।
त्याजयास्मत्तनुं देव ! शपे लक्ष्म्यै सुरेश्वर ! ।।

५१. तुभ्यं शपे न मिथ्ये तत्, त्वया सह नयस्व माम्।
यदि शक्नोषि गच्छत्वं, मयाद्यवि निवार्यते।।

५२. इति निर्बन्धितुं योग्यां, परमां भक्तिमाप्नुयात्।
असहन् क्षणविश्लेषं, तथा प्राप्य त्वरान्वितः।।

५३. अथवा शरणं प्राप्तो निर्भरो धैर्यमास्थितः।
फलं भवति देवेच्छा, यथा स्यात्ततो भवेत्।।

५४. स्वयं गुणमयीं मायां, मोचयित्वा रमापतिः।
मानयेद्यदि गोविंद, स्तत्ततस्य सदृशं भवेत्।।

५५. निर्बन्दो न मया कार्यस्स्वतन्त्रेच्छा यथा भवेत्।।
तथास्त्विति च निश्चिन्तः, प्रि योवर्तेत वा क्वचित्।।

५६. तस्यावसाने काले तु, स्वीकर्तुं कृतनिश्चयः।
यदाऽयं शरणं प्राप्तस्तत्प्रभृत्येव माधवः।।

५७. तत्कृताञ्जलिना तुल्यं, किं कृतं श्रीमता मया।
प्रवृद्धऋणवत्तन्मे, हृद्यान्नापसर्पति।।

५८. आकार वाच्यमात्मानं, जलयत्यग्रत स्थितः।
ततोञ्जलिरिति प्रोक्तस्तत्युल्यं नास्ति भूतले।।

५९. किं कुर्यामित्ययं किञ्चित्कर्तुं व्यवसितो हरिः।
उत्पाटितरदां पूर्वं, सर्पिणीमिव संसृतिम्।।

६०. प्रपन्नविषयेऽकिञ्चित्करीं कृत्वापि सा पुनः।
उद्धाय निपतेत्स्वस्मिन् मृतापीति भयाकुलम्।।

६१. तमिमं निर्भयं स्थानं, नेतुं सिद्धो भवेद्विभुः।
तद्व्यामोहस्तदेतस्मिन्, समुद्र इव वर्धते।।

६२. तद्व्यामोहप्रकर्षं तु, दृष्ट्वा भक्तस्य पूर्वज।
व्यामोहोपि भवेद्वत्स, पदे जलमिवाल्पशः।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे प्रपन्नशरीरावसाने भगवत्प्रवर्धनं नाम तृतीयोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

# चतुर्थोऽध्यायः

**श्रीशैलनाथ उवाच**

१. ततः श्रीशैलनाथार्यः प्रपच्छ गुरुमादरात्।
जगद्गुरो ! प्रियं स्वस्य, प्रपन्नं जगदीश्वरः।।

२. कथं नयति सर्वज्ञस्सर्वशक्तिः परं पदम्।
प्रपन्नस्त्वन्तिमं देहं, कथं त्यजति मे वद।।

**लोकाचार्य उवाच**

३. श्रीशैलनाथ ! वक्ष्यामि ! विस्तरात्त्वदपेक्षितम्।
देहत्यागं प्रपन्नस्य, स्वगतां स्वीकृतिं हरेः।।

४. प्रपन्नस्यान्तिमे काले, सम्प्राप्ते श्रीपतिस्स्वयम्।
वैकुण्ठानयनायैनं, यतते सत्वरः परम्।।

५. कोसलाधिपतिः पूर्वं, कर्तुं रामाभिषेचनम्।
वसिष्ठादीन्समाहूय, यथा ज्ञापयतिस्म तान्।।

६. पूरे जनपदे चापि, सर्वत्र सकलैर्भटैः।
अलङ्कारविधिं कृत्स्नं, कारयामास वेश्मनि।।

७. तदैव श्रीपतिस्सर्वानाहूय परमप्रियान्।
नित्यसूरीन्भणत्येवं, प्रपन्ना नयनम्प्रति।।

८. अर्चिरादिकमार्गस्य, वैकुण्ठनगरस्य च।
नूतनालङ्कृतिं कर्तुं, नियोजयति माधवः।।

९. ते सूरयस्स्वसङ्कल्पमात्रेण सकलेप्सितम्।
साधयन्ति हरेश्शीघ्रं, नूतनप्रिय लालसाः।।

१०. त्वरन्ते सत्कृतिं कर्तुं, देवयानातिवाहकाः।
लोकेषु मार्गगादेवः प्रतीक्षन्ते मुदान्विताः।।

११. प्रपन्नेन कृतं कर्म, त्रिविधं वर्तते तदा।
प्राचीनमुत्तरं कर्म, प्रारब्धमिति कीर्तितम्।।
१२. अनादि सञ्चितं कर्म, प्राचीनमिति कथ्यते।
भगवच्छरणं प्राप्य, प्रकृतेर्वासनावशात्।।
१३. प्रमादेन कृतं कर्म, त्यागमित्युच्यते बुधैः।
फलं दातुं समारब्धं, प्रारब्धमिति गीयते।।
१४. यदायं शरणं प्राप्तस्तदैव हरिरीश्वरः।
कृपादण्डेन भग्नानि, फलायोग्यान्यपि स्वयम्।।
१५. कर्माण्यत्र संयोज्य, निष्कर्माणं करोति सः।
धनमस्य तु दायदाः प्राप्नुवन्ति शुभानि वै।।
१६. कर्माणि त्वस्य मित्राणि, द्विषन्तः पाप सञ्चयम्।
पुण्यपापे विधूयैवं, परं साम्यमुपैत्ययम्।।

**श्रीशैलनाथं उवाच**

१७. स्वामिन् ! लोके स्वयंभुङ्क्ते, कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि।।
१८. कर्ता शास्त्रर्थवत्वादित्युक्तं सूत्र कृता तथा।
धर्मशास्त्रफलं सर्वं, प्रयोक्तरि विधीयते।।
१९. कथमन्यकृतं कर्म, तदन्ये नोपभुज्यते।
एतं मे संशयं छिन्धि, गुरो ! शास्त्रसमन्वयात्।।

**लोकाचार्य उवाच**

२०. तथ्योयं भवता प्रोक्त, शास्त्रार्थस्सर्वसङ्गतः।
तथापि भक्तवात्सल्याद्धरिरन्यत्र पातयेत्।।
२१. तथोपनिषदा प्रोक्तं, नैव तत्र विचारणा।
समुद्रतरणे पश्य, रामकृत्यं तथा कृतम्।।
२२. विभीषणस्य वाक्येन, रामस्तत्र दिनत्रयम्।
प्रायोपवेशमध्यास्त, जलधेस्तरणाय सः।।
२३. त्रिदिनान्ते समुद्धाय, क्रुद्धो लक्ष्मणमब्रवीत्।
असमर्थं विजानाति, मामयं मकरालयः।।

२४. चापमानयसौमित्रे, शरांश्चाशी विषोपमान्।
सागरं शोषयिष्यामि, पद्भ्यां यान्तु प्लवङ्गमाः।।
२५. इत्युक्त्वा धनुरादाय, शरं सन्धाय संस्थितः।
तदा भीतस्समुद्रस्तु, साञ्जलिः पुरतस्थितः।।
२६. तस्याञ्जलिं समालोक्य, बाणमोचन लज्जितः।
समुद्रमवदद्रामः, कुत्र सन्ति तवारयः।।
२७. तदर्थमेव हि शरस्सन्धितः कार्मुके मया।
वद शीघ्रं वधिष्यामि, तानहं ते रिपूनिति।।
२८. वदन्तमिति राजानं, रामं प्राह पयोनिधिः।
कृपानिधे ममाभ्यन्तर्द्वीपे सन्ति महासुराः।।
२९. पीडयन्तीह सत्वानि, जलजानि बहून्यपि।
तस्माद्दुष्टेषु सर्वेषु, तेषु बाणः प्रयुज्यताम्।।
३०. इत्येवं प्रार्थितो रामस्तं बाणं तेष्वपातयत्।
शोषणाय समुद्रस्य, यो चापे सन्धितः पुरा।।
३१. तद्वत्प्रपन्नलोकेन, भोक्तव्यं कर्म चान्यतः।
विधातुं शक्यते सर्वशक्तिना परमात्मना।।
३२. कर्ममात्रं न पुण्यं हि, पापं वा क्षणनाशि तत्।
तज्जन्यं कल्प्यते चान्यैरपूर्वमिति युक्तितः।।
३३. तदप्यचेतनं स्वस्य न फलं दातुमर्हति।
फलप्रदो हरिर्देवस्तोषितः कर्मणा ततः।।
३४. शास्त्रसिद्धौ क्रियाजन्यौ, निग्रहानुग्रहौ हरेः।
पापपुण्याश्रितस्यास्य, सम्बन्धिषु फलप्रदौ।।
३५. एतत्सम्बन्धिनस्सर्वान्, पुण्येन स्वर्गतान् तथा।
पापेन कुरुते तस्य, द्विषतो निरयं गतान्।।
३६. स्वयं गरुडमारूढश्श्रीभूमिभ्यां विराजितः।
शङ्खचक्रगदापद्मवनमालाविभूषितः।।
३७. सेवां मोचयितुं दद्याद्धेहं चा विदितश्रमम्।
चिकित्सयेन्मुखे माता, स्तन्यं दत्वा यथा शिशुम्।।

**श्रीशैलनाथ उवाच**

३८. जगद्गुरो ! संशयोऽत्र, जायते मम माधवः।
स्मृतो ददाति सेवां किमन्तिमे स्वयमेव वा।।
३९. यं यं वापि स्मरन् भावं, त्यजत्यन्ते कळेबरम्।
तं तमेवेति कौन्तेय, सदा तद्भावभावितः।।
४०. एवं गीतोक्तरीत्या तु, स्मृतिरावश्यकी मता।
यदि स्मृतिस्तु न भवेत्तर्हि तस्य गतिः कथम्।।

**लोकाचार्य उवाच**

४१. उपासकस्य भक्तस्य, विहिता चान्तिमस्मृतिः।
प्रपन्नस्य तु मोक्षस्स्यादन्तिमस्मृतिवर्जितम्।।
४२. स्थिते मनसि सुस्वस्थे, शरीरे सति यो नरः।
धातुसाम्ये स्थिते स्मर्ता, विश्वरूपं च मामजम्।।
४३. ततस्तं म्रियमाणं तु, काष्टपाषाणसन्निभम्।
अहं स्मरामि मद्भक्तं, नयामि परमां गतिम्।।
४४. इति श्रीमद्वराहस्य, सूक्त्या साक्षाद्धरिस्स्वयम्।
प्रपन्नस्य गतिं स्मृत्वा, सेवां दद्यान्न संशयः।।
४५. आहूय भगवानातिवाहिकान्मार्गसंस्थितान्।
नियोजयति सत्कर्तुमेनं योग्यानुसारतः।।
४६. प्रपन्नः परमं धाम, गन्तुं सिद्धो भवत्ययम्।
स्वोपयुक्तानि वस्तूनि, परिगृह्य यथागृही।।
४७. हृदन्यानींद्रियाण्यन्तस्सङ्गतानि ततो मनः।
प्राणेन सङ्गतं प्राणश्चेतनेन च सङ्गतः।।
४८. चेतनो भूतसूक्ष्मैश्च, परमात्मा समाश्रितः।
ततो निधाषु काले तु, रविरश्मि समाकुलः।।
४९. छायामाश्रित्य विश्रान्तो, यथास्याद्भूतले तथा।
वासुदेव तरुच्छायामाश्रितो भवतापतः।।
५०. प्रयाणं कुरुते शीघ्रं, प्रपन्नश्श्रीहरिप्रियः।
मुमुक्षुः प्रियसान्निध्यं, तरुणीव मुदान्वितः।।

५१. प्राणप्रयाणपाथेयं, हरिरित्यक्षरद्वयम्।
पाथेयं पुण्डरीकाक्ष, नासङ्कीर्थनामृतम्।।

५२. इत्याद्युक्तप्रकारेण, मन्त्ररत्नात्मकं परम्।
पाथेयं च भवेत्तस्य, गच्छतः परमं पदम्।।

५३. देवयानाभिधो मार्गो, महानन्दप्रदायकः।
गन्तव्यश्च भवेदर्चिरादिकस्तस्य गच्छतः।।

५४. ब्रह्माण्डान्तर्गतोन्यासविषयस्सर्वशक्तिमान्।
नीलमेघनिभश्शेषशयनः करुणान्वितः।।

५५. अण्डाद्बहिर्निवेशार्थं, समर्थस्तस्य गच्छतः।
श्रीरङ्गनायको मार्गसहायो भवति स्वयम्।।

५६. विरजातीरमन्यत्र, तिल्यकान्तारमन्यतः।
ऐरंमदं सरोऽन्यत्र, विश्रान्तिस्थानमस्य वै।।

५७. आनन्दमयमत्यन्तविपुलं मणिमण्टपम्।
प्राप्यस्थानं भवेत्तस्य, गच्छतः परमे पदे।।

५८. आर्चिरादिकदेवास्तु, तत्र तत्र सहायकाः।
आकाशे घननिर्घोषः, प्रयाणपटहध्वनिः।।

५९. हृदाकाशे स्थितो हार्दो, हरिर्मार्गप्रदर्शकः।
इत्थं प्रयाणसन्नाहो, हरिणा निश्चितः पुरा।।

६०. मुक्तोर्चिरादिनागन्तुमुद्युक्तः प्रीतिसंयुतः।
अनादिकालमात्मानमावृत्य बहुधा पुरा।।

६१. बाधिकां संसृतिं दृष्ट्वा, हसन् प्राप्तुं परं पदम्।
सम्प्रीत्यतिशये पश्चाद्वर्धमाने समुत्सुकः।।

६२. स्थूलं शरीरमुत्सृज्य, यथा काकोदरस्त्वचम्।
लङ्कापुरद्यथासीता, विभीषण इवाशु सः।।

६३. हृत्कुशे शयमद्यात्तु, मुक्तात्मा निर्गतो भवेत्।
हार्देनानुगृहीतोऽसौ ज्ञानदीपप्रकाशनात्।।

६४. द्विसप्ततिसहस्राणि, नाड्यस्सन्ति शरीरके।
शतंचैका च हृद्देशे, नाड्यो निर्गमने स्थिताः।।

६५. शताधिका तु या नाडी, धमनिश्सोर्ध्वगामिनी।
ब्रह्मरन्ध्रेण संयुक्ता, तद्वाराद्बहिरागतः।।

६६. मुक्तो भवति तत्सूक्ष्मं, द्वारं हार्दो हरिस्स्वयम्।
प्रकाशयति भक्तस्य, प्रपन्नस्य च केवलम्।।
६७. कपालभेदनं कृत्वा, शरीरान्निर्गतो बहिः।
सुषुम्ना सङ्गतेनैव, जलदादित्य रश्मिना।।
६८. ओंकाररथमारुह्य, मनस्सूतः प्रयात्ययम्।
महता वैभवेनैवं कृपया हि रमापतेः।।
६९. तथा विभूतियुग्मं तु, भासते नूत्नशोभया।
त्यक्त्वा गाम्भीर्यमम्भोधिर्नृत्यतीवावलोक्यते।।
७०. ऊर्ध्वलोक गतास्सर्वे, सोपायन करास्स्थिसताः।
आकाशे स्वरतः पूर्णकुम्भानादाय संस्थिताः।।
७१. तोरणानि विचित्राणि, मण्टपानि विशेषतः।
पुष्पमाला विशिष्टानि, धूपितानि विधायते।।
७२. प्रतीक्षन्ते वसेत्किञ्चिदिति निष्पल तृष्णया।
केचिदागत्यकुर्वन्ति, स्वागतानि पदेपदे।।
७३. वाद्या निवादयन्त्यन्ये, सागरध्वनिवन्मुदा।
अपरे स्वानिपुण्यानि, प्रयच्छन्ति सुरोत्तमाः।।
७४. शङ्खकाहलभेर्यादीन्, घोषयन्तस्समं ततः।
धूपदीपादिभिः केचिदर्चयन्ति स्तुवन्ति च।।
७५. अतिवाहिकसुन्दर्यस्समेत्येवं वदन्ति च।
आराजकमिदं स्थानं, भवेत्पालयमाचिरम्।।
७६. मरुतो वसवस्त्वेवं, मत्वा स्तोत्राणि कुर्वते।
यद्ययं कृपयापश्येदस्मान् श्री भगवत्प्रियः।।
७७. भगवद्दत्तमस्माकं, स्थानं सुस्थिरतां व्रजेत्।
इतोऽधिकं लतापि, कृपया श्रीहरेः पुनः।।
७८. महता वैभवेनेद्धं, सत्कारैस्सर्वतोमुखैः।
मुक्तोगच्छति तं मार्गमर्चिरादिं सुखोत्तरम्।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे मुक्तात्मगमनं नाम चतुर्थोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## पञ्चमोऽध्यायः

१. ततस्संशयमापन्नश्श्रीमान् श्रीशैल नायकः।
लोकाचार्यं पुनः प्राह, साञ्जलिः करुणानिधिम्।।

**श्रीशैलनाथ उवाच**

२. आदित्यरश्मिनागच्छेन्मुक्त इत्युच्यते गुरो।
रात्रौ मृतः प्रसन्नश्चे द्रविरश्मिः कुतो भवेत्।।

३. दिवा च शुक्लपक्षश्च, उत्तरायण मेव च।
मुमूर्षतां प्रशस्तानि, विपरीतं तु गर्हितम्।।

४. इत्युक्तेन प्रकारेण, मरणस्य दिवादयः।
काला एव प्रशस्यन्ते, सदाचारोऽपि दृश्यते।।

५. शरतल्पगतो भीष्मस्संपश्यन् दक्षिणायनम्।
उत्तरायणपर्यन्तं, स्थितो मुक्तेरवाप्तये।।

६. रात्रिस्तथाऽशितः पक्षो, दक्षिणायनमेव च।
गर्हितानि मृतस्तत्र, मुक्तिं गच्छति वासवा।।

**लोकाचार्य उवाच**

७. मुक्तो रश्म्यनुसार्येव, गच्छेदादित्यमण्डलम्।
रश्मी नाम सुनाडीषु, सम्बन्धो दृश्यते सदा।।

८. यथा दीर्घो महामार्गो, द्वौ ग्रामौ संश्रितो भवेत्।
तथैव रश्म्ययस्सूर्यं, नाडीरावृत्य संस्थिताः।।

९. रात्रौ मृतस्य चाप्यस्ति, गमनं रविरश्मिना।
तत्रापि रश्मयस्सन्ति, ग्रीष्मे चोग्रोष्म दर्शनात्।।

१०. हेमन्तादिषु कालेषु, दुर्दिनेष्विव रात्रिषु।
हिमस्याभिभवादूष्म न लभ्येत न चान्यथा।।

११. बन्धस्य कारणं कर्म, तत्प्रोक्तं त्रिविधं खलु।
पूर्वाघमुत्तराघं च, प्रारब्धमिति सूरिभिः।।

१२. न्यासोपासनविद्यायाः प्रभावेन विनाशितम्।
पूर्वाघमुत्तराघं तु, नाश्लिष्टं पूर्वमेव हि।।

१३. प्रारब्धं चरमस्यास्य, देहस्यान्ते विनश्यति।
प्रपन्नानां प्रपत्त्यैव प्रारब्धमपि नश्यति।।

१४. शरीरस्थितिदुःखानां, निदानं भगवत्कृपा।
इहलोकजिहासार्थं, प्राप्य रुच्यभिवृद्धये।।

१५. हरिर्दुःखानि भक्तेभ्यो, हितबुध्या प्रयच्छति।
उपासकस्य चान्येषां, दुःखं कर्मफलं भवेत्।।

१६. प्रपन्नानां भवेद्दुःखं, कृपाफलमिति स्थितिः।
सत्प्रदाय संसिद्धा, सर्वशास्त्रार्थसम्मता।।

१७. तथा निशादिकालेषु, गर्हितेषु मृतोऽपि सन्।
बन्धहेतोरभावेन, मुक्तियेति न संशयः।।

**श्रीशैलनाथ उवाच**

१८. अर्चिरादिकमार्गे तु, कथिताश्चार्चिरादयः।
यथा जिगमिषोर्ग्रामं, देशिकैः कथ्यते पुरः।।

१९. इतो निष्क्रम्य गच्छत्वममुकं वृक्षमग्रतः।
इमां नदीममुं शैलमतीत्य स्वपुरं व्रज।।

२०. इत्युक्तविधया मार्गचिह्नानि किमु सद्गुरो !।
अथवा लोकशब्देन, कथ्यन्ते ह्यर्चिरादयः।।

२१. ततो भोगभुवः किं स्युर्गच्छतः परमं पदम्।
मधुविद्यानिविष्टानां, वसुत्व प्राप्तिवद्गुरो !।।

**लोकाचार्य उवाच**

२२. श्रीशैलनाथ वक्ष्येऽहं, तत्सन्देहनिवारकम्।।
शास्त्रसिद्दान्तसर्वस्वं, ज्ञातव्यं सर्वसूरिभिः।।

२३. मार्गे दिनादिकालानां, वृक्षशैलादिवत्स्वयम्।
नैव लक्षणता तस्मान्नचिह्नान्यर्चिरादयः।।

२४. भोगस्थानानि नैव स्युस्तद्धेतोः कर्मणस्तदा।
विरहाच्च विशेषेण, मधुविद्याधिकारिणः।।

२५. वसुत्वप्राप्तिवच्छुत्या, कुत्राप्यकथनात्तथा।
नैव लोकाभवेयुस्ते, किन्तु तत्राभिमानिनः।।

२६. देवादिवादिशब्दैस्तु, प्रोच्यन्ते ह्यर्चिरादयः।
मुक्तस्य लोकगमने, गमयितृत्वकारणात्।।

२७. आतिवाहिक इत्युक्तं, ब्रह्मसूत्रकृतापि च।
अतोऽर्चिरादिमार्गस्था, देवाश्श्रीपतिसम्मताः।।

२८. पुरुषोऽमानवो ब्रह्म, गमयत्यर्चिरादिना।
गतानिति च व्याक्येन, तन्मार्गेणैव केवलाः।।

२९. गच्छन्तो यान्ति तद्ब्रह्म, मध्ये प्रकृतिमण्डले।
कञ्चित्कालं विशुद्धात्मा, विभवं प्राप्य तत्परम्।।

३०. अर्चिरादिकमार्गेण, तद्विष्णोः परमं पदम्।
मधुविध्या स्थितानां च, वसुत्वप्राप्तिपूर्वकम्।।

३१. ब्रह्मप्राप्तिवदित्येके, वदन्ति विबुधोत्तमाः।
विषयो मधुविद्यायामनित्यादित्यरूपकम्।।

३२. ब्रह्मोपासनमेवातो, मध्येऽनित्यफलं तथा।।
वसुत्वप्राप्तिरूपंस्यात्ततो नित्यफलं महत्।।

३३. ब्रह्मप्राप्त्यात्मकं त्वत्रब्रह्मात्मकमनाकुलम्।
नित्यं स्वात्मानमेवायं, केवलस्समुपासते।।

३४. यथोपासनमेव स्यात्फलं तन्नान्यथा भवेत्।
मधुविद्यागतो न्यायो, नात्रयुक्तो भवेत्ततः।।

३५. कैवल्यं नित्यबन्धस्सन्नब्रह्मप्राप्तिरिष्यते।
इति सूरिवराः केचित्प्रवदन्ति प्रमाणतः।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे अर्चिरादिमार्गसन्देहनिवारणं नाम पञ्चमोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## षष्ठाध्यायः

१. श्रीशैलनायकः पश्चात्, लोकार्यमिदमब्रवीत्।
सर्वकर्मविमुक्तस्य, मुक्तस्य परमं पदम्।।

२. प्राप्तस्य कर्मणा नास्ति, सम्बन्धः खलु सद्गुरो।
किमर्थं प्रेतकार्याणि, कर्तव्यानि सुतादिभिः।।

३. तदीयदेहसंस्कारः कथं स्याद्वदविस्तरात्।
सर्वेषामेकरूपो वा, विशेषो वर्ततेऽथवा।।

**लोकाचार्य उवाच**

४. श्रीशैलेश त्वया प्रोक्तं, सत्यमेव न संशयः।
मुक्तस्य कर्म सम्बन्धो, नास्ति ब्रह्मगतस्य च।।

५. तथापि प्रेतकृत्यानि, कर्तव्यान्येव यत्नतः।
न केवलं गतस्यार्थे, कर्माणि तनयादिभिः।।

६. क्रियन्ते किं तु दद्देहसम्बन्धात्स्वेषु सर्वथा।
प्रत्यवाय निरासार्थं, पितॄणां तृप्तिहेतवे।।

७. गतार्थमेव कर्माणि, यदि स्युर्बहुपुत्रिणः।
पुत्रेष्वेकेन केनापि, कृते श्राद्धे पितुर्भवेत्।।

८. तृप्तिस्सर्वसुतैः कार्यमिति शास्त्रं विरुध्यते।
शास्त्रमेव प्रमाणं स्यात्कार्याकार्यविचक्षणे।।

९. श्रुतिस्मृतिर्ममैवाज्ञा, यस्तामुल्लङ्घ्य वर्तते।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः।।

१०. इत्युक्तविधिना नित्यनैमित्तिकसुकर्मणाम्।
त्यागे तु प्रत्यवायस्स्यात्तस्मात्तस्य विमुक्तये।।

११. पुत्रैस्सर्वैस्सदा कार्यं, श्राद्धकृत्यं विधानतः।
अग्निष्वात्तादयो देवाः, पितरः पुत्रकर्मणा।।

१२. तृप्तागतस्य तत्पुत्रपौत्रादीनां शुभाशिषः।
दास्यन्ति तेन वंशस्य, वृद्धिस्तृप्तिर्गतस्य च।।
१३. भविष्यति ततः कार्या मुक्तस्यापि क्रियाः परम्।
श्रद्धया परया कार्यः, पितृयज्ञस्तनूभुवा।।
१४. अन्वेषां सद्‌गतिप्राप्त्यै, मुक्तानां वंशवृद्धये।
पातित्यानाप्तये शास्त्रं, मर्यादानतिवर्तनात्।।
१५. अन्त्यदेहस्य संस्कारं, वदाम्यवहितश्शृणु।
पितृमेथोक्तरीत्या तु, सर्वेषां संस्कृतिर्भवेत्।।
१६. ब्रह्ममेथोक्तरीत्या तु, ब्रह्मज्ञानवतोधिकः।
संस्कारो गृहिणोऽपि स्यादग्निना मन्त्रपूर्वकम्।।
१७. आरण्यके तृतीयस्तु, प्रश्नस्याद्‌ब्रह्ममेधकः।
प्रश्नश्चतुर्थ आख्यातः पितृमेधः क्रमादयम्।।
१८. पितृमेधगतैर्मन्त्रैर्ब्रह्ममेधैश्च यः कृतः।
स ब्रह्ममेधसंस्कारः पितृमेधैश्च केवलम्।।
१९. मंत्रै रनुष्ठितः प्रोक्तः, पितृमेध इति क्रमात्।
तस्माद्‌ब्रह्मविधां ब्रह्ममेधसंस्कारमाचरेत्।।
२०. यतीनां यतिसंस्कारविधानेन सुतादिभिः।
भूमौ संस्थापनं कार्यं, सिद्धानां वेदसूक्तिभिः।।
२१. पञ्चसंस्कारयुक्तानां, वैष्णवानां विशेषतः।
कुर्यादादौ सुतस्तस्य, श्रीचूर्णपरिपालनम्।।
२२. केशवार्पितसर्वांगं, शरीरं मङ्गलावहम्।
न वृधा दाहयेद्विप्रो, ब्रह्ममेधविधिं विना।।
२३. ते शवाः परिकीर्त्यन्ते, येषां हृदि न केशवः।
केशवार्पितचित्ता ये, न शवाः न पुनर्भवाः।।
२४. ये तु ब्रह्मविदा त्यक्तमपि तन्मगळं वपुः।
दृष्ट्वा स्पृष्ट्वा विमुच्येत, ब्रह्महा ब्रह्महत्यया।।
२५. ये वहन्ति महात्मानं दृष्ट्वा स्पृष्ट्वा द्विजातयः।
हयमेधफलं तेषामस्तीत्येवं वदुर्बुधाः।।

२६. सर्वोपाधिविनिर्मुक्तं, क्षेत्रज्ञं ब्रह्मणि न्यसेत्।
इत्यादिकैः प्रमाणैश्च, पूता ब्रह्मविदस्तनुः।।

२७. न्यासो यज्ञस्तदा चात्मा, यजमानस्तु दीक्षितः।
श्रद्धापत्नी शरीरादीन्यस्योपकरणानिवै।।

२८. यावद्देहस्थितिर्दीक्षा, देहान्तेऽवभृतः स्मृतः।
प्रतिपत्याख्य कर्म स्यात्तद्देहस्य च संस्कृतिः।।

२९. श्लेष्माश्रुबान्धवैर्मुक्तं, प्रेतो भुङ्क्ते यतोऽवशः।
ततो न रोदितव्यं हि, क्रियाः कार्यास्स्वशक्तितः।।

३०. तनुत्यजं न शोचेत्तु, स्वजनं वैष्णवो जनः।
कश्शोचति प्रियं पुत्रं, कारागाराद्विनिर्गतम्।।

३१. मरणे मलमात्राभ्यां, दूषितं रोगहेतुना।
पूतिगन्धो भवेत्तं च, गोमयाक्तेन वारिणा।।

३२. सिञ्चन् दद्याच्च गोदानं, कृच्छ्त्रयमथाचरेत्।
एवं दुर्मरणे तत्तत्प्रायश्चित्तं समाचरेत्।।

३३. गृहाद्बहिः पुरोभागे, मण्टपं कारयेत्सुतः।
गोमयेन विलिप्याध, रङ्गवल्यादिकं न्यसेत्।।

३४. कर्ता स्नात्वोर्ध्वपुण्ड्राणि, धृत्वा मृतशरीरकम्।
स्नापयेत्पुरुषेणैव, सूक्तेन च विधानतः।।

३५. अथवा द्रविडाम्नायैर्नाराट्टाभिधसूक्तिभिः।
प्लोतवस्त्रेण संमृज्य, धौतवस्त्रैरलङ्कृतम्।।

३६. कारयित्वोर्धपुण्ड्राणि, धारयित्वा विशेषतः।
तुलसी पल्लवेनाध तीर्थं दद्यात्ततः परम्।।

३७. प्रायश्चित्तं च जीवस्य, कर्णमन्त्रजपं तथा।
कृत्वाचोत्क्रान्ति गोदानं, ततः कर्म समाचरेत्।।

३८. कर्ताऽचम्य यथाशक्ति, गृहीत्वा दक्षिणां तथा।
ताम्बूल सहितां चैव, साक्षतामुत्थितः स्थितः।।

३९. परिषद्वैष्णवीयेऽद्य, तत्पदाम्बुजसन्निधौ।
मया समर्पितां हैमीं, यत्किञ्चिदपि दक्षिणाम्।।

४०. स्वीकृत्यामुकगोत्रस्य, शर्मणस्त्वर्चिरादिना।
मार्गेण परमव्योम, प्राप्त्यर्थं क्रियते मया।।
४१. पाञ्चरात्रोक्तरीत्या च, श्रीचूर्णपरिपालनम्।
ममतद्योग्यतासिद्धिर्भूयादिति च साञ्जलिः।।
४२. मध्ये प्रधानमेकं स्यादाग्नेयादिषु तत्परम्।
कोणेषु चतुरः पूर्वदिशादिक्रमशस्ततः।।
४३. कलशान्द्वादशप्राज्यान्, स्थापयित्वा प्रदक्षिणम्।
जलमापूर्यदूर्वाञ्च, कुशानप्यक्षतान् तथा।।
४४. विष्णुक्रान्तां सुवर्णादीन्निक्षिप्य च विधानतः।
मध्ये प्रधानपात्रे तु, नारिकेळं विनिक्षिपेत्।।
४५. मध्ये नारायणं पात्रे, कोणपात्रेषु भक्तितः।
आवाह्य वासुदेवं च, सङ्कर्षणमनाकुलः।।
४६. प्रद्युम्नं चानिरुद्धं च, केशवादीन् क्रमात्ततः।
द्वादशस्वपि पात्रेषु, समाराधनमाचरेत्।।
४७. उलूखले च भूदेवी, मुसले जलदेवताम्।
शूर्पेग्निदेवतां चैव, श्रीचूर्णे वायुदेवताम्।।
४८. घृते चाकाशमावाह्य, पूजयेद्दक्षिणादिभिः।
प्रणम्य प्रांजलिस्तत्र, ध्यायेद्गुरुपरम्पराम्।।
४९. मन्त्ररत्नानुसन्धानं, कृत्वा ध्यायन् श्रियःपतिम्।
कलशस्थितदेवानाम्, पूजां परिसमापयेत्।।
५०. मन्त्रहीनं क्रियाहीनं, भक्तिहीनं जनार्दनः।
यत्कृतं तु मया देव, परिपूर्णं तदस्तु मे।।
५१. प्रणम्याखिलपात्रस्थं, जलं पूर्वोदितः क्रमात्।
किञ्चित्किञ्चित्तधामध्यकलशे निक्षिपेत्ततः।
५२. तत्पात्रं मुखपर्यन्तमुधृत्य स्वकरेण वै।
आच्छाद्य मूलमन्त्रेण, द्वयेनाप्यभिमन्त्र्य च।।
५३. कलशं तन्तुपूर्वस्यां, दिशि संस्थापयेत्तथा।
ततश्श्रीचूर्यमाज्यं वा, तैलं वा तदुलूखले।।
५४. निक्षिप्यवैष्णवैन्साकं, चूर्मीकृत्य पठन् तथा।
केशवादीनि नामानि, द्वादशप्रयतात्मवान्।।

५५. शूर्पे श्रीचूर्णमुधृत्य, प्रणवत्रयमुच्छरन्।।
श्रीसूक्तं च जपन् मध्यकलशस्थजलेन तत्।।
५६. चूर्णं दर्पेण सम्प्रोक्ष्य, द्वयमन्त्रेण तत्पुनः।
शूर्पं च कलशे मध्यगते तत्र विनीक्षिपेत्।।
५७. कर्ता तांबूलमादाय, दक्षिणा सहितां तथा।
श्रीवैष्णवान् परिक्रम्य, पुनश्शूर्पे विनिक्षिपेत्।।
५८. सर्वेपि वैष्णवा भूमावुपविश्य यथाक्रमम्।
द्राविडाम्नायसूक्तीनां, पाठं कुर्याद्विशेषतः।।
५९. विष्णुचित्ताद्यसूक्तिं च, शठगोपस्थितिं तथा।
शठगोपसहस्रान्ते, दशकद्वयमेव च।।
६०. श्रीवृत्तं शठजित्प्रोक्तं, श्रीरङ्गामृतभाषितम्।
रामानुजशतान्तादिं, पाठयित्वा ततस्स्वयम्।।
६१. श्रीचूर्णं वैष्णवेभ्यश्च, समर्प्यकलशस्थितम्।।
जलं कूर्चेन गोविन्दस्मृतिपूर्वकमप्युत।।
६२. सुक्तेन पौरुषेणापि, प्रोक्षियेन्मृतदेहकम्।
ततो मृतस्य देहेऽपि, तत्तत्स्थानेषु च क्रमात्।।
६३. श्रीचूर्णालङ्कृतिं कृत्वा, नामभिः केशवादिभिः।
तच्छेषं च स्वयं धृत्वा, दद्याद्बन्धुजनस्य च।।
६४. ततस्तु कलशाविष्ट, देवानुद्वास्य तत्परम्।
पठन् स्तोत्राणि सर्वाणि, गत्वा विष्ण्वालयं ततः।।
६५. तुलसीं विष्णुपादस्थाम्, तद्वस्त्रं मालिकामपि।
समादायमृतस्सास्य, देहे पुत्रस्समर्पयेत्।।
६६. वैष्णवेभ्यश्च सर्वेभ्यो, दत्वा ताम्बूलदक्षिणे।
ततोग्नि कार्यमारभ्य, कुर्यात्संस्कारमग्निना।।
६७. ब्रह्म मेधविधानेन, मृतदेहस्य पुत्रकः।
महता वैभवेनैव, श्रद्धाभक्ति समन्वितः।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे श्रीचूर्णपरिपालनविधानं नाम षष्ठाध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमोऽमार्गः

## सप्तमोऽध्यायः

१. लोकार्यः पुनरप्येवमाह श्रीशैलनायकम्।
सौम्य ! वक्ष्ये प्रपन्नस्य, कर्माण्यवहितश्शृणु।।
२. प्रथमं दिनमारभ्य, नीत्यं कर्म समाचरेत्।
दशाहं विधिना कुर्वन्, कुर्यादेकादशेऽहनि।।
३. एकोद्दिष्टं वृषोत्सर्गं, सापिण्ड्यं द्वादशेऽहनि।
शास्त्रोक्त विधिना कुर्वन्, पितृकर्मसमाप्य च।।
४. तद्रात्रा वारभेद श्रीद्राविडीं ब्रह्मसंहिताम्।
चतुस्सहस्रगाथानां, समये सति कारयेत् ।।
५. कारयेदथवाकारि, सूनोर्गाथा सहस्रकम्।
आरम्भेशठजित्सूक्तौ, तृतीयशतके तथा।।
६. तृतीयदशकान्तं च, पठेत्सत्सम्प्रदायतः।
विष्णुचित्तादिमग्रन्थः प्रणवार्थप्रकाशकः।।
७. शठजिन्नुतिसूक्तिस्तु, नमश्शब्दार्थ बोधकः।
शठगोपसहस्रादि, तृतीय दशकेऽपि च।।
८. तृतीयदशकान्तं च, मन्त्रशेषार्थसूचकम्।
पञ्चविंशतिसङ्ख्याका, सेयं श्रीसूक्तिमालिका।।
९. पञ्चविंशतितत्वानां, सङ्ख्यया वर्तते ततः।
तावत्पर्यन्तमेवादौ, प्रारम्भः क्रियते बुधैः।।
१०. विशेषाराधनं कार्यं, सम्पूर्णशरणागतौ।
मङ्गळाशासनं कृत्वा पुनर्गाथा शतं पठेत्।।
११. अघान्ते कारयेद्विद्वान्, वेदपारायणं शुभम्।
भोजयेद्ब्राह्मणान्भक्त्या, पितॄनामन्त्रये द्विजः।।

१२. देवताराधनं चापि, दीपाराधनमेव च।
अष्टोत्तरसहस्रं तु, गायत्रीं च जपेच्छुचिः।।
१३. अशुभान्ते विशेषेण, द्राविडी ब्रह्मसंहिता।
अध्येतव्या द्विजश्रेष्ठे, राशौ चाघ निवृत्तये।।
१४. एवमुक्तं मनुश्रेष्टैस्सम्यक् शातातपस्मृतौ।
ब्रह्माण्डे च पुराणेऽस्ति, तस्मात्कुर्यादघान्ति मे।।
१५. त्रयोदशदिनेचार्चिरादिमार्गं समापयेत्।
आचार्यं पूजयेद्वस्त्रभूषणादिभिरादरात्।।
१६. प्रार्थयेत्स्वपितुर्ब्रह्म, प्राप्त्यै वैकुण्ठमन्दिरे।
ततश्शठतस्सूक्तिं, गृहे एव समापयेत्।।
१७. मुक्तस्य तत्र वैकुण्ठे, नित्यैर्भगवदाज्ञया।
महोत्सवश्च वीथीषु, क्रियते च्छत्रचामरैः।।
१८. सामगानैस्तथा स्तोत्रैर्माल्यगन्धादिलेपनैः।
तस्यानुकरणं ह्यत्र, क्रियते भगवत्परैः।।
१९. श्रीवैष्णवैस्तथामुक्तप्रीत्यै सर्वैर्विधानतः।
अघे मृतदिनेप्येवं, कर्तव्येऽप्यघयोगतः।।
२०. तथा कर्तुमशक्यत्वात्, सङ्ग्रहेण तथा कृतः।
अघान्ते वैभवेनैव, त्रयोदशदिने पुनः।।
२१. क्रियते वैष्णवैरेवं, राजवीथ्युत्सवः परम्।।
श्रीवैष्णवानलङ्कृत्य, पुष्पमाल्यानुलेपनैः।।
२२. ताम्बूलं दक्षिणां दत्वा, तथा चेक्षुध्वजानपि।
कर्ता स्वयं च तच्छेषान्, गन्धमाल्यादिकान्वहेत्।।
२३. धृत्वा वैकुण्ठपात्रं च, जलपूर्णमलङ्कृतम्।
श्रीवैष्णवपुरोभागे, गच्छेद्भक्ति समन्वितः।।
२४. सेक्षुदण्डकरा नित्यमुक्ता इव विलक्षणाः।
श्रीवैष्णवाश्च रामानुजान्तादिं मधुरस्वरम्।।
२५. गायन्तो राजवीथीषु, गच्छेयुः कृतपङ्क्तयः।
यथा वैकुण्ठवीथीषु, सेनेशादिकसूरयः।।

२६. मुक्तमाराधयन्त्यवमागतान्वैष्णवानपि।
गृहस्था वैष्णवास्सर्वे, पादक्षालनपूर्वकम्।।

२७. गन्धपुष्पादिकान् दत्वा, कृत्वा नीराजनं ततः।
ताम्बूलं दक्षिणां दद्युर्वैष्णवत्वाभिमानतः।।

२८. तथा मङ्गलवाद्यैश्च तत्र तत्रार्चनादिभिः।
भगवत्सन्निधिं गच्छेत्, वैष्णवैर्बान्धवैस्सह।।

२९. कर्ता श्रियःपतिं नत्वा, कारयेन्मङ्गलानि च।
सन्निधिर्दिव्यदेशश्चेत्, तत्रैवाध्यापकास्ततः।।

३०. अन्ताद्यन्तमगधानां, पठनाच्छान्तिपाठकम्।
कृत्वा तीर्थं प्रसादं च, स्वीकृत्य प्रीतमानसाः।।

३१. सर्वेऽपि वैष्णवाः पूर्वगुरुस्त्रोत्राणि भक्तितः।
पठन्तश्च गृहं कर्तु, रागच्चेयुस्सगौरवम्।।

३२. ससन्निधिर्भवेद्दिव्यदेशो यत्रानुवस्तरम्।
प्रबन्धाध्ययनं नित्यमार्यैस्तीर्थपरिग्रहः।।

३३. वर्तते चान्यथा तत्स्वात्प्राकृतस्थलमेव हि।
सन्निधिः प्राकृतस्याच्चेत् तत्समीपे तु वैष्णवाः।।

३४. अन्तादि शान्तिपाठं च, कृत्वैवान्तः प्रवेशनम्।
कुर्यात्ततः पठन्तश्च, स्तोत्राण्यार्यकृतानि च।।

३५. शठारिस्वीकृतिं कृत्वा, निवर्तेरन् गृहं प्रति।
गृहाङ्गणे स्थितानां च, वैष्णवानां विशेषतः।।

३६. पादप्रक्षाळनं कृत्वा, कर्ताबन्धुजनैस्सह।
नीराजनविधिं कुर्यात्, सत्कारैः पूजये त्ततः।।

३७. विशेषज्ञमुपावेश्य, पादौ प्रक्षाळ्यवारिणा।
वैकुण्ठपात्रसंस्थेन, पुनस्तत्रैव तण्डुलान्।।

३८. निक्षिप्य तच्च दातव्यं, वस्त्रभूषणसंयुतम्।
च्छत्रं चोपानहौ दद्यात्प्रार्थयेत्पितृसद्गतिम्।।

३९. गतश्श्रीवैष्णवस्स्याच्चेत्, चरमं श्लोकमादरात्।
कारयित्वापठेत्पुत्र स्त्रीणां श्लोकं न कारयेत्।।

४०. इतरेषां प्रपन्नानां, स्त्रीणामपि गतात्मनाम्।
मातापितेति पद्यन्तु, पठेद्भक्तियुतस्सुतः।।
४१. तत्र ब्रह्म विदः पादतीर्थं स्वीकृत्य वैष्णवान्।
भोजयेद्भक्ष्यभोज्यान्नैस्तर्पयित्वा विशेषतः।।
४२. ताम्बूलं दक्षिणां दद्यात्, प्राप्नुयाच्च तदाशिषः।
वित्तशाठ्यं न कर्तव्यं, यथाशक्ति समाचरेत्।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे प्रपन्नोत्सवकथनं नाम सप्तमोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## अष्टमोऽध्यायः

१. ततश्श्रीशैलनाथार्यो, लोकाचार्यं मुदान्वितः।
पप्रच्छ मुक्तमार्गस्य, वैभवं शास्त्रसम्मतम्।।

**लोकाचार्य उवाच**

२. श्रीशैलनाथ ! मद्वाक्यात्, श्रुणु मुक्तस्य वैभवम्।
मार्गेऽर्चिरादिके यस्य, सत्कारो विस्मयावहः।।

३. धमनि द्वारतो गच्छन्, मुक्तस्त्वादित्यरश्मिना।
प्रथमं याति तं लोकमार्चिषं परमाद्भुतम्।।

४. न तत्र तमसो वार्ता, श्रूयते दिव्यतेजसा।
सञ्चरन्ति नरा नार्यो, दिव्याभरणभूषिताः।।

५. ज्योतिर्मयैर्विमानैश्च, परमानन्दनिर्भराः।
तत्रागतं परं मुक्तं, तदधीशो मुदान्वितः।।

६. महता वैभवेनैवमुपस्थाय प्रिया युतः।
तेजोमयैस्सुमैर्गंधैस्सम्पूज्य स्वामिनं यथा।।

७. किंचिद्दूरं समायातस्सानुगैस्साञ्जलिस्ततः।
निवर्तते महाभक्त्या, नमस्कृत्य पुनः पुनः।।

८. ततः प्राप्नोति मुक्तस्तु, दिनलोकं त्वरान्वितः।
दिनलोकेस्थितास्सर्वे, तपसा सिद्धिमागताः।।

९. गायन्ति हरिनामानि, सौधेषु मधुरैस्स्वरैः।
तत्रत्यो तदधीशश्च, परिवारसमन्वितः।।

१०. मुक्तमेनं च सम्भाव्य, स्वागतैर्वचनैस्तदा।
सह गच्छन् प्रियं कर्तुं, नमस्कृत्य निवर्तते।।

११. तत्पश्चाच्छुक्लपक्षाख्य, लोकः परमपावनः।
चन्द्रमास्तत्र सम्पूर्णस्सदा रात्रिषु राजते।।

१२. तत्र स्थिता विमानेषु, विहरन्ति समं ततः।।
ते सर्वे मुक्तसेवार्थं, हरिणा स्थापिताः पुरा।।
१३. मासलोकस्ततः पश्चात्सर्वलोक विलक्षणः।
तत्रत्येनाधिनाथेन, पूजितोऽनुशतः परम्।।
१४. उत्तरायणलोकं तं, प्राप्नोति बुधसङ्कुलम्।
विमानारामशोभाढ्यं, महानन्दप्रदम् शुभम्।।
१५. उत्तरायणकाले ये, मृतास्ते प्राप्य तत्पदम्।
कञ्चित्कालं सुखं प्राप्य, पुनरायान्ति भूतलम्।।
१६. मुक्तस्तत्रत्य देवेन, सत्कृतस्तमतीत्य च।
संवत्सराख्य लोकं तु, याति शीघ्रं मुदावहम्।।
१७. तद्देवपूजतो मुक्तो, वायुलोकं गतो भवेत्।
वायुस्सुगन्धमादाय, मार्गश्रान्तममुं बुधम्।।
१८. वीजयत्यधिसंलोके, प्रीतिमान् सेवको यथा।
भक्त्या वायुसमानीतं, गन्धमाघ्राय वेगवान्।।
१९. तत्तल्लोकाधिपैर्देवैरनुयातस्ततस्ततः।
तेनैव चांशुमार्गेण, विशते सूर्यमण्डलम्।।
२०. हिरण्मयं च लोकानां, कालचक्रप्रवर्तकम्।
मयन्मण्डले हरिर्हेमवर्णो पद्मासने स्थितः।।
२१. किरीटी कुण्डळी शङ्ख चक्रपाणिर्विराजते।
योगिनस्तमुपासन्ते, सूर्यान्तर्यामिणं हरिम्।।
२२. मुक्तो निस्तीमतेजोभिः प्रतिसूर्य इव स्थितः।
वज्रसूच्यग्रवद्वज्रं, भित्वा तन्मण्डलं स्वयम्।।
२३. बहिर्गच्छति वेगेन, तदूर्ध्वं चन्द्रमण्डलम्।
प्रविशेद्ग्रहताराणां, राजा चन्द्रस्समुत्सुकः।।
२४. मुक्तस्य स्वागतं कृत्वा, तमाप्याययति प्रियम्।
सुधामयकरस्पर्शैस्तुतिभिश्श्रवणामृतैः।।
२५. ततस्त्व मानवं प्राप्य, विद्युत्पुरुषसंज्ञकम्।
तस्यैव सहकारेण, गच्छेदा विरजानदीम्।।

२६. अमानवेन संयुक्तो, मुक्तो गच्छति तत्परम्।
सकलाप्यायकस्यैव, वरुणस्य नदीपतेः।।

२७. लोकं नदनदीभिश्च, दिव्यरूपाभिरावृतम्।
दिव्यरत्नमयैस्सौधै, र्विमानैरुपशोभितम्।।

२८. मुक्तं पुण्यनदीतीर्थस्नवनैर्वरुणस्तदा।
पूजयन् मोदमाप्नोति, प्रियं बन्धुमिवागतम्।।

२९. प्रस्थाय वारुणाल्लोकात्रिलोकाधिपतेः प्रियम्।
स्वर्गं लोकं विशेन्मुक्तो नरेणामानवेन च।।

३०. यत्र मन्दाकिनी पुण्या, हेमाम्भोजैस्समावृता।
नन्दनोद्यानमन्दारसुमगन्धेन वासितः।।

३१. वाति गन्धवहो यत्र, मार्गश्रान्त्यप नोदकः।
गन्धर्वाप्सरसां दिव्यगीतश्श्रोत्र मनोहरा।।

३२. श्रूयते सततं यत्र, सस्स्वर्गसुखदायकः।
लभ्यते मानवैर्यज्ञयागपूर्तादि कर्तृभिः।।

३३. तदधीरस्सुरेन्द्रोऽपि, देवगन्धर्व संयुतः।
मुक्तस्य स्वागतं कृत्वा, नत्वा मूर्ध्ना च मोदते।।

३४. मन्दार सुममाल्यैश्च, कल्पद्रुमविभूषणैः।
अलङ्करोति तं मुक्तं, सम्मोदेन सुराधिपः।।

३५. तत्सपर्यां स मुक्तात्मा, गृहीत्वा प्रीतमानसः।
स याति ब्रह्मणो लोकममानव पुरस्कृतः।।

३६. देवगन्धर्वयक्षाणां, किन्नरोरगरक्षसाम्।
नायकस्सर्वलोकानां, ब्रह्माण्डाधिपतिर्विधिः।।

३७. समेत्य मुक्तमालिङ्ग्य, मित्रं प्रियमिवागतम्।
प्रत्युत्थानं करोत्यस्य, सनकादिभिरावृतः।।

३८. स्तुत्वा नत्वा चतुर्भिश्च, शिरोभिर्भक्तिपूर्वकम्।
ब्रह्माण्डाधिपतित्वं च, समर्पयति सादरम्।।

३९. तृणीकृतविरिंच्याजविभूतिरयमागतः।
मुक्तो नेच्छति तत्किञ्चित्, वैकुण्ठगमने रतः।।

४०. पृथिव्यादिकभूतानां, वञ्चनामावृतीस्तथा।
भूतादेर्महतश्चापि, दशोत्तरगुणावृतीः।।
४१. अतीत्यनिर्गतो मुक्तो, ब्रह्माण्डकुहरादयम्।
विशालं प्रकृते स्थानं, विशते तदनन्तरम्।।
४२. पूर्वं संसार्यवस्थायामनुभूतं भयावहम्।
याम्यमार्गं महादुःखं, विस्मृत्य च सुखोत्तरम्।।
४३. देवयानं गतस्सर्वैर्देवैरपि सुसत्कृतः।
भगवद्दर्शनासक्तश्शीघ्रं गच्छति तत्परम्।।
४४. ततस्तु विरजातीरं, प्रदेशं प्राप्य निर्भयः।
मोदतेऽमानवस्त्वेनं, त्यक्त्वा तस्मान्निवर्तता।।
४५. भगवत्करुणैवेनं, प्रसन्ना विरजानदी।
स्ववीचीकरसञ्चालै राह्वयन्तीव संस्थिता।।
४६. पूर्वं संसारकुञ्जेषु, विषयव्याघ्रदंशनैः।
तापत्रयमहादावदहनैस्तप्तमन्वहम्।।
४७. स्वात्मानं शीतलीकर्तुं, गाहते विरजानदीम्।
अमृतासारसम्पूर्णां, सर्वकर्मविमोचिनीम्।।
४८. तत्तोयस्पर्शमात्रेण, मुक्तः प्रकृतिवासनाम्।
मलप्रक्षालनाद्दिव्यमाणिक्यमिव भासते।।
४९. राहुमुक्तो याथा चन्द्रो, मेघमुक्तो यथा रविः।
सूक्ष्मप्रकृति निर्मुक्तः कोटिसूर्यप्रकाशवान्।।
५०. नदीजलार्बहिर्गच्छन्, परंपारमुपैति सः।
तत्तीरेऽमानवाभिख्यश्चतुर्भुज समन्वितः।।
५१. शङ्खचक्र गदापद्मवनमालाविराजितः।
वर्तते भगवान् मुक्तान्, समुद्धर्तुं नदीजलात्।
५२. तत्करस्पर्शमात्रेण, दिव्यमङ्गल विग्रहः।
विराजते शङ्खचक्र पीताम्बर सुशोभितः।।
५३. गुणत्रयमयात्कर्म, लभ्यादिन्द्रादि संश्रितात्।
लोकाद्विलक्षणं नित्यं, शुद्धसत्वात्मकं महत्।।

५४. भगवत्करुणालभ्यमलभ्यं योगिनामपि।
ज्ञानानन्दमयं दिव्यं, मुक्तः प्राप्तः परं पदम्।।

५५. शुद्धसत्वमयं नित्यं, लावण्यादिगुणान्वितम्।
भगवन्नित्यकैङ्कर्यसाधनं मङ्गलास्पदम्।।

५६. सदा यौवनसंयुक्तमात्मज्ञानप्रकाशकम्।
नूतनं रूपमास्थाय, विस्मयं प्राप्नुयात्परम्।।

५७. भगवल्लोकसम्प्राप्तेस्सालोक्यं प्राप्यते तथा।
भगवद्रूपसम्प्राप्तेस्सारूप्यं लभ्यतेऽधुना।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे मुक्तस्यपरमपदप्राप्तिरूपो नाम अष्टमोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## नवमोऽध्यायः

**लोकाचार्य उवाच**

१. अथ वैकुण्ठलोकं तं, मुक्तो नमतिभक्तिमान्।
नमोवैकुण्ठलोकाय, दिव्यायेति पुनः पुनः।।

२. अमानवसमीपे स्यात्, शङ्खभेर्यादि निस्वनैः।
सुमहान् काहळरवो, मुक्तागमन सूचकः।।

३. तच्छ्रुत्वा त्वरितास्सर्वे, वैकुण्ठपुरवासिनः।
द्रष्टुमायांति सन्तोषाद पूर्वं मुक्तमागतम्।।

४. धावन्तः केचिदायान्ति, पतन्तश्चापरे तथा।
विशन्तस्त्ववशास्तत्रमुक्तदर्शनलालसाः।।

५. दृष्टो दृष्टो मया दृष्टो, नेत्रपर्वं मनोहरः।
आयान्तु त्वरिताभक्ताः करवामो नमस्कृतिम्।।

६. गायामश्चोत्पतामोद्यनमस्कुर्मः पुनः पुनः।
कुत्रत्योऽयं महाभागे, वैकुण्ठपुरमागतः।।

७. इत्येवं वदतां शीघ्रं, पुरादागच्छतां सताम्।
मुक्तानां भाषणारावं, शृण्वन्नानन्दनिर्भरः।।

८. मुक्तैर्नित्यैस्समागम्य, वैकुण्ठपुरदर्शने।
समुत्सुके रमेशेन, नियुक्ताश्चाप्सरस्त्रियः।।

९. ब्रह्मालङ्करणं कर्तुं, मुक्तस्यायान्ति सत्वराः।
मालाहस्ताश्शतं तत्र, वासो हस्ताश्शतं तथा।।

१०. शतमंजनहस्ताश्च, शतं भूषणपाणयः।
दिव्याप्सरस्त्रियोमुक्तं, ब्रह्मालङ्कारसंयुतम्।।

११. कुर्वन्ति मातरः पुत्रं, यथा राज्याभिषेचने।
सारूप्यं भजते पूर्णं, लक्ष्मी श्रीवत्सवर्जितम्।।

१२. भगवद्भृतशेषं तद्वस्त्रं माल्यं च चंदनम्।
धृत्वा विलक्षणं रूपं, पश्यन्विस्मितमानसः।।

१३. किमाश्चर्यमिदं सर्वं, वस्त्रं माल्यं च भूषणम्।
रूपं चापूर्वमेवेदमिति वक्ति महामतिः।।

१४. तदा भगवता दिव्यसङ्कल्पेन प्रकल्पितम्।
नानाध्वजसमायुक्तं, मुक्तादामविराजितम्।

१५. वितानालङ्कृतं दिव्यं, किङ्किणीजालसंयुतम्।
दिव्यस्त्रीसंवृतं श्लाघ्यं, विमानं सुमनोहरम्।।

१६. गरुडोऽप्यानयेन्मुक्तं, नेतुं भगवतः पदम्।
उपावेश्य च तत्रैनं, स्तुवन्ति स्तुतिगीतिभिः।।

१७. सामगानैर्नित्यसिद्धा, दिव्यनादैर्महोत्सवैः।
नयन्ति तिल्यकान्तारं, तत्र विश्रान्तिमेत्ययम्।।

१८. तत्रान्यप्सरसो दिव्याश्श्रीमद्भगवदाज्ञया।
उपहाराननेकांश्च, गृहीत्वाऽयान्ति सत्वरा।।

१९. तिल्यगन्धं परं ब्राह्मयमप्राकृत मवाप्य सः।
सर्वगन्धस्वरूपस्याश्श्रियःपतिरिव स्वयम्।।

२०. पुनर्विमानमारूह्य, महता वैभवेन सः।
ऐरंमदीयतीरं च, प्राप्य विश्रम्य गच्छति।।

२१. ततो ध्वजपताकादिशोभितं दिव्यगोपुरम्।
वैकुण्ठनगरस्यादौ, त्रिवर्णैरुपलक्षितम्।।

२२. प्रणवाख्यपदं मन्त्रराजादाविवलक्ष्यते।
तत्र सिद्धैः प्रतीहारैस्सत्कृतः प्रीतिपूर्वकम्।।

२३. विचित्रं तत्पुरद्वारं, समतीत्य जनाकुलम्।
मनोनेत्रे बलात्तस्मादाकृष्टान्तः प्रविश्यति।।

२४. अयोध्येति समाख्याता, वैकुण्ठनगरी तथा।
प्रसिद्धा निगमान्तेष्वप्यपराजितसंज्ञया।।

२५. तां दृष्ट्वा नगरीं तत्र, मुक्तो भक्त्या नमत्यसौ।
श्रीवैकुण्ठाय दिव्याय, नगराय नमोस्त्विति।।

२६. समुद्रे संस्थितं तोयं सह्याग्रमिव केवलम्।
संसारसागरान्तस्थो, दुर्लभं परमं पदम्।।
२७. समायातः कथं मुक्त, इत्याश्चर्यसमन्विताः।
गृहस्था नित्यसंसिद्धाश्शेषशेषाशनादयः।।
२८. सादरं स्वगृहाण्येनं, समाहूय महोन्नते।
सिंहासनेप्युपावेश्य, विनयाद्भुवि संस्थिताः।।
२९. पत्नीषु जलमत्यच्छं, सिञ्चतीषु मुदान्विताः।
पादौ प्रक्षाळ्य तत्तीर्थं, शिरसा धारयन्ति ते।।
३०. वैभवं तस्य मुक्तस्य, पत्नीभ्यः कथयन्ति च।
सर्वेऽपि नित्यसिद्धाश्च, सत्कुर्वन्ति यथाक्रमम्।।
३१. तत श्रीशठकोपं च, दिव्यचूर्णं विलक्षणम्।
पूर्णकुम्भौ सुमाङ्गल्यदीपिकां परिगृह्यताः।।
३२. चन्द्रबिम्बाननानार्यस्सङ्घीभूय समागताः।
विदेशादागतं पुत्रं, वात्सल्यान्मातरो यथा।।
३३. उपस्थास्यन्ति तत्रैव, सङ्गताः प्रेमविह्वलाः।
मुक्तमन्तर्विशंतं तं, वैभवेन समागतम्।।
३४. सुवर्णावरणश्रेष्ठ, शतकोटिसमावृतम्।
श्रीवैकुण्ठविमानन्तः प्राप्तो नमति भक्तितः।।
३५. अप्राकृताय नित्याय, ज्ञानानन्दमयत्मने।
श्रीवैकुण्ठविमानाय, नमोस्त्विति पुनः पुनः।।
३६. मुक्तागमनहर्षेण, वर्षेणेव सपल्लवैः।
विकचत्कुसुमैर्दिव्यमधुस्यन्दिभिरावृतम्।।
३७. कल्पद्रुमवनैरेवं, पुष्परत्नविनिर्मितैः।
मण्टपैश्शोभितं नूत्नवदाश्चर्य करैश्शुभैः।।
३८. क्रीडाशैलैर्विचित्रैश्च, वैकुण्ठाधिपतेश्श्रियः।
लीलोपकरणैश्श्राव्यनिस्वनैश्शुकबर्हिभिः।।
३९. शारिकाकोकिलादीनां, गणैर्दिव्यैस्समाकुलम्।
मणिमुक्ताप्रवाळादिसोपानसमलङ्कृतैः।।
४०. मनोवद्विशदैर्नित्यमुक्तानामामृताम्बुभिः।
पक्षीसङ्घसमाकीर्णैर्मरन्दस्यन्दिभिस्तथा।।

४१. सुन्दरीवदनाम्भोज, तुल्यांभोरुहसङ्गतैः।
सरोभिश्शोभमानं तद्विमानं सुविराजते।।

४२. तत्र पुष्पेषु लीलानां, मत्तानां मधुपानतः।
कलस्वनानुमेयानं, भृङ्गाणां सामगायनैः।।

४३. विभ्रान्ति जनकैर्दिव्यकल्पकैरुपशोभितः।
अनेकरत्नसुस्तम्भसहस्रैरप्यलङ्कृतः।।

४४. यस्य मूलेप्यपर्याप्ता, विभूतिद्वयवासिनः।
पद्मकर्पूरकल्हारचन्दनागरुवासितः।।

४५. वाति गन्धवहो यत्र, मन्दं तनु सुखावहः।
महानन्द मयश्श्रीमानास्ते स मणिमण्डपः।।

४६. तं मण्डपं समासाद्य, मुक्तः प्रणिपतेत्तदा।
आनन्दमयसद्रत्नमण्डपाय नमोस्त्विति।।

४७. तत्रस्था नित्यमुक्ताश्च, सदा तृप्तामृतात्मनः।
श्रीपतेर्दर्शनाद्बालभावशोभितवर्ष्मकाः।।

४८. ब्रह्मसाम्यं गतास्सर्वे, ब्रह्मानुभवसम्भवम्।
महानन्दमपर्याप्तास्सोढुमन्तत्समन्ततः।।

४९. गायन्तस्सामगानानि, हाहूहेति चरन्ति च।
प्राणान् संरक्ष्य कैङ्कर्यं, कुर्वन्त्विह निराकुलाः।।

५०. सौशील्याख्यो गुणस्तस्मिन्, गुणपीयूषसागरे।
महागर्तस्ततस्तस्मिन्, गतामज्जन्ति मोहिताः।।

५१. नैव तत्र तु गन्तव्यमिति केचिद्वदन्ति च।
संस्थापयति सौशील्ये, जलचिह्नं विशेषतः।।

५२. तेजसां राशिमब्जाक्षं, स्वामिनं कमलापतिम्।
मह्यमावेदयत्प्रीत्या, मदाचार्य इति स्वयम्।।

५३. सदाचार्यप्रभावज्ञाः, प्रशंसन्ति क्वचित्क्वचित्।
मद्योग्यतामनालोच्य, मयान्तस्सङ्गतो हरिः।।

५४. तत्कृपावैभवं केचिद्भणन्ति परमादरात्।
नमो नारायणायेति, वक्तुं योग्यं महामनुम्।।

५५. प्रवदन्तो महाभक्त्या, नमस्कुर्वन्ति केचन।
अकिञ्चनं समुधृत्य, मां ररक्ष श्रियःपतिः।।

५६. कृपयेत्यपरे मुक्ताः कुर्वन्त्यात्मार्पणं क्वचित्।
हरे ? मां पापिनं नित्यं, बाधन्ते हि भवद्गुणाः।।
५७. दर्शयात्मानमित्येव, मुक्ताः केचिद्भणन्ति वै।
उन्मस्तके प्रिये दास्यरसे कर्तव्यशून्यतः।।
५८. नमश्शब्दं प्रयुञ्जानाः, कुर्वते चाञ्जलिं क्वचित्।
एवं महालयांबोधिकल्लोलेष्विव सङ्गताः।।
५९. महानन्दां बुधौ मग्नास्सन्ति मुक्ता हरिप्रियाः।
तेषां श्राव्याणि वाक्यानि, श्रुत्वा पूर्वं समन्ततः।।
६०. कटुवाक्छ्रवणाज्जातां, रुजं त्यक्त्वा मुदान्वितः।
दिव्यस्थानं समासाद्य, तन्महाजनमध्यतः।।
६१. धृत्वा स्वस्वायुधान् मूर्ध्ना, स्थितान् शस्त्रास्त्रनायकान्।
सङ्कल्पेन जगत्सृष्टिस्थितिसंहारकारकान्।।
६२. सेनेश मुख्यसूरीशान्, क्रमात्संसेव्य भक्तितः।
मुक्तास्सामीप्यमप्येति, तदा धन्यो रमापतेः।।
६३. सालोक्यं चापि सारूप्यं, सामीप्यं च ततः परम्।
सायुज्यमिति मुक्तिस्तु, प्रोक्ताविद्भिश्चतुर्विधा।।
६४. समानलोकसंस्थानात्, सालोक्यं तत्स्वरूपतः।
सारूप्यं तत्समीपे च, वर्तनात्कथ्यते बुधैः।।
६५. सामीप्यमिति तत्प्राप्तिरेकस्यैव भवेत् क्रमात्।
युज्यते गम्यते नित्यमिति युग्प्रोच्यते गुलणः।।
६६. समानायुग्भवेद्यस्य, तत्वं सायुज्यमीर्यते।
समानानन्दयोगेन, सायुज्यं प्राप्यतेऽमुना।।
६७. चतुर्विधापि मुक्ति स्यादेस्यैव पृथञ्न च।
कैश्चित्याधनवैषम्यात्, फलवैषम्यमादृतम्।।
६८. सर्वेषां ब्रह्म विद्यानामविशिषं फलं तथा।
भोगमात्रस्य साम्यं च, सूत्रकारेण सूत्रितम्।।
६९. एवं सूत्रकृता मुक्तफलभेदो निवारितः।
ततश्चतुर्विधा मुक्तिरेकस्यैव विधीयते।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे मुक्तसामीप्यप्राप्तिरूपो नाम नवमोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## दशमोऽध्यायः

**लोकाचार्य उवाच**

१. मध्ये मणिमयस्यास्य, मण्डपस्य महाद्भुतम्।
सिंहासनं भवेदस्य, पादाभूतिद्वयात्मकाः।।

२. नानाशक्तिमयं तत्र, पद्मं द्वादशपत्रकम्।
द्वादशाक्षरमन्त्रस्य, वासुदेवस्य सूचकम्।।

३. तद्दिव्यकर्णिकायां तु, पुष्पसञ्चयचत्रितः।
राजते योगपर्यङ्को, तत्र शेषो विराजते।।

४. अनेकचन्द्रसङ्घातमृदुशीतलकान्तिमान्।
अनन्तगुणपूर्णत्वादनन्त इति विश्रुतः।।

५. सर्वकैङ्कर्यसंसिद्धः, कैङ्कर्यनिरतोपमः।
शेष इत्युच्यते तस्माद्भगवच्छयनोचितः।।

६. ब्रह्मानुभवसञ्जातमहानन्दप्रकाशकैः।
शिरोभिश्शोभितोऽनन्तैः, फणामणिविराजितैः।।

७. विज्ञानबलयोश्शैत्यम्रदिम्नोर्निलयस्तथा।
सौरभ्यादिगुणैर्युक्तसहजैस्सर्वलक्षणैः।।

८. रञ्जिताद्रिशिरोद्भूतरविकोटिप्रभावताम्।
तत्फणामणिपुञ्जानां, मण्डले स जगत्पतिः।।

९. ज्ञानशक्तिबलैश्वर्यवीर्यतेजोभिरद्भुतैः।
गणैष्षड्भिस्सदा पूर्णो, वासुदेवो विराजते।।

१०. तस्य दक्षिणभागे तु, कुसुमामोददायिभिः।
कुन्तलैश्शोभितानेत्रशोभया च निजं पतिम्।।

११. पुण्डरीकाक्षमप्याशु, कुर्वन्ती वशमात्मनः।
बाल्यमध्योन्मिषद्यौवनोज्ज्वलाङ्ग्यशितेक्षणा।।

१२. भाषितम्लायमानाति, सौकुमार्यसमञ्चिता।
क्रमभोगा सहात्यन्ति भोग्यतातिशया परा।।

१३. भोगोपौद्घातमात्रेण, विश्वरूपस्य वैभवम्।
स्वल्पीकरोति या देवी, सर्वान् परिजनान् तदा।।

१४. तत्कार्येषु सम्प्रीत्या, नियोजयति सर्वदा।
सर्वात्माश्रयणायाशुशीररूपगुणादिभिः।।

१५. हरेरेवानुरूपा सा श्रीदेवी विद्यतेऽनिशम्।
वामभागे श्रियःपत्युः क्षमादिगुणशोभिते।।

१६. क्षमादेवी च नीळा च, विद्येते श्री सती प्रिये।
दिव्यतेजोमयो तस्मिन्, परमानन्दनिर्भरः।।

१७. श्रीभूनीळायुतश्शेषगतोऽलङ्कृतिराजितः।
वासुदेवो विरात्येवं, रजिताचलसंस्थितः।।

१८. विद्युल्लतात्रया युक्तः, पुष्पितो नीलवारिदः।
विमले परमाकाशे, यथा कारुण्यवर्षुकः।।

१९. किरीटं तत्रमानेतुराधिराज्यस्य सूचकम्।
शोभते मुखरश्मीनामूर्द्वप्रसरणं यथा।।

२०. पश्यतां नेत्ररश्मीनां, प्रतिघातसमद्भवाः।
विभान्ति तिमिरावर्ता, इव तच्चूर्णकुन्तलाः।।

२१. फालभागे शितं पुण्ड्रमूर्ध्वं भाति रमापतेः।
सुधा धाराष्टमी चन्द्रगते वालकमध्यतः।।

२२. सौकुमार्यविशेषेण, दृतह्रीबेरसन्निभम्।
तुलस्यामोददं केशजालं लसति तद्धरेः।।

२३. विकचत्पद्मयोः पार्श्वे, विहरंत्योश्च मत्तयोः।
भृङ्गयोर्वहतश्शोभां, भ्रूलते तस्य शार्ङ्गिणः।।

२४. सङ्गम्य च वियुक्तानां, बाधके सर्वदेहिनाम्।
मातृवद्रक्षके भक्तवात्सल्यातिशया त्तथा।।

२५. विभूतियुग्मसम्पत्या, सुमहैश्वर्य योगतः।
हिरण्यरूपिणीं लक्ष्मीं, निर्निमेषावलोकनात्।।

२६. रक्ते तन्नयने भातो, विकचत्कमले यथा।
नेत्रावलोकनेनैव, सर्वाधिपतिरित्ययम्।।
२७. ज्ञायते नैव शास्त्राणामपेक्षा विद्यते क्वचित्।
त्रिपाद्विभूतिगास्सर्वे, तन्नेत्रवशवर्तिनः।।
२८. श्रीपतेर्नापि कादासजनानां पश्यतां मुहुः।
कल्पवल्ली किमेषेति, शङ्कां जनयति स्वयम्।।
२९. कपोले च श्रियःपत्युः, कल्पवल्ली समुद्भवे।
पल्लवे इव शोभेते, सर्वदृष्टिमनोहरे।।
३०. तस्याधरे प्रवाळाभे, चन्द्रिका स्फुरणं यथा।
विस्फुरन्त्यनिशं मन्दस्मितं हितकरं नृणाम्।।
३१. श्रोत्रयोस्तस्य देवस्य, विलसन्मणि कुण्डले।
स्वरत्नप्रभया नित्यं, मण्डयन्ति दिशो दश।।
३२. वदनं तस्य सौन्दर्यसदनं कमला धनम्।
कृत्य राजते पूर्णचन्द्रबिम्बस्फूटाम्बुजम्।।
३३. देवी कराङ्कितं ग्रीवा, तलं देवस्य निस्तुलम्।
तरुणक्रमुकग्रीवा, कम्बु प्रतिभटं स्फुटम्।।
३४. देवी कर्णावतंसाभ्यां, तदीयैः कर्णभूषणैः।
कचभारविमर्देन, परिष्कृततले शुभे।
३५. मणिपर्वतशृङ्गाभे, सुदृढे भुजशीर्षके।
प्रभायाङ्गतरत्नानां, तरङ्गिततलेऽमले।।
३६. छायायां भूतियुग्मं च, पातुं शक्ते रमापतेः।
महास्त्रपुष्पसंयुक्तैः, करकल्पद्रुमैस्तदा।।
३७. समावृतं श्रियस्थानं, भूषणैः कौस्तुभादिभिः।
शोभमानं विशेषेण वक्षस्थलमधीशितुः।।
३८. सौन्दर्यसागरावर्त, इव नाभिर्विराजते।
श्रीहरेर्ब्रह्मणो हेतुं, नाभिपद्मं करस्थिते।।
३९. शङ्खचक्रे विलोक्याशु, चन्द्रसूर्याविति भ्रमात्।
सङ्कुच्यतिशीघ्रेण, विकसत्यद्भुतं हि तत्।।

४०. नीलं नभ इवाभाति, सन्ध्यारागेण रञ्जितम्।
पीताम्बरेण तन्मद्यं, शोभया परभागया।।

४१. रम्भास्तम्भाति गम्भीरे, सक्थिनी कमालपतेः।
जङ्घे च विकचत्पद्मनाळे इव सकण्टके।।

४२. पादौ शङ्खरथाङ्गाब्जगदावर्जाङ्कुशादिभिः।
दिव्यचिह्नैर्लसन्तौतौ, श्रीवैकुण्ठनिवासिनः।।

४३. दिव्यसौन्दर्यलावण्यविलासास्पदमव्ययम्।
श्रीपतेर्दिव्यरूपं च, पुंसां चित्तापहारकम्।।

४४. माणिक्यमणिमञ्जूषा, सन्निविष्टसुवर्णवत्।
स्वान्तस्थितस्य दिव्यात्मा, स्वरूपस्य प्राकाशकम्।।

४५. जीवातुस्सर्वलोकानामभूमिर्वाञ्छितावधेः।
श्रुत्यन्तवाक्यसर्वस्यमपूर्वाद्भुतदर्शनम्।।

४६. आयुधाभरणादीनां, कान्तिपूरे च सूरिभिः।
सदानुमेयनीलाभ्रविभ्रमावहमक्षतम्।।

४७. तद्दिव्यमङ्गळैनैव, विग्रहेणाखिलं जगत्।
आप्याययन् सुगन्धेन, श्रीवैकुण्ठतलं सदा।।

४८. दिव्यामोदयुतं कुर्वन्, मधुरैर्मृदुभाषणैः।
मनांसि नित्यसिद्धानां, सन्तोषयति सादरम्।।

४९. सिंहासनप्रभावेण, विभूतिद्वयमप्ययम्।
विजित्य च वरीवर्ति, वासुदेवः परात्परः।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे**
**वैकुण्ठनाथस्वरूपकथनं नाम**
**दशमोऽध्यायः समाप्तः।।**

श्रीमते रामानुजाय नमः

# अर्चिरादिमार्गः

## एकादशोऽध्यायः

१. लोकाचार्यं दयासिन्धुं, कृष्णपादं तनूभवम्।
नमस्कृत्य पुनः प्राह, भक्त्या श्रीशैलनायकः।

२. मुक्तो गत्वा हरेस्थानं, वैकुण्ठपुरवासिनः।
किं करोति हरिस्तत्र, किं मुक्ताय प्रयच्छति।।

३. तत्सर्वं श्रोतुमिच्छामि, मुक्तप्राप्यं विलक्षणम्।
कृपया परया देव वक्तुमर्हस्यशेषतः।।

**लोकाचार्य उवाच**

४. श्रुणु श्रीशैलनाथार्य मुक्तप्राप्यफलं मुदा।
हरिप्रसादसंलब्धं, दुष्प्रापं सर्वयोगिभिः।।

५. अद्वितीयाज्ञया लोकान्, पालयन्तं श्रियःपतिम्।
नित्यमुक्तगुणैस्सेव्यं, श्रीवैकुण्ठादिनायकम्।।

६. कदा द्रक्ष्यामि गत्वेति, व्यथां त्यक्त्वा पुरा स्थिताम्।
यथा मनोरथं प्रेक्ष्य, नेत्रपर्वं पुरस्थितम्।।

७. समस्तपरिवाराय, सर्वमङ्गलमूर्तये।
श्रीमन्नारायणायस्यान्नम इत्याभिवाद्य च।।

८. हर्षप्रकर्षवश्यात्मा, प्रीत्या परमया गतः।
पादपीठे पदं स्वस्य, विन्यस्यारोहति स्वयम्।।

९. सिंहासनं हरेर्मुक्तस्तदा दृष्ट्वा रमासखः।
अवाक्यनादरो देव, इति वार्तामपोह्य सः।।

१०. पूर्णचन्द्रावलोकेन, समुद्र इव तत्परः।
विकृतं याति चात्मानं, त्यक्त्वा संसारसागरे।।

११. पतनादस्य सञ्जातां, रुजन्त्यक्त्वा कृपानिधिः।
मुक्तमङ्के समारोप्य, श्रीरामो भरतं यथा।।
१२. अक्रूरमिव तं कृष्णः, प्रीत्यालिङ्गति माधवः।
राजपृष्टस्तु तत्पुत्रो, युवराजोऽहमस्म्ययम्।।
१३. त्वदीय इतिवक्तेन, हरिणा सुखकारिणा।
कोऽसि त्वमसि पृष्टोऽहं, ब्रह्मास्मीति वदत्यसौ।।
१४. एतावत्कालपर्यन्तं, किं कृतं भवताभवे।
वदेति हरिणा पृष्टो, मुक्तो वदति सादरम्।।
१५. अङ्गनालिङ्गने पुष्पचन्दनादिषु सस्पृहः।
विषयासक्तहृच्चाहं, व्यभ्रमं सर्वजन्मसु।।
१६. तस्माल्लब्धं किमित्येवं, ब्रुवति श्रीपतौ तदा।
मुक्तो ब्रवीति याम्यैस्तैर्नरके पातितोस्म्यहम्।।
१७. पश्चात्किमरोस्सर्वमिति लक्ष्मीपतेर्वचः।
श्रुत्वा वदति मुक्तात्मा, तत्सर्वं त्यक्तवानहम्।।
१८. त्यागस्य कारणं किं स्यादिति पृष्टो वदेदसौ।
त्वमेव कारणं पुण्य, मूर्ते ! त्यागस्य संसृतेः।।
१९. तत्त्यक्त्वा किं फलं प्राप्तमिति सम्भाषितोऽप्यसौ।
भणत्येवं भवन्तं हि, प्राप्तोऽस्मि कृपया तव।।
२०. मां प्राप्य किमितो लब्धमिति पृष्टो भणत्ययम्।
त्यक्त्वा सर्वाणि दुःखानि, स्वस्वरूपप्रकाशनात्।।
२१. सायुज्यं समनुप्राप्य, भवतः करुणानिधेः।
नन्दामि च महानन्द, भरितस्त्वत्समीपगः।।
२२. तच्छ्रुत्वा परमं हृष्टः परिष्वज्य पुनः पुनः।
मेघगम्भीरया वाचा, वदत्येवं रमापतिः।।
२३. वत्से तावन्महानन्दमयेऽस्मिन् परमेवपदे।
निवासमनवायैव, लोके दुःखमयेस्थितः।।
२४. गुणानुभवकैङ्कर्यमप्राप्यानेकयोनिषु।
प्रविष्टस्त्वं महादुःखं, प्राप्नोसि कृतकर्मणा।।

२५. दुःखसागरमध्ये तु, पतितस्तर्तुमक्षमः।
मग्नस्तत्रैव सन्तप्तो, दुःखितोऽसि मम प्रियः।।

२६. ममाश्रित्य च मद्दिव्यरूपदर्शनलालसः।
परितप्तस्तथैवाहं, दर्शनं नाददं खलु।।

२७. मन्निवास इति ज्ञात्वा, पश्यन्नाकाशमाविलः।
रुदन्स्त्वं स्थावराणामप्यतिशोच्योऽसि मत्प्रियः।।

२८. एतावत्त्वत्समीपं मां, नेतुं कालोऽपि नागतः।
कदाऽहं भवता युक्तो, भविष्यामीति निश्वसन्।।

२९. दुःखितोऽसि तदाऽनेतुं, विलम्बं कृतवानहम्।
विष्णुपोतमलब्ध्वाहं, पतितो दुःखसागरे।।

३०. निमज्जामीति यद्दुःखं, तदपोह्य प्रवर्तने।
मद्वियोगव्यथां त्यक्त्वा, किं संयुक्तोऽसि शीतलम्।।

३१. त्वत्सङ्गमे नमत्सृष्टिस्सफलासीच्चिरादयम्।
प्रणष्टस्य यथा लाभो, रत्नस्य तव सङ्गमः।।

३२. तथा चापूर्वसन्तोषकारणं हि भवेन्मम।
अद्य त्वदागमेनैव, सनाथं परमं पदम्।।

३३. हारमध्यमणिप्रख्यः, नित्यमुक्तगणे भवान्।
प्रकाशकोऽसि मुक्तात्मन्, त्वमिहागत्य सद्गुणः।।

३४. इत्थं मनोहरैश्चाटुवचनैरार्श्रयन् मुदा।
सन्तोषयति लक्ष्मीशो, मयूरं जलदो यथा।।

३५. कटाक्षालाभसञ्जातसन्तापविनिवृत्तये।
श्रीराम इव सम्प्राप्तं, रक्षोमुक्तं विभीषणम्।।

३६. गतरोगं सुतं पेम्णा, पितेव कमलापतिः।
निर्दुःखं पश्यति प्रीतो, लोचनाभ्यां पिबन्निव।।

३७. ये ये मनोरथाः पूर्वमनेन मनसा कृताः।
तां स्तान्सम्पूर्य वैकुण्ठस्सुप्रीतं कारयेत्तदा।।

३८. न दर्शयसि ते रूपमिति यो व्यधितोऽभवत्।
तस्मै विवृणुते स्वीयां, तनुं मुक्ताय माधवः।।

३९. एष सर्वस्वभूतस्तु, परिष्वङ्ग इति ब्रुवन्।
गाढमालिङ्गति प्रेम्णा, करुणावरुणालयः।।

४०. किन्नुस्याच्चित्तमोहो यमिति व्यामोहदर्शकः।
श्रीदेव्या हस्तपद्मे च, समर्पयति सादरम्।।

४१. श्रीदेवी मुक्तमादाय, स्वाङ्के संस्थाप्य मोदते।
कंसं निहत्य सम्प्रीत्या, समायान्तं सुतं हरिम्।।

४२. देवकी वदयास्रस्त स्तन्यसिक्ततनुं ततः।
कृत्वा विभूति युग्मस्य, विभवं दास्यति स्वयम्।।

४३. श्रीदेव्याः करुणां प्राप्य, तदङ्काद्बहिरागतः।
श्रीपतेः पुरतस्तिष्ठन्, सुन्दरं वदनं हरेः।।

४४. बिम्बाधरं सुधाधारं, मधुरं चूर्णकुन्तलम्।
पुरो द्रष्टुमशक्तस्सन्, पार्श्वे तिष्ठन् ततोऽधिकाम्।।

४५. शोभां पश्यन्प्रभावीचिप्रेरितः पृष्टतो गतः।
तच्छोभामनुभूयाशु, भ्रमत्येवं पुनः पुनः।।

४६. शिरश्यञ्जलिमादाय, सदा पश्यति सूरिभिः।
हावूहाविति गानानि, करोत्यानन्दनिर्भरः।।

४७. एकेनैव शरीरेण, श्रीपतिं भोक्तुमक्षमः।
दशधा शतधा चैव, बहुधा भवति प्रियः।।

४८. जक्षन् क्रीडन् विमानैश्च, रममाणस्समं ततः।
स्त्रीभिर्दिव्यैर्महाभोगैर्हरिसङ्कल्पकल्पितैः।।

४९. अथवा सत्यसङ्कल्पः पितृलोकादिकं सृजन्।
हरीच्छया सुखं भुङ्क्ते, तत्कामो यदि निर्भयः।।

५०. परिग्रहेण देहानामनेकेषां महामनाः।
शेषवृत्तिस्त्वनेकेषु, प्रमोदादन्वितस्तदा।।

५१. अस्थानरक्षणोद्युक्तो, मङ्गलाशासनोत्सुकः।
अमृताम्भोधि निर्मग्न सगलावयवस्तदा।।

५२. प्राप्य साम्यं च हरिणा, जगद्व्यापारवर्जितम्।
वर्तते मुक्तिमापन्नो, धन्यो नैव निवर्तते।।

५३. अर्चिरादिगतिं चैतां, शृणुयाच्छ्रावयेच्च यः।
सपुमान्भगवत्प्रीतिविषयो भविता ध्रुवम्।।

५४. ज्ञानवैराग्य सम्पूर्णस्सर्वसौख्यसमन्वितः।
श्रीपतिं प्रीणयन् नित्यं, भूलोके चरिमास्थितः।।

५५. पुत्रपौत्रान्वितः पूज्यः प्रपन्नस्सर्वदेहिभिः।
देहावसानकाले तु, प्राप्नोति परमं पदम्।।

५६. शाके खधातृ गजचन्द्रमिते च वर्षे
श्रीकीलके धनुषि कृष्णदळे दशम्याम्।
श्रीकृष्ण नाम विदुषा रचितार्चिरादिः
जीयाच्चिरं शतवधान विदांवरेण।।

**।। इति श्रीकृष्णमाचार्यशतावधानिकृतिषु अर्चिरादिमार्गे मुक्तानुभवकथनं नाम एकादशोऽध्यायः समाप्तः।।**

**।। समाप्तश्चायंग्रन्थः।।**

**ओं तत्सत् ब्रह्मार्पणमस्तु**

**श्रीः श्रीः श्रीः**

श्रीमते रामानुजाय नमः

# उदाहृतप्रमाणवाक्यानुक्रमणी

## प्रथमभागः


| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| अङ्के भरतमारोप्य | (रामायणे युद्धकाण्डे १३०-४१) | 99 |
| अचेतना परार्था च | (परमसंहिता) | 90,95 |
| अच्युताऽहं तवास्मीति | (विष्णुपुराणम् -१) | 31 |
| अडियार्गल्कुलाङ्गुलुडन् | (तिरुवायिमोलि २-३१) | 85 |
| अथ वा किं नु समर्पयामि | (स्तोत्ररत्नम्- ५३) | 32 |
| अनादिवासनारूढ | (अहिर्बुध्न्यसंहिता) | 35 |
| अन्तः प्रविष्टश्शास्ता | (यजुर्वेदे आरण्यके ३-११) | 22 |
| अन्नवानन्नादो भवति | (तैत्तिरीयोपनिषद्, भृगुवल्ली -६) | 19 |
| अमृतमुण्डुकलित्तेने | (तिरुवायिमोलि १०-८-६) | 93 |
| अमृतस्यैष सेतुः | (मुण्डकोपनिषत्,२-२-५) | 47 |
| अये दयालो वरद | (वरदराजस्तवः ९३) | 71 |
| अशेषशेषतैकरतिरूप | (शरणागतिगद्ये -५) | 93 |
| असत्कीर्तनकान्तार | (हरिवंशे) | 26 |
| अहं वेद्मि महात्मानम् | (रामायणे बालकाण्डे १९-१४) | 99 |
| अहमन्नम् | (तैत्तिरीयोपनिषत्, भृगुवल्ली) | 87,101 |
| अहमपि तवैवास्मि हि भरः | (स्तोत्ररत्नम्) - ६० | 32 |
| आचार्यात् दैवविद्या | (छान्दोग्योपनिषत् ४-९-३) | 82 |
| आत्मत्राणोन्मुखश्चेन्नम | (अष्टश्लोकि) | 50 |
| आत्मनस्तु कामाय | (बृहदारण्यकोपनिषत् ६-५-६) | 81 |
| आत्मानमन्तरो | (बृहदारण्यकोपनिषत् ५-७-२२) | 22 |
| आनन्दी भवति | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -१) | 97 |
| आयुराशास्ते | (यजुर्वेदः) | 19 |
| आरोग्यं भास्करादिच्छेत् | (मत्स्यपुराणे ६७-४१) | 19 |
| इमौ स्म मुनिशार्दूल | (रामायणे बालकाण्डे ३१-१४) | 99 |
| इयं केवललक्ष्मी | (शरणागतिदीपिका) | 53 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| ईरिलिम्बत्तिरुवेल्लम् | (तिरुवायिमोलि २-६-८) | 93 |
| उण्णुम्शोरु | (तिरुवायिमोलि ६-७-४) | 43 |
| उतामृतत्वस्येशानः | (पुरुषसूक्तम्) | 49 |
| उदारास्सर्व एवैते | (भगवद्गीता ७-१२) | 24 |
| उनक्केनाम् | (तिरुप्पावै -२९) | 98 |
| उपादत्ते सत्तास्थिति | (श्रीरङ्गराजस्तवः २-८) | 81,95 |
| उपाधिरहिते नायं | (अहिर्बुध्न्यसंहिता) | 33 |
| उपेक्षको यथाकर्म | (अहिर्बुध्न्यसंहिता) | 36 |
| ऊर्ध्वं गच्छन्ति | (भगवद्गीता १४-१८) | 52 |
| एते वै निरयास्तात | (जितन्ते १-४) | 68 |
| एन्नान्शेय्केन् | (तिरुवायिमोलि ५-७-१) | 35 |
| एन्नै याक्किक्कोण्डेन | (तिरुवायिमोलि २-७-११) | 46 |
| एम्मावीट्टित्तिरमुम् | (तिरुवायिमोलि २-९-१) | 44,97 |
| एल्लै निकलन्दनन् | (तिरुवायिमोलि ४-५-३) | 97 |
| एवं भूतोप्यशक्त | (अहिर्बुध्न्यसंहिता) | 36 |
| एवमुक्तास्त्रयः | (महाभारते आरण्यपर्वे ५४-१६) | 21 |
| एष विपद्यारम्यहमल्प | (रामायणे सुन्दरकाण्डे) | 35 |
| कण्णपुरस्तुरैयम्माने | (पेरियतिरुमोलि ८-१०-३) | 86 |
| कदाहमैकान्तिकनित्य | (स्तोत्ररत्नम् -४६) | 93 |
| करणं कारणं विकर्ता | (विष्णुसहस्रनामस्तोत्रे) | 44 |
| कर्ता शास्त्रार्थवत्वात् | (ब्रह्मसूत्रम् २-३-३३) | 20,21,22 |
| कलैवाय् तुन्बम् | (तिरुवायिमोलि ५-८-८) | 36 |
| कातल्कडलपुरै | (तिरुवायिमोलि ५-३-४) | 45 |
| कार्यकारणकर्तृत्वे | (भगवद्गीता १३-२०) | 54 |
| किन्तेन कृतं पापम् | (महाभारते उद्योगपर्वे ४२-३४) | 89 |
| किर्पन्किल्लेनेन्रिलन् | (तिरुवायिमोलि ३-२-६) | 36 |
| गुरुमेवाभिगच्छेत् | (छान्दोग्योपनिषत् १-२) | 82 |
| चराचराणि भूतानि | (अहिर्बुध्न्यसंहिता) | 38 |
| चेतनस्य यदा मह्यम् | (अहिर्बुध्न्यसंहिता ५२-२५) | 29,100 |
| जक्षन् क्रीडन् रममाणं | (छान्दोग्योपनिषत् ८-१२-३) | 25 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| जायमानं हि पुरुषं | (महाभारतं शान्तिपर्व ३५-८) | 26 |
| तं पादेनाध्यारोहति | (कौषीतक्युपनिषत् १-४) | 99 |
| तकवुडै यवने येन्नुम् | (तिरुवायिमोलि २-४-६) | 36 |
| तत्र सत्वं निर्मलत्वात् | (भगवद्गीता १४-६) | 52 |
| तदात्मानं स्वयमकुरुत | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -७) | 91 |
| तदुपकरणं वैष्णवमिदं | (अष्टश्लोकि) | 91 |
| तनक्केयागवेनैक्कोल्लुमीदे | (तिरुवायिमोलि २-९-४) | 44,61,98 |
| तन्नाल्वरुम्नम्मै | (श्रीवचभूषणम्) | 42 |
| तन्मन्त्रं ब्राह्मणाधीनम् | (विहगेन्द्रसंहिता -२२) | 82 |
| तमेव शरणं गच्छ | (भगवद्गीता १८-६२) | 54 |
| तमेवं विदित्वा | (श्वेताश्वतरोपनिषत् ३-८) | 89 |
| तमेवं विद्वान् | (पुरुषसूक्तम्) | 89 |
| तस्यभावे सन्ध्यवत् | (ब्रह्मसूत्रम् ४-४-१४) | 28 |
| तस्यैव आत्मा | (कठोपनिषत् १-२२३) | 45 |
| तोलै विल्लिमङ्गलम्तोलुम् | (तिरुवायिमोलि ६-५-१) | 32 |
| तृप्त एवैनमिन्द्रः | (यजुर्वेदे २-४-२४) | 89 |
| तेनेदं पूर्णं पुरुषेण | (श्वेताश्वतरोपनिषत् ३-९) | 47 |
| तेषामेवानुकम्पार्थं | (भगवद्गीता १०-११) | 45 |
| तेऽपि मामेव कौन्तेय | (भगवद्गीता ६-२३) | 26 |
| त्रैगुण्यविषया वेदाः | (भगवद्गीता २-४५) | 93 |
| त्वत्पादकमलादन्यत् | (जितन्तास्तोत्रम् -१) | 49 |
| त्वमेव उपायभूतो मे | (अहिर्बुध्न्यसंहिता ३६-३८) | 54 |
| त्वमेव रुचिरे देशे | (रामायण अयोध्याकाण्डे १५-७) | 43 |
| त्वयासौ पुरुषर्षभः | (रामायणे सुन्दरकाण्डे २१-१९) | 46 |
| त्वय्येव त्वदुपायधीरपि | (न्यासतिलकम् -१०) | 53 |
| त्वामेव शरणं प्राप्य | (जितन्तास्तोत्रम्) | 54 |
| ददामि बुद्धियोगं | (भगवद्गीता १०-१०) | 26 |
| दासभूतास्स्वतस्सर्वे | (रामायणे युद्धकाण्डे) | 100 |
| द्व्यक्षरस्तु भवेन्मृत्युः | (महाभारतं शान्तिपर्वम् १३-४) | 14,25,26 |
| न तत्र पर्येति जक्षन् | (छान्दोग्योपनिषत् ८-१२-३) | 20,28 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| न तु मामभिजानन्ति | (भगवद्गीता ९-२४) | 26,94 |
| न नमेयं तु कस्यचित् | (रामायणे युद्धकाण्डे ३६-१५) | 13 |
| नम इत्येव वादिनः | (महाभारत् शान्तिपर्वे ३३७-४०) | 13,34 |
| नमो नारायणाय वेन्रु | (तिरुप्पल्लाण्डु -१२) | 34 |
| न इत्यपि वा देवं | (अहिर्बुध्न्यसंहिता) | 34 |
| नारायणं सलक्ष्मीकं | (न्यायसिद्धाञ्जने द्वितीयपरिच्छेदे) | 53 |
| नासौ पुरुषकारेण | (भगवच्छास्त्रे) | 49 |
| निन्र तैन्दै यूरकत्तु | (तिरुच्चन्दविरुत्तम् -६४) | 46 |
| निमित्तमात्रं भव सव्यसाचिन् | (भगवद्गीता ११-३३) | 49 |
| निमित्तमात्रमेवासौ | (विष्णुपुराणम् १-४-५१) | 48 |
| नियतस्तमिति | (स्तोत्ररत्नम्) | 43 |
| निरस्ताखिलदुःखोऽहम् | (श्रीभाष्यम्, जिज्ञासाधिकरणम्) | 19 |
| नोक्कवेणुमेन्रलि | (मुमुक्षुप्पडि -१) | 37 |
| नोट्रनोम्बिलेन्नुण्णरिविलेन् | (तिरुवायिमोलि ५-७-१) | 35 |
| पतिं पतीनां परमम् | (श्वेताश्वतरोपनिषत् ६-७) | 100 |
| पतिं विश्वस्यात्मेश्वरम् | (तैत्तिरीयोपनिषत्, नारायणवल्ली -१०) | 31,100 |
| परत्वे सति देवोऽयं | (अहिर्बुध्न्यसंहिता) | 36 |
| परमात्मनोयोगः | (विष्णुपुराणम् २-१४-२७) | 102 |
| परित्यक्ता मया लङ्का | (रामायणे युद्धकाण्डे १९-५) | 12 |
| पश्यत्येनं जायमानं | (महाभारते शान्तिपर्वे ३५८) | 26,67 |
| पश्येम शरदश्शतम् | (यजुर्वेदः) | 19 |
| पिरर्क्कुरियनानवन्रु तन् | (श्रीवचनभूषणम्) | 19 |
| पूर्वसंज्ञे वै शरीरे | (तिरुच्चन्दविरुत्तम् - ६४) | 46 |
| पोय्न्निन्रञानमुम् | (तिरुविरुत्तम् -१) | 35 |
| प्रकृत्यैव च कर्माणि | (भगवद्गीता १३-२९) | 51 |
| प्रेक्षावतः प्रवृत्तिर्या | (अहिर्बुध्न्यसंहिता) | 33 |
| बहुस्यां प्रजायेय | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -६) | 44 |
| ब्रह्माणं शितिकण्ठञ्च | (महाभारते शान्तिपर्वे -३५८) | 26,89 |
| मन्त्रब्रह्मणि | (अष्टश्लोकि -२) | 30 |
| ममैव दुष्कृतं किञ्चित् | (रामायणे सुन्दरकाण्डे ३८-४३) | 35 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| मरन्दुम्पुरन्तोला | (नान्मुगन् तिरुवन्तादि) | 86 |
| महान्प्रभुवै पुरुषः | (श्वेताश्वतरोपनिषत् ३-१२) | 26 |
| मामेकं शरणं व्रज | (भगवद्गीता १८-६६) | 54 |
| मायुम् वकैः | (तिरुवायिमोळि ५-८-३) | 35 |
| मुमुक्षुर्वै शरणमहं प्रपद्ये | (श्वेताश्वतरोपनिषत् ६-१८) | 94 |
| मैलत्तोण्डु | (तिरुवायिमोळि १०-२-७) | 34 |
| यजन्त्यविधिपूर्वकम् | (भगवद्गीता ९-२३) | 94 |
| यततामपि सिद्धानां | (भगवद्गीता ७-३) | 42 |
| यथा क्रतुरस्मिल्लोके | (छान्दोग्योपनिषत् ३-१४-१) | 25 |
| यस्यैते तस्य तद्धनम् | (महाभारते उद्योगपर्वे) | 22 |
| यातानुम्पट्रिनीङ्गुम् | (तिरुविच्चन्दविरुत्तम् -९५) | 36 |
| याने येन्नते येन्रि रुन्देन् | (तिरिवायिमोलि २-९-९) | 31 |
| यान्मूल्किनन् | (तिरुवायिमोलि २-६-८) | 97 |
| येप्यन्य देवताभक्ताः | (भगवद्गीता ९-२३) | 89 |
| यो लोकत्रयमाविश्य | (भगवद्गीता १५-१७) | 45 |
| रसं ह्येवायं लब्ध्वा | (तैत्तिरीयोपनिषत्, आनन्दवल्ली ७-१) | 93,94 |
| रममाणा वने त्रयः | (रामायणं बालकाण्डे) | 28 |
| लभते च ततः कामान् | (भगवद्गीता ७- २२) | 26 |
| वपुरादिषु योऽपि | (स्तोत्ररत्नम् -५२) | 12 |
| वलुविलावडिमैशेय्य | (तिरुवायिमोलि ३-३-१) | 93 |
| वसुरण्यो विभुरसि | (तैत्तिरीयोपनिषत्) | 31 |
| वाचा नम इति प्रोच्य | (अहिर्बुध्न्यसंहिता) | 34 |
| वायुर्वैक्षेपिष्टा देवता | (यजुर्वेदे २-१-१) | 89 |
| वासुदेवस्सर्वमिति | (भगवद्गीता ७-१९) | 43 |
| विदितस्स हि धर्मज्ञः | (रामायणे सुन्दरकाण्डे २१-२०) | 13 |
| विमृश्यै तदशेषेण | (भगवद्गीता १८-६३) | 40 |
| विष्णुपोतं विना नान्यत् | (विष्णुधर्मे १-५६, १७-१००) | 49 |
| विष्णोः कटाक्षमद्वेष | (विष्णुपुराणम् ४-९-३) | 82 |
| शरैस्तु सङ्कुलां कृत्वा | (रामायणे सुन्दरकाण्डे ३९-३०) | 36 |
| शंपाचलं बहुलं | (वरदराजस्तवः ७८) | 69 |

| प्रमाणवचनम् | आकरः | पृष्ठसङ्ख्या च क्रमशः |
|---|---|---|
| शाधि किङ्करवावते | (रामायणे बालकाण्डे) | 99 |
| शाश्वती मम संसिद्धिः | (अहिर्बुध्न्यसंहिता) | 13 |
| शास्त्रफलं प्रयोक्तरि | (पूर्वमीमांससूत्रम् ३-७-१८) | 22,24 |
| श्रुतिस्मृतिर्ममैवाज्ञा | (भगवच्छास्त्रे) | 40 |
| स एकाकी न रमेत | (महोपनिषत् -१) | 44 |
| सतामेतदगर्हितं | (रामायणे युद्धकाण्डे - १८-३) | 46 |
| स यदि पित्रुलोककामो | (छांन्दोग्योपनिषत् ८-२-१) | 24 |
| संबाहुभ्यां नमति | (तैत्तिरीयोपनिषत्, नारायणवल्ली १-३) | 99 |
| सत्वरजस्तम | (भगवद्गीता १४-५) | 52 |
| सर्वं तदूषजलजो | (वरदराजस्तवः ८१) | 71 |
| सर्वात्मना यश्शरणम् | (भागवतम्) | 43 |
| सर्वान्देवान्नमस्यन्ति | (रामायणे आयोध्याकाण्डे २-५२) | 19 |
| सहस्रशीर्षा पुरुषः | (पुरुषसूक्तम्) | 46 |
| सोऽकामयत | (तैत्तिरीयोपनिषत्, आनन्दवल्ली -६) | 91 |
| सोऽश्नुते सर्वान्कामान् | (तैत्तिरीयोपनिषत्, आनन्दवल्ली २-२) | 25,93 |
| स्वतन्त्रः कर्ता | (पाणिनिसूत्रम्) | 20 |
| स्वर्गेऽपि पातभीतस्य | (विष्णुपुराणम् ६-५-५०) | 68 |
| स्वस्य स्वामिनिवृत्तिर्या | (अहिर्बुध्न्यसंहिता) | 36 |
| स्वस्यापि नार्हं ततः | (अष्टश्लोकि) | 98 |
| स्वस्वराड् भवति | (छांन्दोग्योपनिषत् ७-२५-२) | 20,28 |
| स्वस्वातन्त्र्यावबोधस्तु | (अहिर्बुध्न्यसंहिता) | 35 |
| हंसानां वचनं श्रुत्वा | (महाभारते आरण्यपर्वे ५४-१७) | 54 |
| हरिर्हरति पापानि | (हर्यष्टकम्) | 31 |
| क्षोदीयानपि | (श्रीस्तवे -५) | 99 |

| | | |
|---|---|---|
| न्यायसिद्धाञ्जनम् | ....... | वेदान्तदेशिकः |
| न्यासविंशतिः | ....... | वेदान्तदेशिकः |
| पद्मपुराणम् | ....... | वेदव्यासः |
| परमसंहिता | | |
| पाणिनीयसूत्राणि | ....... | पाणिनिः |
| पुरुषसूक्तम् | | |
| पूर्वदिनचर्या | ....... | देवराजगुरुः |
| पूर्वमीमांसा | ....... | जैमिनिः |
| पेरियाल्वार्तिरुमोलि | ....... | पेरियाल्वार् |
| प्रपन्नपरित्राणम् | ....... | पिल्लै लोकाचार्याः |
| बह्वृचोपनिषत् | | |
| बृहदारण्यकोपनिषत् | | |
| ब्रह्मपुराणम् | ....... | वेदव्यासः |
| ब्रह्मसूत्राणि | ....... | वेदव्यासः |
| भगवद्गीता | | |
| भगवद्विषयः | ....... | नम्माल्वार् |
| भविष्यपुराणम् | ....... | वेदव्यासः |
| भागवतमहापुराणम् | ...... | वेदव्यासः |
| भाष्यकारमुक्तक | | |
| मनुस्मृतिः | ....... | मनुः |
| महाभारतम् | ....... | वेदव्यासः |
| महाभाष्यम् | ....... | पतञ्जलिः |
| महोपनिषत् | | |
| माघकाव्यम् | ....... | माघः |
| मालविकाग्निमित्रम् | ....... | कालिदासः |
| मुण्डकोपनिषत् | | |
| मुमुक्षुप्पडि | ....... | पिल्लै लोकाचार्याः |
| यजुर्वेदः | | |
| यतिराजविंशतिः | ....... | मणवालमहामुनिः |
| रामानजचतुःश्लोकी | | |
| रामायणम् | ....... | वाल्मीकिमहर्षिः |
| लक्ष्मीतन्त्रम् | ....... | पाञ्चरात्रागमः |
| लघ्वत्रिस्मृतिः | | |
| वरदराजस्तवः | ....... | कूरेशमिश्रः |

| | | |
|---|---|---|
| वराहपुराणम् | ....... | वेदव्यासः |
| वायुपुराणम् | ....... | वेदव्यासः |
| विष्णुतत्त्वम् | | |
| विष्णुधर्मः | | |
| विष्णुधर्मोत्तरपुराणम् | ....... | वेदव्यासः |
| विष्णुपुराणम् | ....... | पराशरमहर्षिः |
| विष्णुसहस्रनामस्तोत्रम् | ....... | वेदव्यासः |
| विष्वक्सेनसंहिता | ....... | पाञ्चरात्रागमः |
| विहगेन्द्रसंहिता | ....... | पाञ्चरात्रागमः |
| वृद्धहारीतसंहिता | | |
| शरणागतिगद्यम् | ....... | भगवद्रामानुजाचार्याः |
| शरणागतिदीपिका | ....... | वेदान्तदेशिकः |
| शाङ्करभाष्यम् | ....... | शङ्कराचार्यः |
| शाबरभाष्यम् | ....... | शबरस्वामी |
| शेषसंहिता | ....... | पाञ्चरात्रागमः |
| श्रीगुणरत्नकोशः | ....... | पराशरभट्टार्यः |
| श्रीभाष्यम् | ....... | भगवद्रामानुजाचार्याः |
| श्रीरङ्गगद्यम् | ....... | भगवद्रामानुजाचार्याः |
| श्रीरङ्गनाथस्तोत्रम् | | |
| श्रीरङ्गराजस्तवः | ....... | पराशरभट्टार्यः |
| श्रीवचनभूषणम् | ........ | पिल्लै लोकाचार्याः |
| श्रीसूक्तम् | | |
| श्रीस्तवः | ....... | कूरेशमिश्रः |
| श्वेताश्वतरोपनिषत् | | |
| सुबालोपनिषत् | | |
| स्कान्दपुराणम् | ....... | वेदव्यासः |
| स्तोत्ररत्नम् | ....... | यामुनाचार्याः |
| हरिवंशः | ....... | वेदव्यासः |
| हर्यष्टकम् | | |



Editor : Prof. Tatta Vijaya Raghavacharyulu

Prof.Tatta Vijaya Raghavacharyulu, (Vidyapraveena), (M.A.,Ph.D.) has studied Sahitya, Darsana and Agama Sastras under reputed scholars in a traditional way. He was awarded Vidyavaridhi (Ph.D.) degree for his doctoral dissertation on "A Critical Study of Vedarthasangraha" under the guidance of mahamahopadhyaya N.S.R. Ramanuja Tatacharya in 1987. He started his career as a lecturer in Rashtriya Sanskrit Sansthan, New Delhi in July 1987, and later joined the R.S. Vidyapeetha, Tirupati in 1991. He was elevated to the post of Reader in 1997, and as a Professor in Agama dept. from 2005 onwards. He was chairman of Board of Studies in Visistadvaita Vedanta, Agamas during the past ten years. He has successfully guided 10 Ph. D. students and has published extensively on various subjects of Sanskrit literature He is actively engaged in various Religious Programmes related to the TTD (Tirumala Tirupati Devasthanams) and is regularly invited to deliver religious discourses. He has so far published ten books and more than fifty Research Papers in reputed journals of Indology, and has attended nearly fifty national and international conferences and presented papers. He has participated several times the Ubhaya Vedanta Seminars and was honoured by Tridandi Chinna Srimannarayana Jeeyar Swamiji, Vijayawada and by Sri Rangaramanuja Jeeyar Swamiji of Kakinada.

Presently Prof. T.V. Raghavacharyulu is the Head, Dept. of Agama Studies, Rashtriya Sanskrit Vidyapeetha, Tirupati.